मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः । यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती ॥ ४ ॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ । शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः ॥ ५ ॥

मनु, अत्रि, विष्णु, हारीत, याज्ञवल्क्य, उशना, अङ्गिरा, यम, आपस्तम्ब, संवर्त, कात्यायन, बृहस्पति, पराशर, व्यास, शङ्ख, लिखित, दक्ष, गौतम, शातातप और वसिष्ठ, ये २० ऋषि धर्मशास्त्रके बनानेवाले हैं ❀ ॥ ४ ॥ ५ ॥

❀ पाराशरस्मृति--१ अध्यायके १२--१५ श्लोकमें इन २० धर्मशास्त्र बनानेवालोंमेंसे यम, बृहस्पति और व्यासका नाम नहींहै; इनके स्थानपर कश्यप, गर्ग और प्रचेतासका नाम है । २४--२५ श्लोकमें लिखा है कि सत्ययुगमें मनुके कहे धर्म, त्रेतामें गौतमके कहे धर्म, द्वापरमें शङ्ख और लिखितके कहे धर्म और कलियुगमें पराशरके कहेहुए धर्म मुख्य कहेगये हैं (यह वाक्य गौण प्रतीत होताहै कारण कि इसका प्रयोग बहुत न्यून है, और प्रधान २० स्मृतियोंमेंसे १९ स्मृतियोंमें तथा इनसे भिन्न जितनी स्मृतियां मुझको मिलीहैं उनमें किसी जगह नहीं लिखाहै कि किसी स्मृतीमें कहेहुए धर्म किसीएक युगकेलिये प्रधान हैं और थोड़ीसी बातोंको छोड़कर पाराशरस्मृतिकी सब बातें मनु, गौतम आदिकी स्मृतियोंमें भी लिखीहुई हैं) ।

देशे काल उपायेन द्रव्यं श्रद्धासमन्वितम्। पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम् ॥ ६ ॥
इज्याचारदमाहिंसा दानं स्वाध्यायकर्म च। अयन्तु परमो धर्मो यद्योगेनात्मदर्शनम् ॥ ८ ॥
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः। दानं दया दमः क्षान्तिः सर्वेषां धर्मसाधनम् ॥१२२॥

जो द्रव्य पवित्र देश और पुण्यसमयमें शास्त्रोक्त विधिसे सत्पात्रको श्रद्धापूर्वक दियाजाताहै, वह और इसीप्रकारके यज्ञादिक कर्म धर्मके लक्षण हैं ॥ ६ ॥ यज्ञ, आचार, इन्द्रियोंका दमन, अहिंसा, दान और वेदाध्ययन, इन सबसे बड़ा धर्म योगद्वारा आत्माका दर्शन करना है ॥ ८ ॥ हिंसा नहीं करना, सत्य बोलना, चोरी नहीं करना, पवित्र रहना, इन्द्रियोंको वशमें रखना, दान देना, सबपर दया करना, मनका संयम रखना और क्षमा करना, ये ब्राह्मणसे चाण्डालतक सब मनुष्योंके धर्म साधन हैं* ॥ १२२ ॥

(१४) व्यासस्मृति–४ अध्याय।

अशाश्वतानि गात्राणि विभवो नैव शाश्वतः। नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसंग्रहः ॥ १९ ॥
प्राणनाशस्तु कर्तव्यो यः कृतार्थो न सो मृतः। अकृतार्थस्तु यो मृत्युं प्राप्तः खरसमो हि सः ॥ २५॥

शरीर और धन आदि विभव सदा नहीं रहता है और मृत्यु नित्य समीपमें रहती है, इसलिये धर्मका संग्रह करना उचित है ॥१९॥ एक दिन अवश्य मरना होगा; परन्तु कृतार्थ (धर्मिष्ठ) मनुष्य मरता नहीं अर्थात् उसका नाम जीता रहता है; जो अकृतार्थ (अधर्मी) मनुष्य मरता है वह गधेके समान है ॥ २५ ॥

(२०) वसिष्ठस्मृति–१ अध्याय।

ज्ञात्वा चानुतिष्ठन्धार्मिकः प्रशस्यतमो भवति लोके प्रेत्य च स्वर्गं लोकं समश्नुते ॥ २ ॥
श्रुतिस्मृतिविहितो धर्मः ॥ ३ ॥ तदलाभे शिष्टाचारः प्रमाणम् ॥ ४ ॥

जो मनुष्य जानकर धर्मका सेवन करता है वह इस लोकमें धर्मात्मा कहाता है और प्रशंसाके योग्य होता है और मरनेपर स्वर्गका सुख भोग करता है ॥ २ ॥ वेद और धर्मशास्त्रमें विधान कियेहुए कर्म धर्म कहलाते हैं ॥ ३ ॥ जिसका प्रमाण वेद तथा धर्मशास्त्रमें नहीं है उसके लिये शिष्ट लोगोंका आचार ही प्रमाण है @ ॥ ४ ॥

सृष्टिप्रकरण २.

(१) मनुस्मृति–१ अध्याय।

मनुमेकाग्रमासीनमभिगम्य महर्षयः। प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ॥ १ ॥
भगवन्सर्ववर्णानां यथावदनुपूर्वशः। अन्तरप्रभवाणां च धर्मान्नो वक्तुमर्हसि ॥ २ ॥
त्वमेको ह्यस्य सर्वस्य विधानस्य स्वयम्भुवः। अचिन्त्यस्याप्रमेयस्य कार्यतत्त्वार्थवित्प्रभो ॥ ३ ॥
स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः। प्रत्युवाचार्च्य तान्सर्वान्महर्षीञ्छ्रूयतामिति ॥ ४ ॥

भगवान् मनु एकाग्रचित्त होकर बैठेहुए थे। महर्षिगण उनके समीप जाकर यथायोग्य उनका पूजा करके बोले, हे भगवन्! चारों वर्ण तथा उनके पश्चात् उत्पन्न वर्णसङ्करजातियोंका धर्म वर्णन कीजिये; क्योंकि कर्मविधायक, अचिन्त्य, अपरिमेय, अपौरुषेय, समस्त वेदशास्त्रोंके कार्य, तत्त्व तथा अर्थज्ञानके जाननेवाले एकमात्र आपही हैं ॥ १–३ ॥ महान् ज्ञानशक्तिसम्पन्न भगवान् मनु ऋषियोंके इसभाँति पूछनेपर आदरपूर्वक उनसे कहनेलगे कि सुनिये! ॥ ४ ॥

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥ ५ ॥
ततः स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम्। महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥ ६ ॥
योसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः। सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ॥ ७ ॥

एकसमय यह संसार घोर-अंधकारसे छिपाहुआ, अप्रत्यक्ष, चिह्नरहित, अनुमान करनेके अयोग्य, अविज्ञात और घोर निद्रासे निद्रितके समान था ॥ ५ ॥ अप्रकट स्वयम्भू भगवान् अप्रतिहत सामर्थ्यवाले और प्रकृतिको प्रेरणा करनेवाले महाभूत आदि तत्त्वोंको प्रकट करतेहुए स्वयं प्रकट हुए ॥ ६ ॥ जो इन्द्रियोंके ज्ञानसे बाहर, सूक्ष्म, अव्यक्त, सनातन, सर्वभूतमय और अचिन्त्य हैं वही स्वयं प्रगट होते भये ॥ ७ ॥

---

*याज्ञवल्क्यस्मृति–३ अध्याय–६६ श्लोक। सत्य बोलना, चोरी न करना, क्रोध न करना, लज्जा, पवित्रता, बुद्धिमानी, धीरज, शान्ति, इन्द्रियोंको वशमें रखना और विद्याभ्यास ये सब धर्मके लक्षण कहे गये हैं।

@ मनुस्मृति–१२ अध्याय–१०९ श्लोक और बौधायनस्मृति—१ प्रश्न–१ अध्याय,–६ श्लोक। जो ब्राह्मण ब्रह्मचर्य आदि धर्मसे युक्त होकर और वेद, वेदाङ्ग, धर्मशास्त्र आदिके सहित वेद पढ़के वेदके अर्थका उपदेश करताहै उसको शिष्टब्राह्मण कहतेहैं। वसिष्ठस्मृति–६ अध्याय–४० श्लोक। जिस ब्राह्मणके घर कुलपरम्परासे वेद, वेदाङ्ग आदि पढ़के वेदका उपदेश करनेकी परिपाटी चलीआती हो, वह शिष्ट ब्राह्मण कहाता है।

सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु बीजमवासृजत् ॥ ८ ॥
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥ ९ ॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥ १० ॥
यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम् । तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते ॥ ११ ॥

उन्होंने अपनी देहसे विविधप्रकारकी प्रजाओंके रचनेकी इच्छा करके चिन्तामात्रसे ही प्रथम जलको उत्पन्न किया और उस जलमें अपना शक्तिरूप बीज स्थापन करदिया ॥ ८ ॥ वह बीज सुवर्णवर्ण सूर्यके समान प्रकाशयुक्त एक अण्डा बनगया, उस अण्डेमें वह (परमात्मा) स्वयं सब लोकोंके पितामह ब्रह्मा बनकर उत्पन्नहुए ॥ ९ ॥ नर अर्थात् परमात्मासे उत्पन्न होनेके कारण जलको नारा कहतेहैं और उस जलमें परमात्माका प्रथम निवासस्थान होनेसे वे नारायण कहेजातेहैं ॥ १० ॥ जो आदि-कारण, अव्यक्त, नित्य और सदसदात्मक हैं, उनसे जो पुरुष प्रथम उत्पन्न हुआ लोकमें वह ब्रह्मा कहलाताहै ॥ ११ ॥

तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम् । स्वयमेवात्मनो ध्यानात्तदण्डमकरोद् द्विधा ॥ १२ ॥
ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे । मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतम् १३
उद्बबर्हात्मनश्चैव मनः सदसदात्मकम् । मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम् ॥ १४ ॥
महान्तमेव चात्मानं सर्वाणि त्रिगुणानि च । विषयाणां गृहीतॄणि शनैः पञ्चेन्द्रियाणि च ॥ १५ ॥

भगवान् ब्रह्माने उस अण्डेमें एक वर्षतक वास करके आत्मगत-ध्यानके सहारे अण्डेको २ खण्ड किया ॥ १२ ॥ उन्होंने दोनों खण्डोंमेंसे ऊपरवाले खण्डमें स्वर्गलोक, नीचेके खण्डमें पृथिवी और दोनोंके बीचमें आकाश, आठों दिशा और चिरस्थायी समुद्रको बनाया ॥ १३ ॥ परमात्मास्वरूप सदसदात्मक मनको उत्पन्न किया; मनसे मैं ईश्वर हूँ ऐसा अभिमान करनेवाला अहङ्कार उत्पन्न हुआ ॥ १४ ॥ उन्होंने अहङ्कारसे मायासहित महत्तत्त्व उत्पन्न किया और सत्त्व, रज और तम, इन ३ गुणोंसे युक्त और शब्द, स्पर्श, रूप, रस तथा गन्धकी ग्रहणकरनेवाली श्रोत्रआदि ५ इन्द्रियोंको धीरे धीरे रचा ॥ १५ ॥

तेषान्त्ववयवान्सूक्ष्मान् षण्णामप्यमितौजसाम् । सन्निवेश्यात्ममात्रासु सर्वभूतानि निर्ममे ॥ १६ ॥
सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक् । वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥ २१ ॥
कर्मात्मनां च देवानां सोऽसृजत्प्राणिनाम्प्रभुः । साध्यानां च गणं सूक्ष्मं यज्ञं चैव सनातनम् ॥ २२ ॥
अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् । दुदोह यज्ञसिध्यर्थमृग्यजुःसामलक्षणम् ॥ २३ ॥
कालं कालविभक्तीश्च नक्षत्राणि ग्रहांस्तथा । सरितः सागराञ्शैलान्समानि विषमाणि च ॥ २४ ॥
तपो वाचं रतिं चैव कामं च क्रोधमेव च । सृष्टिं ससर्ज चैवेमां स्रष्टुमिच्छन्निमाः प्रजाः ॥ २५ ॥
कर्मणां च विवेकार्थं धर्माधर्मौ व्यवेचयत् । द्वन्द्वैरयोजयच्चेमाः सुखदुःखादिभिः प्रजाः ॥ २६ ॥
लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः । ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्त्तयत् ॥ ३१ ॥

उनमेंसे अनन्तकार्यकी शक्ति रखनेवाले अहङ्कार और पञ्चतन्मात्र,—इन ६ के सूक्ष्मसे सूक्ष्मः शरीरको अपने विकार इन्द्रिय और पञ्चभूतसे जोड़कर मनुष्य, पशु, आदि सबजीवोंको बनाया ॥ १६ ॥ वेदकी विधिसे सबका अलग अलग नाम कर्म और वृत्तिविभाग करदिया ॥ २१ ॥ उस प्रभुने कर्माङ्गभूत देवताओं, प्राणधारी, साध्यनामक सूक्ष्म देवताओं और सनातन यज्ञोंको बनाया ॥ २२ ॥ अग्नि, वायु और सूर्यसे यज्ञकार्यके लिये क्रमसे ऋक्, यजुः और साम, इन तीन सनातन वेदोंको प्रकट किया ॥ २३ ॥ काल, कालका विशेषविभाग (मास, ऋतु, अयन आदि), नक्षत्र, ग्रह, नदी, समुद्र, पर्वत, सम विषम भूमि, तपस्या, वाक्य, चित्तका परितोष, काम और क्रोध; इन सबको प्रजाकी सृष्टिकी अभिलाषासे उत्पन्न किया ॥ २४ ॥ २५ ॥ कर्मोंके जाननेके लिये धर्म और अधर्मका विभाग किया और धर्म अधर्मके फल सुखदुःखोंसे प्रजाओंको युक्त करदिया ॥ २६ ॥ लोकोंकी वृद्धिके लिये अपने मुखसे ब्राह्मणको, बाहुसे क्षत्रियको, ऊरुसे वैश्यको और पदसे शूद्रको उत्पन्न किया ॥ ३१ ॥

द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् । अर्द्धेन नारी तस्यां स विराजमसृजत्प्रभुः ॥ ३२ ॥
तपस्तप्त्वाऽसृजद्यं तु स स्वयं पुरुषो विराट् । तं मां वित्तास्य सर्वस्य स्रष्टारं द्विजसत्तमाः ॥ ३३ ॥

ब्रह्माने अपनी देहको दो भाग करके आधेसे पुरुष और आधेसे स्त्री बनाई और उस नारीके गर्भसे विराट्को उत्पन्न किया ॥ ३२ ॥ हे द्विजोत्तमगण ! विराट्पुरुषने तपस्या करके स्वयं जिस पुरुषको उत्पन्न किया मैं वही मनु हूँ; मुझे इस समुदायका सृष्टिकर्त्ता जानो ॥ ३३ ॥

अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम् । पतीन्प्रजानामसृजं महर्षीनादितो दश ॥ ३४ ॥
मरीचिमत्र्यङ्गिरसौ पुलस्त्यम्पुलहं क्रतुम् । प्रचेतसं वसिष्ठञ्च भृगुन्नारदमेव च ॥ ३५ ॥
एते मनूंस्तु सप्तान्यानसृजन्भूरितेजसः । देवान्देवनिकायांश्च महर्षींश्चामितौजसः ॥ ३६ ॥
यक्षरक्षःपिशाचांश्च गन्धर्वाऽप्सरसोऽसुरान् । नागान् सर्पान् सुपर्णांश्च पितॄणां च पृथग्गणान् ॥३७॥
विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च । उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च ॥ ३८ ॥
किन्नरान्वानरान्मत्स्यान्विविधांश्च विहंगमान् । पशून्मृगान्मनुष्यांश्च व्यालांश्चोभयतो दतः ॥३९॥
कृमिकीटपतङ्गांश्च यूकामक्षिकमत्कुणम् । सर्वं च दंशमशकं स्थावरं च पृथग्विधम् ॥ ४० ॥

मैंने प्रजाकी सृष्टि करनेकी इच्छासे कठिन तपस्या करके प्रथम मरीचि, अत्रि, अङ्गिरा, पुलस्त्य, पुलह, क्रतु, प्रचेता, वसिष्ठ, भृगु और नारद, इन १० महर्षियोंकी सृष्टि की ॥ ३४–३५ ॥ इन्होंने महातेजस्वी अन्य ७ मनुओंको तथा देवताओं, उनके निवासस्थान, तेजस्वी महर्षिगण, यक्ष, राक्षस, पिशाच, गन्धर्व, अप्सरा, असुर, नाग, सर्प, गरुड़, पृथक्पृथक्–पितरगण, बिजली, वज्र, मेघ, ज्योति, इन्द्र–धनुष, उल्का धूमकेतु, अनेक प्रकारके ज्योतिर्मय-पदार्थ, किन्नर, वानर, मत्स्य, विविधप्रकारके–पक्षी, पशु, मृग, मनुष्य, दोनों ओर–दांत- वाले–जन्तु, कीड़े, कीट, पतंग, ढील, खटमल, मक्खी, मच्छड़, दंश और वृक्ष, लता आदि स्थावरोंको पृथक् पृथक् उत्पन्न किया ॥ ३६–४० ॥

पशवश्च मृगाश्चैव व्यालाश्चोभयतो दतः । रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः ॥ ४३ ॥
अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः । यानि चैवं प्रकाराणि स्थलजान्यौदकानि च ४४
स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम् । ऊष्मणश्चोपजायन्ते यच्चान्यत्किञ्चिदीदृशम् ॥ ४५ ॥
उद्भिज्जास्स्थावरास्सर्वे वीजकाण्डप्ररोहिणः । ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः ॥ ४६ ॥
अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः । पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ॥ ४७ ॥

जीवोंमें पशु, मृग, हिंसक जन्तु, दोनों ओर–दांतवाले जीव, राक्षस, पिशाच और मनुष्य जरायुज (पिण्डज) हैं ॥ ४३ ॥ पक्षी, सर्प, घड़ियाल, मछली, कछुए और इसी प्रकारके स्थलमें तथा जलमें रहने- वाले, अन्य जीव अण्डज होते हैं ॥ ४४ ॥ दंश, मच्छड़, यूक, मक्खी और खटमल स्वेदज (पसीनेसे उत्पन्न होनेवाले) हैं; इसी प्रकारके चींटी आदि जीव भी गरमीके बाफसे उत्पन्न होते हैं ॥ ४५ ॥ वृक्ष आदि स्थावर उद्भिज्ज (भूमिसे निकलनेवाले) हैं,–इनमें बहुत तो बीजसे और बहुत रोपीहुई शाखासे उत्पन्न होते हैं। धान, गेहूं, आदि जो बहुतसे फल फूलोंसे युक्त होते हैं और फलके पकनेपर सूखजाते हैं उनको औषधी कहते हैं ॥ ४६ ॥ जो विनाफूल लगेही फलते हैं, (वट, पीपर, पाकडि आदि) वे वनस्पति कहलाते हैं और जिनमें फूल और फल दोनों होते हैं, वे वृक्ष कहे जाते हैं ॥ ४७ ॥

गुच्छगुल्मं तु विविधं तथैव तृणजातयः । वीजकाण्डरुहाण्येव प्रताना वल्ल्य एव च ॥ ४८ ॥
तमसा बहुरूपेण वेष्टिताः कर्महेतुना । अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः ॥ ४९ ॥
एतदन्तास्तु गतयो ब्रह्माद्याः समुदाहृताः । घोरेऽस्मिन् भूतसंसारे नित्यं सततयायिनि ॥ ५० ॥

गुच्छ (बेला, चमेली आदि जिनमें जड़से ही लताओंका समूह निकलता है) गुल्म (ऊख, सरपता आदि जिसके एकजड़से बहुतजड़ होजाते हैं), तृण (घास आदि) प्रतान (कुह्मडा, लौका आदि) और वल्ली (गुरच आदि) अनेक प्रकारके हैं इनमेंसे कोई बीजसे और कोई शाखासे उत्पन्न होते हैं ॥ ४८ ॥ ये सब स्थावर जीव अनेक प्रकारके असत्कर्मके फलसे तमोगुणसे परिपूर्ण हैं, इनमें चेतना शक्ति है और इनको सुखदुःख होता है ॥ ४९ ॥ जिस प्रकारसे यह नित्य विनाशशील जन्म और मरणयुक्त संसारमें ब्रह्मासे लेकर स्थावर तक जीवोंकी उत्पत्ति हुई है वह सब कही गई ॥ ५० ॥

एवं सर्वं स सृष्ट्वेदं मां चाचिन्त्यपराक्रमः । आत्मन्यन्तर्दधे भूयः कालं कालेन पीडयन् ॥ ५१ ॥
यदा स देवो जागर्ति तदेदं चेष्टते जगत् । यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥ ५२ ॥
तस्मिन् स्वपिति तु स्वस्थे कर्मात्मानः शरीरिणः । स्वकर्म्मभ्यो निवर्तन्ते मनश्च ग्लानिमृच्छति ५३
युगपत्तु प्रलीयन्ते यदा तस्मिन् महात्मनि । तदाऽयं सर्वभूतात्मा सुखं स्वपिति निर्वृतः ॥ ५४ ॥
तमोऽयं तु समाश्रित्य चिरं तिष्ठति सेन्द्रियः । न च स्वं कुरुते कर्म तदोत्क्रामति मूर्तितः ॥ ५५ ॥
यदाऽणुमात्रिको भूत्वा वीजं स्थास्नु चरिष्णु च । समाविशति संसृष्टस्तदा मूर्तिं विमुञ्चति ॥ ५६ ॥
एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरम् । संजीवयति चाजस्रं प्रमापयति चाव्ययः ॥ ५७ ॥

मनु कहते हैं कि अचिन्त्य पराक्रमी भगवान् इस प्रकारसे सब जगत्को और मुझको रचते हैं और प्रलय-कालमें सृष्टिका विनाश करतेहुए फिर आपही अपनेमें लीन होजाते हैं ॥ ५१ ॥ जब वह देव जागते हैं तब जगत् चेष्टायुक्त होता है और जब सोते हैं तब यह जगत् लीन होजाता है ॥ ५२ ॥ उनके इच्छा-रहित होनेपर कर्मानुसार देह धारण करनेवाले प्राणी देह धारण करना आदि कर्मोंसे निवृत्त होजाते हैं और उनका मन भी सब इन्द्रियोंके सहित अपनी वृत्तिसे रहित होजाता है ॥ ५३ ॥ जब संपूर्ण जगत् उस महात्मामें लीन होजाता है तब वह सर्वभूतात्मा निश्चिन्त भावसे मानो परमसुखसे सोते हैं ॥ ५४ ॥ जब यह जीव अज्ञात-अवस्थामें इन्द्रियोंके सहित बहुत समयतक रहता है, श्वास प्रश्वास आदि कर्मोंको नहीं कर सकता, तब प्रथमके शरीरसे निकलजाता है ॥ ५५ ॥ जब यह अणुमात्रिक बीज होकर स्थावर अथवा जङ्गमबीजमें प्रवेश करता है तब शरीर धारण करता है ॥ ५६ ॥ इसी प्रकारसे अविनाशी पुरुष अपनी जाग्रत् और स्वप्न अवस्थाके सहारेसे चराचर जगत्की सृष्टि और संहार करते हैं ॥ ५७ ॥

इदं शास्त्रं तु कृत्वाऽसौ मामेव स्वयमादितः । विधिवद्ग्राहयामास मरीच्यादींस्त्वहं मुनीन् ॥ ५८॥
एतद्वोऽयं भृगुः शास्त्रं श्रावयिष्यत्यशेषतः । एतद्धि मत्तोऽधिजगे सर्वमेषोऽखिलं मुनिः ॥ ५९ ॥

भगवान् मनुने ऋषियोंसे कहा कि ब्रह्माने सृष्टिकी आदिमें इस धर्मशास्त्रको मुझे पढाया, मैंने मरीचि आदि ऋषियोंको पढाया है, महर्षि भृगुने यह सम्पूर्ण शास्त्र भलीभांति मुझसे पढाहै, यही तुमलोगोंको आदिसे अन्ततक सुनावेगा ॥ ५८-५९ ॥

ततस्तथा स तेनोक्तो महर्षिर्मनुना भृगुः । तानब्रवीदृषीन्सर्वान्प्रीतात्मा श्रूयतामिति ॥ ६० ॥
स्वायम्भुवस्यास्य मनोः षड्वंश्या मनवोऽपरे । सृष्टवन्तः प्रजाः स्वाः स्वा महात्मानो महौजसः॥६१॥
स्वारोचिषश्चोत्तमश्च तामसो रैवत स्तथा । चाक्षुषश्च महातेजा विवस्वत्सुत एव च ॥ ६२ ॥
स्वायम्भुवाद्याः सप्तैते मनवो भूरितेजसः । स्वेस्वेऽन्तरे सर्वमिदमुत्पाद्यापुश्चराचरम् ॥ ६३ ॥

भगवान् मनुके ऐसे वचन सुनकर महर्षि भृगु प्रसन्नचित्त होकर ऋषियोंसे कहनेलगे कि तुम लोग मुझसे सुनो ! ॥ ६० ॥ इस स्वायम्भुवमनुके वंशमें महात्मा और बडे पराक्रमी ६ मनु हुएथे, उन्होंने प्रजा उत्पन्न करके निजवंशको बढायाथा ॥ ६१ ॥ स्वारोचिष, उत्तम, तामस, रैवत, चाक्षुष और महा तेजस्वी वैवस्वत, यही ६ मनु हैं ॥ ६२ ॥ महातेजस्वी स्वायम्भुवआदि सातों मनुओंने अपने अपने अधिकारके समय चराचर जीवोंको उत्पन्न करके पालन किया ॥ ६३ ॥

निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला । त्रिंशत्कला मुहूर्त्तः स्यादहोरात्रन्तु तावतः ॥६४॥
अहोरात्रे विभजते सूर्यो मानुषदैविके । रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः ॥ ६५ ॥
पित्र्ये राञ्यहनी मासः प्रविभागस्तु पक्षयोः । कर्मचेष्टास्वहः कृष्णः शुक्लः स्वप्नाय शर्वरी ॥ ६६ ॥
दैवे राञ्यहनी वर्षं प्रविभागस्तयोः पुनः । अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम् ॥ ६७ ॥

१८ पलकी १ काष्ठा, ३० काष्ठाकी १ कला, ३० कलाका १ मुहूर्त और ३० मुहूर्तकी एक दिन-रात्रि होतीहै ॥ ६४ ॥ मनुष्य और देवताओंका दिनरातका विभाग सूर्य करते हैं, इनमेंसे रात्रि जीवोंके सोनेके लिये और दिन काम करनेकेलिये है ॥ ६५ ॥ मनुष्योंके एकमहीनेका पितरोंका रातदिन होता है, उसमेंसे काम करनेके लिये कृष्णपक्ष उनका दिन और सोनेके लिये शुक्लपक्ष उनकी रात है ॥ ६६ ॥ मनुष्योंके एकवर्षका देवताओंका एक रातदिन होता है उत्तरायण उनका दिन और दक्षिणायन उनकी रात है ॥ ६७ ॥

ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः । एकैकशो युगानान्तु क्रमशस्तन्निबोधत ॥ ६८ ॥
चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् । तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ६९
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु । एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥ ७० ॥
तदेतत्परिसंख्यातमादावेव चतुर्युगम् । एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥ ७१ ॥
दैविकानां युगानान्तु सहस्रं परिसंख्यया ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च ॥ ७२ ॥
तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुद्ध्यते । प्रतिबुद्धश्च सृजति मनः सदसदात्मकम् ॥ ७४ ॥
यत्प्राग् द्वादशसाहस्रमुदितं दैविकं युगम् । तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते ॥ ७९ ॥
मन्वन्तराण्यसंख्यानि सर्गः संहार एव च । क्रीडन्निवैतत्कुरुते परमेष्ठी पुनःपुनः ॥ ८० ॥
अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः । कृतत्रेतादिषु ह्येषामायुर्ह्रसति पादशः ॥ ८३ ॥

ब्रह्माके दिनरातका प्रमाण सत्ययुग आदिके क्रमसे है, उसको संक्षेपसे सुनो ! ॥ ६८ ॥ दैववर्ष परिमाणसे ४००० वर्षका सतयुग होता है, उस युगके पहिले ४०० वर्षकी सन्ध्या और अन्तमें ४०० वर्षका

सन्धांश होता है ॥ ६९ ॥ ३००० वर्षका त्रेता, ३०० वर्ष उसकी सन्ध्या और ३०० वर्ष उसका सन्धांश २००० वर्षका द्वापर, २०० वर्ष उसकी सन्ध्या और २०० वर्ष उसका सन्ध्यांश और १००० वर्षका कलियुग, १०० वर्ष उसकी सन्ध्या और १०० वर्ष उसका सन्ध्यांश होताहै ॥ ७० ॥ दैववर्षके परिमाणसे १२००० वर्षमें चारोयुग बीततेहैं, जो देवताओंका एकयुग होताहै ॥ ७१ ॥ इसीभांति देवताओंके १००० युगमें ब्रह्माका एकदिन होताहै और देवताओंके १००० युगकी उनकी रात होतीहै ॥ ७२ ॥ पूर्वोक्त रात बीतनेपर ब्रह्मा जागतेहैं और सावधान होतेही सदसदात्मक मनको सृष्टिके काममें लगातेहैं ॥ ७४ ॥ पहिले कहागया है कि देववर्षके परिमाणसे १२००० वर्षमें देवताओंका एक युग होताहै; उसके ७१ गुणा करनेसे अर्थात् ७१ चतुर्युगी बीतनेपर एक मन्वन्तर व्यतीत होताहै ॥ ७९ ॥ इसीप्रकारसे असंख्य मन्वन्तर आते जाते हैं तथा अनेकवार जगत्की उत्पत्ति और प्रलय होतीहै; पितामह मानो खेल करतेहुए इन कार्योंको करतेहैं ॥ ८० ॥ सत्ययुगमें मनुष्य रोगरहित, सिद्धकाम और ४०० वर्षकी आयुवाले होतेहैं; परन्तु त्रेता आदि तीनों युगोंमें उनकी आयुका परिमाण क्रमसे एक एक सौ वर्ष घटताहै अर्थात् त्रेतामें ३०० वर्ष, द्वापरमें २०० वर्ष और कलियुगमें १०० वर्षकी आयुवाले मनुष्य होते हैं ॥ ८३ ॥

देशप्रकरण ३.

पवित्रदेश १.

(१) मनुस्मृति-२ अध्याय।

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥ १७ ॥
तस्मिन् देशे य आचारः पारम्पर्यक्रमागतः। वर्णानां सान्तरालानां स सदाचार उच्यते ॥ १८ ॥
कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः। एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः ॥ १९ ॥
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वंस्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥ २० ॥
हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि। प्रत्यगेव प्रयागाच्च मध्यप्रदेशः प्रकीर्त्तितः ॥ २१ ॥

सरस्वती और दृषद्वती, इन दोनों देवनदियोंके बीचके देवनिर्मितदेशको ब्रह्मावर्त्त देश कहते हैं ॥ १७ ॥ इस देशमें चारों वर्ण और वर्णसङ्कर-जातियोंके बीच जो परम्परा क्रमसे आचार चले आते हैं उन्हें सदाचार कहते हैं ॥ १८ ॥ कुरुक्षेत्र, मत्स्यदेश, (जयपुर आदि) पाञ्चालदेश (कन्नौज आदि) और शूरसेनदेश (व्रजभूमि) को, जो ब्रह्मावर्तसे कुछ न्यून हैं, ब्रह्मर्षिदेश कहते हैं ॥ १९ ॥ इन देशोंमें उत्पन्न ब्राह्मणोंसे पृथिवीके सब मनुष्योंको अपना अपना आचार सीखना चाहिये ॥ २० ॥ हिमालयसे दक्षिण, विन्ध्यगिरिसे उत्तर, विनशनसे ॐ पूर्व और प्रयागसे पश्चिमका देश मध्यदेश कहा जाता है ✣ ॥ २१ ॥

आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्। तयोरेवान्तरं गिर्योरार्यावर्त्तं विदुर्बुधाः ॥ २२ ॥
कृष्णसारस्तु चरति मृगो यत्र स्वभावतः। स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः ॥ २३ ॥
एतान् द्विजातयो देशान्संश्रयेरन्प्रयत्नतः। शूद्रस्तु यस्मिन्कस्मिन्वा निवसेद्वृत्तिकर्शितः ॥ २४ ॥

पूर्वके समुद्रसे पश्चिमके समुद्रतक, हिमालय-पर्वतसे दक्षिण और विन्ध्यगिरिसे उत्तरके देशको पण्डितलोग आर्यावर्तदेश कहतेहैं ◎ ॥ २२ ॥ जिन देशोंमें कालेमृग स्वभावसेही विचरते हैं, उन देशोंको

ॐ सरस्वतीनदीके गुप्त होनेके स्थानको विनशन कहते हैं। सरस्वतीनदी पञ्जाबके अम्बाला जिलेमें प्रकट हुई है, वह कई बार भूमिमें गुप्त प्रकटहोकर पटियालेके राज्यमें गागरा (दृषद्वती) नदीमें मिलगई है, पूर्वकालमें यह नदी राजपूतानेके मैदानके पार तक बहतीथी।

✣ वसिष्ठस्मृति-१ अध्याय-८ और ११ अङ्क और बौधायनस्मृति-१ प्रश्न-१ अध्यायके २७-२८ अङ्क। कोई आचार्य गङ्गा और यमुनाके बीचके देशको धर्म और आचारको विश्वासयोग्य कहतेहैं। बृहत्पाराशर-१ अध्याय-४२ श्लोक। हिमालय, विन्ध्याचल, विनशन और प्रयागके मध्यका देश पवित्र है, इससे इतर म्लेच्छदेश है।

◎ वसिष्ठस्मृति-१ अध्यायके ७-९ अङ्क। सरस्वतीनदीके गुप्तहोनेके स्थानसे पूर्व, कालकवनसे पश्चिम पारियात्र और विन्ध्य पर्वतसे उत्तर और हिमालयसे दक्षिणका देश आर्यावर्त कहाता है। उस देशमें जो जो धर्म और आचार हैं वे विश्वासयोग्य हैं। अन्य देशोंके धर्म उलटी कल्पनासे युक्त होनेके कारण विश्वासयोग्य नहीं हैं। बौधायनस्मृति-१ प्रश्न-१ अध्यायके २७ अङ्कमें भी ऐसा है किन्तु वहां विन्ध्यका नाम नहीं है॥

यज्ञ करनेयोग्य देश जानना चाहिये, इनसे अन्य देशोंको म्लेच्छदेश कहते हैं ॥ २३ ॥ द्विजातियोंको यत्न पूर्वक इन देशोंमें निवास करना चाहिये, शूद्रलोग अपनी जीविकाके लिये किसी देशमें निवास करसकते हैं ॥ २४ ॥

(१३क) बृहत्पाराशरीयधर्मशास्त्र-१अध्याय।

देशेष्वन्येषु या नद्यो धन्याः सागरगाः शुभाः। तीर्थानि यानि पुण्यानि मुनिभिः सेवतानि च॥४३॥
वसेयुस्तदुपान्तेषु शमिच्छंतो द्विजातयः। मुनिभिः सेवितत्वेन पुण्यदेशः प्रकीर्त्तितः॥ ४४ ॥

सुखको चाहनेवाले द्विजाति अन्यदेशमेंभी समुद्रमें जानेवाली पवित्र नदियां तथा मुनियोंसे सेवित पुण्य तीर्थोंके आसपास निवास करें, क्योंकि मुनियोंके रहनेसे वे देशभी पवित्र कहाते हैं ॥४३-४४॥

तीर्थ २.

(३) अत्रिस्मृति।

प्रतिनिधिं कुशमयं तीर्थवारिषु मज्जति। यमुद्दिश्य निमज्जेत अष्टभागं लभेत सः॥ ५० ॥
मातरं पितरं वापि भ्रातरं सुहृदं गुरुम्। यमुद्दिश्य निमज्जेत द्वादशांशफलं भवेत्॥ ५१ ॥

जब कोई किसीकी कुशाकी प्रतिमा लेजाकर तीर्थके जलमें प्रतिमावाले मनुष्यको फल मिलनेके उद्देशसे स्नान करताहै तब प्रतिमावाले मनुष्यको स्नानके फलका आठवां भाग प्राप्त होता है ॥ ५० ॥ जब कोई अपने पिता, माता, भाई, सुहृद् अथवा गुरुको फल मिलनेके उद्देशसे उनका नाम लेकर तीर्थके जलमें स्नान करता है तब पिता, माता आदिको स्नानके फलका बारहवां भाग मिलता है ॥ ५१ ॥

जायन्ते बहवः पुत्रा यद्येकोपि गयां व्रजेत्। यजते चाश्वमेधं च नीलं वा वृषमुत्सृजेत्॥ ५५ ॥
काङ्क्षन्ति पितरः सर्वे नरकान्तरभीरवः। गयां यास्यति यः पुत्रस्स नस्त्राता भविष्यति ॥ ५६॥
फल्गुतीर्थे नरः स्नात्वा दृष्ट्वा देवं गदाधरम्। गयाशीर्षं पदाक्रम्य मुच्यते ब्रह्महत्यया॥ ५७ ॥
महानदीमुपस्पृश्य तर्पयेत्पितृदेवताः। अक्षयाँल्लभते लोकान्कुलं चैव समुद्धरेत्॥ ५८ ॥

बहुतसे पुत्र उत्पन्न करना चाहिये; क्यों कि उनमेंसे कोई तो गया जायगा वा अश्वमेध यज्ञ करेगा अथवा नीलबैलसे वृषोत्सर्ग करैगा ॥ ५५ ॥ नरकोंसे डरतेहुए पितृगण ऐसी इच्छा करते हैं कि जो पुत्र गया जायगा वह हमारा रक्षक होगा॥ ५६ ॥ ® फल्गु-नदीमें स्नान और गदाधरदेवका दर्शन करनेसे तथा गयासुरके सिरपर चरण रखनेसे मनुष्यकी ब्रह्महत्या भी छूट जाती है॥ ५७ ॥ फल्गुमें स्नान करके पितरों और देवताओंके तर्पण करनेवाले मनुष्य अपने कुलका उद्धार करते हैं और मृत्यु होनेपर अक्षय लोकको जाते हैं॥ ५८ ॥

(६क) उशनस्स्मृति-३ अध्याय।

गयायामक्षयं श्राद्धं प्रयागे मरणादिषु। गायन्ति गाथां ते सर्वे कीर्तयन्ति मनीषिणः॥ १३० ॥

गयाका श्राद्ध अक्षय होता है और प्रयागमें मृत्यु होनेसे विद्वान् लोग मृतमनुष्यकी कीर्त्तिका गान करते हैं॥ १३० ॥

(१६) लिखितस्मृति।

गयाशिरे तु यत्किञ्चिन्नाम्ना पिण्डन्तु निर्वपेत्। नरकस्थो दिवं याति स्वर्गस्थो मोक्षमाप्नुयात्॥१२॥

जिसके नामसे (गयामें) गयासिरपर पिण्ड दिया जाता है, वह यदि नरकमें हो तो स्वर्गमें चला जाता है और स्वर्गमें हो तो मुक्त होजाता है॥ १२॥

---

* संवर्तस्मृति-४ श्लोक। जिनदेशोंमें सदा स्वभावसेही काले मृग विचरतेहैं, उन देशोंको धर्मदेश जानना, वही देश द्विजोंके धर्म साधनके योग्य हैं। व्यासस्मृति-१ अध्याय-३ श्लोक। जिन देशोंमें स्वभावसे ही सदा काले मृग विचरते हैं, वे देश वेदोक्त धर्मोंके अनुष्ठानके योग्य हैं। वसिष्ठस्मृति--१ अध्याय १३ अंक और१४ श्लोक और बौधायनस्मृति-१ प्रश्न-१ अध्यायके २९ अंक और ३० श्लोक। भाल्लवी शाखाध्यायी ऋषिलोग प्राचीन-गाथाका उदाहरण देते हैं। पश्चिमके सिन्धु और सूर्यके उदयाचलके-मध्यके जिन जिन स्थानोंमें काले मृग विचरते हैं उन देशोंमें ब्रह्मतेज वर्तमान है बृहत्पाराशरीय धर्म शास्त्र-१ अध्याय ४१ श्लोक। जिस देशमें काले मृग स्वभावसे ही विचरें उस देशमें द्विजातिको रहना चाहिये शूद्र जहां चाहे तहां रहे।

® बृहस्पतिस्मृति २०-२१ श्लोकमें भी ऐसा है।

(१३) पाराशरस्मृति–१२ अध्याय।

सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति। सेतुं दृष्ट्वा विशुद्धात्मा त्ववगाहेत सागरम् ॥ ६८ ॥

समुद्रके सेतुका दर्शन करके समुद्रमें स्नान करनेसे ब्रह्महत्याका पाप छूट जाता है॥ ॥ ६८ ॥

(१६) लिखितस्मृति।

वाराणस्यां प्रविष्टस्तु कदाचिन्निष्क्रमेद्यदि। हसन्ति तस्य भूतानि अन्योन्यं करताडनैः ॥ ११ ॥

जब कोई मनुष्य काशीमें जाकर उससे बाहर होने लगता है तब भूतगण ताली बजाकर उसको हंसते हैं अर्थात् काशी छोड़नेसे उसको मूर्ख समझकर ताली बजाते हैं तथा हंसते हैं ॥ ११ ॥

(२४) लघुआश्वलायनस्मृति–१ आचारप्रकरण।

यः कश्चिन्मानवो लोके वाराणस्यां त्यजेद्वपुः। स चाप्येको भवेन्मुक्तो नान्यथा मुनयो विदुः॥१८९॥

महर्षियोंने कहा है कि जो लोग मनुष्यलोकमें जन्म लेकर काशीमें शरीर–त्याग करते हैं वे मुक्त होजाते हैं ॥ १८९ ॥

(१४) व्यासस्मृति–४ अध्याय।

यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे। तत्फलं ऋषयः श्रेष्ठा विप्राणां पादशौचने ॥ १० ॥

इन्द्रियाणि वशीकृत्य गृह एव वसेन्नरः। तत्र तस्य कुरुक्षेत्रं नैमिषं पुष्कराणि च ॥ १३ ॥

गङ्गाद्वारं च केदारं सन्निहत्यं तथैव च। एतानि सर्वतीर्थानि कृत्वा पापैः प्रमुच्यते ॥ १४ ॥

कार्तिकमासमें (पुष्करतीर्थके) ज्येष्ठपुष्कर (सरोवर) में कपिला गौदान करनेसे जो फल मिलताहै ब्राह्मणके चरण धोनेसे वही फल प्राप्त होताहै ॥ १० ॥ जो मनुष्य अपनी इन्द्रियोंको वशमें करके गृहमें निवास करताहै उसको घरमें ही कुरुक्षेत्र, नैमिषारण्य, पुष्कर, हरिद्वार और केदारतीर्थ हैं; वह इन तीर्थोंको करके सब पापोंसे छूटताहै ॥ १३–१४ ॥

(१५) शङ्खस्मृति १४ अध्याय।

यद्ददाति गयास्थश्च प्रभासे पुष्करे तथा। प्रयागे नैमिषारण्ये सर्वमानन्त्यमश्नुते ॥ २७ ॥

गङ्गायमुनयोस्तीरे पयोष्ण्यमरकण्टके। नर्मदायां गयातीरे सर्वमानन्त्यमुच्यते ॥ २८ ॥

वाराणस्यां कुरुक्षेत्रे भृगुतुङ्गे महालये। सप्तवेण्यृषिकूपे च तदप्यक्षयमुच्यते ॥ २९ ॥

गया, प्रभास, पुष्कर, प्रयाग और नैमिषारण्य तीर्थमें; गङ्गा, यमुना और पयोष्णी नदीके तीरपर; अमरकण्टक तीर्थमें; नर्मदा और गयाके तीरपर; काशी, कुरुक्षेत्र, भृगुतुङ्ग और महालय तीर्थमें और सप्तवेणी तथा ऋषिकूपके निकट पितरोंके निमित्त जो कुछ दिया जाताहै उसका फल अक्षय होताहै ॥ २७—२९ ॥

अपवित्रदेश ३.

(१) मनुस्मृति–१० अध्याय।

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः। वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥ ४३ ॥

पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजयवनाः शकाः। पारदा पह्लवाश्चीनाः किराता दरदाः खशाः ॥४४॥

पौंड्रक, ओड्र, द्रविड, काम्बोज, यवन, शक, पारद, पह्लव, चीन, किरात, दरद और खश देशके रहनेवाले क्षत्रिय यज्ञोपवीत आदि क्रियाओंके लोप होनेसे और उन देशोंमें ब्राह्मणके न रहनेके कारण धीरे-धीरे लोकमें शूद्र होगयेहैं ॥ ४३–४४ ॥

(४ क) बृहद्विष्णुस्मृति–७१ अध्याय।

न शूद्रराज्ये निवसेत् ॥ ६४ ॥ नाधार्मिकजनाकीर्णे ॥ ६५ ॥

(४) शूद्रके राज्यमें अथवा अधर्मियोंसे पूर्ण देशमें निवास नहीं करे ⊛ ॥ ६४–६५ ॥

॥ इसी स्मृतिके ६२ श्लोकसे ७२ श्लोकतक इस यात्राकी विधि लिखी हुई है; प्रायश्चित्तके प्रकरणमें देखिये।

⊛ मनुस्मृति–४ अध्याय-६० और ६१ श्लोक। अधर्मियोंके गांव या बहुव्याधियुक्तगांव, शूद्रके राज्य, अधर्मियोंके देश तथा पाखण्डियोंके वशवर्त्ती देश अथवा अन्त्यजातियोंसे उपद्रवयुक्त देशमें (स्नातकब्राह्मण) निवास नहीं करे।

८४ अध्याय ।

न म्लेच्छविषये श्राद्धं कुर्यात् ॥ १ ॥ न गच्छेन्म्लेच्छविषयम् ॥ २ ॥
चातुर्वर्ण्यव्यवस्थानं यस्मिन्देशे न विद्यते । स म्लेच्छदेशो विज्ञेय आर्यावर्त्तस्ततः परः ॥ ४ ॥

म्लेच्छकी भूमिमें श्राद्ध नहीं करना चाहिये और म्लेच्छके राज्यमें नहीं जाना चाहिये※ ॥ १-२ ॥ जिन देशोंमें चारों वर्णोंकी व्यवस्था नहीं है उनको म्लेच्छदेश कहते हैं; उनसे अतिरिक्त देश आर्यावर्त्त है ॥ ४ ॥

(२२) देवलस्मृति ।

त्रिशङ्कुं वर्जयेद्देशं सर्वं द्वादशयोजनम् । उत्तरेण महानद्या दक्षिणेन तु कीकटम् ॥ ४ ॥
प्रायश्चित्तं प्रवक्ष्यामि विस्तरेण महर्षयः ॥ ५ ॥
सिन्धुसौवीरसौराष्ट्रं तथा प्रत्यन्तवासिनः । कलिङ्गकौङ्कणान्वङ्गान्गत्वा संस्कारमर्हति ॥ १६ ॥

महर्षि देवलने कहा कि महानदीसे उत्तर और कीकट※※ (देश) से दक्षिण १२ योजन त्रिशंकुनामक देश है, उसको छोड़कर (अन्य देशोंके मनुष्योंका) प्रायश्चित्त विस्तारसे कहूँगा ॥४-५॥ सिन्धु, सौवीर और सौराष्ट्र देशके तथा इनके निकटके निवासी कालिङ्ग (उड़ीसा), कौङ्कण (कोङ्कण) और बङ्गालमें जानेपर पुनः संस्कारके योग्य होतेहैं ॥ १६ ॥

(२५) बौधायनस्मृति-१प्रश्न-१ अध्याय ।

अवन्तयोऽङ्गमगधाः सुराष्ट्रा दक्षिणापथाः । उपावृत्सिन्धुसौवीरा एते सङ्कीर्णयोनयः ॥ ३१ ॥
आरट्टान्कारस्करान्पुण्ड्रान्सौवीरान्वङ्गकलिङ्गान्प्रानूनानिति च गत्वा पुनस्तोमेन यजेत सर्वपृष्ठया वा ॥३२॥ अथाप्युदाहरन्ति ॥३३॥ पद्भ्यां स कुरुते पापं यः कलिङ्गान् प्रपद्यते॥ ऋषयो निष्कृतिं तस्य प्राहुर्वैश्वानरं हविः ॥ ३४ ॥

अवन्त, अङ्ग, मगध, सौराष्ट्र, दक्षिणापथ, उपावृत्, सिन्धु और सौवीर देश, यह सब सङ्कीर्ण योनि हैं ॥ ३१ ॥ आरट्ट, कारस्कर, पुण्ड्र, सौवीर, बङ्ग, कलिङ्ग और प्रानूनान देशमें जानेवालोंको अपनी शुद्धिकेलिये पुनस्तोमेन अथवा सर्वपृष्ठया मन्त्रसे यज्ञ करना चाहिये ॥ ३२ ॥ जैसाकि उदाहरण देते हैं ॥ ३३ ॥कलिङ्ग अर्थात् उड़ीसा देशमें जानेवाला दोनों पावोंसे पाप करताहै; महर्षियोंने उसकी शुद्धिके लिये वैश्वानरेष्टी यज्ञ कहाहै ॥ ३४ ॥

ब्राह्मणप्रकरण-४.

ब्राह्मणका महत्त्व-१.

(१) मनुस्मृति-१ अध्याय ।

उत्तमाङ्गोद्भवाज्ज्यैष्ठ्याद् ब्रह्मणश्चैव धारणात् । सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ॥ ९३॥
तं हि स्वयम्भूः स्वादास्यात्तपस्तप्त्वादितोऽसृजत् । हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये ॥९४॥
यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः । कव्यानि चैव पितरः किम्भूतमधिकं ततः ॥९५॥
भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः । बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः॥९६॥
ब्राह्मणेषु तु विद्वांसो विद्वत्सु कृतबुद्धयः । कृतबुद्धिषु कर्त्तारः कर्तृषु ब्रह्मवेदिनः ॥ ९७ ॥

ब्राह्मण ब्रह्माके मुखसे जन्म लेनेसे, सब वर्णोंसे पहिले उत्पन्न होनेसे, वेदके धारण करनेसे और जगत्को धर्मकी शिक्षा देनेसे सबका प्रभु है ॥९३॥ ब्रह्माने देव और पितरोंको हव्य कव्य पहुंचानेके लिये और जगत्की रक्षाके निमित्त तप करके अपने मुखसे ब्राह्मणको उत्पन्न किया ॥ ९४ ॥ जिन ब्राह्मणोंके मुखद्वारा स्वर्गवासी देवगण हव्य और पितरगण कव्यको सदा भोजन करते हैं उनसे अधिक श्रेष्ठ कौन होसकता है※※※ ॥ ९५ ॥ उत्पन्न हुए पदार्थोंमें प्राणधारी, प्राणधारियोंमें बुद्धिवाले जीव, बुद्धिवालोंमें मनुष्य, सब मनु-

---

※ शङ्खस्मृति-१४ अध्यायके ३० श्लोकमें ऐसा ही है।

※※ कीकटदेशमें गया, राजगृह आदि हैं।

※※※ व्यासस्मृति-४ अध्यायका ५४ श्लोक इस ९५ श्लोकके समान है।

ष्योंमें ब्राह्मण ब्राह्मणोंमें विद्वान्, विद्वानोंमें कृतबुद्धि, कृतबुद्धिवालोंमें कर्तव्यकार्य्य-करनेवाले और कर्तव्यकार्य-करनेवालोंमें ब्रह्मज्ञानी श्रेष्ठ हैं ॥ ९६-९७ ॥✽

९ अध्याय।

यैः कृतः सर्वभक्ष्योऽग्निरपेयश्च महोदधिः। क्षयी चाप्यायितः सोमः को न नश्येत्प्रकोप्य तान्॥३१४॥
लोकानन्यान्सृजेयुर्ये लोकपालांश्च कोपिताः। देवान्कुर्युरदेवांश्च कः क्षिण्वंस्तान्समृध्नुयात् ॥३१५॥
यानुपाश्रित्य तिष्ठन्ति लोका देवाश्च सर्वदा। ब्रह्म चैव धनं येषां को हिंस्यात्ताञ्जिजीविषुः ॥३१६॥
अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत्। प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ॥ ३१७ ॥
श्मशानेष्वपि तेजस्वी पावको नैव दुष्यति। हूयमानश्च यज्ञेषु भूय एवाभिवर्धते ॥ ३१८ ॥
एवं यद्यप्यनिष्टेषु वर्तन्ते सर्वकर्मसु। सर्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत् ॥ ३१९ ॥

जिन ब्राह्मणोंके कोपसे अग्नि सर्वभक्षी हुआ, समुद्रका जल खारा होगया और चन्द्रमा क्षयीरोगयुक्त होकर फिर अच्छा हुआ उनको क्रोधित करके कौन नष्ट नहीं होगा ॥ ३१४ ॥ जो ब्राह्मण स्वर्गादि-लोक और लोकपालोंकी सृष्टि करसकते हैं और क्रोध करके देवताओंको अदेवता बना सकते हैं, कौन पुरुष उनको पीड़ा देकर अपनी वृद्धि करसकता है ॥ ३१५ ॥ जिनके आश्रय अर्थात् यज्ञादि करानेसे लोक और देवगण सदा स्थित हैं और ब्रह्म ही जिनका धन है उनकी हिंसा करके कौन जीवित रहैगा ॥३१६॥ जैसे संस्कार युक्त अथवा संस्काररहित अग्नि महान् देवता है वैसे विद्वान् होवे चाहे अविद्वान् होवे ब्राह्मण महान् देवता है अर्थात् ब्राह्मणत्व युक्त अविद्वान् ब्राह्मण भी पूजने योग्य है ॥ ३१७ ॥ जैसे महातेजस्वी अग्नि श्मशानमें रहनेपर भी दूषित नहीं होता; यज्ञमें होम होनेपर वृद्धिको प्राप्त होता है, वैसे कुत्सितकर्मोंसे प्रवृत्त होनेपर भी ब्राह्मण पूज्य है; क्यों कि वह महान् देवता है ॥ ३१८-३१९ ॥

(२) याज्ञवल्क्यस्मृति-१अध्याय।

अग्नेः सकाशाद्विप्राग्नौ हुतं श्रेष्ठमिहोच्यते ॥ ३१६ ॥

अग्निमें हवन करनेकी अपेक्षा ब्राह्मणरूपी अग्निमें हवन करना श्रेष्ठ है ॥ ३१६ ॥

(३) अत्रिस्मृति।

त्रयो लोकास्त्रयो वेदाआश्रमाश्च त्रयोऽग्नयः। एतेषां रक्षणार्थाय संसृष्टा ब्राह्मणाः पुरा ॥ २५ ॥

तीनों लोक, तीनों वेद, चारों आश्रम और तीनों अग्निकी रक्षाके लिये पूर्वकालमें विधाताने ब्राह्मणको रचा था ◎ ॥ २५ ॥

(१३) पाराशरस्मृति-१ अध्याय।

ब्राह्मणस्य मुखं क्षेत्रं निरुदकमकण्टकम्। वापयेत्सर्वबीजानि सा कृषिः सर्वकामिका ॥ ६४ ॥

ब्राह्मणका मुख जल और कांटेसे रहित खेत है, उसीमें सब बीज बोना चाहिये; यही खेती सब कामना देनेवाली है ✤ ॥ ६४ ॥

८ अध्याय।

दुःशीलोपि द्विजः पूज्यो न तु शूद्रो जितेन्द्रियः। कः परित्यज्य गां दुष्टां दुहेच्छीलवतीं खरीम् ॥३३॥

दुःशील ब्राह्मण भी पूज्य हैं; परन्तु जितेन्द्रिय भी शूद्र नहीं; क्यों कि दुष्ट गौको छोड़कर सुशीला गदहीको कोई नहीं दुहता ॥ ३३ ॥

(१४) व्यासस्मृति-४ अध्याय।

पादोदकं पादघृतं दीपमन्नं प्रतिश्रयम्। यो ददाति ब्राह्मणेभ्यो नोपसर्पति तं यमः ॥ ८ ॥
विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी। तावत् पुष्करपात्रेषु पिबन्ति पितरोऽमृतम् ॥ ९ ॥

जो गृहस्थ अपने घरमें ब्राह्मणके आनेपर पग धोनेके लिये जल, पादुका, दीप, अन्न और रहनेका स्थान देता है उसके पास यमराज नहीं आता है ॥ ८ ॥ जबतक ब्राह्मणोंके चरणोंके जलसे पृथ्वी भीगी हुई रहती है तबतक उस गृहस्थके पितर कमलके पत्तोंमें अमृत पीते हैं ॥ ९ ॥

✽याज्ञवल्क्यस्मृति-१ अध्याय। ब्रह्माने वेद धारण करनेके लिये, पितर और देवताओंकी तृप्तिके निमित्त और धर्मकी रक्षाके लिये तप करके ब्राह्मणको उत्पन्न किया ॥ १९८ ॥ सबसे ब्राह्मण श्रेष्ठ हैं, उनमें वेद पढ़नेवाले, वेद पढ़नेवालोंमें वेदविहितकर्म करनेवाले और वेदविहित-कर्म करनेवालोंमें भी आत्म-तत्त्व-ज्ञानी श्रेष्ठ हैं ॥ १९९ ॥

◎ दक्षिणाग्नि, गार्हपत्याग्नि और आहवनीय ये ३ अग्नि हैं।

✤ व्यासस्मृति-४ अध्याय-४८ श्लोकमें प्रायः ऐसा है।

यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे । तत्फलं ऋषयः श्रेष्ठा विप्राणां पादशोधने ॥ १० ॥
स्वागतेनाग्नयः प्रीता आसनेन शतक्रतुः । पितरः पादशौचेन अन्नाद्येन प्रजापतिः ॥ ११ ॥
मातापित्रोः परं तीर्थं गङ्गा गावो विशेषतः । ब्राह्मणात्परमं तीर्थं न भूतं न भविष्यति ॥ १२ ॥
ब्राह्मणः स भवेच्चैव देवानामपि देवतम् । प्रत्यक्षं चैव लोकस्य ब्रह्मतेजो हि कारणम् ॥ ४७ ॥

हे श्रेष्ठऋषियों ! जो फल कार्तिककी पूर्णिमाको ज्येष्ठपुष्करतीर्थमें कपिलागौ दान करनेसे होताहै वही फल ब्राह्मणोंके चरण धोनेसे मिलताहै ॥ १० ॥ ब्राह्मणके स्वागत करनेसे अग्नि, आसन देनेसे इन्द्र, चरण-धोनेसे पितर और अन्नआदि देनेसे ब्रह्मा प्रसन्न होतेहैं ॥ ११ ॥ माता और पितासे परम तीर्थ गङ्गा और गौ हैं; किन्तु ब्राह्मणोंसे श्रेष्ठ तीर्थ न हुआ है, न होगा ॥ १२ ॥ ब्राह्मण देवताओंके देवता हैं; जगत्का कारण प्रत्यक्ष ब्रह्मतेज ही है ॥ ४७ ॥

(१९) दूसरी शातातपस्मृति-१ अध्याय ।

जपच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि । सर्वं भवति निश्छिद्रं यस्य चेच्छन्ति ब्राह्मणाः ॥ २६ ॥
ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः । सर्वदेवमया विप्रा न तद्वचनमन्यथा ॥ २७ ॥
उपवासो व्रतं चैव स्नानं तीर्थफलं तपः । विप्रैस्सम्पादितं सर्वं सम्पन्नं तस्य तत्फलम् ॥ २८ ॥
सम्पन्नमिति यद्वाक्यं वदन्ति क्षितिदेवताः । प्रणम्य शिरसा धार्यमग्निष्टोमफलं लभेत् ॥ २९ ॥
ब्राह्मणा जङ्गमं तीर्थं निर्जलं सार्वकामिकम् । तेषां वाक्योदकेनैव शुद्ध्यन्ति मलिना जनाः ॥ ३० ॥

जपका छिद्र, तपका छिद्र, तथा यज्ञके कर्मोंका छिद्र ब्राह्मणोंके सफल कहदेनेसे नष्ट होजाता है ❀ ॥ २६ ॥ ब्राह्मणोंके वचनोंको देवता मानतेहैं, ब्राह्मण सब देवताओंके रूप हैं, इससे उनका वचन झूठा नहीं होता ॥ २७ ॥ उपवास, व्रत, स्नान और तीर्थका फल ब्राह्मणोंके कहनेसे सफल होताहै ॥ २८ ॥ जिस कर्मको ब्राह्मण कहदेताहै कि यह पूर्ण हुआ उसके उस वचनको नमस्कार करके शिरपर धारण करनेवाले अग्निष्टोम यज्ञका फल पातेहैं ۞ ॥ २९ ॥ सब कामनाओंका देनेवाला, जलसे रहित चलनेवाला तीर्थ ब्राह्मण है, उनके वचनरूपी जलसे मलीन मनुष्य शुद्ध होजातेहैं ॥ ३० ॥

(२४) लघुआश्वलायनस्मृति-२२ वर्णधर्मप्रकरण ।

सर्वेषां चैव वर्णानामुत्तमो ब्राह्मणो यतः । क्षत्रस्तु पालयेद्विप्रं विप्राज्ञाप्रतिपालकः ॥ १ ॥
सेवां चैव तु विप्रस्य शूद्रः कुर्याद्यथोदितम् । सर्वेषां चापि वै मान्यो वेदविद्द्विज एव हि ॥ २ ॥

सब वर्णोंमें ब्राह्मण उत्तम हैं इसलिये क्षत्रियोंको उनका और उनकी आज्ञाका पालन करना चाहिये और शूद्रोंको यथारीति उनकी सेवा करनी चाहिये; वेदज्ञ-ब्राह्मण निश्चय करके सबके माननीय हैं ॥ १-२ ॥

मान्य ब्राह्मण और पङ्क्तिपावन ब्राह्मण २.

(१) मनुस्मृति-२ अध्याय ।

ब्राह्मस्य जन्मनः कर्त्ता स्वधर्मस्य च शासिता। बालोऽपि विप्रो वृद्धस्य पिता भवति धर्मतः॥१५०॥
न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः । ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥ १५४ ॥

जो ब्राह्मण संस्कारआदि कर्मोंसे द्विज बनाताहै और वेदादिके व्याख्यानोंसे धर्म उपदेश करताहै वह ब्राह्मण बालक होनेपर भी धर्मपूर्वक बूढोंकेलिये भी पिताके समान माननीय है ॥ १५० ॥ बड़ी अवस्था, श्वेत-केश, धन और बहुत सम्बन्धीके रहनेपर कोई बड़ा नहीं होसकता; महर्षियोंने निश्चय कियाहै कि जो लोग अङ्गोंके सहित वेदोंको जानतेहैं वही लोग श्रेष्ठ हैं ॥ १५४ ॥

अपाङ्क्त्योपहता पङ्क्तिः पाव्यते यैर्द्विजोत्तमैः । तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान्पङ्क्तिपावनान् १८३॥
अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च । श्रोत्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः ॥ १८४ ॥
त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् । ब्रह्मदेयात्मसन्तानो ज्येष्ठसामग एव च ॥ १८५ ॥
वेदार्थवित् प्रवक्ता च ब्रह्मचारी सहस्रदः । शतायुश्चैव विज्ञेया ब्राह्मणाः पङ्क्तिपावनाः ॥ १८६ ॥

❀ पाराशरस्मृति—६ अध्यायके ५२-५३ श्लोकमें ऐसा ही है, किन्तु ५६-५७ श्लोकमें है कि स्नेह, लोभ, भय अथवा अज्ञानसे किसीपर अनुग्रह करनेसे उसका पाप ब्राह्मणको ही लगजाताहै ।

۞ पाराशरस्मृति—६ अध्यायके ५१-५२ श्लोकमें शातातपस्मृति २९ श्लोकके समान है ।

जिन पंक्तिपावन ब्राह्मणोंके द्वारा पंक्तिहीन ब्राह्मणोंसे दूषित पंक्ति भी पवित्र होजाती है उनका वृत्तान्त मैं पूरी रीतिसे कहताहूं ॥ १८३ ॥ जो ब्राह्मण सब वेदोंके जाननेमें निपुण है, वेदाङ्गोंके जाननेमें श्रेष्ठ है और जिनके पिता आदि सब श्रोत्रिय हैं उनको पंक्तिपावन कहते है ॥ १८४ ॥ त्रिणाचिकेत, पञ्चाग्नि, त्रिसुपर्ण,※ छवो वेदाङ्ग जाननेवाले, ब्राह्मविवाहसे विवाहीहुई स्त्रीके पुत्र, ज्येष्ठसामग अर्थात् सामवेदका आरण्यक भाग–गानेवाले, वेदका अर्थ जाननेवाले, वेदका वक्ता, ब्रह्मचारी, बहुत दान करनेवाले और एकसौ वर्षकी अवस्थावाले ब्राह्मण पंक्तिपावन कहेजाते है✢ ॥ १८५–१८६ ॥

११ अध्याय ।

विधाता शासिता वक्ता मैत्रो ब्राह्मण उच्यते । तस्मै नाकुशलं ब्रूयान्न शुष्कां गिरमीरयेत् ॥३५ ॥

विहित कर्मोंके करनेवाले, शिष्य आदिको शिक्षा देनेवाले, धर्मके व्याख्यान करनेवाले और सब प्राणियोंसे मित्रभाव रखनेवाले ब्राह्मण यथार्थमें ब्राह्मण कहाने योग्य है; कोई उनको बुरा अथवा रूखा वचन न कहे ॥ ३५ ॥

१२ अध्याय ।

यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान् । तथा दहति वेदज्ञः कर्मजं दोषमात्मनः ॥ १०१ ॥
वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् । इहैव लोके तिष्ठन्स ब्रह्मभूयाय कल्पते ॥ १०२ ॥

जैसे प्रचण्ड अग्नि हरितवृक्षोंको भी जला देता है वैसेही वेदज्ञ ब्राह्मण अपने कर्मजनित दोषोंको नष्ट करदेता है ॥ १०१ ॥ वेद और शास्त्रोंके तत्त्वोंको जाननेवाला ब्राह्मण किसी आश्रममें रहे, इसी लोकमें ब्रह्मरूपताको प्राप्त होता है ॥ १०२ ॥

(३) अत्रिस्मृति ।

जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ॥ १३८ ॥
विद्यया याति विप्रत्वं श्रोत्रियस्त्रिभिरेव च । वेदशास्त्राण्यधीते यः शास्त्रार्थं च निबोधयेत्॥१३९॥
तदासौ वेदवित् प्रोक्तो वचनं तस्य पावनम् । एकोपि वेदविद्धर्मं यं व्यवस्येद् द्विजोत्तमः ॥ १४० ॥
स ज्ञेयः परमो धर्मो नाज्ञानामयुतायुतैः ॥ १४१ ॥

ब्राह्मण ब्राह्मणके घरमे जन्म लेनेसे ब्राह्मण कहाजाता है, संस्कार होनेसे द्विज कहलाता है, विद्या पढ़नेसे विप्र होता है और इन तीनोंके होनेसे श्रोत्रिय कहाजाता है ॥ १३८–१३९ ॥ जो ब्राह्मण वेद और शास्त्रको पढ़ाता है और शास्त्रके अर्थका ज्ञान रखता है वह वेदविद् कहलाता है, उसका वचन पवित्र है एक भी वेदविद् ब्राह्मण जिस धर्मका जो निश्चय करदेवे उसीको परमधर्म मानना चाहिये; किन्तु सौहजार मूर्ख ब्राह्मण कहे उसको नही ॥ १४०–१४१ ॥

(१४) व्यासस्मृति–४ अध्याय ।

मीमांसते च यो वेदान् षड्भिरङ्गैः सविस्तरैः । इतिहासपुराणानि स भवेद्वेदपारगः ॥ ४५ ॥

जो ब्राह्मण विस्तारसहित सम्पूर्ण वेद, ६ वेदाङ्ग इतिहास तथा पुराणका विचार करता है उसको वेदपारग कहतेहै ॥ ४५ ॥

※ यजुर्वेदको पढ़ने और जाननेवाले और उसके नियम व्रतको करनेवालेको त्रिणाचिकेत कहते है श्रौत–स्मार्त अग्निहोत्र करनेवाला ब्राह्मण पञ्चाग्निहोत्री कहलाता है (दक्षिणाग्नि, गार्हपत्याग्नि, आहवनीयाग्नि, सभ्याग्नि और आवसथ्याग्नि ये पांच अग्नि हैं) और ऋग्वेदके होत्र–कर्मको पढ़ने, जानने और उसमें लिखेहुए नियम व्रतको करनेवाला ब्राह्मण त्रिसुपर्णवान् कहा जाता है ।

✢ शङ्खस्मृति–१४ अध्यायके ५–८ श्लोकमे अथर्वणको जाननेवाले, योगी, ध्यानपरायण और पत्थर तथा सोनाको समान जाननेवाले ब्राह्मणको भी पंक्तिपावन लिखा है । गौतमस्मृति–१५ अध्यायके अङ्कमें लिखा है कि स्नातक, वेदका मन्त्रभाग और ब्राह्मणभागको जाननेवाले और धर्मज्ञ ब्राह्मण भी पंक्तिपावन हैं । वसिष्ठ स्मृति–३ अध्यायके २२ अङ्कमें है कि वाजसनेयी–संहिताको जाननेवाले, वेदका मन्त्रभाग और ब्राह्मण–भागको जाननेवाले, धर्माध्यापक और जिसकी माता और पिताके वंशमें १० पीढ़ियोंसे वेद पढ़नेकी परम्परा चलीआती है; ये ब्राह्मण भी पंक्तिपावन है । उशनस्स्मृति–४ अध्यायके ३–७ श्लोकमें लिखा है कि सोमपानमे निरत, धर्मज्ञ, सत्यवादी, ऋतुकालमें अपनी स्त्रीसे गमन करनेवाले, अथर्ववेद पढ़नेवाले, रुद्राध्यायी, गुरु, अग्नि और देवताकी पूजा करनेवाले, ज्ञाननिष्ठ, सदा अहिंसामें तत्पर, दान नहीं लेनेवाले और सदा दान देनेवाले ब्राह्मण भी पंक्तिपावन है ।

(१८) गौतमस्मृति-८ अध्याय।

स एष बहुश्रुतो भवति लोकवेदवेदाङ्गविद् वाकोवाक्येतिहासपुराणकुशलस्तदपेक्षस्तद्वृत्तिश्चत्वारिंशता संस्कारैः संस्कृतस्त्रिषु कर्मस्वभिरतः षट्सु वा समयाचारिकेष्वभिविनीतः ॥ २ ॥

जो ब्राह्मण लोकव्यवहार और वेद तथा वेदाङ्गोंको जानताहै; वाकोवाक्य (प्रश्नोत्तररूप वैदिक ग्रन्थ), इतिहास और पुराण जाननेमें प्रवीण है, इन्हींकी अपेक्षा करनेवाला और इन्हींसे जीविका करनेवाला, ४० संस्कारोंसे शुद्ध, ※ ३ कर्म (वेद पढ़ना, यज्ञ करना और दान देना) अथवा ६ कर्म (पढ़ना, पढ़ाना, यज्ञकरना, यज्ञकराना, दान देना और दानलेना) में तत्पर और समयके अनुकूल नम्रताके सहित आचारविचारमें वरताव करनेवाला है उसको बहुश्रुत कहतेहैं ॥ २ ॥

(२०) वशिष्ठस्मृति-६ अध्याय।

योगस्तपो दमो दानं सत्यं शौचं दया श्रुतम्। विद्या विज्ञानमास्तिक्यमेतद् ब्राह्मणलक्षणम् ॥२१॥
ये शान्तदान्ताः श्रुतिपूर्णकर्णा जितेन्द्रियाः प्राणिवधान्निवृत्ताः।
प्रतिग्रहे सङ्कुचिताग्रहस्तास्ते ब्राह्मणास्तारयितुं समर्थाः ॥ २२ ॥

योग, तपस्या, इन्द्रियोंका संयम, दान, सत्य, शौच, दया, वेद, विज्ञान, आस्तिकता; ये सब ब्राह्मणके चिह्न हैं ॥ २१ ॥ जो ब्राह्मण सब प्रकारसे इन्द्रियोंके दमन करनेवाले हैं; जिनके कान वेदोंसे परिपूर्ण हैं, जो जितेन्द्रिय और जीवहिंसासे रहित हैं और दान लेनेमें संकोच करतेहैं, ऐसे ब्राह्मण मनुष्योंके तारनेके लिये समर्थ हैं ॥ २२ ॥

(२४) लघुआश्वलायनस्मृति-२२ वर्णधर्मप्रकरण।

वेदविद्विजहस्तेन सेवा संगृह्यते यदि। न तस्य वर्धते धर्मः श्रीरायुः क्षीयते ध्रुवम् ॥ १७ ॥
संतुष्टो येन केनापि सदाचारपरायणः। पराधीनो द्विजो न स्यात्स तरेद्भवसागरम् ॥ २४ ॥

जो मनुष्य वेद और शास्त्र-पढ़ेहुए तथा शास्त्रके अर्थको बतानेवाले ब्राह्मणके हाथसे अपनी सेवा करवाताहै उसके धर्मकी वृद्धि नहीं होती और उसकी लक्ष्मी तथा आयु क्षीण होजातीहै ॥ १७ ॥ जो ब्राह्मण स्वाधीन और सन्तुष्ट रहकर सदाचारमें तत्पर रहताहै वह संसार-समुद्रसे पार होताहै॥ २४ ॥

ब्राह्मणका धर्म ※※ ३.

(१) मनुस्मृति-२अध्याय।

संमानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव। अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा ॥ १६२ ॥
सुखं ह्यवमतः शेते सुखं च प्रतिबुध्यते। सुखं चरति लोकेऽस्मिन्नवमन्ता विनश्यति ॥ १६३ ॥

ब्राह्मणको उचित है कि विषके समान सदा सम्मानसे डरे और अमृतके समान सदा अपमानकी चाहना करे; अन्यसे अपमान कियाहुआ पुरुष सुखसे सोताहै, सुखसे जागताहै और सुखसे लोकमें विचरताहै और अपमान करनेवालेका नाश होताहै ※॥ १६२-१६३ ॥

४ अध्याय।

चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः। द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥ १ ॥
अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः। या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥ २ ॥
यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः। अक्लेशेन शरीरस्य कुर्वीत धनसञ्चयम् ॥ ३ ॥
ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा। सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥ ४ ॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्। मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥ ५ ॥
सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते। सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ॥ ६ ॥
कुशूलधान्यको वा स्यात्कुम्भीधान्यक एव वा। त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा ॥ ७ ॥

※ ४० संस्कारोंका वर्णन गृहस्थप्रकरणमें हैं।

※※ ब्राह्मण, क्षत्रिय, आदिका धर्म गृहस्थप्रकरणमें देखिये।

※ आपस्तंब स्मृति१० अध्याय। अपमानसे तपकी वृद्धि होतीहै और सम्मानसे तपका ह्रास होताहै; अर्चित और पूजित ब्राह्मण दूही जातीहुई गौके समान खिन्न होजाताहै, किन्तु जैसे जलसे उत्पन्न तृणोंको खाकर वह गौ पुष्ट होतीहै वैसेही जप और होम करनेसे वह ब्राह्मण फिर उन्नति प्राप्त करताहै ॥ ९-११ ॥

ब्राह्मणको उचित है कि अपनी आयुका पहिला चौथाई भाग गुरुके घरमें बितावे और दूसरे चौथाई भागमें विवाह करके निज गृहम निवास करे ॥ १ ॥ जिस वृत्तिसे किसी जीवसे कुछ द्रोह नही होवे अथवा अल्प द्रोह होवे विना आपत्कालके अन्य समयमें ऐसीही वृत्ति अवलम्बन करे ॥ २ ॥ केवल गृहस्थी धर्मके निर्वाहके लिये निज वर्ण विहित-उत्तम कार्यसे, शरीरको क्लेश नही देकर धनका सञ्चय करे ॥ ३ ॥ ऋत, अमृत, मृत, प्रमृत अथवा सत्यानृत वृत्तिसे अपना निर्वाह करे, किन्तु श्ववृत्तिसे कभी नही ॥ ४ ॥ उञ्छ वृत्ति और शिल वृत्तिको ❀ ऋत वृत्ति, विना मांगेहुए भिक्षा आदि प्राप्तको अमृतवृत्ति, मांगी हुई भिक्षाको मृतवृत्ति, कृषिकर्मको प्रमृतवृत्ति और वाणिज्यको सत्यानृत वृत्ति कहतेहैं; इससेभी जीवन वितावे, किन्तु सेवा करना कुत्तेकी वृत्ति कहलाती है इसलिये सेवाका काम कभी नही करे ॥ ५-६ ॥ गृहस्थ ब्राह्मण कोठिले भर अन्न, अथवा ऊंटनी भर अन्न, तीन दिन खाने योग्य अन्न केवल एकदिनके भोजन योग्य अन्न सञ्चय करे ॥ ७ ॥

चतुर्णामपि चैतेषां द्विजानां गृहमेधिनाम् । ज्यायान्परः परो ज्ञेयो धर्मतो लोकजित्तमः ॥ ८ ॥
षट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते । द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति ॥ ९ ॥
वर्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः । इष्टीपार्वायनान्तीयाः केवला निर्वपेत्सदा ॥ १० ॥

इन ४ प्रकारके गृहस्थ ब्राह्मणोंमे क्रमसे पहिलेसे पीछेवाले श्रेष्ठ और स्वर्गादि लोकको जीतनेवाले होतेहै ❁ ॥ ८ ॥ इनमें कोई एक ६ कामोसे अर्थात् उञ्छ वृत्ति, शिल वृत्ति, अयाचित भिक्षा, याचित भिक्षा, कृषि और वाणिज्यसे, कोई तीन कामोंसे अर्थात् याजन, अध्यापन और प्रतिग्रहसे, कोई दो कामोंसे अर्थात् याजन और अध्यापनसे और कोई केवल एक कामसे अर्थात् अध्यापनसे ही अपना निर्वाह करता है ॥ ९ ॥ शिलोञ्छ वृत्तिवालोंको उचित है कि अग्निहोत्र करै और केवल पर्व तथा अयनान्त इष्टि अर्थात् दर्श पौर्णमासादि यज्ञोंको सदा करते रहै ॥ १० ॥

सन्तोषं परमास्थाय सुखार्थी संयतो भवेत् । सन्तोषमूलं हि सुखं दुःखमूलं विपर्ययः ॥ १२ ॥

सुखकी इच्छावाले गृहस्थ ब्राह्मण सन्तोषका अवलम्बन करके बहुत धनकी चेष्टा नही करे क्योंकि सन्तोषही सुखका मूल है और असन्तोष दुःखका कारण है ॥ २ ॥

न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम् । न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ॥ ८० ॥

शूद्रको ज्ञान उपदेश, अपना जूठा, हविका बचाहुआ भाग, धर्मका उपदेश अथवा व्रतकरनेकी आज्ञा नही देवे ✾ ॥ ८० ॥

प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत् । प्रतिग्रहेण ह्यस्याशु ब्राह्मं तेजः प्रशाम्यति ॥ १८६ ॥
न द्रव्याणामविज्ञाय विधिं धर्म्यं प्रतिग्रहे । प्राज्ञः प्रतिग्रहं कुर्यादवसीदन्नपि क्षुधा ॥ १८७ ॥

दान लेनेमें समर्थ होनेपर भी सदा दान नही लियाकरै; क्यो कि दान लेनेसे ब्राह्मणका ब्रह्मतेज नष्ट होताहै ॥ १८६ ॥ बुद्धिमान् ब्राह्मणको उचित है कि विना विशेषरूपसे प्रतिग्रहके विधानको जानेहुए क्षुधासे पीड़ित होनेपर भी द्रव्यआदि दान नही लेवे ◎ ॥ १८७ ॥

१० अध्याय।

ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्मण्यवस्थिताः । ते सम्यगुपजीवेयुः षट्कर्माणि यथाक्रमम् ॥ ७४ ॥
अध्यापनमध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ॥ ७५ ॥
षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥ ७६ ॥

❀ खेत कटजानेपर खेतमें पड़े हुए दानेको बीन लानेको उञ्छवृत्ति और अन्नकी बाल बीनलाने को शिलवृत्ति कहते हैं।

❁ विष्णुस्मृति-२ अध्यायके १५-१७ श्लोकमें भी ऐसाही है । याज्ञवल्क्यस्मृति-१ अध्याय १२८ श्लोकमें है कि कोठिलेभर अन्न रखनेवालेसे ऊंटनीभर अन्न संचनेवाले, ऊंटनीभर अन्न रखनेवालेसे ३ दिन खानेयोग्य अन्न रखनेवाले, इनसे एकदिन खानेयोग्य अन्न रखनेवाले और एकदिन खाने योग्य अन्न रखनेवालेसे शिलोञ्छवृत्तिसे निर्वाह करनेवाले ब्राह्मण श्रेष्ठ हैं।

✾ मनुस्मृति-१० अध्यायके १२५ श्लोकमें है कि सेवक शूद्रको जूठा अन्न देना चाहिये, और यहां जूठा नही देनेको लिखाहै सो यह सेवकसे भिन्न शूद्रोंके लिये है।

◎ वृहद्विष्णुस्मृति—५७ अध्याय-८श्लोक । जो ब्राह्मण दान लेनेकी विधिको विना जानेहुए दान लेताहै वह दाताके सहित नरकमें जाताहै ।

ब्रह्मयोनिमें रत और अपने कर्मोंसे युक्त ब्राह्मणोंको विधिपूर्वक अध्ययन आदि षट्कर्मोंमें तत्पर रहना चाहिये ॥ ७४ ॥ वेदपढ़ाना, वेदपढ़ना, यज्ञकरना, यज्ञकराना, दान देना और दान लेना; ये ६ कर्म ब्राह्मणके है ❀ ॥ ७५ ॥ इनमें यज्ञ कराना, वेद पढ़ाना और शुद्ध दान लेना, ये तीन कर्म उनकी जीविका है ॥ ७६ ॥

वेदाभ्यासो ब्राह्मणस्य क्षत्रियस्य च रक्षणम् । वार्त्ताकर्मैव वैश्यस्य विशिष्टानि स्वकर्मसु ॥ ८० ॥

प्रतिग्रहाद् याजनाद्वा तथैवाध्यापनादपि । प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ॥ १०९ ॥

ब्राह्मणके कर्मोंमे वेदका अभ्यासकरना, क्षत्रियके कर्मोंमे प्रजाकी रक्षाकरना और वैश्यके कर्मोंमें कृषि, गोरक्षा और वाणिज्य श्रेष्ठ है ॥ ८० ॥ ब्राह्मणके प्रतिग्रह, याजन और अध्यापन कर्ममें प्रतिग्रह बहुत हीन है और परलोकके लिये निन्दित है ॥ १०९ ॥

११ अध्याय ।

यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति । स याति भासतां विप्रः काकतां वा शतं समाः ॥ २५ ॥

जो ब्राह्मण यज्ञकेलिये दातासे धन लेकर उसको यज्ञकार्यमें नही लगाताहै वह मरनेपर उस पापसे १०० व तक गीध अथवा काकपक्षी होताहै ॥ २५ ॥

अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणः कामकारतः । चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत् ॥ ४१॥

तेषां सततमज्ञानां वृषलाग्न्युपसेविनाम् । पदा मस्तकमाक्रम्य दाता दुर्गाणि संतरेत् ॥ ४३ ॥

जो ब्राह्मण अनापत्कालमे नित्य दोनो सांझ अग्निहोत्र नही करता उसको पुत्रहत्याके समान पाप लगताहै; वह उस पापको छोड़ानेके लिये एकमास चान्द्रायण व्रत करे ॥ ४१ ॥ जो ब्राह्मण शूद्रसे द्रव्य लेकर अग्निहोत्र करताहै वह अज्ञानी है; वह शूद्र उसके शिरपर पांव रखकर नरकसे पार होताहै ॥ ४३ ॥

१२ अध्याय ।

तपो विद्या च विप्रस्य निःश्रेयसकरं परम् । तपसा किल्विषं हन्ति विद्ययाऽमृतमश्नुते ॥ १०४ ॥

तपस्या और आत्मज्ञान ब्राह्मणका उत्कृष्ट मोक्षसाधन है तपसे पाप नष्ट होताहै और आत्मज्ञानसे मुक्ति होतीहै ॥ १०४ ॥

(२) याज्ञवल्क्यस्मृति–१ अध्याय ।

न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः । न विरुद्धप्रसङ्गेन सन्तोषी च सदा भवेत् ॥ १२९ ॥

स्नातक ब्राह्मणको उचित है कि वेद पाठके विरोधी विना विचारे जहां तहांसे तथा नाच अथवा गानकी वृत्तिसे धन सञ्चय नही करे, सदा सन्तोषसे रहै ॥ १२९ ॥

प्रतिग्रहसमर्थोपि नादत्ते यः प्रतिग्रहम् । ये लोका दानशीलानां स तानाप्नोति पुष्कलान् ॥२१३॥

जो ब्राह्मण दानलेनेमें समर्थ होकर भी दान नहीं लेता है उसको दानशीलोंके समान लोक मिलता है ❀❀ ॥ २१३ ॥

(३) अत्रिस्मृति ।

शौचं मङ्गलमायास अनसूयास्पृहा दमः । लक्षणानि च विप्रस्य तथा दानं दयापि च ॥ ३३ ॥

शौच, मङ्गल अर्थात् उत्तम आचरण, परिश्रम करना, परके गुणोंमें दोषोंका नही देखना, कामना रहित होना, इन्द्रियोंको वशमें रखना, दान देना और दयाकरना, ये सब ब्राह्मणके लक्षण है ॥ ३३ ॥

पावका इव दीप्यन्ते तपोहोमैर्द्विजोत्तमाः॥१४१॥

प्रतिग्रहेण नश्यन्ति वारिणा इव पावकः । तान् प्रतिग्रहजान्दोषान्प्राणायामैर्द्विजोत्तमाः ॥ १४२ ॥

नाशयन्ति हि विद्वांसो वायुर्मेघानिवाम्बरे ॥ १४३ ॥

ब्राह्मण तप और अग्निहोत्र करनेसे अग्निके समान प्रकाशित होते है, परन्तु दान लेनेसे ऐसे तेजहीन होजाते हैं जैसे जलसे अग्नि, किन्तु श्रेष्ठ ब्राह्मण प्राणायामद्वारा प्रतिग्रहजनित दोषको ऐसे नाश करदेते हैं जैसे वायु मेघोंको उड़ा देता है ॥ १४१–१४३ ॥

❀ मनुस्मृति—१ अध्याय–८८ श्लोक; याज्ञवल्क्यस्मृति–१ अध्याय–११८ श्लोक; अत्रिस्मृति–१३ श्लोक; हारीतस्मृति–१ अध्याय–१८ श्लो; शङ्खस्मृति–१ अध्याय–२ श्लोक; गौतमस्मृति–१० अध्याय–१ श्लोक और वसिष्ठस्मृति–२ अध्याय–१९–२० श्लोकमें ब्राह्मणके यही ६ कर्म लिखे हुए हैं ।

❀❀ वृहद्विष्णुस्मृति–५७ अध्यायके ९ श्लोकमें ऐसा ही है ।

(४ क) बृहद्विष्णुस्मृति–२९ अध्याय।

नापरीक्षितं याजयेत् ॥ ४ ॥ नाध्यापयेत् ॥ ५ ॥ नोपनयेत् ॥ ६ ॥

ब्राह्मणको उचित है कि विना (कुल शील आदि) जाने हुए किसी मनुष्यको यज्ञ नहीं करावे, विद्या नहीं पढावे तथा जनेऊ नहीं देवे ॥ ४–६ ॥

(७) अङ्गिरस्स्मृति।

अप्रमाणं गते शूद्रे स्वस्ति कुर्वन्ति ये द्विजाः ॥ ४९ ॥
शूद्रोपि नरकं याति ब्राह्मणोपि तथैव च ॥ ५० ॥

जो ब्राह्मण बिना प्रणाम कियेहुए शूद्रको आशीर्वाद देता है वह उस शूद्रके साहित नरकमें जाता है ॥ ४९–५० ॥

(१३) पाराशरस्मृति–२ अध्याय।

अतः परं गृहस्थस्य कर्माचारं कलौ युगे। धर्मं साधारणं शक्त्या चातुर्वर्ण्याश्रमागतम् ॥ १ ॥
तं प्रवक्ष्याम्यहं पूर्वं पाराशरवचो यथा। षट्कर्मनिरतो विप्रः कृषिकर्माणि कारयेत् ॥ २ ॥
क्षुधितं तृषितं श्रान्तं बलीवर्दं न योजयेत्। हीनाङ्गं व्याधितं क्लीबं वृषं विप्रो न वाहयेत् ॥ ३ ॥
स्थिराङ्गं नीरुजं तृप्तं सुनर्दं षण्ढवर्जितम्। वाहयेद्दिवसस्यार्द्धं पश्चात् स्नानं समाचरेत् ॥ ४ ॥
जपं देवार्चनं होमं स्वाध्यायं चैवमभ्यसेत् ॥ एकद्वित्रिचतुर्विप्रान्भोजयेत्स्नातकान्द्विजः ॥ ५ ॥

क्षत्रियराजाको उचित है कि विधिपूर्वक जनेऊ होजानेपर न्यायके अनुसार प्रजाओंकी रक्षा करे ॥ २॥ जगत्में राजा नहीं रहनेसे सब लोगोंके भययुक्त होनेपर प्रभुने जगत्की रक्षाकेलिये इन्द्र, पवन, यम, सूर्य, अग्नि, वरुण, चन्द्रमा और कुबेर;– इन ८ दिक्पालोंके सारभूत अंशोंसे राजाको उत्पन्न किया ॥ ३–४ ॥ राजाओंमें इन्द्रादि देवताओंके अधिकगुण रहते हैं, इसी कारणसे राजालोग सबसे अधिक पराक्रमी होतेहैं।।५।।

तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च । न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥ ६ ॥
सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट् । स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥ ७ ॥
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः । महती देवता ह्येषा नररूपेण तिष्ठति ॥ ८ ॥
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् । कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम् ॥ ९ ॥
कार्यं सोऽवेक्ष्य शक्तिं च देशकालौ च तत्त्वतः । कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनःपुनः ॥ १० ॥
यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे । मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥ ११ ॥
तं यस्तु द्वेष्टि संमोहात्स विनश्यत्यसंशयम् । तस्य ह्याशु विनाशाय राजा न कुरुते मनः ॥ १२ ॥
तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः । अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् ॥ १३ ॥

जब राजा सूर्यके समान अपने नेत्र और मनको उत्तप्त करताहै तब संसारमें कोई उसकी ओर देखनेमें समर्थ नहीं होताहै ॥ ६ ॥ राजा अग्नि, वायु, सूर्य, चन्द्रमा, यम, कुबेर, वरुण और इन्द्रके तुल्य प्रतापी होताहै ॥ ७ ॥बालकराजाको भी सधारण मनुष्य जानकर निरादर करना उचित नहीं है; क्योंकि वह महान् देवता मनुष्यरूपमें स्थित है ॥ ८ ॥ असावधानीसे अग्निके निकट जानेवाला मनुष्य केवल आप ही जलताहै; किन्तु राजाकी क्रोधाग्निमें पड़नेसे अपने कुटुम्ब, पशु तथा सम्पत्तिके साथ मनुष्य नष्ट होजाताहै ॥ ९ ॥ राजा प्रयोजनीय कार्योंके लिये अपनी शक्ति और देश कालको विचारकर धर्मकेलिये अनेकरूप धारण करता है ॥ १० ॥ जिसकी प्रसन्नतासे महती लक्ष्मी प्राप्त होतीहै, जिसके पराक्रमसे विजय होताहै और जिसके कोपसे मृत्यु होतीहै वह राजा सर्वतेजोमय है ॥ ११ ॥ जो मनुष्य मोहवश होकर राजासे द्वेष करताहै निश्चय करके उसका नाश होताहै, शीघ्र ही उसके नाशके लिये राजा इच्छा करताहै, इसलिये शिष्टोंका पालन और दुष्टोंका दमन करनेके लिये राजा जो धर्म नियत करताहै कोई उसका उल्लंघन नहीं करे ॥ १२–१३ ॥

९ अध्याय ।

कृतं त्रेतायुगं चैव द्वापरं कलिरेव च । राज्ञो वृत्तानि सर्वाणि राजा हि युगमुच्यते ॥ ३०१ ॥
कलिः प्रसुप्तो भवति स जाग्रद्द्वापरं युगम् । कर्मस्वभ्युद्यतस्त्रेता विचरंस्तु कृतं युगम् ॥ ३०२ ॥

सत्ययुग, त्रेता, द्वापर और कलियुग राजाके ही चेष्टित हैं; इसलिये राजाको युग कहते हैं ॥ ३०१ ॥ जब राजा आलसी और उद्योगरहित होकर राज्यके विषयमें सोतासा रहता है तब कलियुग, जब वह राज्यके विषयमें जागृतदृष्टिसे देखता रहता है तब द्वापर, जब वह राज्यकार्य करनेकेलिये उद्यत रहताहै तब त्रेता और जब वह शास्त्रके अनुसार सब राज्यकार्य करता है तब सतयुग वर्तता है ॥ ३०२ ॥

राजाका धर्म २.

(१) मनुस्मृति ७ अध्याय ।

तस्याहुः संप्रणेतारं राजानं सत्यवादिनम् । समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम् ॥ २६ ॥
तं राजा प्रणयन्सम्यक् त्रिवर्गेणाभिवर्धते । कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते ॥ २७ ॥
दण्डो हि सुमहत्तेजो दुर्धरश्चाकृतात्मभिः । धर्माद्विचलितं हन्ति नृपमेव सबान्धवम् ॥ २८ ॥
सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना । न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च ॥ ३० ॥
शुचिना सत्यसंधेन यथाशास्त्रानुसारिणा । प्रणेतुं शक्यते दण्डः सुसहायेन धीमता ॥ ३१ ॥

सत्यवादी, विचारकर काम करनेवाले, तत्त्वके विचारमें निपुण और धर्म, काम तथा अर्थको जाननेवाले राजाको ऋषिलोग दण्ड चलानेयोग्य कहते हैं ॥ २६ ॥ यथार्थरीतिसे विचार करके दण्डके विधान करनेसे राजाके अर्थ, धर्म और कामकी वृद्धि होती है; किन्तु भोगाभिलाषी, क्रोधी और क्षुद्र राजा दण्डद्वारा स्वयं नष्ट होजाता है ॥ २७ ॥ महा तेजस्वी दण्ड, शास्त्रज्ञान और राजधर्मसे हीन राजाके धारण करने योग्य नहीं है; क्यों कि वह ऐसे राजाको उसके बान्धवोंसहित नाश करदेता है ॥ २८ ॥ सहायतासे हीन, मूढ़, लोभी, शास्त्रज्ञानसे हीन और विषयी राजा न्यायपूर्वक दण्डका विधान नहीं करसकता है ॥ ३० ॥ पवित्रस्वभाव, सत्यप्रतिज्ञ, शास्त्रानुसार चलनेवाला, बुद्धिमान् और उत्तम सहाययुक्त राजा दण्डका विधान करनेयोग्य होता है ॥ ३१ ॥

स्वराष्ट्रे न्यायवृत्तः स्याद् भृशदण्डश्च शत्रुषु । सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ॥ ३२ ॥
स्वेस्वे धर्मे निविष्टानां सर्वेषामनुपूर्वशः । वर्णानामाश्रमाणां च राजा सृष्टोऽभिरक्षिता ॥३५॥

राजा न्यायपूर्वक व्यवहार करे, शत्रुओंको यथार्थ दण्ड देवे, मित्रोंसे सरल वर्ताव करे और ब्राह्मणोंके लिये क्षमावान् होवे ॥ ३२ ॥ अपने अपने धर्मोंमें तत्पर सब वर्णों और सब आश्रमोंके लोगोंकी रक्षा करनेके लिये विधाताने राजाको उत्पन्न किया ॥ ३५ ॥

ब्राह्मणान्पर्युपासीत प्रातरुत्थाय पार्थिवः । त्रैविद्यवृद्धान्विदुषस्तिष्ठेत्तेषां च शासने ॥ ३७ ॥
वृद्धांश्च नित्यं सेवेत विप्रान्वेदविदः शुचीन् । वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते ॥ ३८ ॥
तेभ्योऽधिगच्छेद्विनयं विनीतात्मापि नित्यशः । विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित् ॥३९॥
बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः । वनस्था अपि राज्यानि विनयात्प्रतिपेदिरे ॥ ४० ॥

राजाको उचित है कि प्रतिदिन प्रातःकाल उठकर तीनों वेदोंके जाननेवाले वृद्ध विद्वान् ब्राह्मणोंकी सेवा करे और उनकी आज्ञानुसार कार्योंको करे ॥ ३७ ॥ वेदवित् पवित्र वृद्ध ब्राह्मणोंकी सदा सेवा करनेवाले राजाको राक्षस लोग भी पूजते हैं अर्थात् उसका हित करते हैं ॥३८॥ राजा बुद्धिमान् तथा गुणवान् होनेपर भी वृद्धोंसे विनय सीखे; क्यों कि विनयी राजा कभी विनष्ट नहीं होता है ॥ ३९ ॥ हाथी, घोड़े आदि ऐश्वर्ययुक्त राजा विनयी नहीं होनेके कारण नष्ट होगये और वनमें वसनेवाले बहुतेरे विनययुक्त होकर राज्यको पाये ॥ ४० ॥

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्।आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः॥४३॥
इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् । जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः॥४४॥
दशकामसमुत्थानि तथाष्टौ क्रोधजानि च । व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत् ॥ ४५ ॥
कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः । वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ॥ ४६ ॥
मृगयाक्षो दिवा स्वप्नः परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥४७॥
पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् । वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥ ४८ ॥

राजा ऋक्, यजु और साम इन तीनों वेदोंको जाननेवाले ब्राह्मणसे तीनों वेद पढ़े और सनातन दण्डनीति, तर्कशास्त्र, ब्रह्मविद्या, कृषि, वाणिज्य और पशुपालनकर्म और उनके आरम्भ धन प्राप्तिके उपायोंको उनके जाननेवालोंसे सीखलेवे ॥ ४३ ॥ सब इन्द्रियोंको अपने वशमें रक्खे; क्योंकि जितेन्द्रिय राजा ही प्रजाओंको अपने वशमें रख सकताहै ॥ ४४ ॥ कामसे उत्पन्न १० व्यसन (दोष) और क्रोधसे उत्पन्न ८ व्यसन हैं, उनको राजा यत्नपूर्वक छोड़देवे ॥ ४५ ॥ कामज व्यसनोंमें आसक्त होनेवाला राजा निश्चय करके अर्थ और धर्मसे हीन होजाताहै और क्रोधज व्यसनोंमें आसक्त होनेवालेका जीवन भी नष्ट होताहै ॥ ४६ ॥ शिकारखेलना, जूआखेलना, दिनमें शयनकरना, परका दोष कहना, स्त्रियोंमें आसक्त होना, नशेबाजी, नाचना, गाना, बजाना और वृथा घूमना; ये १० कामज व्यसन हैं और चुगली, साहस, द्रोह, ईर्षा, परके गुणोंमें दोषोंका प्रकट करना, अन्यका द्रव्य हरलेना, कठोर वचन बोलना और निर्दोष मनुष्यको ताड़ना करना; ये ८ क्रोधज व्यसन हैं अर्थात् क्रोधसे उत्पन्न होतेहैं ॥ ४७–४८ ॥

द्वयोरप्येतयोर्मूलं य सर्वे कवयो विदुः । तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ॥ ४९ ॥
पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् । एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥ ५० ॥
दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे । क्रोधजेऽपि गणे विद्यात्कष्टमेतत्त्रिकं सदा ॥ ५१ ॥
सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषंगिणः । पूर्वं पूर्वं गुरुतरं विद्याद् व्यसनमात्मवान् ॥ ५२ ॥

विद्वान्लोग कहतेहैं कि दोनो प्रकारके व्यसनोंका मूल कारण लोभ है, इसलिये राजा यत्नपूर्वक लोभका परित्याग करे ॥ ४९ ॥ दशप्रकारके कामज व्यसनोंमें मद्यआदि पीना, जूआखेलना, स्त्रियोंमें आसक्त होना और शिकारकरना; इन ४ को अत्यन्त कष्टदायक जानना चाहिये ॥ ५० ॥ आठ प्रकारके क्रोधज व्यसनोंमें बहुत ताड़ना करना, कठोर वचन बोलना और अन्यका द्रव्य हरण करना; इन तीनोंको अत्यन्त अनर्थकारी समझना चाहिये ॥ ५१ ॥ ये सातो व्यसन सम्पूर्ण राजमण्डलीमें व्याप्त हुआ करतेहैं; इन ७ में से क्रमसे पिछलेवालेसे पहिलेवाले व्यसन अधिक कष्टदायक हैं ॥ ५२ ॥

तदध्यास्योद्वहेद्भार्यां सवर्णां लक्षणान्विताम् । कुले महति सम्भूतां हृद्यां रूपगुणान्विताम् ॥ ७७ ॥
पुरोहितं च कुर्वीत वृणुयादेव चर्त्विजम् । तेऽस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च ॥ ७८ ॥

राजा किलेमें निवास करके अपनी जातिकी, शुभ लक्षणवाली, महान् कुलमें उत्पन्न, मनोहर और सद्-गुणोंसे युक्त कन्यासे अपना विवाह करे ॥ ७७ ॥ पुरोहित और ऋत्विज बनावे वे लोग राजाके गृह्यमें कहेहुए होम आदि वेदोक्तकर्मोंको करें ॥ ७८ ॥

यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः। धर्मार्थश्चैव विप्रेभ्यो दद्याद्भोगान्धनानि च ॥ ७९ ॥
सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम्। स्याच्चाम्नायपरो लोके वर्तेत पितृवन्नृषु ॥ ८० ॥
अध्यक्षान् विविधान्कुर्यात्तत्र तत्र विपश्चितः। तेऽस्य सर्वाण्यवेक्षेरन्नृणां कार्याणि कुर्वताम् ॥८१॥
आवृत्तानां गुरुकुलाद्विप्राणां पूजको भवेत्। नृपाणामक्षयो ह्येष निधिर्ब्राह्मोऽभिधीयते ॥ ८२ ॥

बहुत दक्षिणावाले विविध भांतिके यज्ञ करे और धर्मके अर्थ अनेक प्रकारकी भोगकी वस्तुएं और द्रव्य ब्राह्मणोंको दान देवे ॥ ७९ ॥ विश्वासी कर्मचारियोंद्वारा प्रजाओंसे शास्त्रोक्त वार्षिक "राजकर" लेवे; प्रजा-ओंके साथ पिताके समान वर्त्ताव करे ॥ ८० ॥ राजकर्मचारियोंके कार्योंको विशेषरीतिसे देखनेके लिये चतुर मनुष्योंको नियुक्त करे ॥ ८१ ॥ ब्रह्मचर्यव्रत समाप्त करके गृहस्थाश्रममें आयेहुए ब्राह्मणोंका धन धान्यसे विशेष सत्कार करे; क्यों कि ऐसे ब्राह्मणोंको देनेसे अक्षय फल मिलता है ॥ ८२ ॥

अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः। रक्षितं वर्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत् ॥ ९९ ॥
एतच्चतुर्विधं विद्यात्पुरुषार्थप्रयोजनम्। अस्य नित्यमनुष्ठानं सम्यक्कुर्यादतन्द्रितः ॥ १०० ॥
अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया। रक्षितं वर्द्धयेद् वृद्ध्या वृद्धं दानेन निःक्षिपेत् ॥ १०१ ॥

राजाको उचित है कि नहीं मिलेहुए (द्रव्य, भूमि आदि पदार्थों) के प्राप्त होनेकी चेष्टा करे, प्राप्तहुई वस्तुओंकी यत्नपूर्वक रक्षा करे, रक्षित वस्तुओंको बढ़ानेका उद्योग करे और बढ़ेहुए धनको सत्पात्रको दान देवे ॥ ९९ ॥ इन चार प्रकारके कर्मोंको पुरुषार्थ अर्थात् अर्थ, धर्म, काम और मोक्षका कारण जाने और आलस छोड़कर इनका अनुष्ठान करे ॥ १०० ॥ अलब्ध वस्तुओं (राज्य आदि) को दण्डद्वारा अर्थात् सेना आदिसे लेनेकी चेष्टा करे, प्राप्त वस्तुओंको विशेष अनुसन्धानसे रक्षा करे, रक्षित वस्तुओंको वृद्धिसे बढ़ावे और बढ़ेहुए धनको दान करे ॥ १०१ ॥

नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः। नित्यं संवृतसंवार्यो नित्यं छिद्रानुसार्यरेः ॥ १०२ ॥
बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्। वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ॥ १०६ ॥
एवं विजयमानस्य येऽस्य स्युः परिपन्थिनः। तानानयेद्वशं सर्वान्सामादिभिरुपक्रमैः ॥ १०७ ॥
यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति। तथा रक्षेन्नृपोराष्ट्रं हन्याच्च परिपन्थिनः ॥ ११० ॥
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया। सोऽचिराद् भ्रश्यते राज्याज्जीविताच्च सबान्धवः॥१११॥

सदा अपनी सेनाकी शिक्षापर ध्यान रक्खे, अपने पुरुषार्थको देखा रहे, मन्त्र आदि कार्योंको गुप्त रक्खे और शत्रुके छिद्रोंको देखते रहे ॥ १०२ ॥ अपने अर्थके चिन्तनमें बगुलेके समान ध्यान लगाये रहे, सिंहके समान पराक्रम दिखावे, भेड़ियेके समान (शत्रुओंसे) अपना अर्थ साधन करे और आपत्कालमें खरहेके समान भाग जावे ॥ १०६ ॥ इस प्रकारसे राजाके विजयमें प्रवृत्त होनेपर जो लोग विरुद्धता करें राजा उनको साम, दान, भेद और दण्डके सहारे अपने वशमें लावे ॥ १०७ ॥ जैसे किसान लोग खेतीकी रक्षाके लिये सस्यके सहित उपजेहुए तृणोंको उखाड़ देते हैं वैसेही राजा दुष्टोंको नष्ट करके राज्यकी रक्षा करे ॥ ११० ॥ जो राजा अज्ञानवश होकर प्रजाओंको कष्ट देता है वह शीघ्रही राज्यच्युत होकर अपने वंशसहित नष्ट हो जाता है ॥ १११ ॥

उत्थाय पश्चिमे यामे कृतशौचः समाहितः। हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत्स शुभां सभाम् ॥१४५॥
तत्र स्थितः प्रजाः सर्वाः प्रतिनन्द्य विसर्जयेत्। विसृज्य च प्रजाः सर्वा मन्त्रयेत्सह मन्त्रिभिः॥१४६॥

यज्ञवलक्यस्मृति-१ अध्यायके३१३-३१४ श्लोक। दैवज्ञ, विद्वान् और दण्डनीति तथा अथर्ववेद जान-नेमें निपुण ब्राह्मणको राजा पुरोहित बनावे और श्रौतस्मार्त कर्म करनेकेलिये ऋत्विजोंका वरण करे। गौतम-स्मृति--११ अध्याय-१ अङ्क। राजाको चाहिये कि विद्वान, वक्ता, रूपवान, वयस्थ, सुशील न्यायपथमें चलने-वाले और तपस्वी ब्राह्मणको अपना पुरोहित बनावे; उसकी सम्मतिसे राज्यकार्य करे और दैवी उत्पातोंके चिन्तक (ज्योतिषी आदि) की बातोंका आदर करे; कोई आचार्य कहतेहैं कि उनके कहनेमुताबिक काम करें; क्योंकि वे लोग योगक्षेमकी बातोंको कहतेहैं।

याज्ञवल्क्यस्मृति-१ अध्यायके ३१७ श्लोकमें भी ऐसा है।

याज्ञवल्क्यस्मृति-१ अध्याय-३४६ श्लोक साम, दान, भेद और दण्ड; ये ४ उपाय हैं जो विचार-पूर्वक करनेसे सिद्ध होतेहैं; जब कोई उपाय नहीं लगसके तब दण्ड करना चाहिये।

राजाको उचित है कि रातके पिछले पहरमें उठकर प्रातःकालका शौच आदि करे, पश्चात् अग्निहोत्र तथा ब्राह्मणोंका सत्कार करके शुभ सभागृहमें जावे; सभामें स्थित प्रजाओंको यथायोग्य सत्कारसे सन्तुष्ट करके विदा करे और मन्त्रियोंके साथ कार्योंको विचारे ॥ १४५-१४६ ॥

क्षेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरीमपि । परित्यजेन्नृपो भूमिमात्मार्थमविचारयन् ॥ २१२ ॥
आपदर्थं धनं रक्षेद्दारान् रक्षेद्धनैरपि । आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ २१३ ॥
सह सर्वाः समुत्पन्नाः प्रसमीक्ष्यापदो भृशम् । संयुक्तांश्च वियुक्तांश्च सर्वोपायान् सृजेद्बुधः॥२१४॥
उपेतारमुपेयं च सर्वोपायांश्च कृत्स्नशः । एतत्त्रयं समाश्रित्य प्रयतेतार्थसिद्धये ॥ २१५ ॥
एवं सर्वमिदं राजा सह संमन्त्र्य मन्त्रिभिः । व्यायाम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत् २१६॥
तत्रात्मभूतैः कालज्ञैरहार्यैः परिचारकैः । सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः ॥ २१७ ॥

राजा कल्याणकरनेवाली, सदा सस्य उपजानेवाली और पशुओंकी वृद्धि करनेवाली भूमिको भी आत्मरक्षाकेलिये विना विचार कियेहुए छोड़देवे ॥ २१२ ॥ आपत्कालसे बचनेकेलिये धनकी रक्षा करे, धनका लोभ छोड़कर पत्नीकी रक्षा करे और धन तथा पत्नीका मोह छोड़कर सदा अपनी रक्षा करतारहे ॥ २१३ ॥ बुद्धिमान् राजा अनेक विपद् उपस्थित होनेपर भी अधीर नहीं होवे; किन्तु प्रयोजनके अनुसार एक ही साथ अथवा अलग अलग साम, दान आदि उपायोंको करे ॥ २१४ ॥ उपेता, उपेय और उपाय, इन तीनों द्वारा अर्थसिद्धिके लिये यत्न करे ※ ॥२१५ ॥ इसप्रकारसे मन्त्रियोंके सहित सब विषयोंका विचार और आयुधोंके अभ्याससे कसरत करके स्नान आदि मध्याह्नकर्म करनेके बाद भोजनके लिये रनिवासगृहमें जावे ॥ २१६ ॥ वहां योग्य सेवकद्वारा भोजनके पदार्थोंकी परीक्षा करके और विष दूरकरनेवाले मन्त्रोंसे उनको शुद्ध करके भोजन करे ॥ २१७ ॥

अलंकृतश्च संपश्येदायुधीयं पुनर्जनम् । वाहनानि च सर्वाणि शस्त्राण्याभरणानि च ॥ २२२ ॥
सन्ध्यां चोपास्य शृणुयादन्तर्वेश्मनि शस्त्रभृत् । रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितम्॥२२३॥
गत्वा कक्षान्तरं त्वन्यत्समनुज्ञाप्य तं जनम् । प्रविशेद्भोजनार्थं च स्त्रीवृतोऽन्तःपुरं पुनः ॥ २२४ ॥
तत्र भुक्त्वा पुनः किञ्चित्तूर्यघोषैः प्रहर्षितः । संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः ॥ २२५ ॥
एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः । अस्वस्थः सर्वमेतत्तु भृत्येषु विनियोजयेत् ॥ २२६ ॥

सन्ध्याकालमें अलंकृत होकर योद्धाओं, वाहनों, अस्त्र शस्त्रों और अलङ्कारोंकी परीक्षा करे ॥ २२२ ॥ सन्ध्यावन्दन करके सशस्त्र, राजमन्दिरमें जाकर संवाददाताओं तथा गुप्त दूतोंसे गुप्त कामोंको सुने; उनको बिदा करके भोजनके लिये रनिवास-गृहमें जावे ॥ २२३ ॥ २२४ ॥ वहां कुछ भोजन करके नगारे आदि बाजोंके शब्दसे आनन्दित होकर योग्यसमयमें शयन करे और सबेरे श्रमरहित होकर उठे ॥ २२५ ॥ शरीर आरोग्यरहनेपर इस प्रकारसे स्वयं राज्यशासन करे; किन्तु रोगग्रस्त होनेपर योग्यकर्मचारियोंपर राज्यकार्यका भार अर्पण करे ॥ २२६ ॥

८ अध्याय

स्वादानाद्वर्णसंसर्गात्त्वबलानां च रक्षणात् । बलं संजायते राज्ञः स प्रेत्येह च वर्धते ॥ १७२ ॥

न्यायपूर्वक धन लेनेसे, वर्णसङ्कर होनेसे प्रजाओंको बचानेसे और बलवानोंसे दुर्बलोंकी रक्षा करनेसे राजाका बल बढ़ताहै और इस लोक तथा परलोकमें उसको सुख मिलताहै ॥ १७२ ॥

तस्माद्यम इव स्वामी स्वयं हित्वा प्रियाप्रिये । वर्तेत याम्यया वृत्त्या जितक्रोधो जितेन्द्रियः ॥१७३॥
यस्त्वधर्मेण कार्याणि मोहात्कुर्यान्नराधिपः । अचिरात्तं दुरात्मानं वशे कुर्वन्ति शत्रवः ॥ १७४ ॥
कामक्रोधौ तु संयम्य योऽर्थान् धर्मेण पश्यति । प्रजास्तमनुवर्तन्ते समुद्रमिव सिन्धवः ॥ १७५ ॥

इसलिये राजा जितेन्द्रिय और जितक्रोध होकर यमराजके समान अपने प्रिय अप्रियका विचार छोड़कर वृत्ति अवलम्बन करे ॥ १७३ ॥ जो राजा मोहवश होकर अधर्मसे कार्य करताहै उस दुरात्माके शत्रु उसको शीघ्र ही पराजित करतेहैं ॥ १७४ ॥ जो राजा काम और क्रोधको जीतकर धर्मपूर्वक कार्योंको करताहै उसकी प्रजा इसभांति उसकी सहायक होतीहै जैसे नदियां समुद्रकी ॥ १७५ ॥

श्रोत्रियं व्याधितार्तौ च बालवृद्धावकिञ्चनम् । महाकुलीनमार्यं च राजा संपूजयेत्सदा ॥ ३९५ ॥

श्रोत्रिय, रोगी, आर्त्त, बालक, वृद्ध, अतिदरिद्री, बड़े कुलमें उत्पन्न और उत्तम चरित्रवाले मनुष्योंका राजा सदा दान मानसे सम्मान करे ॥ ३९५ ॥

※ उपाय करनेवालेको उपेता, उपाय करनेयोग्यको उपेय और साम; दान आदिको उपाय कहतेहैं ।

…र अपनी भार्यामें ही रत रहे,
…चाहिये कि नीतिशास्त्रमें
…पितरोंके कार्योंमें

९ अध्याय ।

आरभेतैव कर्माणि श्रान्तः श्रान्तः पुनःपुनः । कर्माण्यारभमाणं हि पुरुषं श्रीर्निष…

राज्यकी रक्षाकरना आदि कार्योंमें बार बार कठिनाई होनेपर भी राजा कार्यारम्भका त्या…
क्योंकि कार्यारम्भ करनेवाले पुरुषकी स्वयं लक्ष्मी सेवा करतीहै ॥ ३०० ॥

इन्द्रस्यार्कस्य वायोश्च यमस्य वरुणस्य च । चन्द्रस्याग्नेः पृथिव्याश्च तेजोवृत्तं नृपश्चरेत् ॥ ३०३ ॥
वार्षिकांश्चतुरो मासान्यथेन्द्रोऽभिप्रवर्षति । तथाभिवर्षेत्स्वं राष्ट्रं कामैरिन्द्रव्रतं चरन् ॥ ३०४ ॥
अष्टौ मासान्यथादित्यस्तोयं हरति रश्मिभिः । तथा हरेत्करं राष्ट्रान्नित्यमर्कव्रतं हि तत् ॥ ३०५ ॥
प्रविश्य सर्वभूतानि यथा चरति मारुतः । तथा चारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ॥ ३०६ ॥
यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति । तथा राज्ञा नियन्तव्याः प्रजास्तद्धि यमव्रतम् ॥ ३०७ ॥
वरुणेन यथा पाशैर्बद्ध एवाभिदृश्यते । यथा पापान्निगृह्णीयाद्व्रतमेतद्धि वारुणम् ॥ ३०८ ॥
परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः । तथा प्रकृतयो यस्मिन्स चान्द्रव्रतिको नृपः ॥ ३०९ ॥

राजाको उचित है कि इन्द्र, सूर्य, वायु, यम, वरुण, चन्द्रमा, अग्नि और पृथ्वीके तेजरूपकर्मको करे ॥ ३०३ ॥ जैसे इन्द्र वर्षाकालके चारोंमासमें जल वरसाताहै वैसे राजा प्रजाओंके प्रार्थित विषयोंको वरसाया करे ॥ ३०४ ॥ जैजे सूर्य आठमासतक अपनी किरणोंद्वारा पृथ्वीके रसको धीरे धीरे खींचताहै वैसे वह अपने राज्यसे धीरेधीरे "राज्यकर" ग्रहण करे ॥ ३०५ ॥ जैसे पवन सब प्राणियोंमें प्रवेश करके विचरताहै वैसे वह दूतोंद्वारा सर्वत्र प्रवेश करके राज्यकार्यको देखे ॥ ३०६ ॥ जैसे यमराज समय आजानेपर प्रिय और अप्रियका विचार नहीं करताहै वैसे वह अभियोगोंके विचारके समय शत्रुमित्रका भेद छोड़करके न्यायानुसार दण्डका विधान करे ॥ ३०७ ॥ जैसे वरुणकी फांसी दृढ़ बन्धन है, राजा भी उसीप्रकार पापियोंका निग्रह करे ॥ ३०८ ॥ जैसे पूर्णचन्द्रमाको देखकर मनुष्य आनन्द होतेहैं राजा ऐसा उद्योग करै कि उसीप्रकार उसको देखकर प्रजा आनन्दित होवें ॥ ३०९ ॥

प्रतापयुक्तस्तेजस्वी नित्यं स्यात्पापकर्मसु । दुष्टसामन्तहिंस्रश्च तदाग्नेयं व्रतं स्मृतम् ॥ ३१० ॥
यथा सर्वाणि भूतानि धरा धारयते समम् । तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ॥ ३११ ॥

पापी और दुष्टोंको दण्ड देनेकेलिये अग्निके समान प्रतापी और तेजस्वी होवे ॥ ३१० ॥ जैसे पृथ्वी सब प्राणियोंको समभावसे धारण करतीहै वैसे सब जीवोंको समभावसे पालन करे ॥ ३११ ॥

(२) याज्ञवल्क्यस्मृति–१ अध्याय ।

महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः । विनीतः सत्यसम्पन्नः कुलीनः सत्यवाक्शुचिः ॥ ३०९ ॥
अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽपरुषस्तथा । धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित् ॥ ३१० ॥
स्वरन्ध्रगोप्तान्वीक्षिक्यां दण्डनीत्यां तथैव च । विनीतस्त्वथ वार्तायां त्रय्यां चैव नराधिपः ॥ ३११ ॥

महा उत्साही, बहुदर्शी, कृतज्ञ, वृद्धसेवी, नम्रतायुक्त, सत्यसम्पन्न, कुलीन, सत्यवादी, पवित्र, शीघ्रतासे काम करनेवाला, स्मृतिमान्, गम्भीर, सरलस्वभाव, धार्मिक, व्यसनोंसे रहित, पण्डित, शूर, रहस्योंको जाननेवाला, अपने छिद्रोंको गुप्त रखनेवाला, न्याय विद्यामें प्रवीण, राजनीतिमें निपुण और तीनों वेदोंका ज्ञाता राजाको होना चाहिये ॥ ३०९–३११ ॥

कृतरक्षः समुत्थाय पश्येदायव्ययौ स्वयम् । व्यवहारांस्ततो दृष्ट्वा स्नात्वा भुञ्जीत कामतः ॥ ३२७ ॥
हिरण्यं व्यापृतानीतं भाण्डागारेषु निक्षिपेत् । पश्येच्चारांस्ततो दूतान्प्रेषयेन्मन्त्रिसंगतः ॥ ३२८ ॥

राजा प्रातःकाल उठकर प्रातःकालके कर्मोंको करके स्वयं अपनी आमदनी और खर्चको देखे उसके पश्चात् व्यवहार अर्थात् राजकार्यको देखे उसके पश्चात् मध्याह्नका स्नान करके अपनी रुचिके अनुसार भोजन करे ॥ ३२७ ॥ सुवर्णआदिके लानेमें नियुक्त कियेहुए मनुष्योंके लायेहुए सोने आदिको भण्डारमें रखवावे और मन्त्रियोंके सहित भेदिये और दूतोंके कामोंको देखे ॥ ३२८ ॥

ततः स्वैरविहारी स्यान्मन्त्रिभिर्वा समागतः । बलानां दर्शनं कृत्वा सेनान्या सह चिन्तयेत् ॥ ३२९ ॥
सन्ध्यामुपास्य शृणुयाच्चाराणां गूढभाषितम् । गीतनृत्यैश्च भुञ्जीत पठेत्स्वाध्यायमेव च ॥ ३३० ॥
संविशेत्तूर्यघोषेण प्रतिबुद्ध्येत्तथैव च । शास्त्राणि चिन्तयेद्बुद्ध्वा सर्वकर्तव्यतास्तथा ॥ ३३१ ॥
प्रेषयेच्च ततश्चारान्स्वेष्वन्येषु च सादरान् । ऋत्विक्पुरोहिताचार्यैराशीभिरभिनन्दितः ॥ ३३२ ॥
दृष्ट्वा ज्योतिर्विदो वैद्यान् दद्याद्गां काञ्चनं महीम् । नैवेशिकानि च ततः श्रोत्रियेभ्यो गृहाणि च ॥ ३३३ ॥
ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्रोधनोऽरिषु । स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता ॥ ३३४ ॥
पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन् । सर्वदानाधिकं यस्मात्प्रजानां परिपालनम् ॥ ३३५ ॥

राजाको उचित है स्त्रियोंके साथ यथेष्ट विहार करके अपनी सेनाको देखे और सेनापतिके साथ तथा ब्राह्मणोंका सत्कार करे ॥३२९॥ सन्ध्याकालमें सन्ध्योपासना करनेके पश्चात् चारगणोंका गुप्त भाषण करके विदा करे उसे प्रसन्न होकर भोजन करके फिर अपना पाठ पढ़े ॥ ३३० ॥ उसके पीछे राजाके क्षेम्यां ... करे और उसीप्रकार जागे और जागकर कर्त्तव्यकार्योंको करके शास्त्रोंका विचार करे ॥ ३३१ ॥ ... तथा अन्यके राज्यमे गुप्त दूतोंको आदरपूर्वक भेजे; ऋत्विक्, पुरोहित और आचार्यके आशीर्वादसे ... होकर ज्योतिषी और वैद्यको देखे; गौ, सोना, भूमि, विवाहके उपयोगी धन और गृह श्रोत्रिय ब्राह्मणोंको दान देवे ॥ ३३२-३३३ ॥ ब्राह्मणोंके विषयमे क्षमावान् होवे, मित्रोंसे निष्कपट वर्त्ताव करे, शत्रुओंके विषयमें क्रोधी होवे और भृत्यवर्ग तथा प्रजाओंसे पिताके समान वर्त्ताव करे ॥ ३३४ ॥ जो राजा न्यायपूर्वक प्रजाओंका पालन करताहै वह उनके पुण्यमेंसे छठवां भाग पाताहै; राजाके लिये प्रजाका पालन करना सब प्रकारके दानोंसे अधिक फलदायक है ॥ ३३५ ॥

अरक्षमाणाः कुर्वंति यत्किञ्चित्किल्बिषं प्रजाः। तस्मात्तु नृपतेरर्द्धं यस्माद् गृह्णात्यसौ करान्॥३३७॥
ये राष्ट्राधिकृतास्तेषां चारैर्ज्ञात्वा विचेष्टितम्। साधून्संमानयेद्राजा विपरीतांश्च घातयेत् ॥ ३३८ ॥
उत्कोचजीविनो द्रव्यहीनान्कृत्वा विवासयेत्। सदानमानसत्काराञ्श्रोत्रियान्वासयेत्सदा॥ ३३९ ॥
अन्यायेन नृपो राष्ट्रात्स्वकोशं योऽभिवर्द्धयेत्। सोऽचिराद्विगतश्रीको नाशमेति सबान्धवः ॥ ३४०॥

प्रजाओंकी रक्षा नहीं करनेसे उनके कियेहुए पापोका आधा भाग राजाको मिलताहै; क्योंकि रक्षा करनेके ही लिये वह प्रजाओंसे कर लेताहै ॥ ३३७ ॥ राजा गुप्त दूतोंद्वारा राजकर्मचारियोका आचरण जानकरके श्रेष्ठ काम करनेवालोका सम्मान करे और दुष्टकर्म करनेवालेको दण्ड देवे ॥ ३३८ ॥ प्रजाओसे घूस लेनेवाले राजकर्मचारीका सब धन छीनकर उसको राज्यसे बाहर करदेवे और दानमानसे सत्कार करके श्रोत्रिय ब्राह्मणोंको राज्यमें बसावे ॥ ३३९ ॥ जो राजा अन्यायसे अपने राज्यसे धन उपार्जन करके अपने खजानेको बढ़ाता है वह थोड़ेही कालमें निर्धन होकर अपने बान्धवोंसहित नष्ट होजाता है ॥ ३४० ॥

अधर्मदण्डनं स्वर्गं कीर्तिं लोकांश्च नाशयेत्। सम्यक्तु दण्डनं राज्ञः स्वर्गकीर्त्तिजयावहम् ॥ ३५७॥
अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपि वा। नादण्ड्यो नाम राज्ञोऽस्ति धर्माद्विचलितःस्वकात्॥३५८॥

जो राजा अधर्मसे दण्ड देता है उसका स्वर्ग, कीर्ति और लोक नाश होताहै और जो राजा विधिपूर्वक प्रजाओंको दण्ड देताहै उसको स्वर्ग, कीर्ति और जय प्राप्त होतीहै ॥ ३५७ ॥ राजाका धर्म है कि निज धर्मसे च्युत अपने भाई, पुत्र, अर्घदेनेयोग्य आचार्य आदि श्वशुर और मामाको भी दण्ड देवे क्योंकि अपने धर्मसे च्युत कोई भी राजाके लिये अदण्डय नहीं है ॥ ३५८ ॥

यो दण्ड्यान् दंडयेद्राजा सम्यग्वध्यांश्च घातयेत्। इष्टं स्यात्क्रतुभिस्तेन समाप्तवरदक्षिणैः ॥ ३५९॥

जो राजा दण्ड देनेयोग्य मनुष्योको दण्ड देताहै और वध करने योग्यका वध करताहै वह बड़ी दक्षिणावाले यज्ञोंके करनेका फल पाताहै ॥ ३५९ ॥

(६) अत्रिस्मृति।

दुष्टस्य दण्डः सुजनस्य पूजा न्यायेन कोशस्य च संप्रवृद्धिः।
अपक्षपातोऽर्थिषु राष्ट्ररक्षा पञ्चैव यज्ञाः कथिता नृपाणाम् ॥ २८ ॥
यत्प्रजापालने पुण्यं प्राप्नुवन्तीह पार्थिवाः। न तु क्रतुसहस्रेण प्राप्नुवन्ति द्विजोत्तमाः ॥ २९॥

दुष्टोंको दण्ड देना, श्रेष्ठ जनोंका पालन करना, न्यायसे धन बढ़ाना, पक्षपात रहित होकर विचार करना और राज्यकी रक्षा करना; ये ५ कर्म राजाओंके लिये पञ्चयज्ञके समान है ॥ २८ ॥ जो पुण्य राजाओंको प्रजापालन करनेसे मिलताहै वह पुण्य ब्राह्मण लोगोंको हजार यज्ञ करनेपर भी नहीं प्राप्त होताहै ॥२९॥

(७) हारीतस्मृति-२ अध्याय।

राज्यस्थः क्षत्रियश्चापि प्रजा धर्मेण पालयन्। कुर्यादध्ययनं सम्यग्यजेद्यज्ञान्यथाविधि ॥ २ ॥
दद्याद्दानं द्विजातिभ्यो धर्मबुद्धिसमन्वितः। स्वभार्यानिरतो नित्यं षड्भागार्हः सदा नृपः ॥ ३ ॥
नीतिशास्त्रार्थकुशलः सन्धिविग्रहतत्त्ववित्। देवब्राह्मणभक्तश्च पितृकार्यपरस्तथा ॥ ४ ॥

---

* मनुस्मृति—८ अध्याय। यदि पिता, आचार्य, मित्र, भ्राता, भार्या, पुत्र अथवा पुरोहित भी अपने धर्ममें स्थित नहीं रहें तो राजा उनको दण्डित करे ॥ ३३५ ॥ जिस अपराधके करनेसे अन्य लोगोंको १ पण दण्ड होवे, उस अपराधको यदि राजा स्वयं करे तो वह १ हजार पण दण्डके योग्य होगा ॥ ३३६ ॥

क्षत्रिय राजा धर्मानुसार प्रजापालन करे, वेद पढे, यज्ञ करे, दान देवे और अपनी भार्यामें ही रत रहे, ऐसा राजा अपनी प्रजाओंसे छठवां भाग राजकर लेनेयोग्य होताहै ॥२-३॥ उसको चाहिये कि नीतिशास्त्रमें प्रवीण होवे, सन्धि और विग्रहके तत्त्वोंको जाने, देवता और ब्राह्मणोंमें प्रीति रक्खे तथा पितरोंके कार्योंमें तत्पर रहे ॥ ४ ॥

(१३) पाराशरस्मृति–१ अध्याय ।

क्षत्रियो हि प्रजां रक्षञ्शस्त्रपाणिः प्रचण्डवत् । निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेत् ॥ ६७ ॥

क्षत्रिय राजा शस्त्र ग्रहण करके प्रचण्डभावसे प्रजाओंकी रक्षा करे और शत्रुकी सेनाको जीतकर धर्मपूर्वक पृथ्वीको पाले ॥ ६७ ॥

न श्रीः कुलक्रमायाता भूषणोल्लिखिताऽपि वा । खड्गेनाक्रम्य भुञ्जीत वीरभोग्या वसुन्धरा ॥६८॥
पुष्पंपुष्पं विचिनुयान्मूलच्छेदं न कारयेत् । मालाकार इवाऽऽरामे न यथाङ्गारकारकः ॥ ६९ ॥

लक्ष्मी कुलपरम्परासे नहीं आती और भूषणोसे भी नही जानीजाती; अपने तलवारके बलसे राजा पृथ्वीको भोगे; क्योंकि पृथ्वी वीरोके भोगने योग्य है ॥ ६८ ॥ जैसे माली वृक्षोंको जडसे नही उपारकर उनके फूल फलको ही तोड़ताहै वैसे ही राजा प्रजाओंसे थोड़ा थोड़ा राजकर लेवे; जैसे कोयले बनानेवाले वृक्षोंको काटडालतेहैं वैसे राजा बहुत कर लेकर प्रजाका नाश नही करे ॥ ६९ ॥

(१५) शंखस्मृति–५ अध्याय ।

न व्रतैर्नोपवासैश्च न च यज्ञैः पृथग्विधैः । राजा स्वर्गमवाप्नोति प्राप्नोति परिपालनात् ॥ ९ ॥

व्रत, उपवास और अनेकभांतिके यज्ञोको करनेसे राजाको स्वर्ग नही मिलताहै; किन्तु प्रजाके पालन करनेसे ही प्राप्त होताहै ॥ ९ ॥

(१६क) शंखलिखितस्मृति ।

गावो भूमिः कलत्रं च ब्रह्मस्वहरणं तथा । यस्तु न त्रायते राजा तमाहुर्ब्रह्मघातकम् ॥ २४ ॥
दुर्बलानामनाथानां बालवृद्धतपस्विनाम् । अन्यायैः परिभूतानां सर्वेषां पार्थिवो गतिः ॥ २५ ॥
पक्षिणां बलमाकाशं मत्स्यानामुदकं बलम् । दुर्बलस्य बलं राजा बालस्य रुदितं बलम् ॥ २८ ॥
बलं मूर्खस्य मौनत्वं तस्करस्यानृतं बलम् ॥ २९ ॥

जो राजा गौ, भूमि, कलत्र और ब्रह्मस्वकी रक्षा नही करताहै वह ब्रह्मघातक कहलाताहै ॥ २४ ॥ दुर्बल, अनाथ, बालक, वृद्ध तपस्वी आदि मनुष्योंकी राजा ही गति है ॥ २५ ॥ पक्षियोंका बल आकाश, मछलियोंका बल जल, दुर्बलोंका बल राजा, बालकोंका बल रोना, मूर्खोंका बल मौन होना और चोरोंका बल झूठ बोलना है ॥ २८ ॥ २९ ॥

(१८) गौतमस्मृति–१० अध्याय ।

राज्ञोधिकं रक्षणं सर्वभूतानां न्याय्यदण्डत्वं बिभृयाद् ब्राह्मणाञ्श्रोत्रियान्निरुत्साहांश्चाब्राह्मणानकरांश्चोपकुर्वाणांश्च योगश्च विजये भये विशेषेण चर्या च, रथधनुर्भ्यां संग्रामे संस्थानमनिवृत्तिश्च ॥ २ ॥

वेद पढ़ना, यज्ञ करना और दान देना, इन ३ कर्मोंके सिवाय राजाका धर्म है कि सब प्राणियोंकी रक्षा, न्यायपूर्वक दण्डका विधान, श्रोत्रिय ब्राह्मण, उत्साहहीन क्षत्रियादि और राजकरदेनेमें असमर्थ उपकारी पुरुषोंका प्रतिपालन करे । विजयका उद्योग करता रहे; आपत्कालमें तर्कका विशेष अवलम्बन करे और रथ और आयुधके सहित संग्राममें खडे होजावे; संग्रामसे पीछे नही हटे ॥ २ ॥

११ अध्याय ।

राजा सर्वस्येष्टे ब्राह्मणवर्जं साधुकारी स्यात् साधुवादी त्रय्यामान्वीक्षिक्यां चाभिविनीतः शुचिर्जितेन्द्रियो गुणवत्सहायोपायसम्पन्नः समः प्रजासु स्याद्धितं चासां कुर्वीत तमुपर्यासीनमधस्तादुपासीरन्नन्ये ब्राह्मणेभ्यस्तेऽप्येनं मन्येरन्, वर्णानाश्रमांश्च न्यायतोऽभिरक्षेच्चलतश्चैनान्स्वधर्मे एव स्थापयेद् धर्मस्योंऽशभाग्भवतीति विज्ञायते ॥ १ ॥

ब्राह्मणको छोड़कर राजा सब मनुष्योंका स्वामीहै, उसको उचित है कि उत्तम कर्म करे सत्य वचन बोले, वेदशास्त्रकी उत्तम शिक्षा प्राप्त करे, विनीत स्वभाव रक्खे, पवित्र रहे, जितेन्द्रिय होवे, गुणवान्को अपना सहायक बनावे, उपायशील होवे, सब प्रजाओंको समान दृष्टिसे देखे, प्रजाओके हित करनेमे तत्पर रहे, राज-

सिंहासपर बैठे, ब्राह्मणोंके अतिरिक्त सब प्रजा नीचे बैठे, ब्राह्मण राजाका मान करें, राजा चारो वर्ण और चारो आश्रमोंके मनुष्योंकी रक्षा करे और उनको निज निज धर्ममें स्थित रक्खे; क्योंकि ये लोग अधर्म करतेहैं तो अधर्मका भाग राजाको भी मिलताहै ॥ १ ॥

(२०) वसिष्ठस्मृति-१अध्याय ।

त्रयो वर्णा ब्राह्मणस्य वशे वर्त्तेरन् ॥ ४० ॥ तेषां ब्राह्मणो धर्मान् प्रब्रूयात् ॥ ४१ ॥ तं राजा चानुशिष्यात् ॥ ४२ ॥

क्षत्रिय आदि तीनो वर्ण ब्राह्मणके उपदेशानुसार काम करें ॥ ४० ॥ उन सबको ब्राह्मण यथाधिकार धर्मोपदेश देवें ॥ ४१ ॥ जो ब्राह्मण अपने धर्मपर नहीं रहे राजा उसको दण्डित करे ॥ ४२ ॥

१९ अध्याय ।

स्वधर्मो राज्ञः पालनं भूतानां तस्यानुष्ठानात् सिद्धिः ॥ १ ॥ राजा चतुरो वर्णान् स्वधर्मे स्थापयेत् ॥ ५ ॥ तेष्वपचरत्सु दण्डं धारयेत् ॥ ६॥ दण्डस्तु देशकालधर्मवयोविद्यास्थानविशेषैर्हिंसाक्रोशयोः कल्प्य आगमाद् दृष्टान्ताच्च॥७॥ क्लीबोन्मत्तान् राजा बिभृयात्तद्गामित्वाद्रिक्थस्य ॥२३॥

सब प्राणियोंका पालन करना ही राजाका प्रधान धर्म है, उसीसे उसकी सिद्धि होती है ॥ १ ॥ राजाको उचित है कि चारों वर्णोके मनुष्योंको अपने अपने धर्ममें स्थित रक्खे ॥ ५ ॥ यदि वे लोग निज धर्मोंको छोड़ें तो उनको दण्ड देवे ॥ ६ ॥ हिंसा और वाक्पारुष्यके विषयमें देश, काल, धर्म, वयस, विद्या और स्थानके अनुसार शास्त्र और लोकदृष्टान्तसे दण्डकी कल्पना करे ॥ ७ ॥ नपुंसक और उन्मत्तकी रक्षा करे; क्यों कि अन्तमें उनका धन राजाको ही मिलेगा ॥ २३ ॥

राज्यप्रबन्ध ३.

(१) मनुस्मृति-७अध्याय ।

मौलाञ्छास्त्रविदः शूराँल्लब्धलक्षान्कुलोद्गतान् । सचिवान्सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान् ॥५४ ॥
तेषां स्वंस्वमभिप्रायमुपलभ्य पृथक्पृथक् । समस्तानां च कार्येषु विदध्याद्धितमात्मनः ॥ ५७ ॥
सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता । मन्त्रयेत्परमं मन्त्रं राजा षाड्गुण्यसंयुतम् ॥ ५८ ॥
नित्यं तस्मिन्समाश्वस्तः सर्वकार्याणि निक्षिपेत् । तेन सार्धं विनिश्चित्य ततः कर्म समारभेत् ॥५९॥
अन्यानपि प्रकुर्वीत शुचीन्प्राज्ञानवस्थितान् । सम्यगर्थसमाहर्तॄनमात्यान्सुपरीक्षितान् ॥ ६० ॥
निर्वर्त्तेतास्य यावद्भिरितिकर्तव्यता नृभिः । तावतोऽतन्द्रितान् दक्षान्प्रकुर्वीत विचक्षणान् ॥ ६१ ॥
तेषामर्थे नियुञ्जीत शूरान् दक्षान् कुलोद्गतान् । शुचीनाकरकर्मान्ते भीरूनन्तर्निवेशने ॥ ६२ ॥

राजाको उचित है कि वंशपरम्परासे राजाकर्मचारी, शास्त्रोंके जाननेवाले, वीर, युद्धविद्यामें निपुण, उत्तम कुलसे उत्पन्न और परीक्षामें योग्य ७ अथवा ८ मन्त्रियोंको रक्खे ॥ ५४ ॥ पहिले एकान्तमें प्रत्येक मन्त्रियोंके पृथक् पृथक् मत लेकर विचार करके निज सिद्धान्तके अनुसार अपने हितकर कार्योंको करे॥५७॥ इन मन्त्रियोंमेसे विद्वान् ब्राह्मणके साथ सन्धि, विग्रह, चढ़ाई, आसन, द्वैध और आश्रय; इन ६ विषयोंमें सलाह करे ॥ ५८ ॥ इसपर विश्वास करके सब कार्योंका भार छोड़ ओर इसके मत लेकर नये कामोंको करे ॥ ५९ ॥ इसके अतिरिक्त पवित्र स्वभाववाले, बुद्धिमान्, दृढनिश्चयवाले, न्यायसे धन बटोरनेवाले और परीक्षामें उत्तीर्णको मन्त्री बनावे॥६०॥सम्पूर्ण राज्य कार्योंमें आलस्यरहित कार्यमें चतुर और बुद्धिमान् लोगोको नियत करे॥६१॥ इनमेंसे वीर, चतुर, अच्छे कुलमें उत्पन्न और पवित्रस्वभाववालोंको सुवर्ण आदि द्रव्यकी खानिके काममें और धान्यादि संग्रहके कार्यमें और धर्मसे डरनेवालोंको रनिवासगृहमें नियुक्त करे ॥ ६२ ॥

दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् । इंगिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥ ६३ ॥
अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित् । वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ॥६४ ॥
अमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया । नृपतौ कोशराष्ट्रे च दूते सन्धिविपर्ययौ ॥ ६५ ॥

सब शास्त्रोंको जाननेवाले, सङ्केत, आकार और चेष्टाको समझनेवाले; पवित्र, चतुर और कुलीनको दूतका काम सौंपे; सर्वप्रिय, पवित्रस्वभाववाला, चतुर, स्मृति रखनेवाला, देशकालका जाननेवाला सुन्दर रूपवाला, निडर और सुवक्ता राजदूत प्रशंसाके योग्य होता है ॥६३॥ ६४ ॥ मन्त्रीके आधीन दण्ड, दण्डके आधीन सुशिक्षा, राजाके आधीन खजाना और देश और राजदूतके आधीन सन्धि विग्रह हैं ॥ ६५ ॥

जांगलं सस्यसम्पन्नमार्यप्रायमनाविलम्। रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत् ॥ ६९ ॥
धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा। नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम् ॥ ७० ॥
सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्। एषां हि बहुगुण्येन गिरिदुर्गं विशिष्यते ॥ ७१ ॥
त्रीण्याद्यान्याश्रितास्त्वेषां मृगगर्ताश्रयाऽप्चराः। त्रीण्युत्तराणि क्रमशः प्लवंगमनरामराः ॥७२ ॥

जाङ्गल (जिसमें तृण और जल कम हो और वायु तथा घाम बहुत होता हो उसको जाङ्गल कहते हैं) धान्य आदिकी खेतीसे पूर्ण, धार्मिक मनुष्योंसे युक्त, रोगादि उपद्रवोंसे रहित, रमणीय, नम्र प्रजाओंसे युक्त और खेती, वाणिज्य आदि जीविकाओंसे युक्त देशमें राजा निवास करे ॥ ६९ ॥ वहां धन्वदुर्ग, महीदुर्ग, जलदुर्ग, वृक्षदुर्ग, मनुष्यदुर्ग अथवा गिरिदुर्गके ❀ आश्रयवाले नगरमें निवास करे ॥ ७० ॥ इनमेंसे गिरि दुर्गमें विशेष गुण है, इसलिये राजाको यत्नपूर्वक उसीका आश्रय लेना चाहिये ॥ ७१ ॥ इन किलोंमें पहिले कहेहुए तीनमेंसे धन्वदुर्गमें मृग, महीदुर्गमें विलोंमें रहनेवाले मूस आदि और जलदुर्गमें मगर आदि जलजन्तु और पिछले तीनमेंसे वृक्षदुर्गमें वानर, मनुष्यदुर्गमें मनुष्य और गिरिदुर्गमें देवता रहते हैं ॥ ७२ ॥

यथा दुर्गाश्रितानेतान्नोपहिंसन्ति शत्रवः। तथारयो न हिंसन्ति नृपं दुर्गसमाश्रितम् ॥ ७३ ॥
एकः शतं योधयति प्राकारस्थो धनुर्धरः। शतं दशसहस्राणि तस्माद् दुर्गं विधीयते ॥ ७४॥
तत्स्यादायुधसंपन्नं धनधान्येन वाहनैः। ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ॥ ७५ ॥
तस्य मध्ये सुपर्याप्तं कारयेद्गृहमात्मनः। गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितम् ॥ ७६ ॥

जैसे दुर्गमस्थानमें रहनेसे मृग आदि वनजन्तुओंको व्याधे नहीं मारसकते हैं वैसे ही किलेमें निवास करनेपर राजाके शत्रु उसका अनिष्ट नहीं करसकते हैं ॥ ७३ ॥ किलेके भीतर रहकर एक योद्धा बाहरके शत्रुके १०० वीरोंसे और किलेके १०० योद्धा बाहरके १०,००० वीरोंसे लड़सकते हैं ॥ ७४ ॥ राजाको उचित है कि आयुध, धन, धान्य, वाहन, ब्राह्मण, शिल्पी, यन्त्र, तृण और जलसे किलेको पूर्ण रक्खे और किलेके मध्यमें जल, वृक्ष आदि उपयोगी सामानोंके सहित राजमहल बनावे ✠ ॥ ७५ ॥ ७६ ॥

द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितम्। तथा ग्रामशतानां च कुर्याद्राष्ट्रस्य संग्रहम् ॥ ११४ ॥
ग्रामस्याधिपतिं कुर्याद्दशग्रामपतिं तथा। विंशतीशं शतेशं च सहस्रपतिमेव च ॥ ११५ ॥
ग्रामदोषान्समुत्पन्नान्ग्रामिकः शनकैः स्वयम्। शंसेद् ग्रामदशेशाय दशेशो विंशतीशिनम् ॥ ११६ ॥
विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत्। शंसेद् ग्रामशतेशस्तु सहस्रपतये स्वयम् ॥ ११७ ॥

राज्यकी रक्षाके लिये दो, तीन, पांच तथा एकसौ गांवोंके बीचमें रक्षकदल स्थापित करे ॥ ११४ ॥ प्रति गांवमें एकएक, १० गांवोंमें एक, २० गांवोंमें एक और १ हजार गांवोंमें एक अधिपति नियुक्त करे ॥ ११५ ॥ गांवके चोरी आदि दोषोंके प्रबन्ध करनेमें असमर्थ होनेपर १ गांवका अधिपति १० गांवोंके अधिपतिसे, १० गांवोंका अधिपति २० गांवोंके स्वामीसे, २० गांवोंका स्वामी एकसौ गांवोंके स्वामीसे और एकसौ गांवोंका अधिपति एकहजार गांवोंके स्वामीसे कहे ॥ ११६–११७ ॥

यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः। अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात् ॥११८॥
दशी कुलन्तु भुञ्जीत विंशी पञ्चकुलानि च। ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरम् ॥ ११९ ॥

गांवके लोग जो प्रतिदिन अन्न, जल और लकड़ी आदि राजाकेलिये देवें वह गांवके अधिपति लेवें ॥ ॥ ११८ ॥ ६ बैलोंसे चलनेवाले ५ हलोंसे जोतनेयोग्य भूमिको 'कुल' कहतेहैं, उतनी भूमि १० गांवोंके स्वामीको; उससे पांच गुनी भूमि २० गांवोंके अधिपतिको; १ गांव १०० गांवोंके स्वामीको और १ नगर १००० गांवोंके अधिपतिको वृत्तिरूपसे राजा देवे ॥ ११९ ॥

तेषां ग्राम्याणि कार्याणि पृथक्कार्याणि चैव हि। राज्ञोऽन्यः सचिवः स्निग्धस्तानि पश्येदतन्द्रितः१२०
नगरे नगरे चैकं कुर्यात्सवार्थचिन्तकम् ॥ १२१ ॥
ये कार्यिकेभ्योऽर्थमेव गृह्णायुः पापचेतसः। तेषां सर्वस्वमादाय राजा कुर्यात्प्रवासनम् ॥ १२४ ॥

❀ धनुपाकार किलेको धन्वदुर्ग, ऊंची और विशेष चौड़ी तथा दृढ दीवारोंसे घेरेहुए मैदानके किलेको महीदुर्ग, अगाध जलसे घेरेहुए किलेको जलदुर्ग, कोसोंतक सघन वृक्षादिकोंसे घेरेहुए किलेको वृक्षदुर्ग, सेनाओंसे रक्षित किलेको मनुष्यदुर्ग और आवश्यकीय वस्तुओंसे युक्त पहाड़के ऊपरके किलेको गिरिदुर्ग कहते हैं।

✠ याज्ञवल्क्यस्मृति–१ अध्याय। राजा रमणीक और पशुओंके हितकारक जाङ्गल देशमें निवास करे; वहां जन, कोष और आत्माकी रक्षाके लिये किला बनावे ॥ ३२१ ॥ चतुर, शुद्ध, आय-कर्म और व्यय-कर्ममें उत्तम अध्यक्षोंको नियत करे ॥ ३२२ ॥

राजा गांवोंके स्वामियोंके गांव सम्बन्धी तथा अन्य कार्योंको देखनेकेलिये आलसरहित और हितकारी एक मन्त्रीको नियुक्त करे और नगरोंके वृत्तान्तोंको जाननेकेलिये प्रत्येक नगरमें एक सच्चा, बुद्धिमान् तथा तेजस्वी कर्मचारीको नियत करदेवे ॥ १२०-१२१ ॥ कार्यार्थियोंसे अन्यायपूर्वक धन लेनेवाले कर्मचारियोंका सर्वस्व हरण करके उनको अपने राज्यसे बाहर करदेवे ॥ १२४ ॥

राजकर्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च । प्रत्यहं कल्पयेद्वृत्तिं स्थानकर्मानुरूपतः ॥ १२५ ॥
पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनम् । षाण्मासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः ॥१२६॥

राजकार्यमें नियुक्त दासी, तथा सेवकोंके पद तथा कार्योंकी श्रेष्ठताके अनुसार उनकी दैनिकवृत्ति निश्चय करे ॥ १२५ ॥ निकृष्ट दासदासीको नित्य एक पण, ❀ ६ महीनेपर २ वस्त्र और प्रतिमासमें १ द्रोण ✿ अन्न देवे और उत्तम दास, दासीको इससे छः गुना देवे ॥ १२६ ॥

८ अध्याय।

बालदायादिकं रिक्थं तावद्राजानुपालयेत् । यावत्स स्यात्समावृत्तो यावच्चातीतशैशवः ॥ २७ ॥
वन्ध्याऽपुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च । पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च ॥ २८ ॥
जीवन्तीनान्तु तासां ये तद्धरेयुः स्वबान्धवाः । तांश्छिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः ॥२९॥

राजाको उचित है कि अनाथ बालक जबतक गुरुके गृहसे पढ़कर अपने घरमें नहीं आवे अथवा बालकअवस्थामें रहे तबतक उसके धनकी रक्षाकरे ✾ ॥ २७ ॥ इसीप्रकार वन्ध्या, पुत्रहीना, कुलहीना, पतिव्रता, विधवा और रोगिणी स्त्रियोंकी सम्पत्तिपर ध्यान रक्खे ॥ २८ ॥ इनकी जीवितअवस्थामें इनके धन लेलेनेवाले इनके बान्धवोंको धार्मिक राजा चोरके समान दण्ड देवे ॥ २९ ॥

प्रणष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत् । अर्वाक् त्र्यब्दाद्धरेत्स्वामी परेण नृपतिर्हरेत् ॥ ३०॥
ममेदमिति यो ब्रूयात्सोऽनुयोज्यो यथाविधि । संवाद्य रूपसंख्यादीन्स्वामी तद्द्रव्यमर्हति ॥ ३१ ॥
अवेदयानो नष्टस्य देशं कालं च तत्त्वतः । वर्णं रूपं प्रमाणं च तत्समं दण्डमर्हति ॥ ३२ ॥

यदि किसीका नष्टहुआ धन राजाको मिलजावे तो वह उसको पोषण कराके ३ वर्षतक अपने पास रक्खे; धनके स्वामीके नहीं आनेपर ३ वर्षके बाद उसको लेलेवे ❁ ॥ ३० ॥ यदि धनका स्वामी ३ वर्षके भीतर आकर उसका रूप, उसकी संख्या तथा धन सम्बन्धी सब घटना कहके उसको अपना होनेका प्रमाण देवे तो राजा उसको वह धन देदेवे ॥ ३१ ॥ यदि वह नष्ट धनका स्थान, समय, रङ्ग, रूप और परिमाण नहीं जानता होवे तो उसपर उस धनके समान दण्ड करे ▦ ॥ ३२ ॥

आददीताथ षड्भागं प्रणष्टाधिगतान्नृपः । दशमं द्वादशं वापि सतां धर्ममनुस्मरन् ॥ ३३ ॥
प्रणष्टाधिगतं द्रव्यं तिष्ठेद्युक्तैरधिष्ठितम् । यांस्तत्र चौरान्गृह्णीयात्तान्राजेभेन घातयेत् ॥ ३४ ॥

खोये हुए धनकी रक्षा करनेके बदलेमें धनके छठवां, दशवां अथवा बारहवां भाग धनके स्वामीसे राजा लेलेवे ❃ ॥ ३३ ॥ किसीकी खोईहुई वस्तु राजाके पास आवे तो राजा उसको योग्य कर्मचारीको सौंपदेवे यदि कोई उस वस्तुको चोरालेवे तो उसको हाथीसे मरवाडाले ॥ ३४ ॥

❀ ८० रत्ती ताम्बेका एक पण होताहै।

✿ १६ गण्डेभरका १ प्रस्थ और १६ प्रस्थका १ द्रोण होताहै।

✾ गौतमस्मृति—१० अध्यायके २ अङ्कमें भी ऐसा है।

❁ याज्ञवल्क्यस्मृति-२ अध्याय-१७७ श्लोक। यदि किसीकी नष्टहुई अथवा चोरी गईहुई वस्तु राज-कर्मचारी लेआवें तो राजा उसका विज्ञापन देकर उसको एकवर्षतक रक्खे; उसके स्वामीके नहीं आनेपर एकवर्षके पश्चात् उस वस्तुको लेलेवे।

▦ याज्ञवल्क्यस्मृति-२ अध्याय-३४ श्लोक। यदि किसीका खोयाहुआ धन राजाको मिलजावे तो राजा उसके स्वामीको वह धन देदेवे, किन्तु यदि वह अपने धनका ठीक चिह्न आदि नहीं बतासके तो उस धनके बराबर उससे दण्ड लेवे। गौतमस्मृति-१० अध्याय-२ अङ्क। यदि किसीकी खोईहुई वस्तु कोई पालेवे तो वह उसकी खबर शीघ्र ही राजाको देवे; राजा उसका विज्ञापन देकर उसको १ वर्षतक अपने पास रक्खे; यदि एक वर्षतक उसका स्वामी नहीं आवे तो उसका चौथाईभाग पानेवालेको देकर सब वस्तु आप लेलेवे।

❃ याज्ञवल्क्यस्मृति—२ अध्याय-१७८ श्लोक। रक्षा करनेके बदलेमें घोडे आदि एकखुरवाले पशुके स्वामीसे ४ पण; मनुष्यके स्वामीसे ५ पण; भैंस, ऊंट और गौके स्वामीसे २ पण और बकरी तथा भेड़के स्वामीसे चौथाई पण राजा लेवे।

ममायमिति यो ब्रूयान्निधिं सत्येन मानवः । तस्याददीत षड्भागं राजा द्वादशमेव वा ॥ ३५ ॥
अनृतं तु वदन्दंड्यः स्ववित्तस्यांशमष्टमम् । तस्यैव वा निधानस्य संख्यायाल्पीयसीं कलाम् ॥ ३६ ॥

जो मनुष्य भूमिके भीतर मिलेहुए धनको अपना प्रमाणित करे राजा उससे छठा अथवा बारहवां भाग लेकर उसका धन उसको देदेवे ॥ ३५ ॥ यदि वह झूठा प्रमाणित होवे तो राजा उससे उस धनके आठवें भागके बराबर अथवा अल्प अंश दण्ड लेवे ※ ॥३६ ॥

विद्वांस्तु ब्राह्मणो दृष्ट्वा पूर्वोपनिहितं निधिम् । अशेषतोऽप्याददीत सर्वस्याधिपतिर्हि सः ॥ ३७ ॥
यं तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ । तस्माद्द्विजेभ्यो दत्त्वार्धमर्धं कोशे प्रवेशयेत् ॥ ३८ ॥
निधीनां तु पुराणानां धातूनामेव च क्षितौ । अर्धभाग्रक्षणाद्राजा भूमेरधिपतिर्हि सः ॥ ३९ ॥

विद्वान् ब्राह्मण यदि भूमिमें गड़ाहुआ धन पावेगा तो उसको उसमेंसे राजाका भाग नहीं देना पड़ेगा क्योंकि वह सबका स्वामी है ॥ ३७ ॥ राजा भूमिमें गाड़ाहुआ धन पावे तो उसका आधा भाग ब्राह्मणको देकर आधा भाग अपने भण्डारमें रक्खे ※ ॥ ३८ ॥ यदि कोई मनुष्य भूमिके भीतरका पुराना धन अथवा सोना आदि धातुकी खानि पावे तो उसमेंसे आधा राजाको देवे; क्योंकि राजा रक्षक और भूमिका स्वामी है ॥ ३९ ॥

जातिजानपदान्धर्माञ्छ्रेणीधर्मांश्च धर्मवित् । समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत् ॥ ४१ ॥

धर्मज्ञ राजा जातिधर्म; देशधर्म; श्रेणीधर्म और कुलधर्मकी ओर विशेष ध्यान देकर, जिसमें इन धर्मोंमें विरुद्ध नहीं पड़े, देश प्रबन्धके लिये नियम बनावे ※ ॥ ४१ ॥

यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक् । न साहसिकदण्डघ्नौ स राजा शक्रलोकभाक् ३८६
एतेषां निग्रहो राज्ञः पञ्चानां विषये स्वके । साम्राज्यकृत्सजात्येषु लोके चैव यशस्करः ॥ ३८७ ॥

जिस राजाके राज्यमें चोर, परस्त्रीगामी, कठोरवादी, डाकू और दण्डपारुष्य करनेवाला नहीं है, वह इन्द्रलोकमें वसताहै; इन पाचोंको अपने राज्यसे बाहर रखनेवाला राजा सब राजाओंमें उत्तम राज्य करने वाला कहलाताहै और जगत्में यश पाताहै ॥ ३८६-३८७ ॥

९ अध्याय।

स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत्तथा । सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते ॥ २९४ ॥

राजा, मन्त्री, किला, देश अर्थात् प्रजा, खजाना, सेना और मित्र; ये ७ राज्यके मूल कारण है इसलिये राज्यको सप्ताङ्ग कहते है ※ ॥ २९४ ॥

राज्य-कर ४.

(१) मनुस्मृति-७ अध्याय।

क्रयविक्रयमध्वानं भक्तं च सपरिव्ययम् । योगक्षेमं च संप्रेक्ष्य वणिजो दापयेत्करान् ॥ १२७ ॥
यथा फलेन युज्येत राजा कर्त्ता च कर्मणाम् । तथावेक्ष्य नृपो राष्ट्रे कल्पयेत्सततं करान् ॥ १२८॥
यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः । तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः॥१२९॥

राजाको उचित है कि वस्तुओंके क्रयविक्रयके मूल्य, लाने भेजनेके फासिले, खरच, रक्षाका खरच और व्यवसायके लाभका विचार करके वाणिज्यकी वस्तुओंपर राजकर नियत करे ॥ १२७ ॥ जिसमें राजा और वणिक् आदि प्रजा अपने अपने कार्योंका फल पासके ऐसा विचार कर राजा सदा "कर" निश्चय करे ॥ १२८ ॥ जैसे जोंक थोड़ा रुधिर, वछड़ा थोड़ा दूध और भँवरा थोड़ा रस पीता है वैसेही राजा अपनी प्रजाओंसे थोड़ा २ वार्षिक कर लेवे ॥ १२९ ॥

※ याज्ञवल्क्यस्मृति—२ आध्यायके-३६ श्लोकमें । ब्राह्मणसे भिन्न किसीका भूमिमें गड़ा हुआ धन किसीको मिलजावे तो राजा पानेवालेको छठा भाग देकरके बाकी आप लेलेवे; यदि कोई ऐसा धन पाकरके राजासे नही बतावे तो राजा उससे वह धन छीनलेवे और उसको दण्ड देवे । वसिष्ठस्मृति—३ अध्यायके-१४ अङ्क । अज्ञात गड़ा हुआ धन किसीको मिल जावे तो राजा उसको उसका छठवां भाग देकर शेषको लेलेवे ।

※ याज्ञवल्क्यस्मृति—२ अध्यायके ३५ श्लोकमें भी ऐसा है ।

※ याज्ञवल्क्यस्मृति—१ अध्याय-३४३ श्लोक । राजाको उचित है कि देश जीतने पर उस देशमें जो आचार, व्यवहार और कुलकी मर्यादा हो उसको उसीरीतिसे पालन करे ।

※ याज्ञवाल्क्यस्मृति—१ अध्यायके ३५३ श्लोकमें भी ऐसा है ।

पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः । धान्यानामष्टमो भागः षष्ठो द्वादश एव वा ॥ १३० ॥

वह पशु तथा सोनाके व्यापारियोंसे लाभका ५० वां भाग,❀ अन्नका ८ वां; ६ वां अथवा १२ वां भाग कर निश्चय करे ❀ ॥ १३० ॥

आददीताथ षड्भाग द्रुमांसमधुसर्पिषाम् । गन्धौषधिरसानां च पुष्पमूलफलस्य च ॥ १३१ ॥

पत्रशाकतृणानां च चर्मणां वैदलस्य च । मृन्मयानां च भाण्डानां सर्वस्याश्ममयस्य च ॥१३२ ॥

म्रियमाणोऽप्याददीत न राजा श्रोत्रियात्करम्। न च क्षुधाऽस्य संसीदेच्छ्रोत्रियो विषये वसन्॥१३३॥

संरक्ष्यमाणो राज्ञा यं कुरुते धर्ममन्वहम् । तेनायुर्वर्धते राज्ञो द्रविणं राष्ट्रमेव च ॥ १३६ ॥

यत्किञ्चिदपि वर्षस्य दापयेत्करसंज्ञितम् । व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम् ॥ १३७ ॥

वृक्ष, मांस, मधु, घी, चन्दन आदि सुगन्धयुक्त वस्तु, औषधी, रस, फूल, मूल, फल, पत्र, शाक, तृण, चाम, बांस मट्टीके पात्र और पत्थरके पात्रके व्यापारियोंसे उनके लाभमेंसे ६ वां भाग कर लेवे ❀ ॥ १३१-१३२ ॥ श्रोत्रिय ब्राह्मणोंसे कभी नहीं कर लेवे; किन्तु राज्यमें वसनेवाले क्षुधित श्रोत्रिय ब्राह्मणोंका पालन करे ॥ १३३ ॥ राजासे रक्षित होकर श्रोत्रिय ब्राह्मणोंके धर्मानुष्ठान करनेसे राजाके धन, आयु और राज्यकी वृद्धि होती है ॥ १३६ ॥ तुच्छ काम करके जीविका करनेवालोंसे वर्षमें नाममात्र थोड़ासा कर लेवे ॥ १३७ ॥

कारुकाञ्छिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः । एकैकं कारयेत्कर्म मासिमासि महीपतिः ॥ १३८ ॥

सोनार,चित्रकार आदि कारुक; लोहार, बढ़ई आदि शिल्पी और शरीरसे काम करके जीविका चलानेवाले शूद्रसे करके बदलेमें प्रति महीनेमें एक दिन अपना काम करालेवे ❀ ॥ १३८ ॥

नोच्छिन्द्यादात्मनो मूलं परेषां चातितृष्णया । उच्छिन्दन् ह्यात्मनो मूलमात्मानं तांश्च पीडयेत्१३९

राजा प्रजाओंपर दया करके कर लेना छोड़कर खजानेको नहीं घटावे और उनसे बहुत कर लेकरके उनका मूल नहीं उखाड़े ॥ १३९ ॥

८ अध्याय ।

अन्धो जडः पीठसर्पी सप्तत्या स्थविरश्च यः । श्रोत्रियेषूपकुर्वंश्च न दाप्याः केनचित्करम् ॥ ३९४ ॥

राजाको उचित है कि अन्ध, जड़, पंगु, ७० वर्षके बूढ़े, श्रोत्रिय और उपकारी मनुष्यसे किसीप्रकारका "राज्यकर" नहीं लेवे ॥ ३९४ ॥

पणं यानं तरे दाप्यं पौरुषोऽर्धपणं तरे । पादं पशुश्च योषिच्च पादार्धं रिक्तकः पुमान् ॥ ४०४ ॥

भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः । रिक्तभाण्डानि यत्किञ्चित्पुमांसश्चापरिच्छदाः॥४०५॥

दीर्घाध्वनि यथादेशं यथाकालं तरो भवेत् । नदीतीरेषु तद्विद्यात्समुद्रे नास्ति लक्षणम् ॥ ४०६ ॥

गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः । ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं तरे ॥४०७ ॥

नदीपार होनेवालोंमेंसे सवारीका १ पण, बोझेके सहित पुरुषका आधा पण, पशु और स्त्रियोंका चौथाई पण और विना बोझेके मनुष्यका एकपणका आठवां भाग राजा महसूल लेवे ॥ ४०४ ॥ भाण्डसे लदीहुई सवारीका महसूल उसके तौलके अनुसार और खाली भाण्ड तथा दरिद्री लोगोंसे बहुत थोड़ा महसूल लेवे ॥ ४०५ ॥ नदीके मार्गसे दूर देशमें जानेवाले मनुष्यसे देशकालका विचार करके और समुद्रमें यात्रा करनेवालेसे यथायोग्य महसूल लेवे ॥ ४०६॥ दो माससे अधिकको गर्भिणी स्त्री, संन्यासी, वानप्रस्थ, ब्राह्मण और ब्रह्मचारीसे नदीकी उतराई नहीं लेवे ॥ ४०७ ॥

१० अध्याय ।

चतुर्थमाददानोऽपि क्षत्रियो भागमापदि । प्रजारक्षन्परं शक्त्या किल्बिषात्प्रतिमुच्यते ॥ ११८ ॥

जो राजा अपने सामर्थ्यके अनुसार प्रजाकी रक्षा करनेमें तत्पर रहताहै वह आपत्कालमें प्रजाओंसे चौथाभाग कर लेनेपर भी अधिक कर लेनेके पापमें लिप्त नहीं होताहै ॥ ११८ ॥

❀ गौतमस्मृति-१० अध्यायके २ अङ्कमें भी ऐसा है ।

❀ गौतमस्मृति-१० अध्याय-२ अङ्क । खेती करनेवालोंसे राजा १० वां, ८ वां अथवा ६ ठा भाग कर लेवे ।

❀ गौतमस्मृति-१० अध्याय-२ अङ्क । मूल, फल, फूल, औषध, मधु, मांस, तृण और लकड़ी बेंचनेवालोंसे राजा लाभका ६ ठा भाग कर लेवे ।

❀ गौतमस्मृति-१० अध्याय २ अङ्क । लोहार, बढ़ई आदि शिल्पी तथा गाड़ीवान् आदिसे राजा प्रतिमहीनेमें एकदिन काम करालेवे; काम करानेके दिन उनको केवल भोजनमात्र देवे ।

शस्त्रेण वैश्यान् रक्षित्वा धर्म्यमाहारयेद्बलिम् ॥ ११९ ॥
धान्येऽष्टमं विशां शुल्कं विंशं कार्षापणावरम् । कर्मोपकरणाः शूद्राः कारवः शिल्पिनस्तथा॥१२०॥

राजा शस्त्रोंसे वैश्योंकी रक्षा करे और उनसे धर्मानुसार राजकर लेवे ॥ ११९ ॥ कृषक वैश्यसे धान्यका आठवां भाग और व्यापारकरनेवालोंसे पण्यके लाभका बीसवां भाग कर लेवे ❀ और कामकरनेवाले शूद्र तथा शिल्पीसे काम करवालेवे ॥ १२० ॥

(२०) वसिष्ठस्मृति-१ अध्याय।

राजा तु धर्मेणानुशासत् षष्ठं षष्ठं धनस्य हरेत् ॥ ४३ ॥ अन्यत्र ब्राह्मणात् ॥ ४४ ॥ इष्टापूर्तस्य तु षष्ठमंशं भजति-इति ह ब्राह्मणो वेदमाढ्यं करोति,ब्राह्मण आपद उद्धरति तस्माद्ब्राह्मणोऽनाद्यः४५

राजा धर्मानुसार प्रजाकी रक्षा करके उनके लाभमें छठा भाग करलेवे; किन्तु ब्राह्मणसे कुछ नहीं ले ॥ ४३-४४ ॥ ब्राह्मण जो यज्ञादि इष्टकर्म और जलाशय बनाना आदि पूर्त्तकर्म करताहै उसमें छठा भाग पुण्य-फल राजाको मिलताहै; ब्राह्मण वेद पढाताहै तथा आपत्से बचाताहै इसलिये राजा ब्राह्मणसे "राजकर" नहीं लेवे ॥ ४५ ॥

१९ अध्याय।

निरुदकस्तरोमोष्योऽकरः श्रोत्रियो राजपुमाननाथप्रव्रजितबालवृद्धतरुणप्रदातारः प्रागगामिकाः कुमार्यो मृतपत्न्यश्च ॥ १५ ॥ बाहुभ्यामुत्तरञ्छतगुणं दद्यात् ॥ १६ ॥ नदीकक्षवनदाहशैलोपभोगा निष्कराः स्युस्तदुपजीविनो वा दद्युः ॥ १७ ॥

राजाको चाहिये कि जलहीन खेत, वर्षासे डूबनेवाले खेत और जिसका अन्न चोर लेजातेहैं; ऐसे खेतोंका कर नहीं लेवे। श्रोत्रिय, राजवंशके लोग, अनाथ, संन्यासी, बालक, वृद्ध,ब्रह्मचारी, दाता, विधवा स्त्री और कुमारीकन्यासे राजकर नहीं लेवे ॥ १५ ॥ नदीमें भुजाओंसे पौरकर पार उतरनेवालेसे सौगुना महसूल लेवे ॥ १६ ॥ नदीके तीरके जलनेवाले वनके और पर्वतके ऊपरके खेतोंका राजकर नहीं ले अथवा उनसे जीविका करनेवालोंसे यथोचित कर लेवे ॥ १७ ॥

युद्ध ५.

(१) मनुस्मृति-७ अध्याय।

समोत्तमाधमै राजा त्वाहूतः पालयन्प्रजाः । न निवर्तेत संग्रामात्क्षात्रं धर्ममनुस्मरन् ॥८७॥
संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम् । शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम् ॥ ८८ ॥
आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः । युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ८९

प्रजापालक राजाका धर्म है कि समान बल, अधिक बल अथवा हीनबलवाला शत्रु यदि युद्धके लिये ललकारे तो "युद्धकरना ही क्षत्रियोंका धर्म है" ऐसा स्मरण करके कदापि युद्धसे मुख नहीं मोड़े ॥ ८७ ॥ युद्धसे नहीं हटना, प्रजाओंका पालन करना और ब्राह्मणोंका आदर करना; ये सब राजाओंके लिये महान् कल्याणकारी कर्म हैं ॥ ८८ ॥ जो राजा संग्राममें एक दूसरेके वधकी इच्छा करते हुए महा पराक्रमसे युक्त होकर पीछेको नहीं हटते हैं वे निर्विघ्नतासे स्वर्गमें चले जाते हैं ॥ ▩ ॥ ८९ ॥

न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून् । न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥ ९० ॥
न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम् । न मुक्तकेशं नासीनं न तवास्मीति वादिनम् ॥९१॥
न सुप्तं न विसन्नाहं न नग्नं न निरायुधम् । नायुध्यमानं पश्यन्तं न परेण समागतम् ॥ ९२ ॥

वीर लोगोंको उचित है कि जो देखनेमें शस्त्र नहीं जानपड़े ऐसे कूट आयुधसे, कांटेके आकारका फलक लगाहुआ बाणसे, विषैले बाणसे अथवा अग्निसे तपायेहुए बाणसे संग्राममें शत्रुको नहीं मारे ॥ ९० ॥ रथहीन होजानेवाले, नपुंसक, हाथ जोड़ेहुए, खुलेकेश भागतेहुए, युद्ध छोड़कर बैठेहुए अथवा शरणमें आयेहुए शत्रुका वध नहीं करे ॥ ९१ ॥ सोतेहुए; कवचसे हीन, नग्न, आयुधसे रहित, युद्धसे विमुख, युद्ध देखनेवाले अथवा दूसरेसे युद्ध करतेहुए मनुष्यको नहीं मारे ॥ ९२ ॥

❀ गौतमस्मृति-१० अध्याय-२ अङ्क। वैश्यसे सौदाका महसूल राजा २० वां भाग लेवे; सौदामें लाभ नहीं होवे तो कुछ नहीं ले। याज्ञवल्क्यस्मृति-२ अध्याय-२६६ श्लोक। जो व्यापारी महसूल देनेके समय मालकी संख्याके विषयमें झूठ कहे, जो महसूल देनेकी जगहसे छिप करके जानेकी चेष्टा करे और जो क्रय विक्रयके विषयमें बहाना करे उनसे राजा महसूलका अठगुना दण्ड लेवे।

▩ याज्ञवल्क्यस्मृति-१ अध्याय-३२४ श्लोक। जो राजा भूमिके लिये युद्ध करनेके समय विषैले आयुधोंसे युद्ध नहीं करताहै और संग्राममें सम्मुख लड़कर प्राण त्यागताहै वह योगियोंके समान स्वर्गमें निवास करता है।

नायुधव्यसनप्राप्तं नार्तं नातिपरीक्षितम् । न भीतं न परावृत्तं सतां धर्ममनुस्मरन् ॥ ९३ ॥

जिसका हथियार टूटगया होय, जो पुत्र आदिके शोकसे व्याकुल हो, जो बहुत घायल होगया होवे अथवा जो युद्धसे डरकर भाग रहा हो; श्रेष्ठ धर्मका स्मरण करके इनका वध नहीं करे ॥ ९३ ॥

यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः । भर्तुर्यद्दुष्कृतं किञ्चित्तत्सर्वं प्रतिपद्यते ॥ ९४ ॥

यच्चास्य सुकृतं किञ्चिदमुत्रार्थमुपार्जितम् । भर्ता तत्सर्वमादत्ते परावृत्तहतस्य तु ॥ ९५ ॥

जो वीर लड़ाईसे डरकर संग्राममें भागनेके समय शत्रुके हाथसे मारा जाता है उसको अपने स्वामी राजाका सब पाप लग जाताहै ॥ ९४ ॥ जब योद्धा युद्धसे विमुख होकर मारा जाताहै तब उसके सम्पूर्ण सञ्चित पुण्यका फल उसके स्वामीको प्राप्त होताहै ▒ ॥ ९५ ॥

रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून् स्त्रियः । सर्वद्रव्याणि कुप्यं च यो यज्जयति तस्य तत् ॥९६ ॥

राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः । राज्ञा च सर्वयोधेभ्यो दातव्यमपृथग्जितम् ॥ ९७ ॥

रथ; घोड़ा, हाथी, छत्ता, धन, धान्य, पशु, दासी, घृत आदि द्रव्य और ताम्बा आदि धातु युद्धको जीतके समय जो जिसको मिलताहै वह उसीका होता है ॥ ९६ ॥ योद्धाओंको उचित है कि राज-कार्यके उपयोगी (हाथी, घोड़ा, सोना, चांदी आदि) उत्तम वस्तुओंको राजाको अर्पण करें; राजाको चाहिये कि युद्धमें प्राप्त वस्तुओंको यथायोग्य योद्धाओंको बांट देवे ◎ ॥ ९७ ॥

एषोऽनुपस्कृतः प्रोक्तो योधधर्मः सनातनः । अस्माद्धर्मान्न च्यवेत क्षत्रियो घ्नन् रणे रिपून् ॥ ९८ ॥

यह योद्धाओंका सनातन उत्तम धर्म कहागया; युद्धमें शत्रुओंको मारनेवाला क्षत्रिय इस धर्मको नहीं छोड़े ॥ ९८ ॥

यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम् । परस्य विपरीतं च तदा यायाद्रिपुं प्रति ॥ १७१ ॥

राजा जब भलीभांति जान लेवे कि इस समय हमारी सेना हृष्टपुष्ट है, इसको किसी बातकी कमी नहीं है और शत्रुकी अवस्था इसके विपरीत है युद्धके लिये शत्रुपर चढ़ाई करे ॥ १७१ ॥

यदा तु स्यात्परिक्षीणो वाहनेन बलेन च । तदासीत प्रयत्नेन शनकैः सान्त्वयन्नरीन् ॥ १७२ ॥

मन्येतारिं यदा राजा सर्वथा बलवत्तरम् । तदा द्विधा बलं कृत्वा साधयेत्कार्यमात्मनः ॥ १७३ ॥

यदा परबलानां तु गमनीयतमो भवेत् । तदा तु संश्रयेत्क्षिप्रं धार्मिकं बलिनं नृपम् ॥ १७४ ॥

निग्रहं प्रकृतीनां च कुर्याद्यो ऽरिबलस्य च । उपसेवेत तं नित्यं सर्वयत्नैर्गुरुं यथा ॥ १७५ ॥

यदि तत्रापि सम्पश्येद्दोषं संश्रयकारितम् । सुयुद्धमेव तत्रापि निर्विशङ्कः समाचरेत् ॥ १७६ ॥

जब देखे कि हमारे वाहन और सेना निर्बल है तब यत्नपूर्वक धीरे धीरे शत्रुको शान्त करे ॥ १७२ ॥ जब देखे कि शत्रु सब प्रकारसे बलवान् है तब उसको रोकनेके लिये एक सेनादल रखकर सेनाके दूसरे दलके साथ दुर्गम स्थानमें चलाजावे ॥ १७३ ॥ जब जान पड़े कि अब किसी प्रकारसे शत्रुके आक्रमणसे बचनेकी सम्भावना नहीं है तब शीघ्रही एक धार्मिक तथा बलवान् राजाका आश्रय लेवे ॥ १७४ ॥ यदि वह राजा युद्धकरके शत्रुको भगा देवे तो यत्नपूर्वक गुरूके समान उसकी सेवा करे ॥ १७५ ॥ यदि उस राजामें भी दोष देखे तो निःशंक होकर युद्ध ही करे ✿ ॥ १७६ ॥

लोभः स्वप्नो धृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता। याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ॥ ३३ ॥

इन तीनों गुणोंसे जो उत्तम, मध्यम तथा अधम फल उत्पन्न होतेहैं उनको मैं पूर्णरीतिसे कहताहूं ॥ ३० ॥ वेदका अभ्यास, तपस्या, ज्ञान, शौच, इन्द्रियसंयम, धर्मानुष्ठान और आत्मज्ञानकी चिन्ता; ये सब सत्त्वगुणके लक्षण हैं ॥ ३१ ॥ फलके लिये कर्मका आरम्भ करना, अधीर होजाना, निषिद्धकर्म करना और सदा विषयकी भोगकी इच्छा रखना; ये सब रजोगुणके लक्षण कहेजातेहैं ॥ ३२ ॥ लोभ, बहुत निद्रा, अधीरता, क्रूरता, नास्तिकता, अन्यकी वृत्ति ग्रहण करना, याचना करनेका स्वभाव रखना और प्रमाद;ये सब तमोगुणके लक्षण हैं ॥ ३३ ॥

त्रयाणामपि चैतेषां गुणानां त्रिषु तिष्ठताम्। इदं सामासिकं ज्ञेयं क्रमशो गुणलक्षणम् ॥ ३४ ॥
यत्कर्म कृत्वा कुर्वंश्च करिष्यंश्चैव लज्जति। तज्ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणम् ॥ ३५ ॥
येनास्मिन्कर्मणा लोके ख्यातिमिच्छति पुष्कलाम्। न च शोचत्यसम्पत्तौ तद्विज्ञेयं तु राजसम् ३६॥
यत्सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरन्। येन तुष्यति चात्मास्य तत्सत्त्वगुणलक्षणम् ॥ ३७ ॥
तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते। सत्त्वस्य लक्षणं धर्मः श्रैष्ठ्यमेषां यथोत्तरम् ॥ ३८ ॥

भूत भविष्य तथा वर्त्तमान इन तीनों कालोंमें रहनेवाले सत्वगुण, रजोगुण; और तमोगुण; इन तीनों गुणोंका लक्षण क्रमसे संक्षेपमें मैं कहताहूं ॥ ३४ ॥ जिस कर्मको करके अथवा करनेके समय वा करनेमें मनुष्य लज्जावान् होते हैं विद्वान् लोग उसे तमोगुणका लक्षण जानतेहैं ॥ ३५ ॥ जो कर्म इस लोकमें बहुत बड़ाईकी इच्छासे कियाजाता है और पारलौकिक सम्पत्तिका शोच नहीं किया जाता उस कर्मको राजस जानो ॥ ३६ ॥ जिस कामको सब प्रकारसे जाननेकी इच्छा होतीहै, जिसे करनेसे लज्जा नहीं होती और जिसको करनेसे आत्माको सन्तोष होताहै वह सत्त्वगुणका लक्षण है ॥ ३७ ॥ कामकी प्रधानता तमोगुणका लक्षण, द्रव्यकी प्रधानता रजोगुणका लक्षण और धर्मकी प्रधानता सत्त्वगुणका लक्षण है, इनमें कामसे द्रव्य और द्रव्यसे धर्म श्रेष्ठ है ॥ ३८ ॥

येन यस्तु गुणेनैषां संसारान्प्रतिपद्यते। तान्समासेन वक्ष्यामि सर्वस्यास्य यथाक्रमम् ॥ ३९ ॥
देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः। तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ४०॥
त्रिविधा त्रिविधैषा तु विज्ञेया गौणिकी गतिः। अधमा मध्यमाग्र्या च कर्मविद्याविशेषतः ॥ ४१ ॥
स्थावराः कृमिकीटाश्च मत्स्याः सर्पाः सकच्छपाः। पशवश्च मृगाश्चैव जघन्या तामसी गतिः ४२
हस्तिनश्च तुरङ्गाश्च शूद्रा म्लेच्छाश्च गर्हिताः। सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः ॥ ४३ ॥
चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः। रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः ॥ ४४ ॥

झल्ला मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः। द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः ॥ ४५ ॥
राजानः क्षत्रियाश्चैव राज्ञश्चैव पुरोहिताः। वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः ॥ ४६ ॥
गन्धर्वा गुह्यका यक्षा विबुधानचराश्च ये। तथैवाप्सरसः सर्वा राजसीषूत्तमा गतिः ॥ ४७ ॥
तापसा यतयो विप्रा ये च वैमानिका गणाः। नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः ॥ ४८॥
यज्वान ऋषयो देवा वेदा ज्योतींषि वत्सराः। पितरश्चैव साध्याश्च द्वितीया सात्त्विकी गतिः ॥४९॥
ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च। उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः ॥ ५० ॥
एष सर्वः समुद्दिष्टस्त्रिप्रकारस्य कर्मणः। त्रिविधस्त्रिविधः कृत्स्नः संसारः सार्वभौतिकः ॥ ५१ ॥

इनमेंसे जिस कर्मके करनेसे जीवोंकी जैसी गति होतीहै उनको संक्षेपसे क्रमपूर्वक कहेंगे ॥ ३९ ॥ सत्त्वगुणीलोग देवयोनिको, रजोगुणीलोग मनुष्ययोनिको और तमोगुणीलोग पशुपक्षीआदि तिर्यग्योनिको प्राप्त होतेहैं; इस भांति तीनप्रकारकी गति है ॥ ४० ॥ इसभांति गुणोंकी ३ प्रकारकी गति कहीगई फिर संसारमें कर्मभेद तथा ज्ञानभेदसे अधम, मध्यम और उत्तम; ये तीनप्रकारकी गति है ॥ ४१ ॥ वृक्षआदि स्थावर, कृमि (सूक्ष्मप्राणी), कीट (बडे कीड़े), मछली, सर्प, कछवे, पशु और मृगकी योनियोंमें प्राप्तहोना तामसीगतिमें अधम है ॥ ४२ ॥ हाथी, घोड़े, शूद्र, निन्दित म्लेच्छ, सिंह बाघ और सूअरकी योनियोंमें प्राप्त होना तामसीगतिमें मध्यमश्रेणी है ॥ ४३ ॥ चारण (नटआदि), सुपर्ण (पक्षीविशेष), दम्भसे कार्य करनेवाले पुरुष, राक्षस और पिशाचकी योनियोंकी प्राप्ति तामसीगतिमें उत्तमश्रेणी है ॥ ४४ ॥ झल्ल, मल्ल, नट, शस्त्रजीवी पुरुष, जुवाडी और मद्यपानमें प्रसक्त मनुष्य, राजसीगतिमे अधम है ॥ ४५ ॥ राजा, क्षत्रिय, राजपुरोहित और शास्त्रार्थआदिके समय कलह करनेवाले मनुष्य राजसीगतिमें मध्यम है ॥ ४६ ॥ गन्धर्व, गुह्यक, यक्ष, देवताओंके अनुचर (विद्याधरआदि) और अप्सरा ये सब रजोगुणीगतिमें उत्तम है ॥ ४७ ॥ वानप्रस्थ, संन्यासी, ब्राह्मण, विमानचारी देवता, नक्षत्र और दैत्य सत्त्वगुणीगतिमें अधम हैं ॥ ४८ ॥ यज्ञकरनेवाले मनुष्य, ऋषि, देवता, वेदाभिमानी, ज्योतिवाले (तारागण), वत्सर, पितृगण और साध्यगण सत्त्वगुणी गतिमें मध्यमश्रेणीके है ॥ ४९ ॥ ब्रह्मा, मरीचिआदि प्रजापति, देहधारी धर्म, महत्तत्त्व और अव्यक्तको विद्वान्लोग सत्त्वगुणीगतिमें उत्तमश्रेणीके कहतेहैं ॥ ५० ॥ यह तीन प्रकारके कर्मकी तीन तीन प्रकारकी गति कहीगई ॥ ५१ ॥

वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः। अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ॥ ८३ ॥
सर्वेषामपि चैतेषां शुभानामिह कर्मणाम्। किञ्चिच्छ्रेयस्करतरं कर्मोक्तं पुरुषं प्रति ॥ ८४ ॥
सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्। तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ॥ ८५ ॥
षण्णामेषां तु सर्वेषां कर्मणां प्रेत्य चेह च। श्रेयस्करतरं ज्ञेयं सर्वदा कर्म वैदिकम् ॥ ८६ ॥
वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः। अन्तर्भवन्ति क्रमशस्तस्मिंस्तस्मिन्क्रियाविधौ ॥ ८७ ॥
सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च। प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥ ८८ ॥
इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते। निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ॥ ८९ ॥
प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम्। निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥९० ॥
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि। समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥ ९१ ॥
यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः। आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ॥९२॥
एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः। प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा ॥९३॥

वेदका अभ्यास, तपस्या, ज्ञान, इन्द्रियनिग्रह, अहिंसा और गुरुसेवा; ये सब परम कल्याणके साधक हैं ॥ ८३ ॥ इन कर्मोंमें पुरुषके लिये किञ्चिन्मात्र कर्म सबसे श्रेष्ठ मोक्षसाधक है ॥ ८४ ॥ इन कर्मोंमें आत्मज्ञान (परमात्माका ज्ञान) ही परमश्रेष्ठ कहागया है, वह सब विद्याओंमें प्रधान है और उससे मोक्ष प्राप्त होताहै ॥ ८५ ॥ पहले कहेहुये वेदाभ्यासआदि ६ कर्मोंमें वैदिककर्मको इस लोक तथा परलोकमें परमकल्याणकारी जानना चाहिये ॥ ८६ ॥ ऊपर कहेहुए सब कर्म ही क्रमसे वैदिककर्मके अन्तर्गत हुआकरतेहैं ॥ ८७ ॥ वैदिककर्म दो प्रकारके हैं;—प्रवृत्त और निवृत्त, इनमे प्रवृत्तकर्मके फलसे सुख और अभ्युदय आदि प्राप्त होतेहै और निवृत्तकर्मके फलसे मुक्ति मिलतीहै॥८८॥ इस लोकमें अथवा परलोकके सम्बन्धमें किसी कामनासे जो कर्म कियाजाता है वह प्रवृत्तकर्म कहाताहै और जो ज्ञानपूर्वक कामनारहित कर्म कियाजाता है उसे निवृत्तकर्म कहतेहै ॥ ८९ ॥ प्रवृत्तकर्मको भलीभांति सेवन करनेसे मनुष्य देवताओके समान होजाता है और निवृत्त कर्मकी सेवा करनेसे पञ्चभूतोंको अतिक्रम करताहै अर्थात् मोक्ष पाताहै ॥ ९० ॥ जो आत्मज्ञानी सम्पूर्णभूतोंमें आत्माको और आत्मामें सब भूतोंको एकसमान देखताहै वह ब्रह्मत्वको प्राप्त होताहै अर्थात् मोक्ष

पाताहै॥९१॥ ब्राह्मणको उचित है कि अग्निहोत्रआदि शास्त्रोक्त कर्मोंको छोड़नेपर भी आत्मज्ञान, इन्द्रिय संयम और वेदाभ्यासके निमित्त यत्न करे ॥ ९२ ॥ ये आत्मज्ञानआदि द्विजातियो विशेषकरके ब्राह्मणोंके जन्मको सफल करनेवाले हैं, वे इनको प्राप्तकरनेसे कृतार्थ होतेहैं; अन्यप्रकारसे नहीं ॥ ९३ ॥

पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम् । अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः ॥९४ ॥
या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः॥सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः॥९५॥
उत्पद्यन्ते च्यवन्ते च यान्यतोन्यानि कानिचित् । तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च ९६॥
चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक् । भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिध्यति ॥९७॥
शब्दः स्पर्शश्च रूपं च रसो गंधश्च पञ्चमः। वेदादेव प्रसूयन्ते प्रसूतिर्गुणकर्मतः ॥ ९८ ॥
बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम् । तस्मादेतत्परं मन्ये यज्जन्तोरस्य साधनम् ॥ ९९ ॥
सेनापत्यं च राज्यं च दण्डनेतृत्वमेव च । सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ॥ १०० ॥
यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान् । तथा दहति वेदज्ञः कर्मजं दोषमात्मनः ॥ १०१ ॥
वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् । इहैव लोके तिष्ठन्स ब्रह्मभूयाय कल्पते॥ १०२ ॥

पितर, देवता और मनुष्योंके सनातन नेत्र वेद ही है;ये अपौरुषेय और अप्रमेय है—यह स्थिर मीमांसा है ॥ ९४ ॥ जो स्मृतियां वेदसे बाहर है और जो ग्रन्थ वेदविरुद्ध कुतर्कमूलक हैं वे परलोकके सम्बन्धमे निष्फल कहेगये हैं; क्योंकि तमोगुणसे कल्पित हैं ॥९५॥ वेदमूलसे विरुद्ध पुरुष कल्पितशास्त्र उत्पन्न होनेपर शीघ्र ही विनष्ट होजातेहैं वे नवीन होनेके कारण निष्फल और असत्य हे ॥ ९६ ॥ चारों वर्ण, तीनों लोक, चारो आश्रम और भूत, भविष्य तथा वर्तमानकाल, ये सब वेदसे ही प्रसिद्ध हुएहैं ॥ ९७ ॥ शब्द, स्पर्श, रूप, रस और गन्ध, ये पांचो विषय वेदसे ही उत्पन्न हुएहे, गुणकर्मके अनुसार वेद ही सबका उत्पत्तिस्थान है ॥ ९८ ॥ वेदशास्त्र सर्वदा सब भूतोको धारण करतेहै, इस कारणसे वे परम श्रेष्ठ मानेजातेहै, इनसे सब प्राणियोका प्रयोजन सिद्ध होताहै ॥ ९९ ॥ सेनापतिका पद, राज्य, दण्डदेनेका अधिकार और सम्पूर्ण लोकका आधिपत्य वेदशास्त्र जाननेवालेको ही मिलना चाहिये ॥ १०० ॥ जैसे प्रचण्ड अग्नि गीले वृक्षको जलादेताहै वैसेही वेदज्ञ द्विज अपने कर्मजनित दोषोंको नष्ट करताहै ॥ १०१ ॥ वेदशास्त्रके अर्थ और तत्त्वको जाननेवाला पुरुष किसी आश्रममे निवास करे इसी लोकमें ब्रह्मत्व लाभ करताहै ॥ १०२ ॥

अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः। धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः
तपो विद्या च विप्रस्य निःश्रेयसकरं परम् । तपसा किल्बिषं हन्ति विद्ययामृतमश्नुते ॥ १०४ ॥
प्रत्यक्षं चानुमानं च शास्त्रं च विविधागमम् । त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता ॥१०५ ॥
आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना । यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः ॥ १०६ ॥
नैःश्रेयसमिदं कर्म यथोदितमशेषतः । मानवस्यास्य शास्त्रस्य रहस्यमुपदिश्यते ॥ १०७ ॥

अज्ञलोगोंसे ग्रन्थ पढ़नेवाले ग्रन्थ पढ़नेवालोंसे ग्रन्थोंके विषयोको धारण करनेवाले, उनसे ज्ञानी अर्थात् उन ग्रन्थोंका यथार्थज्ञान रखनेवाले और उनसे भी उसके अनुसार कर्म करनेवाले श्रेष्ठ हैं ॥१०३॥ तपस्या और विद्या (आत्मज्ञान); ये दोनो ब्राह्मणका परम कल्याण करनेवाले है तपस्यासे पाप नाश होताहै और विद्यासे मुक्ति होतीहै ॥ १०४ ॥ जो लोग धर्मके तत्त्वको जाननेकी इच्छा करतेहैं उन्हें प्रत्यक्ष, अनुमान और स्मृति आदि नाना प्रकारके वेदमूलक शास्त्र; इन तीनोंको उत्तम रीतिसे जानना चाहिये ॥ १०५ ॥ जो लोग वेदशास्त्रके अविरोध तर्कसे वेद तथा वेदमूलक स्मृति आदि धर्मोपदेशका विचार करतेहै वही धर्मके ज्ञाता है; अन्य नहीं ॥ १०६ ॥ यह कल्याणका साधन कर्म सम्पूर्ण कहागया ॥ १०७ ॥

सर्वमात्मनि संपश्येत्सच्चासच्च समाहितः । सर्वं ह्यात्मनि संपश्यन्नाधर्मे कुरुते मनः ॥ ११८ ॥
आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम् । आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम्॥११९॥
खं संनिवेशयेत्खेषु चेष्टनस्पर्शनेऽनिलम् । पंक्तिदृष्ट्योः परं तेजः स्नेहे यो गां च मूर्तिषु ॥ १२० ॥
मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम् । वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम् १२१॥
प्रशासितारं सर्वेषामणीयांसमणोरपि । रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् ॥ १२२ ॥
एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् । इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ॥ १२३ ॥
एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः । जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ॥ १२४ ॥
एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना । स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥ १२५ ॥

समाधान होकर सम्पूर्ण सत् असत् वस्तुओंको आत्मामें देखे, जो सबको आत्मामें देखताहै उसका मन अधर्मकी ओर कभी नहीं दौड़ता ॥ ११८ ॥ आत्माही सम्पूर्ण देवता है, सब जगत आत्मामें स्थित है और आत्माही शरीरधारियोंके कर्मके सम्बन्धको उत्पन्न करताहै ॥११९॥ बाह्यके आकाशको उदर आदिके आकाशमे, बाह्यकी वायुको प्राण आदि भीतरकी वायुमें अग्नि और सूर्यके परम तेजको अपने नेत्र

आदि तेजमें, जलको अपने शरीरके जलमें और पृथिवीको अपने शरीरमें धारण करे ॥ १२० ॥ मनमें चन्द्रमाको, कानोंमें दिशाओंको, पांवमें विष्णुको, बलमें रुद्रको, वाणीमें अग्निको, गुदामें मित्र देवताको और लिङ्गमें प्राजापतिको धारण करे अर्थात् ऐसी भावनासे उनका एकत्र साधन करे ॥ १२१ ॥ जो सबका शासन करताहै जो सूक्ष्मसे भी अति सूक्ष्म है, जिसकी कान्ति सुवर्णके समान है और जो स्वप्नकी बुद्धिके समान ज्ञानसे ग्रहण करने योग्य है, उस परम पुरुष परमात्माका ध्यान करे ॥ १२२ ॥ इस परम पुरुषको कोई अग्नि, कई मनु प्राजापति, कोई इन्द्र, कोई प्राणस्वरूप और कोई शाश्वत ब्रह्म कहतेहैं ॥ १२३ ॥ यह परमात्मा पृथिवी आदि पञ्चभूतोंसे सम्पूर्ण प्राणियोंमें व्याप्त होकर जन्म वृद्धि तथा नाशसे चक्रके तुल्य इस संसारको प्रवर्त्तित करताहै ॥ १२४ ॥ इसी प्रकार जो लोग आत्मद्वारा सम्पूर्ण भूतोंमें आत्माको देखतेहैं वे सबमें समता पाकर परमपद प्राप्त करतेहैं ॥ १२५ ॥

(२) ॐ याज्ञवल्क्यस्मृति-३ अध्याय।

अनादिरात्मा कथितस्तस्यादिस्तु शरीरकम् । आत्मनस्तु जगत्सर्वं जगतश्चात्मसम्भवः ॥ ११७ ॥
मोहजालमपास्येह पुरुषो दृश्यते हि यः । सहस्रकरपन्नेत्रः सूर्यवर्चाः सहस्रकः ॥ ११९ ॥
स आत्मा चैव यज्ञश्च विश्वरूपः प्रजापतिः । विराजः सोऽन्नरूपेण यज्ञत्वमुपगच्छति ॥ १२० ॥
यो द्रव्यदेवतात्यागसंभूतो रस उत्तमः । देवान्सन्तर्प्य स रसो यजमानं फलेन च ॥ १२१ ॥
संयोज्य वायुना सोमं नीयते रश्मिभिस्ततः । ऋग्यजुःसामविहितं सौरं धामोपनीयते ॥ १२२ ॥
स्वमण्डलादसौ सूर्यः सृजत्यमृतमुत्तमम् । यज्जन्म सर्वभूतानामशनानशनात्मनाम् ॥ १२३ ॥
तस्मादन्नात्पुनर्यज्ञः पुनरन्नस्पुनः क्रतुः । एवमेतदनाद्यन्तं चक्रं सम्परिवर्त्तते ॥ १२४ ॥
अनादिरात्मा सम्भूतिर्विद्यते नान्तरात्मनः । समवायी तु पुरुषो मोहेच्छाद्वेषकर्मजः ॥ १२५ ॥
सहस्रात्मा मया यो व आदिदेव उदाहृतः । मुखबाहूरुपज्जाः स्युस्तस्य वर्णा यथाक्रमम् ॥ १२६ ॥
पृथिवी पादतस्तस्य शिरसो द्यौरजायत । नस्तः प्राणा दिशः श्रोत्रात्स्पर्शाद्वायुर्मुखाच्छिखी ॥ १२७ ॥
मनसश्चन्द्रमा जातश्चक्षुषश्च दिवाकरः । जघनादन्तरिक्षं च जगच्च सचराचरम् ॥ १२८ ॥

आत्मा अनादि कहागया है, शरीरधारण करना ही उसकी आदि है, आत्मासे सम्पूर्ण जगत् होताहै और जगत्से अर्थात् पञ्चभूतोंके सङ्गसे आत्माकी उत्पत्ति होतीहै ॥ ११७ ॥ जो पुरुष मोहजालको दूर करके सहस्रकर, सहस्रचरण तथा सहस्रनेत्र धारण करताहै, सूर्यके समान तेजस्वी है और सहस्रशिरवाला दीखपडता है वही आत्मा है और वही यज्ञ प्रजापति विश्वरूप है, क्योंकि वह विराट्रूप अन्नरूपसे यज्ञरूपको प्राप्त होताहै ॥ ११९-१२० ॥ देवताओंके निमित्त जो वस्तु दीजाती है उससे जो उत्तम रस उत्पन्न होताहै वह देवताओंको तृप्त करके तथा यजमानको फलसे युक्त करके वायुद्वारा चन्द्रमण्डलमें पहुंचताहै और वहांसे किरणोंद्वारा सूर्यमण्डलमें प्राप्त होकर ऋक्, यजुः और सामवेदस्वरूप होजाताहै ॥ १२१-१२२ ॥ सूर्य अपने मण्डलसे वृष्टिरूप अमृत उत्पन्न करताहै जो चराचर सम्पूर्ण जीवोंके जन्मका हेतु है ॥ १२३ ॥ वृष्टिसे उत्पन्नहुए अन्नसे फिर यज्ञ होताहै यज्ञसे फिर अन्न होताहै और उससे फिर यज्ञ होताहै इसप्रकारसे यह अनादि संसारचक्र घूमताहै ॥ १२४ ॥ आत्मा अनादि है इसलिये उस अन्तरात्माका जन्म नहीं होता तो भी पुरुष मोह, इच्छा, द्वेष और कर्मके अनुसार देहका सम्बन्धी होताहै ॥ १२५ ॥ जो मैंने तुमसे सहस्रात्मारूप तथा सम्पूर्णजगत्का कारण और आदिदेव कहाहै उसके मुख, बाहु, जंघे और पैरोंसे चारों वर्ण क्रमसे उत्पन्न हुएहैं ॥ १२६ ॥ उसके चरणसे पृथिवी, शिरसे आकाश, नासिकासे प्राण, कानसे दिशा, स्पर्शसे वायु, मुखसे अग्नि, मनसे चन्द्रमा, नेत्रसे सूर्य और जंघाओंसे आकाश और चराचररूप जगत् उत्पन्न होताहै ॥ १२७-१२८ ॥

अन्त्यपक्षिस्थावरतां मनोवाक्कायकर्मजैः । दोषैः प्रयाति जीवोऽयं भवं योनिशतेषु च ॥ १३१ ॥
अनन्ताश्च यथा भावाः शरीरेषु शरीरिणाम् । रूपाण्यपि तथैवेह सर्वयोनिषु देहिनाम् ॥ १३२ ॥
विपाकः कर्मणाम्प्रेत्य केषांचिदिह जायते । इह वामुत्र वै केषाम्भावास्तत्र प्रयोजनम् ॥ १३३ ॥

यह जीव मन, वचन और शरीरसे कियेहुए दोषोंके कारण अन्त्यज, पक्षी तथा वृक्षादि स्थावरयोनिमें सैंकड़ों जन्मतक प्राप्त होताहै ॥ १३१ ॥ जीवोंको अपने अपने शरीरमें जैसे अनन्तभाव होतेहैं उसीके अनुसार सम्पूर्ण योनियोंमें देहियोंके स्वरूप भी होतेहैं ॥ १३२ ॥ किसीकर्मका फल परलोकमें, किसीकर्मका फल इसीलोकमें और किसीकर्मका फल इसलोक और परलोकमें अर्थात् दोनों स्थलमें मिलताहै उसमें प्रयोजक सत्त्व आदि भाव होताहै ॥ १३३ ॥

ॐ याज्ञवल्क्यस्मृति-३ अध्यायके ६७ श्लोकसे १०७ श्लोकतकका अध्यात्मप्रकरण गृहस्थप्रकरणके मनुष्यजन्ममें लिखागया है।

मलिनो हि यथादर्शो रूपालोकस्य न क्षमः । तथा विपक्वकरणं आत्मज्ञानस्य न क्षमः ॥१४१॥
कटवेर्वारौ यथा पक्वे मधुरः सन्नसोपि न । प्राप्यते ह्यात्मनि तथा नापक्वकरणेज्ञता ॥ १४२ ॥
सर्वाश्रयां निजे देहे देही विन्दति वेदनाम् । योगी मुक्तश्च सर्वासां योग माप्नोति वेदनाम् ॥१४३॥
आकाशमेकं हि यथा घटादिषु पृथग्भवेत् । तमात्मेको ह्यनेकश्च जलाधारेष्विवांशुमान् ॥१४४॥
ब्रह्मखानिलतेजांसि जलम्भूश्चेति धातवः । इमे लोका एष चात्मा तस्माच्च सचराचरम् ॥१४५ ॥
मृद्दण्डचक्रसंयोगात्कुम्भकारो यथा घटम् । करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः ॥ १४६ ॥
हेममात्रमुपादाय रूपं वा हेमकारकः । निजलालासमायोगात्कोशं वा कोशकारकः ॥ १४७ ॥
कारणान्येवमादाय तासु तास्विह योनिषु । सृजत्यात्मानमात्मा च सम्भूय करणानि च ॥ १४८॥
महाभूतानि सत्यानि यथात्मापि तथैव हि । कोन्यथैकेन नेत्रेण दृष्टमन्येन पश्यति ॥ १४९ ॥
वाचं वा को विजानाति पुनः संश्रुत्य संश्रुताम् । अतीतार्थस्मृतिः कस्य को वा स्वप्नस्य कारकः ॥
जातिरूपवयोवृत्तविद्यादिभिरहङ्कृतः । शब्दादिविषयोद्योगं कर्मणा मनसा गिरा ॥ १५१ ॥
स सन्दिग्धमतिः कर्मफलमस्ति न वेत्ति वा । विप्लुतः सिद्धमात्मानमसिद्धोपि हि मन्यते १५२॥
मम दारासुतामात्या अहमेषामिति स्थितिः । हिताहितेषु भावेषु विपरीतमतिः सदा ॥ १५३ ॥
ज्ञेयज्ञे प्रकृतौ चैव विकारे वा विशेषवान् । अनाशकानलापातजलप्रपतनोद्यमी ॥ १५४ ॥
एवंवृत्तो विनीतात्मा वितथाभिनिवेशवान् । कर्मणा द्वेषमोहाभ्यामिच्छया चैव बध्यते ॥१५५ ॥

जैसे दर्पणके मलीन होनेसे उसमें रूप नहीं दखपडताहै वैसेही रागद्वेष आदि मलोंसे आक्रान्तचित्त होनेसे आत्माको पूर्वजन्ममें देखेहुए पदार्थोंका ज्ञान नहीं रहताहै ॥ १४१ ॥ जिस प्रकार कडुई ककडीमें उसका मधुररस प्रगट नहीं होता उसी प्रकार रागद्वेष आदि मलोंसे युक्त आत्मामें पूर्वजन्मकी बातोंको जाननेकी शक्ति नहीं होती ॥ १४२ ॥ देहाभिमानी पुरुष सुखदुःखको अपने शरीरसे ही भोगताहै और योगी तथा अहंकाररहित पुरुष सबका दुःखसुख जाननेमें समर्थ होताहै ॥ १४३ ॥ जैसे आकाश एक ही है; किन्तु घटआदि उपाधि भेदसे घटाकाश आदि भिन्न भिन्न नामसे कहाजाता है और जैसे एकही सूर्य जलके अनेकपात्रोंमें अनेक देख पडता है वैसेही एकही आत्मा (अन्तःकरणरूप उपाधिके भेदसे) अनेक जान पड़ताहै ॥ १४४ ॥ आत्मा, आकाश, वायु, अग्नि, जल और भूमि ये सब धातु कहेजातेहैं अर्थात् शरीरमें व्याप्त होकर उसको धारण करनेसे धातु कहलाते हैं उनमें आकाश आदि पञ्चधातु जड़ और प्रथमधातु आत्मा चेतन है, इन्हीं सबसे चराचर जगत् उत्पन्न हुआहै ॥ १४५ ॥ जिस प्रकारसे मिट्टी दण्ड और चाकसे कुम्हार घड़ा बनाता है अथवा तृण, मिट्टी और काठसे कारीगर घर निर्माण करताहै वा सुवर्णसे कुण्डलादि विविध प्रकारकी वस्तु सोनार तैयार करदेताहै अथवा अपने लारसे मकड़ी जाला तनती है इसी प्रकार इन्द्रियों और पृथिवी आदि पञ्च भूतोंको लेकर आत्मा भिन्न भिन्न योनियोंमें अपनेको ही उत्पन्न करताहै ॥ १४६–१४८ ॥ जैसे पृथिवी आदि महाभूत (प्रमाणोंसे जानने योग्य होनेसे) सत्य हैं वैसेही आत्मा भी सत्य है, नहीं तो नेत्र इन्द्रियसे देखीहुई वस्तुको त्वचाइन्द्रियसे कौन जान सकता कि जिसको मैंने देखा उसकाही मैं स्पर्श करताहूं ॥१४९॥ पहिलेकी सुनीहुई बातको यह वही बात है ऐसा कौन जानता, बहुत दिनकी बातोंकी सुधि कौन रखता और स्वप्न किसको होता ॥ १५० ॥ जाति, रूप, अवस्था, आचरण, विद्या आदिसे अहङ्कार किसको होता और कर्म, मन तथा वचनसे शब्द आदि विषयोंका उद्योग कौन करता (इस कारणसे इन्द्रियोंसे अलग एक आत्मा है) ॥ ॥ १५१ ॥ वह आत्मा अहङ्कारसे दूषित होकर बुद्धिमें सन्देह करता है कि सब कर्मोंमें फल है अथवा नहीं और सिद्ध (कृतार्थ) नहीं होनेपर भी अपनेको कृतार्थ मानता है ॥ १५२ ॥ ऐसा निश्चय करताहै कि यह मेरी स्त्री है, यह मेरा पुत्र है और यह मेरा भृत्य है तथा मैं इनका हूं और सर्वदा हितको अहित और अहितको हित समझता है ॥१५३॥ आत्मा, प्रकृति (आत्माके गुणकी साम्यावस्था) और विकार (अहङ्कार आदि) में भेदज्ञान नहीं रहताहै; अनशन (भोजनका त्याग), अग्निप्रवेश, जल प्रवेश और ऊंच स्थानसे गिरनेका यत्न करताहै ॥ १५४ ॥ ऐसा अविनीतात्मा होकर झूठा सङ्कल्प करताहुआ कर्म, राग, द्वेष, मोह और इच्छासे बांधाजाताहै ॥ १५५ ॥

आचार्योपासनं वेदशास्त्रार्थेषु विवेकिता । तत्कर्मणामनुष्ठानं सङ्गः सद्भिर्गिरः शुभाः ॥ १५६ ॥
स्त्र्यालोकालम्भविगमः सर्वभूतात्मदर्शनम् । त्यागः परिग्रहाणां च जीर्णकाषायधारणम् ॥१५७॥
विषयेन्द्रियसंरोधस्तन्द्रालस्यविवर्जनम् । शरीरपरिसंख्यानं प्रवृत्तिष्वघदर्शनम् ॥ १५८ ॥
नीरजस्तमता सत्त्वशुद्धिर्निःस्पृहता शमः । एतैरुपायैः संशुद्धः सत्त्वयोग्यमृती भवेत् ॥ १५९ ॥
तत्त्वस्मृतेरुपस्थानात्सत्त्वयोगात्परिक्षयात् । कर्मणां सन्निकर्षाच्च सतां योगः प्रवर्त्तते ॥ १६० ॥

शरीरसङ्क्षये यस्य मनः सत्त्वस्थमीश्वरम् । अविप्लुततमतिः सम्यग्जातिसंस्मरतामियात् ॥१६१॥
यथा हि भरतो वर्णैर्वर्णयत्यात्मनस्तनुम् । नानारूपाणि कुर्वाणस्तथात्मा कर्मजास्तनूः ॥१६२ ॥
कालकर्मात्मबीजानां दोषैर्मातुस्तथैव च । गर्भस्य वैकृतं दृष्टमङ्गहीनादि जन्मतः ॥ १६३ ॥
अहङ्कारेण मनसा गत्या कर्मफलेन च । शरीरेण च नात्मा यम्मुक्तपूर्वः कथंचन ॥ १६४ ॥
वर्त्याधारः स्नेहयोगाद्यथा दीपस्य संस्थितिः । विक्रियापि च दृष्टैवमकाले प्राणसंक्षयः ॥ १६५ ॥

आचार्यकी सेवा करना, वेद और शास्त्रके अर्थका विवेक रखना, उनमें कहेहुए कर्मोंका अनुष्ठान करना, सत्पुरुषोंका संग करना, प्रियवचन बोलना, स्त्रियोंके दर्शन और स्पर्शका त्याग करना, सम्पूर्ण जीवोंको अपने समान देखना, परिग्रह (पुत्र, कलत्र ऐश्वर्यआदि) का त्याग करना, जीर्ण काषायवस्त्र धारणकरना, विषयोंसे इन्द्रियोंको रोकना, जंभाई और आलस्यको त्यागदेना, शरीरकी अशुद्धता आदि अवस्थाका स्मरण रखना, गमनआदि प्रवृत्तियोंमें पापको देखना, रजोगुण और तमोगुणका त्याग करना, प्राणायामआदिसे अन्तःकरणको शुद्ध रखना, विषयोंमें अभिलाष नहीं करना और बाह्यइन्द्रिय तथा अन्तःकरणको रोकना; इन उपायोंसे शुद्ध हुआ मनुष्य सत्त्वगुणयुक्त होकर मुक्त होताहै ॥ १५६–१५९ ॥ आत्मस्वरूपतत्त्वकी निश्चलस्थितिसे, सत्त्वगुण (शुद्धि) के योगसे, अविद्याआदि कर्मबीजके नाश होनेसे और सज्जनोंके सङ्गसे आत्मयोगकी प्रवृत्ति होतीहै ॥ १६० ॥ जिस स्थिरबुद्धिवाले मनुष्यका मन मरनेके समय सत्त्वगुणयुक्त होकर ईश्वरमें लगताहै उसको पूर्वजन्मका स्मरण रहताहै ॥ १६१ ॥ जैसे नट अनेकप्रकारके रूप बनानेके लिये नानावर्णका वेष बनाताहै वैसे ही कर्मफल भोगनेके लिये आत्मा अनेक प्रकारका शरीर धारण करताहै॥१६२॥ काल, कर्म, पिताके वीर्य और माताके शोणितके दोषके कारण गर्भका विकार होकर अंगहीन आदि दोष देखाजाताहै ॥ १६३ ॥ जबतक मुक्ति नहीं होती तबतक अहङ्कार, मन, गति (संसारका हेतु दोषोंकी राशि), कर्मफल और सूक्ष्मशरीरसे आत्मा छूट नहीं सकता ॥ १६४ ॥ जैसे बत्तीके आधार और तेलके योगसे दीपक जलताहै और प्रबलवायुसे बुझाजाताहै वैसे ही अकालमें भी प्राणोंका क्षय होताहै ॥ १६५ ॥

अनन्ता रश्मयस्तस्य दीपवद्यः स्थितो हृदि । सितासिताः कर्बुनीलाः कपिलाः पीतलोहिताः १६६
ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम्१६७॥
यदस्यान्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितम् । तेन देवशरीराणि तैजसानि प्रपद्यते ॥ १६८ ॥
येनैकरूपाश्चाधस्ताद्रश्मयोस्य मृदुप्रभाः । इह कर्मोपभोगाय तैः संसरति सोवशः ॥ १६९ ॥

जो आत्मा दीपके समान हृदयमें स्थित है उसकी श्वेत, काली,कबरी, नीली, कपिला, पीली और लाल-रङ्गकी अनन्त नाड़ियां हैं ॥ १६६ ॥ उनमेंसे एक नाड़ी सूर्यमण्डलको भेदकर ब्रह्मलोकको अतिक्रम करके उससे ऊपर स्थित है उसीद्वारा जीव परमगतिको प्राप्त होताहै ॥ १६७ ॥ इस आत्माकी मुक्तिका मार्ग जो नाड़ी है उससे अन्य सैकड़ों नाड़ी ऊपरको स्थित हैं उनके द्वारा तेजोमय देवशरीर लाभ होताहै ॥ १६८ ॥ जो अनेकरूप कोमल कान्तिवाली नाड़ियां नीचेको स्थित हैं उनके द्वारा यह जीव कर्मफल भोगनेके लिये संसारमें जन्म लेताहै ॥ १६९ ॥

वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च । आर्त्या गत्या तथागत्या सत्येन ह्यनृतेन च ॥ १७० ॥
श्रेयसा सुखदुःखाभ्यां कर्म्मभिश्च शुभाशुभैः । निमित्तशाकुनज्ञानग्रहसंयोगजैः फलैः ॥ १७१ ॥
तारानक्षत्रसंचारैर्जागरैः स्वप्नजैरपि । आकाशपवनज्योतिर्जलभूतिमिरैस्तथा ॥ १७२ ॥
मन्वन्तरैर्युगप्राप्त्या मंत्रौषधिफलैरपि । वित्तात्मानं वेद्यमानं कारणं जगतस्तथा ॥ १७३ ॥
अहङ्कारः स्मृतिर्मेधा द्वेषो बुद्धिः सुखं धृतिः । इन्द्रियान्तरसंचार इच्छा धारणजीविते ॥ १७४॥
स्वर्गः स्वप्नश्च भावानाम्प्रेरणं मनसो गतिः । निमेषश्चेतना यत्न आदानम्पाञ्चभौतिकम् ॥१७५॥
यत एतानि दृश्यन्ते लिङ्गानि परमात्मनः । तस्मादस्ति परो देहादात्मा सर्वग ईश्वरः ॥ १७६ ॥

वेद, शास्त्र, विज्ञान (अनुभव), जन्म, मरण, व्याधि, गमन, अगमन, सत्य, मिथ्या, कल्याण, सुख, दुःख, शुभकर्म, अशुभकर्म, भूकम्पआदि निमित्त, शकुनोंका ज्ञान (पक्षियोंकी चेष्टासे शुभ, अशुभ जानना) सूर्यादिग्रह संयोगका फल, तारा और अश्वनीआदि नक्षत्रके संचारसे शुभाशुभका फल, जाग्रत अवस्था, स्वप्न अवस्था, आकाश, वायु, सूर्यआदि ज्योति, जल, भूमि, अन्धकार, मन्वन्तर, युगोंकी प्राप्ति और मंत्र तथा औषधियोंका फल; इनसे जानना चाहिये कि आत्मा देहसे पृथक् और जगत्का कारण है ॥ १७०–१७३ ॥ अहंकार, स्मरण, धारण, द्वेष, बुद्धि, सुख, धैर्य, इन्द्रियान्तर संचार अर्थात् एक इन्द्रियगृहीतविषय अन्य इन्द्रियद्वारा ग्रहण, इच्छा, देहधारण, प्राणधारण, स्वर्ग, स्वप्न, इन्द्रियोंकी प्रेरणा, मनकी गति, निमेष, चेतना, यत्न और पञ्चभूतोंका धारण ये सब परमात्माके चिह्न देखपडतेहैं, इस लिये सर्वव्यापक ईश्वर आत्मा देहसे भिन्न है ॥ १७४—१७६ ॥

बुद्धीन्द्रियाणि सार्थानि मनः कर्मेन्द्रियाणि च। अहङ्कारश्च बुद्धिश्च पृथिव्यादीनि चैव हि १७७
अव्यक्तमात्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते। ईश्वरः सर्वभूतस्थः सन्नसन्सदसच्च यः॥ १७८॥

श्रोत्रादि ५ ज्ञानेन्द्रिय, ५ उनके विषय (शब्द, स्पर्श, रूप, रस और गन्ध) मन, हाथ आदि ५ कर्मेन्द्रिय, अहंकार, बुद्धि पृथिवी आदि पञ्चभूत और प्रकृति, ये सब उस सर्वव्यापी ईश्वर सत् असत् रूपधारी आत्माके क्षेत्र (स्थान) हैं, इनमें रहकर वह आत्मा क्षेत्रज्ञ कहलाताहै॥ १७७–१७८॥

बुद्धेरुत्पत्तिरव्यक्तात्ततोहंकारसंभवः। तन्मात्रादीन्यहङ्कारादेकोत्तरगुणानि च॥ १७९॥
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद्गुणाः। यो यस्मान्निःसृतश्चैषां स तस्मिन्नेव लीयते॥१८०॥

प्रकृतिसे बुद्धि, बुद्धिसे अहंकार और अहंकारसे पञ्चतन्मात्रा (शब्द, स्पर्श, रूप, रस और गन्ध) की उत्पत्ति होती है, पञ्चतन्मत्राओंमें क्रमसे एक एक गुण अधिक होतेहैं॥ १७९॥ शब्द, स्पर्श, रूप,रस और गन्ध ये सब उस (आकाश आदि पञ्चभूतों) के गुण हैं; पूर्वोक्त बुद्धि आदि जो जिससे निकला है वह प्रलयके समय उसीमें लीन होजाताहै ❋॥ १८०॥

यथात्मानं सृजत्यात्मा तथा वः कथितो मया। विपाकात्त्रिः प्रकाराणां कर्मणामीश्वरोपि सन्१८१॥
सत्त्वं रजस्तमश्चैव गुणास्तस्यैव कीर्तिताः। रजस्तमोभ्यामाविष्टश्चक्रवद् भ्राम्यते ह्यसौ॥ १८२॥
अनादिरादिमांश्चैव स एव पुरुषः परः। लिङ्गेन्द्रियग्राह्यरूपः सविकार उदाहृतः॥ १८३॥

आत्मा स्वयं ईश्वर होनेपर भी कायिक, वाचिक और मानसिक कर्मके विपाकसे जिस प्रकार आत्मा (जीवको) रचता है वह मैंने आप लोगोंसे कहा॥ १८१॥ सत्त्वगुण, रजोगुण और तमोगुण उसी आत्माके गुण हैं और रजोगुण तथा तमोगुणसे युक्त होकर वह चक्रके समान इस संसारमें घूमताहै यहभी कहदिया॥ १८२॥ वही अनादि परम पुरुष शरीर धारण करनेसे आदिमान् और कुब्ज, वामन आदि विकारोंसहित तथा चिह्न और इन्द्रियोंसे ग्रहण करनेयोग्य होताहै॥ १८३॥

पितृयानोऽजवीथ्याश्च यदगस्त्यस्य चान्तरम्। तेनाग्निहोत्रिणो यांति स्वर्गकामा दिवम्प्रति१८४॥
ये च दानपराः सम्यगष्टाभिश्च गुणैर्युताः। तेपि तेनैव मार्गेण सत्यव्रतपरायणाः॥ १८५॥
तत्राष्टाशीतिसाहस्रा मुनयो गृहमेधिनः। पुनरावर्तिनो बीजभूता धर्मप्रवर्तकाः॥ १८६॥
सप्तर्षिनागवीथ्यन्तर्देवलोकं समाश्रिताः। तावन्त एव मुनयः सर्वारम्भविवर्जिताः॥ १८७॥
तपसा ब्रह्मचर्येण संगत्यागेन मेधया। तत्र गत्वावतिष्ठंते यावदाभूतसंप्लवम्॥ १८८॥
यतो वेदाः पुराणानि विद्योपनिषदस्तथा। श्लोकाः सूत्राणि भाष्याणि यच्च किंचन वाङ्मयम्॥
वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः। श्रद्धोपवासः स्वातंत्र्यमात्मनो ज्ञानहेतवः॥ १९०॥
स ह्याश्रमैर्विजिज्ञास्यः समस्तैरेवमेव तु। द्रष्टव्यस्त्वथ मन्तव्यः श्रोतव्यश्च द्विजातिभिः॥१९१॥
यएनमेवं विन्दन्ति ये चारण्यकमाश्रिताः। उपासते द्विजाः सत्यं श्रद्धया परया युताः॥ १९२॥
क्रमात्ते सम्भवन्त्यर्चिरहः शुक्लं तथोत्तरम्। अयनं देवलोकं च सवितारं सवैद्युतम्॥ १९३॥
ततस्तान्पुरुषोभ्येत्य मानसो ब्रह्म लौकिकम्। करोति पुनरावृत्तिस्तेषामिह न विद्यते॥ १९४॥
यज्ञेन तपसा दानैर्ये हि स्वर्गजितो नराः। धूमन्निशां कृष्णपक्षं दक्षिणायनमेव च॥ १९५॥
पितृलोकं चन्द्रमसं वायुं वृष्टिं जलं महीम्। क्रमात्ते सम्भवन्तीह पुनरेव व्रजन्ति च॥ १९६॥
एतद्यो न विजानाति मार्गद्वितयमत्मावान्। दन्दशूकः पतङ्गो वा भवेत्कीटोथ वा कृमिः॥१९७॥

अजवीथी (देवमार्ग) और अगस्त्यके तारा के बीच जो पितृयान नामक स्थान है उसी मार्गसे स्वर्गाभिलाषी अग्निहोत्री लोग स्वर्गमें जातेहैं॥ १८४॥ जो मनुष्य दानपरायण, अहंकाररहित, आठ गुणो (दया क्षमा, अनसूया, शौच, अनायास, मङ्गल, अकार्पण्य और अस्पृहा) से युक्त और सत्यनिष्ठ हैं वे भी उसी मार्गसे स्वर्गमें प्राप्त होतेहैं॥ १८५॥ उस पितृयानमें गृहस्थधर्मवाले ८८ सहस्र मुनि रहते हैं, वे लोग पुनःपुनः सृष्टिके आदिमें धर्मका उपदेश करके उसका बीज बोते हैं॥ १८६॥ सप्तर्षिमण्डल और नागवीथी (ऐरावत पथ) के बीचमें देवलोकमें रहनेवाले उतने ही (८८ सहस्र) मुनि, जो सब आरम्भोंसे रहित (तत्त्वज्ञानी) तपस्वी, ब्रह्मचर्ययुक्त, सङ्गत्यागी और मेधायुक्त हैं, वहां जाकर प्रलयतक स्थिर रहतेहैं॥१८७–१८८॥ उन्हींसे वेद, पुराण, अङ्गविद्या, उपनिषद, सूत्र, श्लोक भाष्य और सम्पूर्ण वाङ्मय शास्त्र प्रचलित होते हैं॥१८९॥ वेदपाठ, यज्ञ, ब्रह्मचर्य; तपस्या, दम, श्रद्धा, उपवास और स्वतन्त्रता (विषयके वश न होना) ये सब आत्मज्ञानके कारण हैं अर्थात् इनसे आत्मज्ञान होताहै॥ १९०॥ सब आश्रमवाले द्विजातियोंको उचित है कि उस आत्माको जानने, देखने और सुननेका उद्योग करें॥ १९१॥

❋ मनुस्मृति—१ अध्यायके ७५—७८ श्लोक। सृष्टिकी आदिमें महत्तत्त्वसे आकाश उत्पन्न हुआ जिसका गुण शब्द है; आकाशसे वायुकी उत्पत्ति हुई जिसका गुण स्पर्श है; वायुसे अग्नि उत्पन्न हुआ जिसका गुण रूप है; अग्निसे जल उत्पन्न हुआ, जिसका गुण रस है और जलसे पृथिवी उत्पन्न हुई जिसका गुण गन्ध है।

जो द्विज परमश्रद्धासे युक्त होकर निर्जन स्थानमें निवास करके सत्य (आत्मा) की उपासना करतेहैं वे क्रमसे अग्नि, दिन, शुक्लपक्ष, उत्तरायण, देवलोक, सूर्य और तेजको प्राप्त होतेहैं, फिर मानस पुरुष आकर उनको ब्रह्मलोकमें लेजाताहै, जहांसे फिर इस लोकमें लौटना नहीं होता ॥ १९२—१९४ ॥ जो लोग यज्ञ, तपस्या और दानसे स्वर्गमें जातेहैं वे क्रमसे धूम, रात्रि, कृष्णपक्ष, दक्षिणायन, पितृलोक और चन्द्रलोकको प्राप्त करतेहैं फिर वायु, वृष्टि, जल और भूमिको प्राप्त होकर अर्थात् अन्नरूपसे वीर्य होकर संसारमें आतेहैं ॥१९५——१९६॥ जो मनुष्य इन दोनों मार्गोंका निवारण नहीं जानता है अर्थात् दोनों मार्गोंके धर्मोंका आचरण नहीं करताहै वह सर्प, पक्षी, कीट अथवा कृमिका जन्म पाताहै ॥ १९७ ॥

ऊरुस्थोत्तानचरणः सव्ये न्यस्योत्तरं करम् । उत्तान किंचिदुन्नाम्य मुखं विष्टभ्य चोरसा ॥ १९८ ॥
निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन् । तालुस्थाचलजिह्वश्च संवृतास्यः सुनिश्चलः ॥१९९॥
संनिरुध्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः । द्विगुणं त्रिगुणं वापि प्राणायाममुपक्रमेत् ॥ २०० ॥
ततो ध्येयः स्थितो योऽसौ हृदये दीपवत्प्रभुः । धारयेत्तत्र चात्मानं धारणां धारयन्बुधः ॥ २०१ ॥
अन्तर्द्धानं स्मृतिः कान्तिर्दृष्टिः श्रोतज्ञता तथा । निजं शरीरमुत्सृज्य परकायप्रवेशनम् ॥ २०२ ॥
अर्थानां छन्दतः सृष्टिर्योगसिद्धेर्हि लक्षणम् । सिद्धेयोगे त्यजन्देहममृतत्वाय कल्पते ॥ २०३ ॥
अथवाप्यभ्यसन्वेदं न्यस्तकर्मा वने वसन् । अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयात्॥२०४॥
न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः । श्राद्धकृत्सत्यवादी च गृहस्थोपि हि मुच्यते ॥ २०५ ॥

दहिने जंघेपर बांया चरण और बांये जंघे पर दहिना चरण उत्तान करके स्थापित करे, बांये हाथकी हथेलीमें उत्तान करके दहिना हाथ रक्खे, मुखको छातीसे थांमकर किंचित् उन्नत करे, आंख मूंद देवे, काम, क्रोधादिसे रहित होवे, दांतोंसे दान्तोंका स्पर्श नहीं करे, तालूमें जीभको अचल रक्खे, मुखके बन्द करदेवे, शरीको निश्चल रक्खे, इन्द्रियोंको विषयोंसे निवृत्त करे, जो आसन न बहुत ऊंचा न बहुत नीचा हो उसपर बैठे, दुगुने अथवा तिगुने प्राणायामका अभ्यास करे ॥ १९८——२०० ॥ उसके पश्चात् जो प्रभु हृदयमें दीपकके समान स्थित है उसका ध्यान करे, बुद्धिमान् मनुष्य उसीमें मनको धारणा करके योगावलंबन करे ॥ २०१ ॥ अन्तर्द्धान होजाना, स्मृति (अतीन्द्रिय बातोंका स्मरण) रखना, शोभा होना, भूत भविष्य बातोंको देखना, बड़ी दूरकी बातोंको सुनलेना, अपने शरीरको छोड़कर दूसरेकी देहमें प्रवेश करजाना और अपनी इच्छासे पदार्थोंका रचना करलेना; ये सब योगसिद्धके लक्षण हैं, योगसिद्धि होने पर मरनेवाला योगी मोक्ष पाताहै ॥ २०२——२०३ ॥ अथवा जो मनुष्य सब कामनाओंको त्यागकर वनमें निवास करके वेदका अभ्यास रखताहै और विना मांगेहुए प्राप्त अन्नको परिमित (थोड़ा) भोजन करता है वह परम सिद्धि अर्थात् मोक्षको पाताहै ॥ २०४ ॥ धर्मपूर्वक धन उपार्जन करनेवाला, तत्त्वज्ञानमें निष्ठ अतिथियोंका सत्कार करनेवाला, श्राद्धकर्ममें तत्पर रहनेवाला और सत्यवादी गृहस्थ भी मुक्त होताहै ॥२०५॥

(९) हारीतस्मृति—७ अध्याय ।

योगशास्त्रं प्रवक्ष्यामि संक्षेपात्सारमुत्तमम् । यस्य च श्रवणाद्यान्ति मोक्षं चैव मुमुक्षवः ॥ २ ॥
योगाभ्यासबलेनैव नश्येयुः पातकानि च । तस्माद्योगपरो भूत्वा ध्यायेन्नित्यं क्रियापरः ॥ ३ ॥
प्राणायामेन वचनं प्रत्याहारेण चेन्द्रियम् । धारणाभिर्वशे कृत्वा पूर्वं दुर्धर्षणं मनः ॥ ४ ॥
एकाकारमनानन्दं बुद्धिरूपमलामयम् । सूक्ष्मात्सूक्ष्मतरं ध्यायेज्जगदाधारमुच्यते ॥ ५ ॥
आत्मना बहिरंतस्थं शुद्धचामीकरप्रभम् । रहस्येकान्तमासीनो ध्यायेदामरणान्तिकम् ॥ ६ ॥
यत्सर्वप्राणिहृदयं सर्वेषां च हृदि स्थितम् । यच्च सर्वजनैर्ज्ञेयं सोहमस्मीति चिन्तयेत् ॥ ७ ॥
आत्मलाभसुखं यावत्तपोध्यानमुदीरितम् । श्रुतिस्मृत्यादिकं धर्मं तद्विरुद्धं न चाचरेत् ॥ ८ ॥
यथा रथोऽश्वहीनस्तु यथाश्वो रथिहीनकः । एवं तपश्च विद्या च संयुते भैषजं भवेत् ॥ ९ ॥
यथान्नं मधुसंयुक्तं मधु वान्नेन संयुतम् । उभाभ्यामपि पक्षाभ्यां यथा खे पक्षिणां गतिः ॥ १० ॥
तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम् । विद्यातपोभ्यां सम्पन्नो ब्राह्मणो योगतत्परः ॥११॥
देहद्वयं विहायाशु मुक्तो भवति बन्धनात् । न तथा क्षीणदेहस्य विनाशो विद्यते क्वचित् ॥ १२ ॥

अब संक्षेपसे योगशास्त्रका उत्तम सार मैं कहताहूं जिसके सुननेसे मोक्षकी इच्छावाले मनुष्य मुक्त हो हैं ॥ २ ॥ योगाभ्यासके बलसे पाप नष्ट होतेहैं इस लिये योगमें तत्पर होकर उत्तम आचारणसे मनुष्य नित्य ध्यान करे ॥ ३ ॥ प्रथम प्राणायामसे वाणीको, प्रत्याहारसे इन्द्रियोंको और धारणासे वशकरनेके अयोग्य मनको वशमें करके एकाग्रचित्त होकर जो देवताओंको भी अगम्य, सूक्ष्मसे सूक्ष्म और जगत्के आश्रय है उस परमात्माका ध्यान करे ॥ ४–५ ॥ निर्जनस्थानमें एकाग्रचित्त बैठकर बाहर भीतर स्थित और शुद्ध सोनेके समान कान्तिवाले परमात्माका जन्मपर्यन्त ध्यान करतेरहे ॥ ६ ॥ जो सम्पूर्ण प्राणियोंका हृदय है, जो सबके हृदयमें विराजमान है और जो सबके जाननेयोग्य है वह परमात्मा मैं ही हूं, ऐसा चिंतवन करे ॥ ७ ॥ जबतक आत्माके लाभका सुख नहीं प्राप्त होवे तबतक तपस्या, ध्यान और श्रुति तथा स्मृतियोंमें कहेहुये

अन्य धर्म करे, आत्माकी प्राप्तिका विरोधी कर्म नहीं करे ॥ ८ ॥ जैसे घोड़ेविना रथ और सारथीविना घोड़ा नहीं चलता (दोनों परस्पर सहायक हैं) वैसेही तपस्या और विद्या (ज्ञान) दोनों मिलकर संसाररोगकी औषध हैं ॥ ९ ॥ जिसप्रकार मीठेसे युक्त अन्न और अन्नसे युक्त मीठा है और जिस भांति दोनों पंखसे ही आकाशमें पक्षी उड़सकतेहैं उसी प्रकार ज्ञान और कर्म (तपस्याआदि) दोनोंसे ही सनातन ब्रह्म मिलतेहैं ॥ १०-११ ॥ ज्ञान और तपसे युक्त और योगमें तत्पर ब्राह्मण स्थूल और सूक्ष्म; इन दोनों देहोंको छोड़कर बन्धनसे छूटजाता है, इस प्रकार जिसका शरीर नष्ट होगया है उसकी कुगति कभी नहीं होती ॥ ११-१२ ॥

(९) आपस्तम्बस्मृति–१० अध्याय।

न यमं यममित्याहुरात्मा वै यम उच्यते। आत्मा संयमितो येन तं यमः किं करिष्यति ॥३॥ न तथासिस्तथ। तीक्ष्णः सर्पो वा दुरधिष्ठितः। यथा क्रोधो हि जन्तूनां शरीरस्थो विनाशकः॥४॥ क्षमा गुणो हि जन्तूनामिहामुत्र सुखप्रदः। एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ॥५॥ यदेनं क्षमया युक्तमशक्तं मन्यते जनः॥ न शब्दशास्त्राभिरतस्य मोक्षो न चैव रम्यावसथप्रियस्य॥६॥ न भोजनाच्छादनतत्परस्य न लोकचित्तग्रहणे रतस्य ॥७॥ एकान्तशीलस्य दृढव्रतस्य मोक्षो भवे-त्प्रीतिनिवर्तकस्य। अध्यात्मयोगैकरतस्य सम्यङ्मोक्षो भवेन्नित्यमहिंसकस्य ॥ ८ ॥

बुद्धिमान्लोग यमराजको यम (दण्डदाता) नहीं कहतेहैं; किन्तु अपने आत्माको ही यम मानतेहैं जिसने आत्माको वशमें करलिया उसका यमराज क्या करेगा॥३॥खड्ग भी ऐसा तीक्ष्ण नहीं और सर्पभी ऐसा भयानक नहीं जैसा प्राणियोंके शरीरमें क्रोध नाशकरनेवाला है॥४॥ क्षमा जो गुण है वह प्राणियोंको इसलोक और परलोकमें सुख देनेवाला है, क्षमावालेंमें एक ही दो है,दूसरा नहीं कि क्षमावालेको मनुष्य असमर्थ मानतेहैं ॥५-६॥ व्याकरणमें रत रहनेसे, रमणीयगृहमें प्रीति होनेसे, भोजन वस्त्रमें तत्पर रहनेसे तथा संसारके मनको वश करनेमें रत होनेसे मोक्ष नहीं होता; किन्तु जो मनुष्य एकान्तमें निवास करताहै, दृढव्रतयुक्त है, सबकी प्रीतिसे अलग रहताहै,अध्यात्मयोगमें तत्पर है और कभी हिंसा नहीं करताहै उसीका मोक्ष होताहै ॥ ६-८ ॥

(१७) दक्षस्मृति–७ अध्याय।

लोका वशीकृता येन येन चात्मा वशीकृतः। इन्द्रियार्थो जितो येन तं योगं प्रब्रवीम्यहम् ॥ १ ॥ प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा। तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥ २ ॥ नारण्यसेवनाद्योगो नानेकग्रंथचिन्तनात्। व्रतैर्यज्ञैस्तपोभिर्वा न योगः कस्यचिद्भवेत् ॥ ४ ॥ न च पथ्याशनाद्योगो न नासाग्रनिरीक्षणात्। न च शास्त्रातिरिक्तेन शौचेन भवति कचित् ॥५॥ न मन्त्रमौनकुहकैरनेकैः सुकृतैस्तथा। लोकयात्रानियुक्तस्य योगो भवति कस्यचित् ॥ ६ ॥ अभियोगात्तथाभ्यासात्तस्मिन्नेव तु निश्चयात्। पुनः पुनश्च निर्वेदाद्योगः सिद्ध्यति योगिनः ॥७॥ आत्मचिन्ताविनोदेन शौचेन क्रीडनेन च। सर्वभूतसमत्वेन योगः सिद्ध्यति नान्यथा ॥ ८ ॥ यश्चाऽऽत्ममिथुनो नित्यमात्मक्रीडस्तथैव च। आत्मानन्दस्तु सततमात्मन्येव सुभावितः ॥ ९ ॥ रतश्चैव सुतुष्टश्च संतुष्टो नान्यमानसः। आत्मन्येव सुतृप्तोसौ योगस्तस्य प्रसिद्ध्यति ॥ १० ॥ सुप्तोपि योगयुक्तश्च जाग्रदेव विशेषतः। ईदृक्चेष्टः स्मृतः श्रेष्ठो वरिष्ठो ब्रह्मवादिनाम् ॥ ११ ॥ अत्रात्मव्यतिरेकेण द्वितीयं नैव पश्यति। ब्रह्मभूतः स एवेह दक्षपक्ष उदाहृतः ॥ १२ ॥

जिससे जगत् वशमें कियाजाता है, जिसके द्वारा आत्मा वशमें होताहै और जिससे इन्द्रियां जीतीजातीहैं उस योगकी कथा मैं कहताहूं ॥ १ ॥ प्राणायाम, ध्यान, प्रत्याहार, धारणा, तर्क (विवेक) और समाधि, ये ६ जिसके अङ्ग हैं उसको योग कहतेहैं ॥ २ ॥ वनमें वास, अनेक ग्रन्थोंके विचार, व्रत, यज्ञ अथवा तपस्यासे किसीको योग प्राप्त नहीं होता ॥ ४ ॥ पथ्य भोजन, नाकके अग्रभागके निरीक्षण, बहुत शास्त्रोंके देखने और शौचसे भी कभी योग नहीं होसकता ॥ ५ ॥ मन्त्र जपने, मौन रहने, होम करने, नाना प्रकारके पुण्य करने और लोकके व्यवहारोंमें तत्पर रहनेसे भी योग सिद्ध नहीं होताहै ॥ ६ ॥ योगमें तत्पर होने, लगातार उसका अभ्यास करने, उसमें अचल श्रद्धा विश्वास रखने और बारबार वैराग्य होनेसे योग सिद्ध होताहै ॥ ७ ॥ आत्माकी चिन्ताके आनन्द, शौचकी क्रीड़ा और सम्पूर्ण प्राणियोंमें समतासे योग सिद्ध होताहै; अन्यथा नहीं ॥ ८ ॥ जो मनुष्य सदा आत्मामें लीन, आत्मक्रिया परायण, आत्मामें आनन्द, आत्मध्यान परायण, आत्मामें रत, आत्मामें संतुष्ट, अनन्यचित्त और आत्मामेंही भलीभांति तृप्त है उसीका योग सिद्ध होताहै ॥९-१०॥ जो निद्रित अवस्थामें भी और विशेष

शङ्खस्मृति–७अध्याय,१२–१५श्लोक। प्राणोंको रोककर सात व्याहृति, ओङ्कार और शिरोमन्त्र (आपोज्योति)सहित गायत्रीके तीन बार पढ़नेको प्राणायाम कहतेहैं,संमयके जाननेवाले मनके रोकनेको धारणा कहते हैं, विषयोंसे इन्द्रियोंके हटानेको प्रत्याहार कहतेहैं और हृदयमें ध्यानके योगसे ब्रह्मके दर्शनके ध्यान कहतेहैं।

करके जाग्रत अवस्थामें योग युक्त रहताहै, जिसकी ऐसी चेष्टा है वही श्रेष्ठ और ब्रह्मवादियोंमें बड़ा कहागयाहै ॥ ११ ॥ जो मनुष्य इसलोकमें आत्माके विना दूसरेको नहीं देखताहै अर्थात् सम्पूर्ण प्राणियोंको आत्मरूप समान भावसे देखताहै, दक्षके मतसे वही ब्रह्मस्वरूप है ॥ १२ ॥

विषयासक्तचित्तो हि यतिर्मोक्षं न विन्दति । यत्नेन विषयासक्तिं तस्माद्योगी विवर्जयेत् ॥ १३ ॥
विषयेन्द्रियसंयोगं केचिद्योगं वदन्ति वै । अधर्मो धर्मबुद्ध्या तु गृहीतस्तैरपण्डितैः ॥ १४ ॥
आत्मनो मनसश्चैव संयोगं तु ततः परम् । उक्तानामधिका ह्येते केवलं योगवञ्चिताः ॥ १५ ॥

जिस यतीका चित्त विषयमें आसक्त है वह मोक्ष नहीं पाताहै, इसलिये योगी यत्नपूर्वक विषयसे मनको हटालेवे ॥ १३ ॥ कोई कोई विषय और इन्द्रियोंके संयोगको योग कहतेहैं; वे निर्बुद्धि अधर्मको धर्म जानकर ग्रहण करतेहैं ॥ १४ ॥ अन्य कोई कोई आत्मा और मनके संयोगको योग कहतेहैं, वे लोग पूर्वोक्त लोगोंसे भी अधिक योगवञ्चित हैं ॥ १५ ॥

वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि । एकीकृत्य विमुच्येत योगोयं मुख्य उच्यते ॥ १६ ॥
कषायमोहविक्षेपलज्जाशङ्कादिचेतसः । व्य पारास्तु समाख्यातास्ताञ्जित्वा वशमानयेत् ॥ १७ ॥
कुटुम्बैः पञ्चभिर्ग्रामः षष्ठस्तत्र महत्तरः । देवासुरैर्मनुष्यैश्च स जेतुं नैव शक्यते ॥ १८ ॥
बलेन परराष्ट्राणि गृह्णञ्छूरस्तु नोच्यते । जितो येनेन्द्रियग्रामः स शूरः कथ्यते बुधैः ॥ १९ ॥
बहिर्मुखानि सर्वाणि कृत्वा चाभिमुखानि वै । मनस्येवेन्द्रियाण्यत्र मनश्चात्मनि योजयेत् ॥ २० ॥
सर्वभावविनिर्मुक्तं क्षेत्रज्ञं ब्रह्मणि न्यसेत् । एतद्ध्यानं तथा ज्ञानं शेषस्तु ग्रन्थविस्तरः ॥ २१ ॥

सब वृत्तियोंसे मनको हटाकर जीवात्माको परमात्मामें मिलादेनेसे मुक्ति होजाती है, इसको मुख्य योग कहतेहैं ॥ १६ ॥ मनकी मलीनता, मोह, चित्तकी चञ्चलता, लज्जा और शङ्काआदि, ये चित्तके व्यापार कहेजातेहैं, इनको जीतकर मनको वशमें करे ॥ १७ ॥ पांच कुटुम्बों अर्थात् पांच ज्ञानेन्द्रियोंका ग्राम होताहै और छठवां मन उस ग्रामका प्रबल प्रधान है, जिसको देवता, असुर और मनुष्य जीत नहीं सकतेहैं ॥ १८ ॥ जो मनुष्य बलसे परायेके राज्यको जीतलेता है, वह शूर नहीं होता; किन्तु जिसने इन्द्रियोंके ग्रामको जीता है बुद्धिमान् लोग उसीको शूर कहतेहैं ॥ १९ ॥ विषयोंमें लगीहुई सब इन्द्रियोंको विषयोंसे हटादेवे, इन्द्रियोंको मनमें और मनको आत्मामें युक्त करे ॥ २० ॥ सब पदार्थोंसे रहित क्षेत्रज्ञ (जीवात्मा) को ब्रह्ममें मिलावे, यही ध्यान और ज्ञान है बाकी सब तो ग्रन्थोंका विस्तार है ॥ २१ ॥

त्यक्त्वा विषयभोगांस्तु मनो निश्चलतां गतम् । आत्मशक्तिस्वरूपेण समाधिः परिकीर्त्तितः॥२२॥
चतुर्णां सन्निकर्षेण फलं यत्तदशाश्वतम् । द्वयोस्तु सन्निकर्षेण शाश्वतं ध्रुवमक्षयम् ॥ २३ ॥

विषयभोगोंको त्यागकर आत्मशक्तिरूपसे मनकी स्थिरताको समाधि कहतेहैं ॥ २२ ॥ चार अर्थात् योगके ४ अङ्ग प्राणायाम, ध्यान, प्रत्याहार और धारणाके योगसे जो फल होताहै वह अनित्य है और दो अर्थात् तर्क (विवेक) और समाधिके योगसे प्राप्तहुआ फल नित्य और अक्षय है ॥ २३ ॥

यन्नास्ति सर्वलोकस्य तदस्तीति विरुध्यते । कथ्यमानं तथान्यस्य हृदयेनावतिष्ठते ॥ २४ ॥
स्वयंवेद्यं च तद्ब्रह्म कुमारी मैथुनं यथा । अयोगी नैव जानाति जात्यन्धो हि यथा घटम् ॥२५ ॥
नित्याभ्यसनशीलस्य सुसंवेद्यं हि तद्भवेत् । तत्सूक्ष्मत्वादनिर्देश्यं परं ब्रह्म सनातनम् ॥ २६ ॥
बुधास्त्वाभरणं भावं मनसालोचनं तथा । मन्यन्ते स्त्री च मूर्खश्च तदेव बहु मन्यते ॥ २७ ॥
सत्त्वोत्कटाः सुरास्तेपि विषयेन वशीकृताः । प्रमादिभिः क्षुद्रसत्त्वैर्मनुष्यैरत्र का कथा ॥ २८ ॥
तस्मात्त्यक्तकषायेण कर्त्तव्यं दण्डधारणम् । इतरस्तु न शक्नोति विषयैरभिभूयते ॥ २९ ॥
न स्थिरं क्षणमप्येकमुदकं च यथोर्मिभिः । वाताहतं तथा चित्तं तस्मात्तस्य न विश्वसेत् ॥ ३० ॥

इति श्रीबाबूसाधुचरणप्रसादसंगृहीतो धर्मशास्त्रसंग्रहः समाप्तः ।

जो ब्रह्म सबको नास्ति प्रतीत होताहै वह विद्यमान है ऐसा कहनेसे दोनों बातोंमें विरोध पड़ताहै और जो कहीं नहीं है वह अन्यके हृदयमें क्यों स्थित होगा ॥ २४ ॥ वह ब्रह्म कुमारीके मैथुनके समान स्वयं जानने योग्य है, जैसे जन्मान्ध मनुष्य घटके रूपको नहीं देखसकता वैसे ही योगमार्गसे हीन मनुष्य उस ब्रह्मको नहीं जानताहै ॥ २५ ॥ नित्य योगाभ्यासके स्वभाववाले मनुष्यको अनायाससे ब्रह्म जाननेयोग्य होजाताहै, वह सनातन परब्रह्म सूक्ष्म होनेके कारण दिखानेयोग्य नहीं है ॥ २६ ॥ पण्डित लोग मनमें ब्रह्मका ज्ञान होनेको ही भूषण मानतेहैं । और स्त्री तथा मूर्खलोग आभूषणको बहुत उत्तम समझतेहैं ॥२७॥ जब विषयोंने सत्त्वगुणी देवताओंको भी अपने वशमें करलिया तब भूलमें पड़हुए अल्पसत्त्व गुणवाले मनुष्योंके बशकरनेकी क्या कहना है ॥ २८ ॥ इसलिये मनके मलको त्याग करके दण्ड धारण करना चाहिये, जिसने त्याग नहीं किया वह दण्डधारणके लिये समर्थ नहीं होताहै; क्योंकि विषय उसको दबालेतेहैं ॥ २९ ॥ जिस प्रकारसे तरङ्गोंके उठनेसे जल क्षणमात्र भी स्थिर नहीं रहता उसी प्रकार विषयवासनाओंसे हताहुआ चित्त स्थिर नहीं रहसकता, इसलिये उसका विश्वास नहीं करना चाहिये ॥ ३० ॥

इति श्री बाबू साधुचरणप्रसाद विरचित धर्मशास्त्रसंग्रहभाषाटीका समाप्त ।

अथ धर्मशास्त्रसंग्रहका-परिशिष्ट *।

(१) मनुस्मृति-१अध्याय ।

पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः । रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः ॥ ४३ ॥
अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः । यानि चैवंप्रकाराणि स्थलजान्यौदकानिच॥४४॥
स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम् । ऊष्मणश्चोपजायन्ते यच्चान्यत्किञ्चिदीदृशम् ॥ ४५ ॥
उद्भिज्जास्स्थावरास्सर्वे बीजकाण्डप्ररोहिणः । ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः ॥ ४६ ॥
अपुष्पाः फलवन्तो ये ते वनस्पतयस्स्मृताः । पुष्पिणः फलिनश्चैव वृक्षास्तूभयतस्स्मृताः ॥ ४७ ॥
निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला । त्रिंशत्कला मुहूर्त्तः स्यादहोरात्रन्तु तावतः॥६४॥
पित्र्ये रात्र्यहनी मासः प्रविभागस्तु पक्षयोः । कर्मचेष्टास्वहः कृष्णः शुक्लः स्वप्नाय शर्वरी ॥६६॥
दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः । अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम् ॥ ६७ ॥
मनस्सृष्टिं विकुरुते चोद्यमानं सिसृक्षया । आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः ॥ ७५ ॥
आकाशात्तु विकुर्वाणात्सर्वगन्धवहः शुचिः । बलवाञ्जायते वायुस्स वै स्पर्शगुणो मतः ॥ ७६ ॥
वायोरपि विकुर्वाणाद्विरोचिष्णु तमोनुदम् । ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते ॥ ७७ ॥
ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः । अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः ॥७८
अध्यापनमध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् ॥ ८८ ॥

मनुस्मृति-२ अध्याय ।

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः । ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ॥१०॥
प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते । मन्त्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम् ॥ २९ ॥
नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत् । पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ॥ ३० ॥
चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात् । षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले ॥ ३४ ॥
चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः । प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात् ॥ ३५ ॥
गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् । गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ॥ ३६ ॥
ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे । राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ॥ ३७ ॥
आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते । आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥ ३८ ॥
अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः । सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥ ३९ ॥
नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् । ब्राह्मान्यौनांश्च संबन्धान्नाचरेद्ब्राह्मणः सह ॥ ४० ॥
उपस्पृश्य द्विजो नित्यमन्नमद्यात्समाहितः । भुक्त्वा चोपस्पृशेत्सम्यगद्भिः खानि च संस्पृशेत्॥५३॥
पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् । दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वशः ॥ ५४ ॥
पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति । अपूजितं तु तद्भुक्तमुभयं नाशयेदिदम् ॥ ५५ ॥
नोच्छिष्टं कस्यचिद्दद्यान्नाद्याच्चैव तथान्तरा । न चैवाध्यशनं कुर्यान्नचोच्छिष्टः क्वचिद्व्रजेत् ॥ ५६ ॥
अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम् । अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ॥ ५७ ॥
अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते । कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः ॥ ५९ ॥
मेखलामजिनं दण्डमुपवीतं कमण्डलुम् । अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत् ॥ ६४ ॥
केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते । राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥ ६५ ॥
श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी । पायूपस्थं हस्तपादं वाक्चैव दशमी स्मृता ॥ ९०॥
बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्वशः । कर्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते ॥ ९१ ॥
श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः । न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः९८
पूर्वां संध्यां जपंस्तिष्ठेत्सावित्रीमार्कदर्शनात् । पश्चिमां तु समासीनः सम्यगृक्षविभावनात् ॥ १०१॥

* धर्मशास्त्रसंग्रहकी टिप्पणियोंके तथा संज्ञाशब्दार्थके मूलश्लोक इस परिशिष्टमें हैं ।

वेदोपकरणे चैव स्वाध्याये चैव नैत्यके । नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥ १०९ ॥
उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥ १४० ॥
एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः । योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ॥ १४१ ॥
निषेकादीनि कर्माणि यः करोति यथाविधि । संभावयति चान्नेन स विप्रो गुरुरुच्यते ॥ १४२ ॥
अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान्मखान् । यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते॥१४३॥
योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ १६८ ॥
स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः । स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत् ॥१८१॥
पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः । गुरुराहवनीयस्तु साग्नित्रेता गरीयसी ॥ २३१ ॥

मनुस्मृति-३ अध्याय ।

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥ ७० ॥
एकरात्रन्तु निवसन्नतिथिर्ब्राह्मणः स्मृतः । अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥ १०२ ॥
कग्रामीणमतिथिं विप्रं साङ्गतिकं तथा । उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोऽपि वा ॥ १०३ ॥
कामं श्राद्धेऽर्चयेन्मित्रं नाभिरूपमपि त्वरिम् । द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् ॥ १४४ ॥
दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ १७१ ॥
भ्रातुर्मृतस्य भार्यायां योऽनुरज्येत कामतः । धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः ॥ १७३ ॥
परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ । पत्यौ जीवति कुण्डः स्यान्मृते भर्त्तरि गोलकः ॥ १७४ ॥
ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितम् । ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् ॥ २४३ ॥
आसपिण्डक्रियाकर्म द्विजातेः संस्थितस्य तु । अदैवं भोजयेच्छ्राद्धं पिण्डमेकं तु निर्वपेत् ॥ २४७ ॥
सह पिण्डक्रियायां तु कृतायामस्य धर्मतः । अनयैवावृता कार्यं पिण्डनिर्वपणं सुतैः ॥ २४८ ॥
मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतम् । अक्षारलवणं चैव प्रकृत्या हविरुच्यते ॥ २५७ ॥

मनुस्मृति-४ अध्याय ।

नाधार्मिके वसद्ग्रामे न व्याधिबहुले भृशम् । नैकः प्रपद्येताध्वानं न चिरं पर्वते वसेत् ॥ ६० ॥
न शूद्रराज्ये निवसेन्नाधार्मिकजनावृते । न पाषण्डिगणाक्रान्ते नोपसृष्टेऽन्त्यजैर्नृभिः ॥ ६१ ॥
न भुञ्जीतोद्धृतस्नेहं नातिसौहित्यमाचरेत् । नातिप्रगे नातिसायं न सायं प्रातराशितः ॥ ६२ ॥
न कुर्वीत वृथा चेष्टां न वार्यञ्जलिना पिबेत् । नोत्सङ्गे भक्षयेद्भक्ष्यान्न जातु स्यात्कुतूहली ॥ ६३ ॥
नाक्षैः क्रीडेत्कदाचित्तु स्वयं नोपानहौ हरेत् । शयनस्थो न भुञ्जीत न पाणिस्थं न चासने ॥ ७४ ॥
न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम् । न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ॥ ८० ॥
अमावास्यामष्टमीञ्च पौर्णमासीं चतुर्दशीम् । ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥१२८॥
सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः । श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥ १५८ ॥
धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः । बैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः ॥ १९५ ॥
अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च बकव्रतचरो द्विजः ॥ १९६ ॥
परकीयनिपानेषु न स्नायाच्च कदाचन । निपानकर्तुः स्नात्वा तु दुष्कृतांशेन लिप्यते ॥ २०१ ॥
यानशय्यासनान्यस्य कूपोद्यानगृहाणि च । अदत्तान्युपभुञ्जान एनसः स्यात्तुरीयभाक् ॥ २०२ ॥
मत्तक्रुद्धातुराणाञ्च न भुञ्जीत कदाचन । केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः ॥ २०७ ॥
भ्रूणघ्नावेक्षितञ्चैव संस्पृष्टञ्चाप्युदक्यया । पतत्रिणावलीढञ्च शुना संस्पृष्टमेव च ॥ २०८ ॥
गवा चान्नमुपघ्रातं घुष्टान्नञ्च विशेषतः । गणान्नं गणिकान्नञ्च विदुषा च जुगुप्सितम् ॥ २०९ ॥
स्तेनगायकयोश्चान्नं तक्ष्णोर्वार्धुषिकस्य च । दीक्षितस्य कदर्यस्य बद्धस्य निगडस्य च ॥ २१० ॥
अभिशस्तस्य षंढस्य पुंश्चल्या दाम्भिकस्य च । शुक्तं पर्युषितञ्चैव शूद्रस्योच्छिष्टमेव च ॥ २११ ॥
चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजिनः । उग्रान्नं सूतिकान्नञ्च पर्याचान्तमनिर्दशम् ॥ २१२ ॥
अनर्चितं वृथा मांसमवीरायाश्च योषितः । द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतम् ॥ २१३ ॥
भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः । गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूप्यमुत्तमम् ॥२३०॥
वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः । अनडुहः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपम् ॥ २३१ ॥

मनुस्मृति–५ अध्याय।

यो यस्य मांसमश्नाति स तन्मांसाद उच्यते । मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान्विवर्जयेत्१५॥
पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः । राजीवान्सिंहतुण्डांश्च सशल्कांश्चैव सर्वशः ॥ १६ ॥
श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा । भक्ष्यान्पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः ॥ १८ ॥
छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम् । पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः ॥ १९ ॥
अमत्यैतानि षट् जग्ध्वा कृच्छ्रं सान्तपनं चरेत् । यतिचान्द्रायणं वापि शेषेषूपवसेदहः ॥ २० ॥
प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां च काम्यया । यथाविधि नियुक्तस्तु प्राणानामेव चात्यये ॥२७॥
अनुमन्ता विशसिता निहन्ता क्रयविक्रयी । संस्कर्त्ता चोपहर्ता च खादकश्चेति घातकाः ॥ ५१ ॥
वर्षेवर्षेऽश्वमेधेन यो यजेत शतं समाः । मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥ ५३ ॥
फलमूलाशनैर्मेध्यैर्मुन्यन्नानां च भोजनैः । न तत्फलमवाप्नोति यन्मांसपरिवर्जनात् ॥ ५४ ॥
न मांसभक्षणे दोषो न मद्ये न च मैथुने । प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥ ५६ ॥
सपिण्डता तु पुरुषे सप्तमे विनिवर्तते । समानोदकभावस्तु जन्मनाम्नोरवेदने ॥ ६० ॥
स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यन्ति बान्धवाः । यथोक्तेनैव कल्पेन शुध्यन्ति तु सनाभयः॥७२॥
न वर्धयेदघाहानि प्रत्यूहेन्नाग्निषु क्रियाः । न च तत्कर्म कुर्वाणः सनाभ्योऽप्यशुचिर्भवेत् ॥ ८४ ॥
डिम्भाहवहतानां च विद्युता पार्थिवेन च । गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः ॥ ९५ ॥
ज्ञानं तपोऽग्निराहारो मृन्मनोवार्युपाञ्जनम् । वायुः कर्मार्ककालौ च शुद्धेः कर्तॄणि देहिनाम् ॥ १०५॥
सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् । योऽर्थे शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः ॥ १०६॥
क्षान्त्या शुध्यन्ति विद्वांसो दानेनाकार्यकारिणः । प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः॥१०७॥
मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति । रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमः ॥ १०८॥
अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति । विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति१०९॥
नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम् । ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः १२९
श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत् । क्रव्याद्भिश्च हतस्यान्यैश्चाण्डालाद्यैश्च दस्युभिः॥१३१॥
एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश । उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता ॥ १३६ ॥
एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् । त्रिगुणं स्याद्वनस्थानां यतीनां तु चतुर्गुणम् ॥१३७॥
मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः । प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम् ॥ १५२ ॥
नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषितम् । पतिं शुश्रूषते येन तेन स्वर्गे महीयते ॥ १५५ ॥
व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम् । शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते१६४
पतिं या नाभिचरति मनोवाग्देहसंयता । सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते ॥१६५॥
एवं वृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीम् । दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् ॥ १६७ ॥
भार्यायै पूर्वमारिण्यै दत्त्वाग्नीनन्त्यकर्मणि । पुनर्दारक्रियां कुर्यात्पुनराधानमेव च ॥ १६८ ॥

मनुस्मृति–६ अध्याय।

वर्जयेन्मधुमांसं च भौमानि कवकानि च । भूस्तृणं शिग्रुकं चैव श्लेष्मातकफलानि च ॥ १४ ॥

मनुस्मृति–७ अध्याय।

मृगयाक्षो दिवा स्वप्नः परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाट्या च कामजो दशको गणः॥४७॥
पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् । वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥ ४८ ॥
सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे । प्राधीते शतसाहस्रमनन्तं वेदपारगे ॥ ८५ ॥

मनुस्मृति–८ अध्याय।

वृषो हि भगवान्धर्मस्तस्य यः कुरुते ह्यलम् । वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत् ॥ १६ ॥
दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनम् । राजा तदुपयुञ्जानश्चौरस्याप्नोति किल्बिषम् ॥ ४० ॥
लोकसंव्यवहारार्थं याः संज्ञाः प्रथिता भुवि । ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्याम्यशेषतः ॥ १३१ ॥
जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः । प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥ १३२ ॥

त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः । ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः ॥ १३३ ॥
सर्षपाः षड् यवो मध्यस्त्रियवं त्वेककृष्णलम् । पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश ॥१३४ ॥
पलं सुवर्णाश्चत्वारः पलानि धरणं दश । द्वे कृष्णले समधृते विज्ञेयो रौप्यमाषकः ॥ १३५ ॥
ते षोडश स्याद्धरणं पुराणश्चैव राजतम् । कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः ॥ १३६ ॥
धरणानि दश ज्ञेयः शतमानस्तु राजतः । चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः ॥ १३७ ॥
पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः । मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः ॥ १३८॥
ऋणे देये प्रतिज्ञाते पञ्चक शतमर्हति । अपह्नवं तद्विगुणं तन्मनोरनुशासनम् ॥ १३९ ॥
यः स्वामिनाऽननुज्ञातमाधिं भुङ्क्तेऽविचक्षणः । तेनार्धवृद्धिर्मोक्तव्या तस्य भोगस्य निष्कृतिः १५०
ग्रहीता यदि नष्टः स्यात्कुटुम्बार्थे कृतो व्ययः । दातव्यं बान्धवैस्तत्स्यात्प्रविभक्तैरपि स्वतः॥१६६॥
कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं यमाचरेत् । स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत्॥१६७॥
यः साधयन्तं छन्देन वेदयेद्धनिकं नृपे । स राज्ञा तच्चतुर्भागं दाप्यस्तस्य च तद्धनम् ॥ १७६ ॥
राजा स्तेनेन गन्तव्यो मुक्तकेशेन धावता । आचक्षाणेन तत्स्तेयमेवं कर्मास्मि शाधि माम्॥३१४॥
स्कन्धेनादाय मुसलं लगुडं वापि खादिरम् । शक्तिं चोभयतस्तीक्ष्णामायसं दण्डमेव वा ॥३१५ ॥
शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते । अशासित्वा तु तं राजा स्तेनस्याप्नोति किल्बिषम्३१६
अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी । गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम्३१७
स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतम् । निरन्वयं भवेत्स्तेयं हृत्वापह्नूयते च यत् ॥ ३३२ ॥
पिताचार्यः सुहृद्भ्राता भार्या पुत्रः पुरोहितः । नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति३३५॥
कार्षापणं भवेद्दण्ड्यो यत्रान्यः प्राकृतो जनः । तत्र राजा भवेद्दण्ड्यः सहस्रमिति धारणा ॥ ३३६॥
ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्रिमौ । पैत्रिको दण्डदासश्च सप्तैते दासयोनयः ॥ ४१५ ॥

मनुस्मृति—९ अध्याय ।

ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति । क्षेत्रिकस्यैव तद्बीजं न वप्ता लभते फलम् ॥ ५४ ॥
प्रोषितो धर्मकार्यार्थं प्रतीक्ष्योऽष्टौ नरः समाः । विद्यार्थं षड् यशोऽर्थं वा कामार्थं त्रींस्तु वत्सरान्७६।.
आददीत न शूद्रोऽपि शुल्कं दुहितरं ददन् । शुल्कं हि गृह्णन्कुरुते छन्नं दुहितृविक्रयम् ॥ ९८ ॥
अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम् । यदपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरम् ॥१२७॥
मातुस्तु यौतकं यत्स्यात्कुमारीभाग एव सः । दौहित्र एव च हरेदपुत्रस्याखिलं धनम् ॥ १३१ ॥
भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान् भवेत् । सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥ १८२ ॥
सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत् । सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ॥ १८३ ॥
अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि । भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ॥ १९४ ॥
अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते । प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः ॥ २२३ ॥
द्यूतमेतत्पुरा कल्पे दृष्टं वैरकरं महत् । तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ॥ २२७ ॥
ये नियुक्तास्तु कार्येषु हन्युः कार्याणि कार्यिणाम् । धनोष्मणा पच्यमानास्तान्निःस्वान्कारयेन्नृपः२३१
अमात्याः प्राड्विवाको वा यत्कुर्युः कार्यमन्यथा । तत्स्वयं नृपतिः कुर्यात्तान्सहस्रं च दण्डयेत् २३४॥
यावानवध्यस्य वधे तावान्वध्यस्य मोक्षणे । अधर्मो नृपतेर्दृष्टो धर्मस्तु विनियच्छतः ॥ २४९ ॥

मनुस्मृति—१० अध्याय ।

ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः । चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ॥ ४ ॥
सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सनम् । वैदेहकानां स्त्रीकार्यम्मागधानां वणिक्पथः ॥ ४७ ॥
म त्स्यघातो निषादानां तष्टिस्त्वायोगवस्य च । मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् ॥ ४८ ॥
क्षत्त्रुग्रपुक्कसानां तु बिलौकोवधबन्धनम् । धिग्वणानां चर्मकार्यं वेणानां भाण्डवादनम् ॥ ४९ ॥
दिवा चरेयुः कार्यार्थं चिह्निता राजशासनैः । अबान्धवं शवं चैव निर्हरेयुरिति स्थितिः ॥ ५५ ॥
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया । वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ॥ ५६ ॥
उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च । पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः ॥१२५॥

मनुस्मृति–११ अध्याय ।

क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः । धनेन वैश्यशूद्रौ तु जपहोमैर्द्विजोत्तमः ॥ ३४ ॥
गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा । यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः ॥ ९५॥
जीनकार्मुकवस्तावीन्पृथग्दद्याद्विशुद्धये । चतुर्णामपि वर्णानां नारीर्हत्वाऽनवस्थिताः ॥ १३९ ॥
अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च । पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ १५१ ॥
वपनं मेखलादण्डौ भैक्षचर्या व्रतानि च । निवर्त्तन्ते द्विजातीनां पुनः संस्कारकर्मणि ॥ १५२ ॥
अभोज्यानां तु भुक्त्वान्नं स्त्रीशूद्रोच्छिष्टमेव च । जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं यवान्पिबेत् ॥१५३॥
मासिकान्नं तु योऽश्नीयादसमावर्त्तको द्विजः । स त्रीण्यहान्युपवसेदेकाहं चोदके वसेत् ॥ १५८ ॥
अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता । अज्ञानभुक्तं तूत्तार्यं शोध्यं वाऽप्याशु शोधनैः ॥१६१॥
गुरुतल्पव्रतं कुर्याद्रेतः सित्क्वा स्वयोनिषु । सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च ॥१७१॥
चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च । पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति१७६
श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च । नराश्वोष्ट्रवराहैश्च प्राणायामेन शुद्ध्यति ॥ २०० ॥
उष्ट्रयानं समारुह्य खरयानं तु कामतः । स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुद्ध्यति ॥२०२॥
अनुक्तनिष्कृतीनां तु पापानामपनुत्तये । शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत् ॥ २१० ॥
ऋचो यजूंषि चान्यानि सामानि विविधानि च । एष ज्ञेयस्त्रिवृद्वेदो यो वेदैनं स वेदवित् ॥२६५ ॥
आद्यं यत्त्र्यक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता । स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् ॥ २६६ ॥

मनुस्मृति–१२ अध्याय ।

वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च । यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते ॥ १० ॥
योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते । यः करोति स कर्माणि भूतात्मेत्युच्यते बुधैः ॥ १२ ॥
जीवसंज्ञोऽन्तरात्माऽन्यः सहजः सर्वदेहिनाम् । येन वेदयते सर्वं सुखं दुःखं च जन्मसु ॥ १३ ॥
सत्त्वं रजस्तमश्चैव त्रीन्विद्यादात्मनो गुणान् । यैर्व्याप्येमान्स्थितो भावान्महान्सर्वानशेषतः ॥ २४॥
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः । वेदादेव प्रसूयन्ते प्रसूतिगुणकर्मतः ॥ ९८ ॥
धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः । ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ॥ १०९ ॥

(१ क) वृद्धमनुस्मृति ।

अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता । पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च (१)
सपिण्डता तु पुरुषे सप्तमे विनिवर्तते । समानोदकभावस्तु निवर्तेता चतुर्दशात् (२) ।
जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यते (३) ।
दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः । शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते (४) ।

(२) याज्ञवल्क्यस्मृति–१ अध्याय ।

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः । यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती ॥ ४ ॥
पराशरव्यासशंखलिखिता दक्षगौतमौ । शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः ॥ ५ ॥
श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । सम्यक् संकल्पजः कामो धर्ममूलमिदं स्मृतम् ७
चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा । सा ब्रूते यं स धर्मः स्यादेको वाध्यात्मवित्तमः ॥ ९ ॥
ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः । निषेकादिश्मशानान्तास्तेषां वै मन्त्रतः क्रियाः ॥१०॥
गर्भाधानमृतौ पुंसः सवनं स्पन्दनात्पुरा । षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म च ॥ ११ ॥
अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः । षष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलम् ॥ १२ ॥
एवमेनः शमं याति बीजगर्भसमुद्भवम् । तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः ॥ १३ ॥
गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम् । राज्ञामेकादशे सैके विशामेके यथाकुलम् ॥ १४ ॥
उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् । वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥ १५ ॥
कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च । प्राजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥ १९ ॥
गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकाम् । प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः ॥ २३ ॥

कृतज्ञाद्रोहिमेधाविशुचिकल्पानसूयकाः । अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवित्तदाः ॥ २८ ॥
दण्डाजिनोपवीतानि मेखलाञ्चैव धारयेत् । ब्राह्मणेषु चरेद्भैक्ष्यमनिन्द्येष्वात्मवृत्तये ॥ २९ ॥
आदिमध्यावसानेषु भवच्छब्दोपलक्षिता । ब्राह्मणक्षत्रियविशां भैक्ष्यचर्यायथाक्रमम् ॥ ३० ॥
कृताग्निकार्यो भुञ्जीत वाग्यतो गुर्वनुज्ञया । आपोशानक्रिया पूर्वं सत्कृत्यान्नमकुत्सयन् ॥ ३१ ॥
ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि । ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन् ॥ ३२ ॥
स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति । उपनीय ददद्वेदमाचार्यः स उदाहृतः ॥ ३४ ॥
एकदेशमुपाध्याय ऋत्विग्यज्ञकृदुच्यते । एते मान्या यथापूर्वमेभ्यो माता गरीयसी ॥ ३५ ॥
प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्च वा । ग्रहणान्तिकमित्येके केशान्तश्चैव षोडशे ॥ ३६ ॥
अतऊर्ध्वं पतन्त्येते सर्वधर्मवहिष्कृताः । सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥ ३८ ॥
मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् । ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ॥ ३९ ॥
नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ । तदभावेऽस्य तनये पत्न्यां वैश्वानरेपि वा ॥ ४९ ॥
अनेन विधिना देहं साधयन्विजितेन्द्रियः । ब्रह्मलोकमवाप्नोति न चेह जायते पुनः ॥ ५० ॥
अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् । अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ॥ ५२ ॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् । पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा ॥ ५३ ॥
दशपूरुषविख्याताच्छ्रोत्रियाणां महाकुलात् । स्फीतादपि न संचारिरोगदोषसमन्वितात् ॥ ५४ ॥
ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता । तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥ ५८ ॥
यज्ञस्थ ऋत्विजे दैव आदायार्षस्तु गोद्वयम् । चतुर्दशप्रथमजः पुनात्युत्तरजश्च षट् ॥ ५९ ॥
इत्युक्त्वा चरतां धर्मं सह या दीयतेर्थिने । स कायः पावयेत्तज्जः षट्षट् वंश्यान् सहात्मना ॥६०॥
आसुरो द्रविणादानाद्गांधर्वः समयान्मिथः । राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात् ॥ ६१ ॥
पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरम् । वैश्या प्रतोदमाद्द्याद्वेदने त्वग्रजन्मनः ॥ ६२ ॥
लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः । यस्मात्तस्मात्स्त्रियः सेव्याः कर्त्तव्याश्च सुरक्षिताः॥७८॥
षोडशर्तुनिशाः स्त्रीणां तस्मिन् युग्मासु संविशेत् । ब्रह्मचार्येव पर्वण्याद्याश्चतस्रश्च वर्जयेत् ॥ ७९ ॥
एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत् । सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान् ॥८०॥
यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन् । स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः ॥ ८१ ॥
संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी । कुर्यात् श्वशुरयोः पादवन्दनं भर्तृतत्परा ॥ ८३ ॥
क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् । हास्यं परगृहे यानन्त्यजेत्प्रोषितभर्तृका ॥ ८४ ॥
रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्द्धके । अभावे ज्ञातयस्तेषां न स्वातन्त्र्यंक्वचित्स्त्रियाः ॥८५॥
पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः । हीना न स्याद्विना भर्त्रा गर्हणीयान्यथा भवेत् ॥ ८६ ॥
सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् । सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा ॥ ८८ ॥
दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः । आहरेद्विधिवद्दारानग्नींश्चैवाविलम्बयन् ॥ ८९ ॥
सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः । अनिन्द्येषु विवाहेषु पुत्राः सन्तानवर्द्धनाः ॥ ९० ॥
विप्रान्मूर्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम् । अंबष्ठः शूद्र्यां निषादो जातः पारसवोपि वा९१॥
वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ । वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः९२
ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहिकस्तथा । शूद्राज्जातस्तु चाण्डालः सर्वधर्मवहिष्कृतः ॥ ९३॥
क्षत्रिया मागधं वैश्याच्छूद्रात्क्षत्तारमेव च । शूद्रादायोगवं वैश्या जनयामास वै सुतम् ॥ ९४ ॥
जात्युत्कर्षो युगे ज्ञेयः पञ्चमे सप्तमेऽपि वा । व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम् ॥ ९६ ॥
कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही । दायकालाहृते वापि श्रौतं वैतानिकाग्निषु ॥ ९७ ॥
वेदाथर्वपुराणानि सेतिहासानि शक्तितः । जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत् ॥ १०१ ॥
वलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः । भूतपित्रमरब्रह्ममनुष्याणां महामखाः ॥ १०२ ॥
देवेभ्यश्च हुतादन्नाच्छेषाद् भूतबलिं हरेत् । अन्नं भूमौ श्वचाण्डालवायसेभ्यश्च निःक्षिपेत् ॥ १०३ ॥
अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलम् । स्वाध्यायं चान्वहं कुर्यान्न पचेदन्नमात्मने ॥ १०४ ॥
बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः । संभोज्यातिथिभृत्यांश्च दम्पत्योः शेषभोजनम् ॥ १०५ ॥

अतिथित्वेन वर्णानां देयं शक्त्यानुपूर्वशः। अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैः॥ १०७॥
सत्कृत्य भिक्षवे भिक्षा दातव्या सुव्रताय च। भोजयेच्चागतान्काले सखिसम्बन्धिबान्धवान्॥१०८॥
प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः। प्रियो विवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः॥११०॥
अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः। मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः॥ १११॥
परपाकरुचिर्न स्यादनिन्द्यामन्त्रणादृते। वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनम्॥ ११२॥
अतिथिं श्रोत्रियं तृप्तमासीमान्तमनुव्रजेत्। अहःशेषं समासीत शिष्टैरिष्टैश्च बन्धुभिः॥ ११३॥
उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च। भृत्यैः परिवृतो भुक्त्वा नातितृप्त्याथ संविशेत्१ ४
विद्याकर्मवयोबन्धुवित्तैर्मान्या यथाक्रमम्। एतैः प्रभूतैः शूद्रोपि वार्द्धके मानमर्हति॥ ११६॥
वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम्। पन्था देयो नृपस्तेषां मान्यः स्नातश्च भूपतेः॥ ११७॥
इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च। प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा॥ ११८॥
प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम्। कुसीदकृषिवाणिज्यपाशुपाल्यं विशः स्मृतम्॥ ११९॥
शूद्रस्य द्विजशुश्रूषा तया जीवन्वणिग्भवेत्। शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन्॥ १२०॥
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः। दानं दया दमः क्षान्तिः सर्वेषां धर्मसाधनम्॥ १२२॥
वयोबुद्ध्यर्थवाग्वेषश्रुताभिजनकर्मणाम्। आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथा॥ १२३॥
त्रैवार्षिकाधिकान्नो यः स तु सोमं पिबेद्द्विजः प्राक्सौमिकीः क्रियाः कुर्याद्यस्यान्नं वार्षिकं भ त् १२४
प्रतिसंवत्सरं सोमः पशुः प्रत्ययनन्तथा। कर्त्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि॥ १२५॥
एषामसम्भवे कुर्यादिष्टिं वैश्वानरीं द्विजः। हीनकल्पं न कुर्वीत सति द्रव्ये फलप्रदम्॥ १२६॥
चाण्डालो जायते यज्ञकरणाच्छूद्रभिक्षितात्। यज्ञार्थं लब्धमददद्भासः काकोऽपि वा भवेत्॥१२७॥
कुशूलकुम्भीधान्यो वा त्र्याहिको श्वस्तनोऽपि वा। जीवेद्वापि शिलोञ्छेन श्रेयानेषां परः परः१२८॥
राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा। दम्भिहैतुकपाखण्डिबकवृत्तींश्च व त्॥ १३०॥
शुक्लाम्बरधरो नीचकेशश्मश्रुनखः शुचिः। न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः॥ १३१॥
दाक्षायणी ब्रह्मसूत्री वेणुमान् सकमण्डलुः। कुर्यात्प्रदक्षिणं देवमृद्गोविप्रवनस्पतीन्॥ १३३॥
न तु मेहेन्नदीछायावर्त्मगोष्ठाम्बुभस्मसु। न प्रत्यग्न्यर्कगोसोमसन्ध्याम्बुस्त्रीद्विजन्मनः॥ १३४॥
नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनाम्। न च मूत्रं पुरीषं वा नाशुचीराहुतारकाः॥ १३५॥
अयं मे वज्र इत्येवं सर्वं मन्त्रमुदीरयेत्। वर्षत्यप्रावृतो गच्छेत्स्वपेत्प्रत्यक्शिरा न च॥ १३६॥
ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सु न निःक्षिपेत्। पादौ प्रतापयेन्नाग्नौ न चैनमभिलङ्घयेत्॥ १३७॥
जलं पिबेन्नाञ्जलिना शयानं न प्रबोधयेत्। नाक्षैः क्रीडेन्नधर्मघ्नैर्व्याधितैर्वा न संविशेत्॥ १३८॥
अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा। हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु॥ १४२॥
पौषमासस्य रोहिण्यामष्टकायामथापि वा। जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः॥ १४३॥
गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत्। न निन्दाताडने कुर्यात्सुतं शिष्यञ्च ताडयेत् १५५॥
मातृपित्रतिथिभ्रातृजामिसम्बन्धिमातुलैः। वृद्धबालातुराचार्यवैद्यसंश्रितबान्धवैः॥ १५७॥
ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः। विवादं वर्जयित्वा तु सर्वाँल्लोकान् जयेद्गृही॥ ५८॥
पञ्चपिण्डाननुद्धृत्य न स्नायात्परवारिषु। स्नायान्नदीदेवखातह्रदप्रस्रवणेषु च॥ १५९॥
कदर्यबद्धचोराणां क्लीबरङ्गावतारिणाम्। वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणाम्॥ १६१॥
चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम्। क्रूरोग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनाम्॥ १६२॥
अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम्। शस्त्रविक्रयकर्मारतन्तुवायश्ववृत्तिनाम्॥ १६३॥
नृशंसराजरजककृतघ्नवधजीविनाम्। चैलधावसुराजीविसहोपपतिवेश्मनाम्॥ १६४॥
पिशुनानृतिनोश्चैव तथा चाक्रिकवन्दिनाम्। एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा॥ १६५॥
शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः। भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्॥ १६६॥
अनर्चितं वृथा मांसं केशकीटसमन्वितम्। शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम्॥ १६७॥
उदक्या स्पृष्टसङ्घुष्टं पर्यायान्नं च वर्जयेत्। गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः॥ १६८॥
अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम्। अस्नेहा अपि गोधूमयवगोरसविक्रियाः॥ १६९॥

सन्धिन्यनिर्दशावत्सागोपयः परिवर्जयेत् । औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकम् ॥ १७० ॥
देवतार्थं हविः शिग्रुं लोहितान् व्रश्चनांस्तथा । अनुपाकृतमांसानि विड्जानि कवकानि च ॥१७१॥
क्रव्यादपक्षिदात्यूहशुकप्रतुदटिट्टिभान् । सारसैकशफान् हंसान्सर्वांश्च ग्रामवासिनः ॥ १७२ ॥
कोयष्टिप्लवचक्राह्वबलाकाबकविष्किरान् । वृथाकृसरसंयावपायसाऽपूपशष्कुलीः ॥ १७३ ॥
कलविङ्कंसकाकोलं कुररं रज्जुदालकम् । जालपादान्खञ्जरीटानज्ञातांश्च मृगद्विजान् ॥ १७४ ॥
चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च । मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ॥१७५॥
पलाण्डुं विड्वराहं च छत्राकं ग्रामकुक्कुटम् । लशुनं गृञ्जनं चैव जग्ध्वा चान्द्रायणं चरेत्॥१७६॥
सौवर्णराजताब्जानामूर्ध्वपात्रग्रहाश्मनाम् । शाकरज्जुमूलफलवासोविदलचर्मणाम् ॥ १८२ ॥
पात्राणां चमसानां च वारिणा शुद्धिरिष्यते । चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेन वारिणा ॥ १८३ ॥
स्फ्यशूर्पाजिनधान्यानां मुसलोलूखलानसाम् । प्रोक्षणं संहतानां च बहूनां धान्यवाससाम् ॥१८४॥
तक्षणं दारुशृङ्गास्थ्नां गोबालैः फलसम्भवाम् । मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि ॥ १८५॥
सोखैरुदकगोमूत्रैः शुद्धत्याविककौशिकम् । सश्रीफलैरंशुपट्टं सारिष्टैः कुतपन्तथा ॥ १८६ ॥
सगौरसर्षपैः क्षौमम्पुनः पाकान्महीमयम् । कारुहस्तः शुचिः पण्यं भैक्ष्यं योषिन्मुखन्तथा॥१८७॥
भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा । सेकादुल्लेखनाल्लेपाद् गृहं मार्जनलेपनात् ॥ १८८ ॥
गोघ्रातेऽन्ने तथा केशमक्षिकाकीटदूषिते । सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये ॥ १८९ ॥
त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः । भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य तु॥९०॥
अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गंधादिकर्षणात् । वाक्शस्तमम्बुनिर्णिक्तमज्ञातं च सदा शुचि॥१९१॥
शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम् । तथा मांसं श्वचांडालक्रव्यादादिनिपातितम् ॥ १९२ ॥
रश्मिरग्नीरजश्छाया गौरश्वो वसुधानिलः । विप्रुषो मक्षिका स्पर्शे वत्सः प्रस्रवणे शुचिः ॥१९३॥
मुखजा विप्रुषो मेध्यास्तथाचमनबिन्दवः । श्मश्रु चास्य गतं दन्तसक्तं त्यक्त्वा ततः शुचिः ॥९५॥
तपस्तप्त्वासृजद्ब्रह्मा ब्राह्मणान् वेदगुप्तये । तृप्त्यर्थं पितृदेवानां धर्मसंरक्षणाय च ॥ १९८ ॥
सर्वस्य प्रभवो विप्राः श्रुताध्ययनशीलिनः । तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः१९९॥
विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः । गृह्णन्प्रदातारमधो नयत्यात्मानमेव च ॥ २०२ ॥
भूदीपांश्चान्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् । नैवेशिकं स्वर्णधुर्यं दत्त्वा स्वर्गे महीयते ॥ २१० ॥
गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम् । यानं वृक्षं प्रियं शय्यां दत्त्वात्यन्तं सुखी भवेत् ॥ २११ ॥
सर्वधर्ममयं ब्रह्म प्रदानेभ्योऽधिकं यतः । तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतम् ॥ २१२ ॥
अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः । अन्यत्र कुलटाषण्ढपतितेभ्यस्तथा द्विषः ॥ २१५ ॥
देवातिथ्यर्चनकृते गुरुभृत्यार्थमेव च । सर्वतः प्रतिगृह्णीयादात्मवृत्त्यर्थमेव च ॥ २१६ ॥
मृतेऽहनि तु कर्त्तव्यं प्रतिमासन्तु वत्सरम् । प्रतिसम्वत्सरञ्चैवमाद्यमेकादशेऽहनि ॥ २५६ ॥
पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा । प्रक्षिपेत्सत्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेत् ॥२५७॥
यद्ददाति गयास्थश्च सर्वमानन्त्यमश्नुते । तथा वर्षात्रयोदश्यां मघासु च विशेषतः ॥ २६१ ॥
पुरोहितं प्रकुर्वीत दैवज्ञमुदितोदितम् । दण्डनीत्यां च कुशलमथर्वाङ्गिरसे तथा ॥ ३१३ ॥
श्रौतस्मार्तक्रियाहेतोर्वृणुयादेव चर्त्विजः । यज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणान् ॥ ३१४ ॥
अलब्धमीहेद्धर्मेण लब्धं यत्नेन पालयेत् । पालितं वर्द्धयेन्नीत्या वृद्धम्पात्रेषु निःक्षिपेत् ॥ ३१७ ॥
रम्यं पाशव्यमाजीव्यं जाङ्गलं देशमावसेत् । तत्र दुर्गाणि कुर्वीत जनकोशात्मगुप्तये ॥ ३२१ ॥
तत्रतत्र च निष्णातानध्यक्षान् कुशलाञ्छुचीन् । प्रकुर्यादायकर्मान्तव्ययकर्मसु चोद्यतान् ॥३२२॥
ये आहवेषु वध्यन्ते भूम्यर्थमपराङ्मुखाः । अकूटैरायुधैर्यान्ति ते स्वर्गं योगिनो यथा ॥ ३२४ ॥
पदानि क्रतुतुल्यानि भग्नेष्वविनिवर्तिनाम् । राजा सुकृतमादत्ते हतानां विपलायिनाम् ॥ ३२५ ॥
तवाहं वादिनं क्लीवं निर्हेतिं परसङ्गतम् । न हन्याद्विनिवृत्तं च युद्धप्रेक्षणकादिकम् ॥ ३२६ ॥
यस्मिन्देशे य आचारो व्यवहारः कुलस्थितिः । तथैव परिपाल्योऽसौ यदा वशमुपागतः ॥ ३४३ ॥
उपायाः साम दानं च भेदो दण्डस्तथैव च । सम्यक्प्रयुक्ताः सिद्ध्येयुर्दण्डस्त्वगतिका गतिः३४६॥
सन्धिं च विग्रहं चैव यानमासनसंश्रयौ । द्वैधीभावं गणानेतान् यथावत्परिकल्पयेत् ॥ ३४७ ॥

यदा सस्यगुणोपेतं परराष्ट्रं तदा व्रजेत्। परश्च हीनआत्मा च हृष्टवाहनपूरुषः ॥ ३४८ ॥
दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता। तत्र दैवमभिव्यक्तं पौरुषं पौर्वदेहिकम् ॥ ३४९ ॥
केचिद्दैवात्स्वभावाद्वा कालात्पुरुषकारतः। संयोगं केचिदिच्छन्ति फलं कुशलबुद्धयः ॥ ३५० ॥
यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत्। एवं पुरुषकारेण विना दैवं न सिध्यति ॥ ३५१ ॥
स्वाम्यमात्या जनो दुर्गं कोषो दण्डस्तथैव च। मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते॥३५३॥
कुलानि जातीः श्रेणीश्च गणान् जानपदानपि। स्वधर्माच्चलितान् राजा विनीय स्थापयेत्पथि३६१॥
जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतम्। तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते ॥ ३६२ ॥
गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः। कृष्णलः पञ्च ते माषस्ते सुवर्णस्तु षोडश॥३६३॥
पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्तितम्। द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते ॥ ३६४ ॥
शतमानं तु दशभिर्धरणैः पलमेव तु। निष्कं सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः ॥ ३६५ ॥
साशीतिः पणसाहस्रो दण्ड उत्तमसाहसः। तदर्धं मध्यमः प्रोक्तस्तदर्धमधमः स्मृतः ॥ ३६६ ॥
धिग्दण्डस्त्वथ वाग्दण्डो धनदण्डो वधस्तथा। योज्या व्यस्ताः समस्ता वा ह्यपराधवशादिमे॥३६७॥
ज्ञात्वापराधं देशं च कालं बलमथापि वा। वयः कर्म च वित्तं च दण्डं दण्डेषु पातयेत् ॥ ३६८ ॥

याज्ञवल्क्यस्मृति–२ अध्याय।

व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैस्सह। धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥ १ ॥
श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः। राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः ॥ २ ॥
अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु। सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित् ॥ ३ ॥
रागाल्लोभाद्भयाद्वापि स्मृत्यपेतादिकारिणः। सभ्याः पृथक् पृथक् दण्ड्या विवादाद्द्विगुणं दमम् ४॥
स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः। आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥ ५ ॥
निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समम्। मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत् ॥ ११ ॥
पश्यतो ब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी। परेण भुज्यमानाया धनस्य दशवार्षिकी ॥ २४ ॥
आधिसीमोपनिक्षेपजडबालधनैर्विना। तथोपनिधिराजस्त्री श्रोत्रियाणां धनैरपि ॥ २५ ॥
आध्यादीनां विहर्तारं धनिने दापयेद्धनम्। दण्डं च तत्समं राज्ञे शक्त्यपेक्षं यथापि वा ॥ २६ ॥
बलोपाधिविनिर्वृत्तान् व्यवहारान्निवर्तयेत्। स्त्रीनक्तमन्तरागारबहिःशत्रुकृतांस्तथा ॥ ३२ ॥
मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः। असम्बद्धकृतश्चैव व्यवहारो न सिद्ध्यति ॥ ३३ ॥
प्रनष्टाधिगतं देयं नृपेण धनिने धनम्। विभावयेन्न चेल्लिङ्गैस्तत्समं दण्डमर्हति ॥ ३४ ॥
राजा लब्ध्वा निधिं दद्याद् द्विजेभ्योऽर्धं द्विजः पुनः। विद्वानशेषमादद्यात्स सर्वस्य प्रभुर्यतः ॥३५॥
इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत्। अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव च ॥ ३६ ॥
अशीतिभागो वृद्धिः स्यान्मासिमासि सबन्धके। वर्णक्रमाच्छतं द्वित्रिचतुष्पञ्चकमन्यथा ॥ ३८॥
कान्तारगास्तु दशकं सामुद्रा विंशकं शतम्। दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु ॥ ३९ ॥
सन्ततिस्तु पशुस्त्रीणां रसस्याष्टगुणा परा। वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा ॥ ४० ॥
प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेत्। साध्यमानो नृपं गच्छन् दण्ड्यो दाप्यश्च तद्धनम् ॥४१॥
राज्ञाधमर्णिको दाप्यः साधिताद्दशकं शतम्। पञ्चकं च शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः ॥४३॥
हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्। ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम् ॥ ४४ ॥
सुराकामद्यूतकृतन्दण्डशुल्कावशिष्टकम्। वृथा दानं तथैवेह पुत्रो दद्यान्न पैतृकम् ॥ ४८ ॥
दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते। आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ॥ ५४ ॥
दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोपि वा। न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय यः स्थितः ॥ ५५ ॥
बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनम्। एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि ॥ ५६ ॥
प्रतिभूर्दापितो यत्तु प्रकाशं धनिनां धनम्। द्विगुणम्प्रतिदातव्यमृणिकैस्तस्य तद्भवेत् ॥ ५७ ॥
सन्ततिः स्त्रीपशुष्वेव धान्यं त्रिगुणमेव च। वस्त्रं चतुर्गुणम्प्रोक्तं रसश्चाष्टगुणः स्मृतः ॥ ५८ ॥
आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते। काले कालकृतो नश्येत्फलभोग्यो न नश्यति॥५९॥

गोप्याधिभोगे नो वृद्धिः सोपकारेथ हापिते । नष्टो देयो विनष्टश्च देवराजकृताहते ॥ ६० ॥
आधेः स्वीकरणात्सिद्धी रक्ष्माणोप्यसारताम् । यातश्चेदन्यआधेयो धनभाग्वा धनी भवेत् ॥ ६१ ॥
चरित्रबन्धककृतं सवृद्ध्या दापयेद्धनम् । सत्यंकारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥ ६२ ॥
उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत् । प्रयोजके सति धनं कुलेऽन्यस्याधिमाप्नुयात्६३
तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः । । विना धारणिकाद्वापि विक्रीणीत ससाक्षिकम् ॥ ६४ ॥
यदा तु द्विगुणीभूतमृणमाधौ तदा खलु । मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने ॥ ६५ ॥
वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते ॥ द्रव्यन्तदौपनिधिकं प्रतिदेयं तथैव तु ॥ ६६ ॥
तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः । धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः ॥ ६९ ॥
त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः । यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ॥७०॥
स्त्रीवृद्धबालकितवमत्तोन्मत्ताभिशस्तकाः । रङ्गावतारिपाखण्डिकूटकृद्विकलेन्द्रियाः ॥ ७२ ॥
पतिताप्तार्थसम्बन्धिसहायरिपुतस्कराः । साहसी दृष्टदोषश्च निर्धूताद्यास्त्वसाक्षिणः ॥ ७३ ॥
उभयानुमतः साक्षी भवत्येकोपि धर्मवित् । सर्वः साक्षी संग्रहणे चौर्यपारुष्यसाहसे ॥ ७४ ॥
साक्षिणः श्रावयेद्वादिप्रतिवादिसमीपगान् । ये पातककृतां लोका महापातकिनां तथा ॥ ७५ ॥
अग्निदानां च ये लोका ये च स्त्रीबालघातिनाम् । स तान्सर्वानवाप्नोति यः साक्ष्यमनृतं वदेत्७६॥
सुकृतं यत्त्वया किञ्चिज्जन्मान्तरशतैः कृतम् । तत्सर्वं तस्य जानीहि यं पराजयसे मृषा॥ ७७ ॥
अब्रुवन्हि नरः साक्ष्यमृणं सदशबन्धकम् । राज्ञा सर्वं प्रदाप्यः स्यात् षट्चत्वारिंशकेहनि ॥७८॥
न ददाति हि यः साक्ष्यं जानन्नपि नराधमः । सकूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि ॥ ७९ ॥
द्वैधे बहूनां वचनं समेषु गुणिनां तथा । गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तमाः ॥ ८० ॥
यस्योचुः साक्षिणः सत्यांप्रतिज्ञां स जयी भवेत् । अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः॥८१॥
उक्तोपि साक्षिभिः साक्ष्ये यदन्ये गुणवत्तमाः । द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः॥८२॥
पृथक्पृथग्दण्डनीयाः कूटकृत्साक्षिणस्तथा । विवादाद्द्विगुणं दण्डं विवास्यो ब्राह्मणः स्मृतः ॥८३॥
यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तत्तमोवृतः । स दाप्योऽष्टगुणं दण्डं ब्राह्मणं तु विवासयेत् ॥८४॥
वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् । तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः ॥ ८५ ॥
तुलास्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् । अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वा ॥१००॥
विभजेरन्सुताः पित्रोरूर्ध्वं रिक्थमृणं समम् । मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः ॥ ११९ ॥
पितृद्रव्याविरोधेन यदन्यत्स्वयमार्जितम् । मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत् ॥ १२० ॥
क्रमादभ्यागतन्द्रव्यं हृतमभ्युद्धरेत्तु यः । दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ॥ १२१ ॥
सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः । अनेकपितृकाणान्तु पितृतो भागकल्पना ॥ १२२ ॥
विभक्तेषु सुतो जातः सवर्णायां विभागभाक् । दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्॥१२४॥
असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः । भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकम् ॥१२६॥
चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः । क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः१२७॥
अन्योन्यापहृतं द्रव्यं विभक्तं यत्तु दृश्यते । तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः ॥ १२८ ॥
अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः । उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥ १२९ ॥
औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः । क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥ १३२ ॥
गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः । कानीनः कन्यकाजातो मातामहसुतो मतः ॥ १३३ ॥
अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः । दद्यान्माता पिता वायं स पुत्रो दत्तको भवेत्॥१३४॥
क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः । दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः१३५॥
उत्सृष्टो गृह्यते यस्तु सोपविद्धो भवेत्सुतः । पिण्डदोंशहरश्चैषां पूर्वाभावे परः परः ॥ १३६ ॥
पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम् । आधिवेदनिकाद्यं च स्त्रीधनन्तत्प्रकीर्तितम् ॥ १४७ ॥
बन्धुदत्तन्तथा शुल्कमन्वाधेयकमेव च । अतीतायामप्रजसि बान्धवास्तदवाप्नुयुः ॥ १४८ ॥
अप्रजस्त्रीधनम्भर्तुर्ब्राह्मादिषु चतुर्ष्वपि । दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत् ॥ १४९ ॥
अनृते तु पृथक् दण्ड्या राज्ञा मध्यमसाहसम् । अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तिता ॥१५७॥

पथिग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते । अकामतः कामचारे चौरवद्दण्डमर्हति ॥ १६६ ॥
महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः । पालो येषां न ते मोच्या दैवराजपरिप्लुताः ॥ १६७ ॥
यथार्पितान्पशून् गोपः सायं प्रत्यर्पयेत्तथा । प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः ॥ १६८ ॥
पालदोषविनाशे तु पाले दण्डो विधीयते । अर्द्धत्रयोदशपणः स्वामिनो द्रव्यमेव च ॥ १६९ ॥
ग्रामेच्छया गोप्रचारो भूमीराजवशेन वा । द्विजस्तृणैधः पुष्पाणि सर्वतः सर्वदा हरेत् ॥ १७० ॥
धनुःशतं परीणाहो ग्रामे क्षेत्रान्तरं भवेत् । द्वे शते खर्वटस्य स्यान्नगरस्य चतुःशतम् ॥ १७१ ॥
शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम् । अर्वाक्संवत्सरात्स्वामी हरेत परतो नृपः ॥ १७७ ॥
पणानेकशफे दद्याच्चतुरः पञ्च मानुषे । महिषोष्ट्रगवां द्वौ द्वौ पादम्पादमजाविके ॥ १७८ ॥
बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते । स्वामिप्राणप्रदो भक्तत्यागात्तन्निष्क्रयादपि ॥ १८६ ॥
प्रव्रज्यावसितो राज्ञो दास आमरणान्तिकम् । वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः ॥ १८७॥
कृतशिल्पोपि निवसेत्कृतकालं गुरोर्गृहे । अन्तेवासी गुरुप्राप्तभोजनस्तत्फलप्रदः ॥ १८८ ॥
सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम् । क्षेपं करोति चेद्दण्ड्यः पणानर्द्धत्रयोदशान्॥२०८॥
प्रातिलोम्यापवादेषु द्विगुणत्रिगुणा दमाः । वर्णानामानुलोम्येन तस्मादर्द्धार्द्धहानितः ॥ २११ ॥
सामान्यद्रव्यप्रसभहरणात्साहसं स्मृतम् । तन्मूल्याद् द्विगणो दण्डो निह्नवे तु चतुर्गुणः ॥ २३४ ॥
पितापुत्रस्वसृभ्रातृदम्पत्याचार्यशिष्यकाः । एषामपतितान्योन्यत्यागी च शतदण्डभाक् ॥ २४१ ॥
भिषङ् मिथ्याचरन्दण्ड्यस्तिर्यक्षु प्रथमं दमम् । मानुषे मध्यमं राजपुरुषेषूत्तमं दमम् ॥ २४६ ॥
अर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेत् । व्यासिद्धं राजयोग्यं च विक्रीतं राजगामि तत् ॥२६५॥
मिथ्यावदन्परीमाणं शुल्कस्थानादपासरन् । दाप्यस्त्वष्टगुणं यश्च सव्याजक्रयविक्रयी ॥ २६६ ॥
तरिकः स्थलजं शुल्कं गृह्णन् दाप्यः पणान्दश । ब्राह्मणप्रातिवेश्यानामेतदेवानिमन्त्रणे ॥ २६७ ॥
उत्क्षेपकग्रंथिभेदौ करसंदंशहीनकौ । कार्यौ द्वितीयापराधे करपादैकहीनकौ ॥ २७८ ॥
भक्तावकाशाग्न्युदकमन्त्रोपकरणव्ययान् । दत्वा चौरस्य वा हन्तुर्जानतो दम उत्तमः ॥ २८० ॥
पुमान्संग्रहणे ग्राह्यः केशाकेशि परस्त्रियाः । सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा ॥ २८७॥
नीवीस्तनप्रावरणसक्थिकेशावमर्शनम् । अदेशकालसम्भाषं सहैकासनमेव च ॥ २८८ ॥
स्त्रीनिषेधे शतन्दद्याद् द्विशतन्तु दमम्पुमान् । प्रतिषेधे तयोर्दण्डो यथासंग्रहणे तथा ॥ २८९ ॥
अवरुद्धासु दासीषु भुजिष्यासु तथैव च । गम्यास्वपि पुमान्दाप्यः पञ्चाशत्पणिकन्दमम्॥२९४॥
अयोनौ गच्छतो योषां पुरुषं वापि मेहतः । चतुर्विंशतिको दण्डस्तथा प्रव्रजितागमे ॥ २९७ ॥
ऊनं वाभ्यधिकं वापि लिखेद्यो राजशासनम् । पारदारिकचौरं वा मुञ्चतो दण्ड उत्तमः ॥२९९ ॥
चतुष्पादकृतो दोषो नापेहीति प्रजल्पतः । काष्ठलोष्टेषु पाषाणबाहुयुग्मकृतस्तथा ॥ ३०२ ॥
छिन्ननस्येन यानेन तथा भग्नयुगादिना ॥ पश्चाच्चैवापसरता हिंसने स्वाम्यदोषभाक् ॥ ३०३ ॥
शक्तोप्यमोक्षयन् स्वामी दंष्ट्रिणां शृंगिणां तथा । प्रथमं साहसं दद्याद्विक्रुष्टे द्विगुणन्तथा ॥ ३०४ ॥
द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा । विप्रत्वेन च शूद्रस्य जीवतोऽष्टशतो दमः ॥ ३०८ ॥
राज्ञाऽन्यायेन यो दण्डो गृहीतो वरुणाय तम् । निवेद्य दद्याद्विप्रेभ्यः स्वयन्त्रिंशद्गुणीकृतम्३११॥

याज्ञवल्क्यस्मृति—३अध्याय ।

पाखण्ड्यनाश्रिताः स्तेनाभर्तृघ्न्यः कामगादिकाः । सुराप्य आत्मत्यागिन्यो नाशौचोदकभाजनाः॥
कृतोदकान्समुत्तीर्णान्मृदुशाद्वलसंस्थितान् । स्नातानपवदेयुस्तानितिहासैः पुरातनैः ॥ ७ ॥
मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् । करोति यः स सम्मूढो जलबुद्बुदसन्निभे:॥ ८ ॥
पञ्चधा सम्भृतः कायो यदि पञ्चत्वमागतः । कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना ॥ ९ ॥
गन्त्री वसुमती नाशमुदधिर्दैवतानि च । फेनप्रख्यः कथं नाशम्मर्त्यलोको न यास्यति ॥ १० ॥
श्लेष्माश्रुबान्धवैर्मुक्तम्प्रेतो भुङ्क्ते यतोवशः । अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः॥११॥
इति संश्रुत्य गच्छेयुर्गृहम्बालपुरःसराः । विदश्य निम्बपत्राणि नियता द्वारि वेश्मनः ॥ १२ ॥
आचम्याग्न्यादिसलिलं गोमयं गौरसर्षपान् । प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः ॥ १३ ॥
प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि । इच्छतान्तत्क्षणाच्छुद्धिम्परेषां स्नानसंयमात् ॥ १४ ॥

आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती । शकटान्नं च नाश्नीयान्न च तैः सह संवसेत् ॥ १९ ॥
जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृन्मये । वैतानोपासनाः कार्याः क्रियाश्च श्रुतिनोदनात् ॥१७॥
अन्तरा जन्ममरणे शेषाहोभिर्विशुध्यति । गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम् ॥ २० ॥
हतानान्नृपगोविप्रैरन्वक्षं चात्मघातिनाम् । प्रोषिते कालशेषः स्यात्पूर्णे दत्त्वोदकं शुचिः ॥ २१ ॥
क्षत्रस्य द्वादशाहानि विशः पञ्चदशैव तु । त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिनः ॥ २२ ॥
अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च । निवासराजनि प्रेते तदहः शुद्धिकारणम् ॥ २५ ॥
महीपतीनां नाशौचं हतानां विद्युता तथा । गोब्राह्मणार्थे संग्रामे यस्य चेच्छति भूमिपः ॥ २७ ॥
ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वताम् । सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ॥ २८ ॥
उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत् । अब्लिङ्गानि जपेच्चैव गायत्रीं मनसा सकृत् ॥ ३० ॥
फलोपलक्षौमसोममनुष्यापूपवीरुधः । तिलोदनरसक्षारां दधिक्षीरं घृतं जलम् ॥ ३६ ॥
शस्त्रासवमधूच्छिष्टं मधुलाक्षाथ बर्हिषः । मृच्चर्मपुष्पकुतुपकेशतक्रविषक्षितीः ॥ ३७ ॥
कौशेयनीललवणमांसैकशफसीसकान् । शाकार्द्रौषधिपिण्याकपशुगन्धांस्तथैव च ॥ ३८ ॥
वैश्यवृत्त्यापि जीवन्नो विक्रीणीत कदाचन । धर्मार्थं विक्रयं नेयास्तिला धान्येन तत्समाः ॥ ३९ ॥
लाक्षालवणमांसानि पतनीयानि विक्रये । पयो दधि च मद्यं च हीनवर्णकराणि तु ॥ ४० ॥
आपद्गतः सम्प्रगृह्णन् भुञ्जानो वाग्यतस्ततः । न लिप्येतैनसा विप्रो ज्वलनार्कसमो हि सः ॥ ४१ ॥
बुभुक्षितस्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत् । प्रतिगृह्य तदाख्येयमभियुक्तेन धर्मतः ॥ ४३ ॥
तस्य वृत्तं कुलं शलिं श्रुतमध्ययनं तपः । ज्ञात्वा राजा कुटुम्बं च धर्म्यां वृत्तिं प्रकल्पयेत् ॥ ४४ ॥
सुतविन्यस्तपत्नीकस्तया वानुगतो वनम् । वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् ॥ ४५ ॥
अफालकृष्टेनाग्नींश्च पितॄन्देवातिथीनपि । भृत्यांश्च तर्पयेच्छ्मश्रुजटालोमभृदात्मवान् ॥ ४६ ॥
अह्नो मासस्य षण्णां वा तथा संवत्सरस्य वा । अर्थस्य सञ्चयं कुर्यात्कृतमाश्वयुजे त्यजेत् ॥ ४७ ॥
दान्तस्त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहात् । स्वाध्यायवान्दानशीलः सर्वसत्त्वहिते रतः ॥ ४८ ॥
दन्तोलूखलिकः कालपक्वाशी वाश्मकुट्टकः । श्रौतं स्मार्तं फलं स्नेहैः कर्म कुर्यात्तथा क्रियाः ॥४९॥
चान्द्रायणैर्नयेत्कालं कृच्छ्रैर्वा वर्तयेत्सदा । पक्षे गते वाप्यश्नीयान्मासे वाहनि वा गते ॥ ५० ॥
स्वप्याद्भूमौ शुची रात्रौ दिवा संप्रपदैर्नयेत् । स्थानासनविहारैर्वा योगाभ्यासेन वा तथा ॥ ५१ ॥
ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः । आर्द्रवासास्तु हेमन्ते शक्त्या वापि तपश्चरेत् ॥५२॥
यः कण्टकैर्वितुदति चन्दनैर्यश्च लिम्पति । अक्रुद्धोऽपरितुष्टश्च समस्तस्य च तस्य च ॥ ५३ ॥
अग्नीन्वाप्यात्मसात्कृत्वा वृक्षावासो मिताशनः । वानप्रस्थगृहेष्वेव यात्रार्थम्भैक्ष्यमाचरेत् ॥ ५४ ॥
ग्रामादाहृत्य वा ग्रासानष्टौ भुञ्जीत वाग्यतः । वायुभक्षः प्रागुदीचीं गच्छेद्वा वर्ष्मसंक्षयात् ॥ ५५ ॥
वनाद्गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणाम् । प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि ॥ ५६ ॥
अधीतवेदो जपकृत्पुत्रवानन्नदोऽग्निमान् । शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ॥ ५७ ॥
सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः । एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत् ॥ ५८ ॥
अप्रमत्तश्चरेद्भैक्ष्यं सायाह्नेनभिलक्षितः । रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः ॥ ५९ ॥
यतिपात्राणि मृद्वेणुदार्वलाम्बुमयानि च । सलिलैः शुद्धिरेतेषां गोबालैश्चावघर्षणम् ॥ ६० ॥
सन्निरुद्धेन्द्रियग्रामं रागद्वेषौ प्रहाय च । भयं हित्वा च भूतानाममृती भवति द्विजः ॥ ६१ ॥
कर्तव्याशयशुद्धिस्तु भिक्षुकेण विशेषतः । ज्ञानोत्पत्तिनिमित्तत्वात्स्वातन्त्र्यकरणाय च ॥ ६२ ॥
अवेक्ष्या गर्भवासाश्च कर्मजा गतयस्तथा । आधयो व्याधयः क्लेशजरारूपविपर्ययः ॥ ६३ ॥
भवो जातिसहस्रेषु प्रियाप्रियविपर्ययः । ध्यानयोगेन सम्पश्येत्सूक्ष्म आत्मात्मनि स्थितः ॥ ६४ ॥
नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः । अतो यदात्मनो पथ्यं परेषां न तदाचरेत् ॥ ६५ ॥
सत्यमस्तेयमक्रोधो ह्रीः शौचं धीर्धृतिर्दमः । संयतेन्द्रियता विद्या धर्मः सर्व उदाहृतः ॥ ६६ ॥
प्रथमे मासि संक्लेदभूतो धातुर्विमूर्च्छितः । मास्यर्बुदं द्वितीये तु तृतीयेंऽगेन्द्रियैर्युतः ॥ ७५ ॥
स्थालैः सह चतुःषष्टिर्दन्ता वै विंशतिर्नखाः । पाणिपादशलाकाश्च तेषां स्थानचतुष्टयम् ॥ ८५ ॥
षष्ट्यङ्गुलीनां द्वे पार्ष्ण्योर्गुल्फेषु च चतुष्टयम् । चत्वार्यरत्निकास्थीनि जङ्घयोस्तावदेव तु ॥ ८६॥

द्वे द्वे जानुकपोलोरुफलकांससमुद्भवे । अक्षतालूपकश्रोणीफलके च विनिर्दिशेत् ॥ ८७ ॥
भगास्थ्येकं तथा पृष्ठे चत्वारिंशच्च पञ्च च । ग्रीवापञ्चदशास्थी स्याज्जत्र्वेकैकं तथा हनुः ॥८८ ॥
तन्मूले द्वे ललाटाक्षिगण्डे नासाघनास्थिका । पार्श्वकाः स्थालकैः सार्द्धमर्बुदैश्च द्विसप्ततिः ॥८९॥
द्वौ शङ्खकौ कपालानि चत्वारि शिरसस्तथा । उरः सप्तदशास्थीनि पुरुषस्यास्थिसंग्रहः ॥ ९० ॥
गन्धरूपरसस्पर्शशब्दाश्च विषयाः स्मृताः । नासिका लोचने जिह्वा त्वक् श्रोत्रं चेन्द्रियाणि च९१॥
हस्तौ पायुरुपस्थं च जिह्वा पादौ च पञ्च वै । कर्मेन्द्रियाणि जानीयान्मनश्चैवोभयात्मकम् ॥ ९२॥
महस्रात्मा मया यो व आदिदेव उदाहृतः । मुखबाहूरुपज्जाः स्युस्तस्य वर्णा यथाक्रमम् ॥१२६ ॥
अन्त्यपक्षिस्थावरतां मनोवाक्कायकर्मजैः । दोषैः प्रयाति जीवोयम्भवं योनिशतेषु च ॥ १३१ ॥
अनन्ताश्च यथा भावाः शरीरेषु शरीरिणाम् । रूपाण्यपि तथैवेह सर्वयोनिषु देहिनाम् ॥ १३२ ॥
विपाकः कर्मणाम्प्रेत्य केषांचिदिह जायते । इह वामुत्र वैकेषाम्भावास्तत्र प्रयोजनम् ॥ १३३ ॥
परद्रव्याण्यभिध्यायंस्तथानिष्टानि चिन्तयन् । वितथाभिनिवेशी च जायतेन्त्यासु योनिषु ॥१३४ ॥
पुरुषोनृतवादी च पिशुनः परुषस्तथा । अनिबद्धप्रलापी च मृगपक्षिषु जायते ॥ १३५ ॥
अदत्तादाननिरतः परदारोपसेवकः । हिंसकश्चाविधानेन स्थावरेष्वभिजायते ॥ १३६ ॥
महापातकजान् घोरान् नरकान्प्राप्य दारुणान् । कर्मक्षयात्प्रजायन्ते महापातकिनस्त्विह ॥२०६ ॥
मृगश्वशूकरोष्ट्राणां ब्रह्महा योनिमृच्छति । खरपुक्कसवेनानां सुरापो नात्र संशयः ॥ २०७ ॥
कृमिकीटपतङ्गत्वं स्वर्णहारी समाप्नुयात् । तृणगुल्मलतात्वं च क्रमशो गुरुतल्पगः ॥ २०८ ॥
ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदन्तकः । हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः ॥ २०९ ॥
यो येन संवसत्येषां स तल्लिङ्गोभिजायते । अन्नहर्त्तामयावी स्यान्मूको वागपहारकः ॥ २१० ॥
धान्यमिश्रे तिरिक्ताङ्गः पिशुनः पूतिनासिकः । तैलहृत्तैलपायी स्यात्पूतिवक्त्रस्तु सूचकः ॥ २११ ॥
परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च । अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः ॥ २१२ ॥
हीनजातौ प्रजायेत पररत्नापहारकः । पत्रशाकं शिखी हृत्वा गन्धाञ्छुच्छुन्दरी शुभान् ॥ २१३ ॥
मूषको धान्यहारी स्याद्यानमुष्ट्रः कपिः फलम् । जलं प्लवः पयः काको गृहकारी ह्युपस्करम्॥२१४॥
मधु दंशः पलं गृध्रो गां गोधाग्निं बकस्तथा । श्वित्री वस्त्रं श्वा रसं तु चीरी लवणहारकः ॥२१५ ॥
विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् । अनिग्रहाच्चेन्द्रियाणान्नरः पतनमृच्छति ॥ २१९ ॥
प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः । अपश्चात्तापिनः कष्टान्नरकान् यान्ति दारुणान् ॥२२१॥
तामिस्रं लोहशंकुं च महानिरयशाल्मली । रौरवं कुड्मलम्पूतिमृत्तिकं कालसूत्रकम् ॥ २२२ ॥
संघातं लोहितोदं च सविषं सम्प्रपातनम् । महानरककाकोलं संजीवनमहापथम् ॥ २२३ ॥
अवीचिमंधतामिस्रं कुम्भीपाकन्तथैव च । असिपत्रवनं चैव तापनं चैकविंशकम् ॥ २२४ ॥
प्रायश्चित्तैरपैत्येनो यदज्ञानकृतम्भवेत् । कामतो व्यवहार्यस्तु वचनादिह जायते ॥ २२६ ॥
ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः । एते महापातकिनो यश्च तैः सह संवसेत् ॥ २२७ ॥
गुरूणामध्यधिक्षेपो वेदनिन्दा सुहृद्वधः । ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम् ॥ २२८ ॥
निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोनृतम् । रजस्वलामुखास्वादः सुरापानसमानि तु ॥ २२९ ॥
अश्वरत्नमनुष्यस्त्रीभूधेनुहरणन्तथा । निक्षेपस्य च सर्वं हि सुवर्णस्तेयसम्मितम् ॥ २३० ॥
गोवधो व्रात्यता स्तेयमृणानां चानपाक्रिया । अनाहिताग्नितापण्यविक्रयः परिवेदनम् ॥ २३४ ॥
भृताद्ध्ययनादानम्भृतकाध्यापनन्तथा । पारदार्यं पारिवित्यम्वार्धुष्यं लवणक्रिया ॥ २३५ ॥
स्त्रीशूद्रविट्क्षत्रवधो निन्दितार्थोपजीवनम् । नास्तिक्यंव्रतलोपश्च सुतानां चैव विक्रयः ॥ २३६ ॥
धान्यकुप्यपशुस्तेयमयाज्यानां च याजनम् । पितृमातृसुतत्यागस्तडागारामविक्रयः ॥ २३७ ॥
कन्यासंदूषणं चैव परिविन्दकयाजनम् । कन्याप्रदानं तस्यैव कौटिल्यंव्रतलोपनम् ॥ २३८ ॥
आत्मनोर्थे क्रियारम्भो मद्यपस्त्रीनिषेवणम् । स्वाध्यायाग्निसुतत्यागो बान्धवत्याग एव च ॥२३९॥
इन्धनार्थं द्रुमच्छेदः स्त्रीहिंसौषधजीवनम् । हिंस्रयन्त्रविधानं च व्यसनान्यात्मविक्रयः ॥ २४० ॥
शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणम् । तथैवानाश्रमे वासः परान्नपरिपुष्टता ॥ २४१ ॥
असच्छास्त्राधिगमनमाकरेष्वधिकारिता । भार्याया विक्रयश्चैषामेकैकमुपपातकम् ॥ २४२ ॥

शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन् । ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात् २४३
ब्राह्मणस्य परित्राणाद्गवां द्वादशकस्य च । तथाश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुयात् ॥ २४४ ॥
दीर्घतीव्रामयग्रस्तम्ब्राह्मणं गामथापि वा । दृष्ट्वा पथि निरातङ्कं कृत्वा वा ब्रह्महा शुचिः ॥ २४५ ॥
आनीय विप्रसर्वस्वं हृतं घातित एव वा । तन्निमित्तं क्षतः शस्त्रैर्जीवन्नपि विशुद्ध्यति ॥ २४६ ॥
लोमभ्यः स्वाहेत्येवं हि लोमप्रभृति वै तनुम् । मज्जां तां जुहुयाद्वापि मन्त्रैरेभिर्यथाक्रमम् ॥२४७॥
सङ्ग्रामे वा हतो लक्ष्यभूतः शुद्धिमवाप्नुयात् । मृतकल्पः प्रहारार्तो जीवन्नपि विशुद्ध्यति॥२४८॥
अरण्ये नियतो जप्त्वा त्रिर्वै वेदस्य संहिताम् । शुद्ध्यते वा मिताशी त्वाप्रतिस्रोतः सरस्वतीम्॥२४९
पात्रे धनं वा पर्याप्तं दत्त्वा शुद्धिमवाप्नुयात् । आदातुश्च विशुद्ध्यर्थमिष्टिर्वैश्वानरी स्मृता ॥ २५० ॥
यागस्थक्षत्रविड्घाती चरेद्ब्रह्महणि व्रतम् । गर्भहा च यथावर्णं तथात्रेयीनिषूदकः ॥ २५१ ॥
सुराम्बुघृतगोमूत्रपयसामग्निसन्निभम् । सुरापोन्यतमत्पीत्वा मरणाच्छुद्धिमृच्छति ॥ २५३ ॥
बालवासा जटी वापि ब्रह्महत्याव्रतं चरेत् । पिण्याकं वा कणान्वापि भक्षयेत्त्रिसमा निशि ॥२५४॥
अज्ञानात्तु सुरां पीत्वा रेतो विण्मूत्रमेव च । पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ २५५ ॥
पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत् । इहैव सा शुनी गृध्री शूकरी चोपजायते॥२५६॥
ब्राह्मणः स्वर्णहारी तु राज्ञे मुशलमर्पयेत् । स्वकर्म ख्यापयंस्तेन हतो मुक्तोपि वा शुचिः ॥२५७ ॥
अनिवेद्य नृपे शुद्ध्येत्सुरापव्रतमाचरन् । आत्मतुल्यं सुवर्णं वा दद्याद्वापि प्रतुष्टिकृत् ॥ २५८ ॥
तप्तेयःशयने सार्धमायस्या योषिता स्वपेत् । गृहीत्वोत्कृत्य वृषणौ नैर्ऋत्यां चोत्सृजेत्तनुम् ॥२५९ ॥
प्राजापत्यं चरेत्कृच्छ्रं समा वा गुरुतल्पगः । चान्द्रायणं वा त्रीन्मासानभ्यसेद्वेदसंहिताम् ॥ २६०॥
एभिस्तु संवसेद्यो वै वत्सरं सोपि तत्समः । कन्यां समुद्वहेदेषां सोपवासामकिञ्चनाम् ॥ २६१ ॥
उपपातकशुद्धिः स्यादेवं चान्द्रायणेन वा । पयसा वापि मासेन पराकेणाथवा पुनः ॥ २६५ ॥
ऋषभैकसहस्रा गा दद्यात्क्षत्रवधे पुमान् । ब्रह्महत्याव्रतं वापि वत्सरत्रितयं चरेत् ॥ २६६ ॥
वैश्यहाब्दं चरेदेतद्दद्याद्वैकशतं गवाम् । षण्मासाञ्छूद्रहाप्येतद्धेनूर्दद्याद्दशाथवा ॥ २६७ ॥
अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेत् । अस्थिमतां सहस्रं तु तथानस्थिमतामनः ॥ २६९ ॥
मार्जारगोधानकुलमण्डूकाश्वपतत्रिणः । हत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं वा पादिकं चरेत् ॥ २७० ॥
गजे नीलवृषाः पञ्च शुके वत्सो द्विहायनः । खराजमेषेषु वृषो देयः क्रौञ्चे त्रिहायनः ॥ २७१ ॥
हंसश्येनकपिक्रव्याज्जलस्थलशिखण्डिनः । मासं हत्वा च दद्याद्गामक्रव्यादस्तु वत्सिकाम् ॥२७२ ॥
उरगेष्वायसो दण्डो षण्डके त्रपुसीसकम् । कोले घृतघटो देय उष्ट्रे गुञ्जा हयेंशुकम् ॥ २७३ ॥
तित्तिरौ तु तिलद्रोणं गजादीनामशक्नुवन् । दानन्दातुं चरेत्कृच्छ्रमेकैकस्य विशुद्धये ॥ २७४ ॥ ॥
फलपुष्पान्नरसजसत्त्वघाते घृताशनम् । किंचित्सास्थिमतान्देयम्प्राणायामस्त्वनास्थिके ॥ :२७५ ॥
वृक्षगुल्मलतावीरुच्छेदने जप्यमृक्शतम् । स्यादौषधिवृथाछेदे क्षीराशी गोनुगो दिनम् ॥ २७६॥
पुंश्चलीवानरखरैर्दष्टश्वोष्ट्रादिवायसैः । प्राणायामं जले कृत्वा घृतम्प्राश्य विशुद्ध्यति ॥ २७७ ॥:
अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितम् । गर्दभम्पशुमालभ्य नैर्ऋतं स विशुद्ध्यति ॥ २८० ॥
उपस्थानन्ततः कुर्यात्सप्तासिश्चत्वनेन तु । मधुमांसाशने कार्यः कृच्छ्रः शेषव्रतानि च ॥ २८२ ॥
अनियुक्तो भ्रातृजायां गच्छंश्चान्द्रायणं चरेत् । त्रिरात्रान्ते घृतम्प्राश्य गत्वोदक्यां विशुद्ध्यति२८६
त्रीन् कृच्छ्रानाचरेद्व्रात्ययाजको भिचरन्नपि । वेदप्लावीयवाश्यब्दन्त्यक्त्वा च शरणागतम्॥२८९॥
गोष्ठे वसन् ब्रह्मचारी मासमेकम्पयोव्रतः । गायत्रीजाप्यनिरतः शुद्ध्यतेऽसत्प्रतिग्रहात् ॥ २९० ॥
गुरुं तुं कृत्य हुं कृत्य विप्रन्निर्जित्य वादतः । बद्ध्वा वा वाससा क्षिप्रम्प्रसाद्योपवसेद्दिनम् ॥२९२ ॥
विप्रदण्डोद्यमे कृच्छ्रस्त्वतिकृच्छ्रो निपातने । कृच्छ्रातिकृच्छ्रोऽसृक्पातेकृच्छ्रोभ्यन्तरशोणिते॥२९३॥
दासीकुम्भम्बहिर्ग्रामान्निनयेरन्स्वबान्धवाः । पतितस्य बहिः कुर्युः सर्वकार्येषु चैव तम् ॥ २९५ ॥
चरितव्रतआयाते निनयेरन्नवं घटम् । जुगुप्सेरन्नचाप्येनं संविशेयुश्च सर्वशः ॥ २९६ ॥
पतितानामेष एव विधिः स्त्रीणाम्प्रकीर्तितः । वासो गृहान्तिकन्देयमन्नं वासः सरक्षणम् ॥ २९७ ॥
नीचाभिगमनं गर्भपातनम्भर्तृहिंसनम् । विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवम् ॥ २९८ ॥
शरणागतबालस्त्रीहिंसकान्संविशेन्न तु । चीर्णव्रतानपि सतः कृतघ्नसहितानिमान् ॥ २९९ ॥

ब्रह्मचर्यं दया क्षान्तिर्दानं सत्यमकल्कता । अहिंसास्तेयमाधुर्यन्दमश्चेति यमाः स्मृताः ॥ ३१३ ॥
स्नानम्मौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः । नियमा गुरुशुश्रूषाशौचाक्रोधांप्रमादताः ॥ ३१४ ॥
गोमूत्रं गोमयं क्षीरन्दधि सर्पिः कुशोदकम् । जग्ध्वा परेह्न्युपवसेत्कृच्छ्रं सान्तपनम्परम् ॥ ३१५॥
तप्तक्षीरघृताम्बूनामेकैकम्प्रत्यहम्पिबेत् । एकरात्रोपवासश्च तप्तकृच्छ्रं उदाहृतः ॥ ३१८ ॥
एकभुक्तेन नक्तेन तथैवायाचितेन च । उपवासेन चैवायं पादकृच्छ्रः प्रकीर्त्तितः ॥ ३१९ ॥
यथाकथंचित् त्रिगुणः प्राजापत्योयमुच्यते । अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः ॥ ३२० ॥
कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम् । द्वादशाहोपवासेन पराकः परिकीर्त्तितः ॥ ३२१ ॥
तिथिवृद्ध्याचरेत्पिण्डाञ्छुक्ले शिखण्डसम्मितान् । एकैकं ह्रासयेत्कृष्णे पिण्डं चान्द्रायणं चरन् ॥
यथाकथंचित्पिण्डानां चत्वारिंशच्छतद्वयम् । मासेनैवोपभुञ्जीत चान्द्रायणमथापरम् ॥ ३२५ ॥
कुर्यात्त्रिषवणस्नायी कृच्छ्रं चान्द्रायणन्तथा । पवित्राणि जपेत्पिण्डान् गायत्र्या चाभिमन्त्रयेत् ३२६
अनादिष्टेषु पापेषु शुद्धिश्चान्द्रायणेन तु । धर्मार्थं यश्चरेदेतच्चन्द्रस्यैति सलोकताम् ॥ ३२७ ॥
य इदं श्रावयेद्विद्वान् द्विजान् पर्वसु पर्वसु । अश्वमेधफलन्तस्य तद्भवाननुमन्यताम् ॥ ३३४ ॥

(२ क) वृद्धयाज्ञवल्क्यस्मृति ।

आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः । अनाहिताग्निरेकेन लौकिकेनापरो जनः (१) ।
कुमारजन्मदिवसे विप्रैः कार्यः प्रतिग्रहः । हिरण्यभूगवाश्वाजवासः शय्यासनादिषु (२) ।
तत्र सर्वं प्रतिग्राह्यं कृतान्नं न तु भक्षयेत् । भक्षयित्वा तु तन्मोहाद्द्विजश्चान्द्रायणं चरेत् (३) ।

(३) अत्रिस्मृति ।

ये च पापकृतो लोके ये चान्ये धर्मदूषकाः । सर्वपापैः प्रमुच्यन्ते श्रुत्वेदं शास्त्रमुत्तमम् ॥ ६ ॥
कर्म विप्रस्य यजनं दानमध्ययनं तपः । प्रतिग्रहोध्यापनं च याजनं चेति वृत्तयः ॥ १३ ॥
क्षत्रियस्यापि यजनं दानमध्ययनं तपः । शस्त्रोपजीवनं भूतरक्षणं चेति वृत्तयः ॥ १४ ॥
दानमध्ययनं वार्ता यजनं चेति वै विशः । शूद्रस्य वार्ता शुश्रूषा द्विजानां कारुकर्म च ॥ १५ ॥
सद्यः पतति मांसेन लाक्षया लवणेन च । त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयी ॥ २१ ॥
अलाभे देवखातानां ह्रदेषु सरसीषु च । उद्धृत्य चतुरः पिण्डान् पारक्ये स्नानमाचरेत् ॥ ३० ॥
वसा शुक्रमसृङ् मज्जा मूत्रं विट्कर्णविण्नखाः । श्लेष्मास्थिदूषिका स्वेदो द्वादशैते नृणां मलाः ३१॥
षण्णां षण्णां क्रमेणैव शुद्धिरुक्ता मनीषिभिः । मृद्वारिभिश्च पूर्वेषामुत्तरेषां तु वारिणा ॥ ३२ ॥
न गुणान् गुणिनो हन्ति स्तौति चान्यान् गुणानपि । न हसेच्चान्यदोषांश्च सानसूया प्रकीर्तिता ३४
अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः । आचारेषु व्यवस्थानं शौचमित्यभिधीयते ॥ ३५ ॥
प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम् । एतद्धि मङ्गलं प्रोक्तं ऋषिभिर्धर्मवादिभिः ॥ ३६ ॥
शरीरं पीड्यते येन शुभेन ह्यशुभेन वा । अत्यन्तं तन्न कुर्वीत अनायासः स उच्यते ॥ ३७ ॥
यथोत्पन्नेन कर्त्तव्यः सन्तोषः सर्ववस्तुषु । न स्पृहेत्परदारेषु सा स्पृहा च प्रकीर्तिता ॥ ३८ ॥
बाह्यमाध्यात्मिकं वापि दुःखमुत्पाद्यते परैः । न कुप्यन्ति न चाहन्ति दम इत्यभिधीयते ॥ ३९ ॥
अहन्यहनि दातव्यमदीनेनान्तरात्मना । स्तोकादपि प्रयत्नेन दानमित्यभिधीयते ॥ ४० ॥
परेस्मिन्बन्धुवर्गे वा मित्रे द्वेष्ये रिपौ तथा । आत्मवद्वर्तितव्यं हि दयैषा परिकीर्तिता ॥ ४१ ॥
इष्टापूर्तं च कर्तव्यं ब्राह्मणेनैव यत्नतः । इष्टेन लभते स्वर्गं पूर्ते मोक्षो विधीयते ॥ ४३ ॥
अग्निहोत्रं तपः सत्यं वेदानां चैव पालनम् । आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते ॥ ४४ ॥
वापीकूपतडागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते ॥ ४५ ॥
इष्टापूर्ते द्विजातीनां सामान्ये धर्मसाधने । अधिकारी भवेच्छूद्रः पूर्ते धर्मे न वैदिके ॥ ४६ ॥
आनृशंस्यं क्षमा सत्यमहिंसा दानमार्जवम् । प्रीतिः प्रसादो माधुर्यमार्दवं च यमा दश ॥ ४८ ॥
शौचमिज्या तपो दानं स्वाध्यायोपस्थनिग्रहः । व्रतमौनोपवासं च स्नानं च नियमा दश ॥ ४९ ॥
गवां शृङ्गोदके स्नात्वा महानद्युपसङ्गमे । समुद्रदर्शने वापि व्यालदष्टः शुचिर्भवेत् ॥ ६५ ॥
वृकश्वानशृगालैस्तु यदि दष्टस्तु ब्राह्मणः । हिरण्योदकसंमिश्रं घृतं प्राश्य विशुद्ध्यति ॥ ६६ ॥
ब्राह्मणी तु शुना दष्टा जम्बुकेण वृकेण वा । उदितं सोमनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत् ॥ ६७ ॥

सव्रतस्तु शुना दष्टस्त्रिरात्रमुपवासयेत् । सघृतं यावकं प्राश्य व्रतशेषं समापयेत् ॥ ६८ ॥
अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव वा । पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ ७४ ॥
वपनं मेखलादण्डं भैक्ष्यचर्याव्रतानिच । निवर्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि ॥ ७९ ॥
शुना चैव तु संस्पृष्टस्तस्य स्नानं विधीयते । तदुच्छिष्टं तु संप्राश्य यत्नेन कृच्छ्रमाचरेत् ॥ ८० ॥
एकाहाच्छुद्ध्यते विप्रो योऽग्निवेदसमन्वितः । त्र्यहात्केवलवेदस्तु निर्गुणो दशभिर्दिनैः ॥ ८२ ॥
व्रतिनः शास्त्रपूतस्य आहिताग्नेस्तथैव च । राज्ञां तु सूतकं नास्ति यस्य चेच्छन्ति ब्राह्मणाः ॥८३॥
ब्राह्मणो दशरात्रेण द्वादशाहेन भूमिपः । वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥ ८४ ॥
सपिण्डानां तु सर्वेषां गोत्रजः सप्तपौरुषः । पिण्डांश्चोदकदानं च शावाशौचं तथानुगम् ॥ ८५ ॥
चतुर्थे दशरात्रं स्यात्षडहः पञ्चमे तथा । षष्ठे चैव त्रिरात्रं स्यात् सप्तमे द्व्यहमेव वा ॥ ८६ ॥
मृतसूतके तु दासीनां पत्नीनां चानुलोमिनाम् । स्वामितुल्यं भवेच्छौचं मृते भर्तरि यौनिकम् ॥८७॥
एकत्र संस्कृतानां तु मातॄणामेकभोजिनाम् । स्वामितुल्यं भवेच्छौचं विभक्तानां पृथक् पृथक् ॥८९॥
उष्ट्रीक्षीरमवीक्षीरं पक्वान्नं मृतसूतके । पाचकान्नं नवश्राद्धं भुक्त्वा चान्द्रायणं चरेत् ॥ ९० ॥
महायज्ञविधानं तु न कुर्यान्मृतजन्मनि । होमं तत्र प्रकुर्वीत शुष्कान्नेन फलेन वा ॥ ९२ ॥
विवाहोत्सवयज्ञेषु अन्तरामृतसूतके । पूर्वसङ्कल्पितार्थस्य न दोषश्चात्रिरब्रवीत् ॥ ९६ ॥
व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा । क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः ॥ १०० ॥
व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः । श्राद्धत्यागविहीनस्य भस्मान्तं सूतकं भवेत् ॥ १०१ ॥
द्वे कृच्छ्रे परिवित्तेस्तु कन्यायाः कृच्छ्रमेव च । कृच्छ्रातिकृच्छ्रं दातुः स्याद्धेतुः सान्तपनं स्मृतम् १०२॥
एकैकं वर्द्धयेन्नित्यं शुक्ले कृष्णे च ह्रासयेत् । अमावास्यां न भुञ्जीत एष चान्द्रायणो विधिः॥११०॥
जप्त्वा सहस्रं गायत्र्याः शुद्धिर्ब्रह्मवधाहते । पद्ममौदुम्बरबिल्वाश्च कुशाश्वत्थपलाशकाः ॥ ११३ ॥
एतेषामुदकं पीत्वा पर्णकृच्छ्रं तदुच्यते । पञ्चगव्यं च गोक्षीरं दधि मूत्रं शकृद् घृतम् ॥ ११४ ॥
जग्ध्वा परेह्न्युपवसेत्कृच्छ्रं सान्तपनं स्मृतम् । पृथक्सान्तपनैर्द्रव्यैः षडहः सोपवासकः ॥ ११५ ॥
सप्ताहेन तु कृच्छ्रोयं महासान्तपनं स्मृतम् । त्र्यहं सायं त्र्यहं प्रातस्त्र्यहं भुङ्क्ते त्वयाचितम् ॥११६॥
त्र्यहं परं च नाश्नीयात्प्राजापत्यो विधिः स्मृतः । सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः ११७
अयाचितैश्चतुर्विंश परैस्त्वनशनं स्मृतम् । एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्ववत् ॥ ११८ ॥
त्र्यहं परं च नाश्नीयादतिकृच्छ्रं तदुच्यते । कुक्कुटाण्डप्रमाणं स्यात् यावद्वास्य विशेन्मुखे॥११९॥
एतद् ग्रासं विजानीयाच्छुद्ध्यर्थं कायशोधनम् । त्र्यहमुष्णं पिबेदापस्त्र्यहमुष्णं पिबेत्पयः ॥१२०॥
त्र्यहमुष्णं घृतं पीत्वा वायुभक्षो दिनत्रये । षट् पलानि पिबेदापस्त्रिपलं तु पयः पिबेत् ॥ १२१ ॥
पलमेकं तु वै सर्पिस्तप्तकृच्छ्रं विधीयते । त्र्यहं तु दधिना भुंक्ते त्र्यहं भुंक्ते च सर्पिषा ॥ १२२ ॥
एतदेवं व्रतं पुण्यं वैदिकं कृच्छ्रमुच्यते । एकभुक्तेन नक्तेन तथैवायाचितेन च ॥ १२४ ॥
उपवासेन चैकेन पादकृच्छ्रं प्रकीर्तितम् । कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम् ॥ १२५ ॥
द्वादशाहोपवासेन पराकः परिकीर्तितः । पिण्याकश्चामतक्राम्बुसक्तूनां प्रतिवासरम् ॥ १२६ ॥
एकैकमुपवासः स्यात्सौम्यकृच्छ्रः प्रकीर्त्तितः । एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम् ॥ १२७॥
तुलापुरुष इत्येष ज्ञेयः पञ्चदशाह्निकः । कपिलायास्तु दुग्धाया धारोष्णं यत्पयः पिबेत् ॥ १२८ ॥
श्राद्धे यज्ञे विवाहे च पत्नी दक्षिणतः सदा । सोमः शौचं ददौ तासां गन्धर्वश्च तथाङ्गिराः॥१३७॥
पावकः सर्वमेध्यं च मेध्यं वै योषितां सदा । जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ॥ १३८॥
विद्यया याति विप्रत्वं श्रोत्रियस्त्रिभिरेव च । वेदशास्त्राण्यधीते यः शास्त्रार्थं च निबोधयेत् ॥१३९॥
तदासौ वेदवित्प्रोक्तो वचनं तस्य पावनम् । एकोपि वेदविद्धर्मं यं व्यवस्येद् द्विजोत्तमः ॥ १४० ॥
नास्ति वेदात्परं शास्त्रं नास्ति मातुः परो गुरुः । नास्ति दानात्परं मित्रमिह लोके परत्र च ॥१४८॥
न च कांस्येषु भुञ्जीयादापद्यपि कदाचन । मलाशाः सर्व एवैते यतयः कांस्यभोजनाः ॥ १५५ ॥
कांस्यकस्य च यत्पात्रं गृहस्थस्य तथैव च । कांस्यभोजी यतिश्चैव प्राप्नुयात्किल्बिषं तयोः॥१५६॥
सौवर्णायसताम्रेषु कांस्यरौप्यमयेषु च । भुञ्जन् भिक्षुर्वैदुःष्येत दुष्येच्चैव परिग्रहे ॥ १५७ ॥
यतिहस्ते जलं दद्याद्भिक्षां दद्यात्पुनर्जलम् । तद्भैक्षं मेरुणा तूल्यं तज्जलं सागरोपमम् ॥ १५८ ॥

गोमूत्रेण तु संमिश्रं यावकं घृतपाचितम् । एतद्व्रतमिति प्रोक्तं भगवानत्रिरब्रवीत् ॥ १६१ ॥
ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः । अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः ॥ १६२॥
षण्मासान्कामयेन्मर्त्यो गुर्विणीमेव वै स्त्रियम् । आदन्तजननादूर्ध्वमेवं धर्मो न हीयते ॥ १६३ ॥
रजकः शैलूषश्चैव वेणुकर्मोपजीवनः । एतेषां यस्तु भुङ्क्ते वै द्विजश्चान्द्रायणं चरेत् ॥ १६९ ॥
संस्पृष्टं यस्तु पक्वान्नमन्त्यजैर्वाप्युदक्यया । अज्ञानाद्ब्राह्मणोऽश्नीयात् प्राजापत्यार्द्धमाचरेत् ॥१७२॥
ब्राह्मणो वृक्षमारूढश्चाण्डालो मूलसंस्पृशः । फलान्यत्ति स्थितस्तत्र प्रायश्चित्तं कथं भवेत् ॥१७५॥
ब्राह्मणान्समनुप्राप्य सवासाः स्नानमाचरेत् । नक्तभोजी भवेद्विप्रो घृतं प्राश्य विशुद्ध्यति ॥१७६॥
एकवृक्षसमारूढश्चाण्डालो ब्राह्मणस्तथा । फलान्यत्ति स्थितस्तत्र प्रायश्चित्तं कथं भवेत् ॥ १७७ ॥
ब्राह्मणान्समनुज्ञाप्य सवासाः स्नानमाचरेत् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ १७८ ॥
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुद्ध्यति । स्त्रियो म्लेच्छस्य संपर्कात् शुद्धिः सान्तपने तथा ॥
तप्तकृच्छ्रं पुनः कृत्वा शुद्धिरेषा विधीयते । संवर्तेत यथा भार्या गत्वा म्लेच्छस्य सङ्गताम् ॥१८१॥
अशुद्धा सा भवेन्नारी यावद् गर्भं न मुञ्चति । असवर्णस्तु यो गर्भः स्त्रीणां योनौ निषेच्यते॥१९१॥
विमुक्ते तु ततः शल्ये रजश्चापि प्रदृश्यते ॥ १९२ ॥
तदा सा शुध्यते नारी विमलं काञ्चनं यथा॥ १९३ ॥
ऋतुकाल उपासीत पुष्पकालेन शुद्ध्यति । रजकश्चर्मकारश्च नटो बुरुड एव च ॥ १९५॥
कैवर्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः । एतान् गत्वा स्त्रियो मोहाद्भुक्त्वा च प्रतिगृह्य च ॥
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् । सकृद्भुक्ता तु या नारी म्लेच्छैः सा पापकर्मभिः॥१९७॥
प्राजापत्येन शुद्ध्येत ऋतुप्रस्रवणेन तु । बलोद्धृता स्वयं वापि परप्रेरितया यदि ॥ १९८ ॥
सकृद्भुक्ता तु या नारी प्राजापत्येन शुद्ध्यति । प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् ॥ १९९॥
न तेन तद्व्रतं तासां विनश्यति कदाचन । मद्यसंस्पृष्टकुम्भेषु यत्तोयं पिबति द्विजः ॥ २०० ॥
कृच्छ्रपादेन शुद्ध्येत पुनः संस्कारमर्हति । अन्त्यजस्य तु ये वृक्षा बहुपुष्पफलोपगाः ॥ २०१ ॥
कृच्छ्रपादेन शुद्ध्येत आपस्तम्बो ब्रवीन्मुनिः । श्लेष्मोपानहविण्मूत्रस्त्रीरजो मद्यमेव च ॥ २०३ ॥
एभिः संदूषिते कूपे तोयं पीत्वा कथं विधिः । एकं द्व्यहं त्र्यहं चैव द्विजातीनां विशोधनम् ॥२०४॥
प्रायश्चित्तं पुनश्चैव नक्तं शूद्रस्य दापयेत् । सद्यो वान्ते सचैलं तु विप्रस्तु स्नानमाचरेत् ॥ २०५ ॥
पर्युषिते त्वहोरात्रमतिरिक्ते दिनत्रयम् । शिरः कण्ठोरुपादांश्च सुरया यस्तु लिप्यते ॥ २०६ ॥
दशषट्त्रित्रयैकाहं चरेदेवमनुक्रमात् । प्रमादान्मद्यपसुरां सकृत्पीत्वा द्विजोत्तमः ॥ २०७ ॥
गोमूत्रयावकाहारो दशरात्रेण शुद्ध्यति । मद्यपस्य निषादस्य यस्तु भुङ्क्ते द्विजोत्तमः ॥ २०८ ॥
प्राजापत्येन शुद्ध्येत ब्राह्मणानां तु भोजनात् । ये प्रत्यवसिता विप्राः प्रव्रज्याग्निजलादितः२११॥
अनाशकान्निवर्तन्ते चिकीर्षन्ति गृहस्थितिम् । धारयेत्त्रीणि कृच्छ्राणि चान्द्रायणमथापि वा ॥२१२॥
जातकर्मादिकं प्रोक्तं पुनः संस्कारमर्हति । न शौचं नोदकं नाशु नापवादानुकम्पने ॥ २१३ ॥
गोमूत्रयावकाहारः कृच्छ्रमेकं विशोधनम् । वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ॥ २१५ ॥
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः । तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः॥२१६॥
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेत् । यस्यैकापि गृहे नास्ति धेनुर्वत्सानुचारिणी ॥ २१७ ॥
मङ्गलानि कुतस्तस्य कुतस्तस्य तमःक्षयः । अतिदोहातिवाहाभ्यां नासिकाभेदनेन वा ॥ २१८ ॥
नदीपर्वतसंरोधे मृते पादोनमाचरेत् । अष्टागवं धर्महलं षड्गवं व्यावहारिकम् ॥ २१९ ॥
षड्गवं तु त्रिपादोक्तं पूर्णाहस्त्वष्टभिः स्मृतः । काष्ठलोष्टशिलागोघ्नः कृच्छ्रं सान्तपनं चरेत्॥२२१॥
प्राजापत्यं चरेन्मुष्ट्या अतिकृच्छ्रं तु आयसैः । प्रायश्चित्तेन तच्चीर्णे कुर्याद्ब्राह्मणभोजनम् ॥ २२२॥
अनुडुत्सहितां गां च दद्याद्विप्राय दक्षिणाम् । शरभोष्ट्रहयान्नागान् सिंहशार्दूलगर्दभान् ॥ २२३ ॥
हत्वा च शूद्रहत्यायाः प्रायश्चित्तं विधीयते । मार्जारगोधानकुलमण्डूकांश्च पतत्रिणः ॥ २२४ ॥
हत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं वा पादिकं चरेत् । चाण्डालस्य च संस्पृष्टं विण्मूत्रोच्छिष्टमेव वा२२५॥
श्वपाकचाण्डालपरिग्रहे तु पीत्वा जलं पञ्चगव्येन शुद्धिः । रेतोविण्मूत्रसंस्पृष्टं कौपं यदि जलं पिबेत्२३१
त्रिरात्रेणैव शुद्धिः स्यात्कुम्भे सान्तपनं तथा । क्लिन्नभिन्नशवं यत्स्यादज्ञानाच्च तथोदकम् ॥ २३२॥

प्रायश्चित्तं चरेत्पीत्वा तप्तकृच्छ्रं द्विजोत्तमः । उष्ट्रीक्षीरं खरीक्षीरं मानुषीक्षीरमेव च ॥ २३३ ॥
प्रायश्चित्तं चरेत्पीत्वा तप्तकृच्छ्रं द्विजोत्तमः । वर्णबाह्येन संस्पृष्ट उच्छिष्टस्तु द्विजोत्तमः ॥ २३४ ॥
पञ्चरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति । शुचि गो तृप्तिकृत्तोयं प्रकृतिस्थं महीगतम् ॥ २३९ ॥
देवयात्रा वाहेषु यज्ञप्रकरणेषु च । उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टं न विद्यते ॥ २४७ ॥
पतितानां यदा भुक्तं भुक्तं चाण्डालवेश्मनि । मासार्द्धं तु पिबेद्वारि इति शातातपोऽब्रवीत् ॥ २६०॥
गोब्राह्मणहतानां च पतितानां तथैव च । अग्निना न च संस्कारः शङ्खस्य वचनं यथा ॥ २६१ ॥
चान्द्रायणं चरेन्मासमिति शातातपोऽब्रवीत् । पशुवेश्याभिगमने प्राजापत्यं विधीयते ॥ २६९ ॥
गवां गमने मनुप्रोक्तं व्रतं चान्द्रायणं चरेत् । अमानुषीषु गोवर्जमुदक्यायामयोनिषु ॥ २७० ॥
रेतः सिक्त्वा जले चैव कृच्छ्रं सान्तपनं चरेत् । उदक्यां सूतिकां वा अन्त्यजां स्पृशते यदि२७१
दन्तकाष्ठे त्वहोरात्रमेष शौचविधिः स्मृतः । रजस्वला यदा स्पृष्टा श्वानचाण्डालवायसैः ॥ २७६ ॥
निराहारा भवेत्तावत्स्नात्वा कालेन शुद्ध्यति । रजस्वला यदा स्पृष्टा उष्ट्रजम्बुकशम्बरैः ॥ २७७ ॥
पञ्चरात्रं निराहारा पञ्चगव्येन शुद्ध्यति । स्पृष्टा रजस्वलान्योन्यं ब्राह्मण्या ब्राह्मणी च या॥२७८॥
त्रिरात्रमाचरेत्नक्तैर्निःस्नेहमथ वा चरेत् । बिडालकाकाद्युच्छिष्टं जग्ध्वाश्वनकुलस्य च ॥ २९२ ॥
केशकीटावपन्नं च पिबेद्ब्राह्मीं सुवर्चसम् । उष्ट्रयानं समारुह्य खरयानं च कामतः ॥ २९३ ॥
स्नात्वा च विप्रो दिग्वासाः प्राणायामेन शुद्ध्यति । सव्याहृतीं सप्रणवां गायत्रीं शिरसा सह२९४॥
त्रिःपठेदायतप्राणः प्राणायामः स उच्यते । शकृद्द्विगुणगोमूत्रं सर्पिर्दद्याच्चतुर्गुणम् ॥ २९५ ॥
क्षीरमष्टगुणं देयं पञ्चगव्यं तथा दधि । पञ्चगव्यं पिबेच्छूद्रो ब्राह्मणस्तु सुरां पिबेत् ॥ २९६ ॥
जातश्राद्धे नवश्राद्धे भुक्त्वा चान्द्रायणं चरेत् । राजान्नं हरते तेज शूद्रान्नं ब्रह्मवर्चसम् ॥ ३०० ॥
स्वसुतान्नं च यो भुंक्ते स भुङ्क्ते पृथिवीमलम् । स्वसुता अप्रजाता च नाश्नीयात्तद्गृहे पिता३०१॥
भुंक्ते त्वस्या माययान्नं पूयसं नरकं व्रजेत् । अधीत्य चतुरो वेदान्सर्वशास्त्रार्थतत्त्ववित् ॥ ३०२ ॥
नरेन्द्रभवने भुक्त्वा विष्ठायां जायते कृमिः । नवश्राद्धे त्रिपक्षे च षण्मासे मासिकेऽब्दिके ॥ ३०३॥
कार्पासं दन्तकाष्ठं च विष्णोरपि श्रियं हरेत् । शूर्पवातो नखाग्राम्बु स्नानवस्त्रं घटोदकम् ॥३१५ ॥
मार्जनीरेणु केशाम्बु हन्ति पुण्यं दिवा कृतम् । मार्जनीरजकेशाम्बु देवतायतनोद्भवम् ॥ ३१६ ॥
तेनावलुण्ठितं तेषु गङ्गाम्भःप्लुत एव सः । मृत्तिकाः सप्त न ग्राह्या वल्मीके मूषिकस्थले ॥ ३१७॥
अन्तर्जले श्मशानान्ते वृक्षमूले सुरालये । वृषभैश्च तथोत्खाते श्रेयस्कामैः सदा बुधैः ॥ ३१८ ॥
शुचौ देशेषु संग्राह्या शर्कराश्मविवर्जिता । पुरीषे मैथुने होमे प्रस्रावे दन्तधावने ॥ ३१९ ॥
नाशयित्वा तु तत्सर्वं भ्रूणहत्याफलं भवेत् । ग्रहणोद्वाहसंक्रान्तौ स्त्रीणां च प्रसवे तथा ॥ ३२३ ॥
दानं नैमित्तिकं ज्ञेयं रात्रावपि प्रशस्यते । क्षौमजं वाथ कार्पासं पट्टसूत्रमथापि वा ॥ ३२४ ॥
यज्ञोपवीतं यो दद्याद्वस्त्रदानफलं लभेत् । कांसस्य भाजनं दद्याद्घृतपूर्णं सुशोभनम् ॥ ३२५ ॥
तथा भक्त्या विधानेन अग्निष्टोमफलं लभेत् । श्राद्धकाले तु यो दद्यात्शोभनौ च उपानहौ॥३२६॥
स गच्छत्यन्नमार्गेऽपि अश्वदानफलं लभेत् । तैलपात्रं तु यो दद्याच्संपूर्णं सुसमाहितः ॥ ३२७ ॥
स गच्छति ध्रुवं स्वर्गं नरो नास्त्य संशयः । दुर्भिक्षे अन्नदाता च सुभिक्षे च हिरण्यदः ॥ ३२८ ॥
पानप्रदस्त्वरण्ये तु स्वर्गलोके महीयते । यावदर्धप्रसूता गौस्तावत्सा पृथिवी स्मृता ॥ ३२९ ॥
पृथिवी तेन दत्ता स्यादीदृशीं गां ददाति यः । तेनाग्नयो हुताः सम्यक् पितरस्तेन तर्पिताः ३३०॥
देवाश्च पूजिताः सर्वे यो दद्ति गवाह्निकम् । जन्मप्रभृति यत्पापं मातृकं पैतृकं तथा ॥ ३३१ ॥
उद्धरेन्नरकस्थानात्कुलान्येकोत्तरं शतम् । आदित्यो वरुणो विष्णुर्ब्रह्मा सोमो हुताशनः ॥ ३३३ ॥
शूलपाणिस्तु भगवान् अभिनन्दति भूमिदम् ॥ ३३४ ॥
गृहाद्दशगुणं कूपं कूपाद्दशगुणं तटम् । तटाद्दशगुणं नद्यां गङ्गासंख्या न विद्यते ॥ ३९१ ॥
स्रवद्ब्राह्मणं तोयं रहस्थं क्षत्रियं तथा । वापीकूपे तु वैश्यं स्याच्छूद्रं भाण्डोदकं तथा ॥ ३९२ ॥

(४) विष्णुस्मृति-१अध्याय ।

सीमंतोन्नयनं कर्म न स्त्री संस्कार इष्यते । गर्भस्यैव तु संस्कारो गर्भे गर्भे प्रयोजयेत् ॥ १० ॥
जातकर्म तथा कुर्यात्पुत्रे जाते यथोदितम् । बहिर्निष्क्रमणं चैव तस्य कुर्याच्छिशोः शुभम् ॥ ११ ॥

षष्ठे मासे च संप्राप्ते अन्नप्राशनमाचरेत् । तृतीयेऽब्दे च संप्राप्ते केशकर्म समाचरेत् ।. १२ ।।
गर्भाष्टमे तथा कर्म ब्राह्मणस्योपनायनम् । द्विजत्वे त्वथ संप्राप्ते सावित्र्यामधिकारभाक् ॥ १३ ॥
यो यस्य विहितो दण्डो मेखलाजिनधारणम् । सूत्रं वस्त्रं च गृह्णीयाद्ब्रह्मचर्येण यंत्रितः ॥ १६ ॥
समित्कुशांश्चोदकुम्भमाहृत्य गुरवे व्रती । प्राञ्जलिःसम्यगासीन उपस्थाय यतः सदा:॥ २० ॥
यं यं ग्रन्थमधीयीत तस्य तस्य व्रतं चरेत् । सावित्र्युपक्रमात्सर्वमावेदग्रहणोत्तरम् ॥ २१ ॥
द्विजातिषु चरेद्भैक्ष्यं भिक्षाकाले समागते । निवेद्य गुरवेऽश्नीयात्संमतो गुरुणा व्रती ॥ २२ ॥
सायं सन्ध्यामुपासीनो गायत्र्यष्टशतं जपेत् । द्विकालभोजनार्थं च तथैव पुनराहरेत् ॥ २३ ॥
वेदस्वीकरणे त्वष्टो गुर्वधीनो गुरोर्हितः । निष्ठां तत्रैव यो गच्छेन्नैष्ठिकस्स उदाहृतः ॥ २४ ॥
परिणीय तु षण्मासान्वत्सरं वा न संविशेत् । औदुम्बरायणो नाम ब्रह्मचारी गृहेगृहे ॥ २७ ॥

विष्णुस्मृति–२ अध्याय ।

ब्राह्मे मुहूर्त उत्थाय तत्सर्वं सम्यगाचरेत् । चतुःप्रकारं भिद्यन्ते गृहिणीधर्मसाधकाः ॥ १५ ॥
वृत्तिभेदेन सततं ज्यायांस्तेषां परः परः । कुसूलधान्यको वा स्यात्कुम्भीधान्यक एव वा ॥ १६ ॥
त्र्यहैहिको वापि भवेत्सद्यः प्रक्षालकोपि वा । श्रौतं स्मार्तं च यत्किञ्चिद्विधानं धर्मसाधनम् ॥१७॥

विष्णुस्मृति–३ अध्याय ।

गृहस्थो ब्रह्मचारी वा वनवासं यदाचरेत् । चीरवल्कलधारी स्यादकृष्टान्नाशनो मुनिः ॥ १ ॥
गत्वा च विजनं स्थानं पञ्चयज्ञान्न हापयेत् । अग्निहोत्रं च जुहुयादन्ननीवारकादिभिः ॥ २ ॥
श्रवणेनाग्निमाधाय ब्रह्मचारी वने स्थितः । पञ्चयज्ञविधानेन यज्ञं कुर्यादतंद्रितः ॥ ३ ॥
सञ्चितं तु यदारण्यं भक्तार्थं विधिवद्वने । त्यजदाश्वयुजे मासि वन्यमन्यत्समाहरेत् ॥ ४ ॥
आकाशशायी वर्षासु हेमन्ते च जलाशयः । ग्रीष्मे पञ्चाग्निमध्यस्थो भवेन्नित्यं वने वसन् ॥५ ॥
कृच्छ्रं चांद्रायणं चैव तुलापुरुषमेव च । अतिकृच्छ्रं प्रकुर्वीत त्यक्त्वा कामाञ्छुचिस्ततः ॥ ६ ॥
त्रिसन्ध्यं स्नानमातिष्ठेत्सहिष्णुर्भूतजान्गुणान् । पूजयेदतिथींश्चैव ब्रह्मचारी वनं गतः ॥ ७ ॥
प्रतिग्रहं न गृह्णीयात्परेषां किञ्चिदात्मवान् । दाता चैव भवेन्नित्यं श्रद्दधानः प्रियंवदः ॥ ८ ॥
रात्रौ स्थण्डिलशायी स्यात्प्रपदैस्तु दिनं क्षिपेत् । वीरासनेन तिष्ठेद्वा क्लेशमात्मन्यचिन्तयन् ॥ ९ ॥
केशरोमनखश्मश्रून्न छिन्द्यान्नापि कर्तयेत् । त्यजञ्छरीरसौहार्दं वनवासरतः शुचिः ॥ १० ॥

विष्णुस्मृति–४ अध्याय ।

विरक्तः सर्वकामेषु पारिव्राज्यं समाश्रयेत् । आत्मन्यग्नीन्समारोप्य दत्त्वा चाभयदक्षिणाम् ॥ २ ॥
चतुर्थमाश्रमं गच्छेद्ब्राह्मणः प्रव्रजन्गृहात् । आचार्येण समादिष्टं लिङ्गं यत्नात्समाश्रयेत् ॥ ३ ॥
शौचमाश्रयसम्बन्धं यतिधर्मांश्च शिक्षयेत् । अहिंसा सत्यमस्तेयं ब्रह्मचर्यमफल्गुता ॥ ४ ॥
दयां च सर्वभूतेषु नित्यमेतद्यतिश्चरेत् । ग्रामान्ते वृक्षमूले च नित्यकालनिकेतनः ॥ ५ ॥
ग्रामे वापि पुरे वापि वासो नैकत्र दुष्यति । कौपीनाच्छादनं वासः कन्थां शीतापहारिणीम् ॥ ७ ॥
पादुके चापि गृह्णीयात्कुर्यान्नान्यस्य संग्रहम् । सम्भाषणं सहस्त्रीभिरालम्भप्रेक्षणे तथा ॥ ८ ॥
एकाकी विचरेन्नित्यं त्यक्त्वा सर्वपरिग्रहम् । याचितायाचिताभ्यां तु भिक्षया कल्पयेत्स्थितिम्॥१०॥
साधुकारं याचितं स्यात्प्राक्प्रणीतमयाचितम् । चतुर्विधा भिक्षुकाः स्युः कुटीचकबहूदकौ ॥ ११ ॥
पात्रमस्य भवेत्पाणिस्तेन नित्यं गृहानटेत् । अतैजसानि पात्राणि भिक्षार्थं कृतवान्मनुः ॥ २९ ॥
सर्वेषामेव भिक्षूणां दार्वलाबुमयानि च । कांस्यपात्रे न भुञ्जीत आपद्यपि कथंचन ॥ ३० ॥
मलाशाः सर्व उच्यन्ते यतयः कांस्यभोजिनः । कांसिकस्य तु यत्पापं गृहस्थस्य तथैव च ॥ ३१ ॥
कांस्यभोजी यतिः सर्वं तयोः प्राप्नोति किल्बिषम् । ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा॥३२॥
निन्द्यश्च सर्वदेवानां पितॄणां च तथोच्यते । त्रिदण्डं लिङ्गमाश्रित्य जीवन्ति बहवो द्विजाः ॥ ३४ ॥
न तेषामपवर्गोऽस्ति लिङ्गमात्रोपजीविनाम् । त्यक्त्वा लोकांश्च वेदांश्च विषयानिन्द्रियाणि च॥३५॥
आत्मन्येव स्थितो यस्तु प्राप्नोति परमं पदम् ॥ ३६ ॥

विष्णुस्मृति-५ अध्याय ।

ब्राह्मणक्षत्रवैश्यांश्च चरेन्नित्यममत्सरः । कुर्वंस्तु शूद्रः शुश्रूषां लोकाञ्जयति धर्मतः ॥ ८ ॥

(४ क) बृहद्विष्णुस्मृति-२ अध्याय ।

तेषाञ्च धर्माः-ब्राह्मणस्याध्यापनम्; क्षत्रियस्य शस्त्रनित्यता; वैश्यस्य पशुपालनम्; शूद्रस्य द्विजातिशुश्रूषा; द्विजानां यजनाध्ययने ॥ ४ ॥ अथैतेषां वृत्तयः-ब्राह्मणस्य याजनप्रतिग्रहौ; क्षत्रियस्य क्षितित्राणम्, कृषिगोरक्षवाणिज्यकुसीदयोनिपोषणानि वैश्यस्य; शूद्रस्य सर्वशिल्पानि ॥ ५ ॥

बृहद्विष्णुस्मृति-३ अध्याय ।

व्यवहारदर्शने ब्राह्मणं वा नियुञ्ज्यात् ॥ ५१ ॥

बृहद्विष्णु-४ अध्याय ।

जालस्थार्कमरीचिगतं रजस्त्रसरेणुसंज्ञकम् ॥ १ ॥ तदष्टकं लिक्षा ॥ २ ॥ तत्त्रयं राजसर्षपः ॥ ३ ॥ तत्त्रयं गौरसर्षपः ॥ ४ ॥ तत्षट्कं यवः ॥ ५ ॥ तत्त्रयं कृष्णलम् ॥ ६ ॥ तत्पञ्चकं माषः ॥ ७ ॥ तद्द्वादशमक्षार्द्धम् ॥ ८ ॥ अक्षार्द्धमेव सचतुर्माषकं सुवर्णः ॥ ९ ॥ चतुःसुवर्णको निष्कः ॥ १० ॥ द्वे कृष्णले समधृते रूप्यमाषकः ॥ ११ ॥ तत् षोडशकं धरणम् ॥ १२ ॥ ताम्रकार्षिकः कार्षापणः ॥ १३ ॥ पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः । मध्यमः पञ्च विज्ञेयः सहस्रन्त्वे व चोत्तमः ॥ १४ ॥

बृहद्विष्णुस्मृति-५ अध्याय ।

धान्यापहार्येकादशगुणं दण्ड्यः ॥ ७९ ॥ शय्यापहारी च ॥ ८० ॥ सुवर्णरजतवस्त्राणां पञ्चाशतस्त्वभ्यधिकमपहरन् विकरः ॥ ८१ ॥ तदूनमेकादशगुणं दण्ड्यः ॥ ८२ ॥ ग्रहपीडाकरं द्रव्यं प्रक्षिपन् पणशतम् ॥ १०९ ॥ पशूनां पुंस्त्वोपघातकारी ॥ ११८ ॥ त्यक्तप्रव्रज्यो राज्ञो दास्यं कुर्यात् ॥ १५१ ॥

गुरु वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् । आततायिनमायान्तं हन्यादेवाविचारयन् ॥ १८५
आततायिवधे दोषो हन्तुर्भवति कश्च न । प्रकाशं वाप्रकाशं वा मन्युस्तन्मन्युमृच्छति ॥ १८६
उद्यतासिविषाग्निञ्च शापोद्यतकरं तथा । आथर्वणेन हन्तारं पिशुनञ्चैव राजसु ॥ १८७ ॥
भार्यातिक्रमिणञ्चैव विद्यात् सप्ताततायिनः । यशोवित्तहरानन्यानाहुर्धर्मार्थहारकान् ॥ १८८ ॥

बृहद्विष्णुस्मृति-१३ अध्याय ।

विषाण्यदेयानि सर्वाणि ॥ २ ॥ ऋते हिमाचलोद्भवाच्छार्ङ्गात् ॥ ३ ॥ तस्य च यवसप्तकं घृतप्लुतमभिशस्ताय दद्यात् ॥ ४ ॥

बृहद्विष्णुस्मृति-१५ अध्याय ।

अथ द्वादश पुत्रा भवन्ति ॥ १ ॥ स्वे क्षेत्रे संस्कृतायामुत्पादितः स्वयमौरसः प्रथमः ॥ २ ॥ नियुक्तायां सपिण्डेनोत्तमवर्णेन वोत्पादितः क्षेत्रजो द्वितीयः ॥ ३ ॥ पुत्रिकापुत्रस्तृतीयः ॥ ४ ॥ यस्तस्याः पुत्रः समे पुत्रो भवेदिति या पित्रा दत्ता सा पुत्रिका ॥ ५ ॥ पुत्रिकाविधिना प्रतिपादितापि भ्रातृविहीना पुत्रिकैव ॥ ६ ॥ पौनर्भवश्चतुर्थः ॥ ७ ॥ अक्षता भूयः संस्कृता पुनर्भूः ॥ ८ ॥ भूयस्त्वसंस्कृतापि परपूर्वा ॥ ९ ॥ कानीनः पञ्चमः ॥ १० ॥ पितृगृहेऽसंस्कृतयैवोत्पादितः ॥ ११ ॥ स च पाणिग्राहस्य ॥ १२ ॥ गृहे च गूढोत्पन्नः षष्ठः ॥ १३ ॥ यस्य तल्पजस्तस्यासौ ॥ १४ ॥ सहोढ़ः सप्तमः ॥ १५ ॥ गर्भिणी या संस्क्रियते तस्याः पुत्रः ॥ १६ ॥ स च पाणिग्राहस्य ॥ १७ ॥ दत्तकश्चाष्टमः ॥ १८ ॥ स च मातापितृभ्यां यस्य दत्तः ॥ १९ ॥ क्रीतश्च नवमः ॥ २० ॥ स च येन क्रीतः ॥ २१ ॥ स्वयमुपगतो दशमः ॥२२॥ स च यस्योपगतः ॥ २३ ॥ अपविद्धस्त्वेकादशः ॥ २४ ॥ पित्रा मात्रा च परित्यक्तः ॥ २५ ॥ स च येन गृहीतः ॥ २६ ॥ यत्र क्वचनोत्पादितश्च द्वादशः ॥ २७ ॥ एतेषां पूर्वः श्रेयान् ॥२८॥

स एव दायहारः ॥ २९ ॥ स चान्यान् बिभृयात् ॥ ३० ॥ अनूढानां स्ववित्तानुरूपेण संस्कारं कुर्यात् ॥ ३१ ॥ एकोढानर्थानामप्येकस्याः पुत्रः सर्वासां पुत्र एव ॥ ४० ॥ भ्रातॄणामेकजातानाञ्च ॥ ४१ ॥
पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः। तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥ ४३ ॥
ऋणमस्मिन् सन्नयति अमृतत्वञ्च गच्छति। पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥ ४४ ॥
पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते। अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥ ४५ ॥

बृहद्विष्णुस्मृति–१६ अध्याय।

समानवर्णासु पुत्राः सवर्णा भवन्ति ॥ १ ॥ अनुलोमासु मातृवर्णाः ॥ २ ॥ प्रतिलोमास्वार्यविगर्हिताः ॥ ३ ॥ तत्र वैश्यापुत्रः शूद्रेणायोगवः ॥ ४ ॥ पुक्कसमागधौ क्षत्रियापुत्रौ वैश्यशूद्राभ्याम् ॥ ५ ॥ चाण्डालवैदेहकसूताश्च ब्राह्मणीपुत्राः शूद्रविट्क्षत्रियैः ॥ ६ ॥ रङ्गावतरणमायोगवानाम् ॥ ८ ॥ व्याधता पुक्कसानाम् ॥ ९ ॥ स्तुतिक्रिया मागधानाम् ॥ १० ॥ वध्यघातित्वं चाण्डालानाम् ॥ ११ ॥ स्त्रीरक्षा तज्जीवनञ्च वैदेहकानाम् ॥ १२ ॥ अश्वसारथ्यं सूतानाम् ॥ १३ ॥
ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः। स्त्रीबालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणम् ॥ १८ ॥

बृहद्विष्णुस्मृति–१७अध्याय।

पिता चेत्पुत्रान् विभजेत्तस्य स्वेच्छा स्वयमुपात्तेऽर्थे ॥ १ ॥ पैतामहे त्वथ पितृपुत्रयोस्तुल्यं स्वामित्वम् ॥२॥ पितृविभक्ता विभागानन्तरोत्पन्नस्य भागं दद्युः ॥ ३ ॥ अपुत्रधनं पत्न्यभिगामि॥४॥ तदभावे दुहितृगामि॥५॥तदभावे पितृगामि॥६॥तदभावे मातृगामि ॥७॥तदभावे भ्रातृगामि ॥८॥ तदभावे भ्रातृपुत्रगामि ॥ ९ ॥ तदभावे बन्धुगामि ॥ १० ॥ तदभावे सकुल्यगामि ॥ ११ ॥ तदभावे सहाध्यायिगामि ॥ १२ ॥ तदभावे ब्राह्मणधनवर्जं राजगामि ॥ १३॥ ब्राह्मणार्थो ब्राह्मणानाम् ॥ १४ ॥ वानप्रस्थधनमाचार्यो गृह्णीयात् ॥ १५ ॥ शिष्यो वा ॥ १६ ॥
पितृमातृसुतभ्रातृ–दत्तमध्यग्न्युपागतम्। अधिवेदनिकं बन्धुदत्तं शुल्कमन्वाधेयकमिति स्त्रीधनम् ॥
ब्राह्मादिषु चतुर्षु विवाहेष्वप्रजायामतीतायां तद्भर्तुः ॥ १९ ॥ शेषेषु च पिता हरेत् ॥ २० ॥ सर्वेष्वेव प्रसूतायां यद्धनं तद्दुहितृगामि ॥ २१ ॥

बृहद्विष्णुस्मृति–१८ अध्याय।

मातरः पुत्रभागानुसारेण भागहारिण्यः ॥ ३४ ॥ समवर्णाः पुत्राः समानंशानादद्युः ॥ ३६ ॥ ज्येष्ठाय श्रेष्ठमुद्धारं दद्युः ॥ ३७ ॥
वस्त्रं पत्रमलंकारं कृतान्नमुदकं स्त्रियः। योगक्षेमं प्रकारश्च न विभाज्यश्च पुस्तकम् ॥ ४४ ॥

बृहद्विष्णुस्मृति–१९ अध्याय।

ब्राह्मणमनाथं ये ब्राह्मणा निर्हरन्ति ते स्वर्गलोकभाजः ॥ ९ ॥ चतुर्थदिवसेऽस्थिसञ्चयनं कुर्युः ॥ १० ॥ तेषाञ्च गङ्गाम्भसि प्रक्षेपः ॥ ११ ॥ यावत् सङ्ख्यमस्थि पुरुषस्य गङ्गाम्भसि तिष्ठति तावद्वर्षसहस्राणि स्वर्गलोकमधितिष्ठति ॥ १२ ॥

बृहद्विष्णुस्मृति–२२ अध्याय।

ब्राह्मणस्य सपिण्डानां जननमरणयोर्दशाहमाशौचम् ॥१ ॥ द्वादशाहं राजन्यस्य ॥ २ ॥ पञ्चदशाहं वैश्यस्य मासं शूद्रस्य ॥ ३ ॥ अदन्तजाते बाले प्रेते सद्य एव ॥ २६ ॥ नास्याग्निसंस्कारो नोदकक्रिया ॥ २७ ॥
दन्तजाते त्वकृतचूडे त्वहोरात्रेण ॥ २८ ॥ कृतचूडे त्वसंस्कृते त्रिरात्रेण ॥ २९ ॥ ततः परं यथोक्तकालेन ॥ ३० ॥ संस्कृतासु स्त्रीषु न शौचं भवति पितृपक्षे ॥ ३२ ॥ तत्प्रसवमरणे चेत् पितृगृहे स्यातां त्रिरात्रञ्च ॥ ३३ ॥ जननाशौचमध्ये यद्यपरं जननाशौचं स्यात् तदा पूर्वाशौचव्यपगमे शुद्धिः ॥ ३४ ॥ रात्रिशेषे दिनद्वयेन ॥३५॥ प्रभाते दिनत्रयेण ॥ ३६ ॥ मरणाशौचमध्ये ज्ञातिमरणेऽप्येवम् ॥ ३७ ॥ आचार्ये मातामहे च व्यतीते त्रिरात्रेण ॥ ४१ ॥

अनौरसेषु पुत्रेषु जातेषु च मृतेषु च । परपूर्वासु भार्यासु प्रसूतासु मृतासु च ॥ ४२ ॥
भृग्वग्न्यनाशकाम्बुसंग्राम–विद्युन्नृपहतानां नाशौचम् ॥ ४६ ॥ न राज्ञां राजकर्मणि ॥४७॥ न व्रतिनां व्रते ॥ ४८ ॥ न सत्रिणां सत्रे ॥ ४९ ॥ न कारूणां कारुकर्मणि ॥ ५० ॥ न राजाज्ञाकारिणां तदिच्छया ॥ ५१ ॥ न देवप्रतिष्ठाविवाहयोः पूर्वसम्भूतयोः ॥५२ ॥ न देशविप्लवे॥५३॥ आपद्यपि च कष्टायाम् ॥ ५४ ॥ आत्मत्यागिनः पतिताश्च नाशौचोदकभाजः ॥ ५५ ॥ पतितस्य दासीम्रितेऽह्नि पादाभ्यां घटमपवर्जयेत् ॥ ५६ ॥ उद्बन्धनमृतस्य यः पाशं छिन्द्यात् स तप्तकृच्छ्रेण शुध्यति ॥ ५७ ॥ आत्मघातिनं संस्कर्ता च ॥ ५८ ॥ तदश्रुपातकारी च ॥ ५९ ॥ सर्वस्यैव प्रेतस्य बान्धवैः सहाश्रुपातं कृत्वा स्नानेन ॥ ६० ॥

बृहद्विष्णुस्मृति–२३ अध्याय ।

अजाश्वं मुखतो मेध्यं न गौर्न नरजा मलाः । पन्थानश्च विशुध्यन्ति सोमसूर्यांशुमारुतैः ॥ ४० ॥
भूमिष्ठमुदकं पुण्यं वैतृष्ण्यं यत्र गोर्भवेत् । अव्याप्तश्चेदमेध्येन तद्वदेव शिलागतम् ॥ ४३ ॥
त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् । अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥ ४७ ॥
नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम् । ब्राह्मणान्तरितं भैक्ष्यमाकराः सर्व एव च ॥ ४८ ॥
नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने । प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः ॥ ४९ ॥
ऊर्द्ध्वं नाभेर्यानि खानि तानि मेध्यानि निर्दिशेत् । यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युताः॥५१॥
मक्षिकाविप्रुषश्छाया गौर्गजाश्वमरीचयः । रजो भूर्वायुरग्निश्च मार्जारश्च सदा शुचिः ॥ ५२ ॥
नोच्छिष्टं कुर्वते मुख्या विप्रुषोऽङ्गे पतन्ति याः । न श्मश्रूणि गतान्यास्यं न दन्तान्तरवेष्टितम्॥५३॥
स्पृशन्ति विन्दवः पादौ य आचामयतः परान् । भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत् ॥ ५४ ॥

बृहद्विष्णुस्मृति–२५ अध्याय ।

मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा ॥ १४ ॥
नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् । पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते ॥ १५ ॥
पत्यौ जीवति या योषिदुपवासव्रतं चरेत् । आयुः सा हरते भर्तुर्नरकञ्चैव गच्छति ॥ १६ ॥

बृहद्विष्णुस्मृति–३१ अध्याय ।

त्रयः पुरुषस्यातिगुरवो भवन्ति ॥ १ ॥ माता पिता आचार्यश्च ॥ २ ॥ तेषां नित्यमेव शुश्रूषुणा भवितव्यम् ॥ ३ ॥ यत् ते ब्रूयुस्तत् कुर्यात् ॥ ४॥ तेषां प्रियहितमाचरेत् ॥ ५ ॥ न तैरननुज्ञातः किञ्चिदपि कुर्यात् ॥ ६ ॥
एत एव त्रयो वेदा एत एव त्रयः सुराः । एत एव त्रयो लोका एत एव त्रयोऽग्नयः ॥ ७ ॥
पिता गार्हपत्योऽग्निर्दक्षिणाग्निर्माता गुरुराहवनीयः ॥ ८ ॥
सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः । अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥ ९ ॥
इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम् । गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते ॥ १०॥

बृहद्विष्णुस्मृति–३२ अध्याय ।

श्वशुरपितृव्यमातुलर्त्विजां कनीयसां प्रत्युत्थानमेवाभिवादनम् ॥ ४ ॥ असंस्तुतापि परपत्नी भगिनीति वाच्या पुत्रीति मातेति वा ॥ ७ ॥
विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणान्तु वीर्यतः । वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः ॥१८॥

बृहद्विष्णुस्मृति–३४ अध्याय ।

मातृगमनं दुहितृगमनं स्नुषागमनमित्यतिपातकानि ॥ १ ॥
अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनम् । न ह्यन्या निष्कृतिस्तेषां विद्यते हि कथञ्चन ॥ २ ॥

बृहद्विष्णुस्मृति–३५ अध्याय ।

ब्रह्महत्या सुरापानं ब्राह्मणसुवर्णहरणं गुरुदारगमनमिति महापातकानि ॥१॥ तत्संयोगश्च ॥ २ ॥ संवत्सरेण पतति पतितेन सहाचरन् ॥३॥ एकयानभोजनासनशयनैः ॥४॥ यौनस्रौवमौखसम्बन्धात् सद्य एव ॥ ५ ॥

बृहद्विष्णुस्मृति–३६ अध्याय ।

पितृव्यमातामहमातुलश्वशुरनृपपत्न्यभिगमनं गुरुदारगमनसमम् ॥४॥ पितृष्वसृमातृष्वसृस्वसृगमनञ्च ॥ ५ ॥ श्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनञ्च ॥ ६ ॥ स्वसुः सख्याःसगोत्राया उत्तमवर्णायाः कुमार्या अन्त्यजाया रजस्वलायाः प्रव्रजिताया निक्षिप्तायाश्च ॥ ७ ॥

बृहद्विष्णुस्मृति–३७ अध्याय ।

उपपातकिनस्त्वेते कुर्युश्चान्द्रायणं नराः । पराकञ्च तथाकुर्युर्यजेयुर्गोमखेन वा ॥ ३५ ॥

बृहद्विष्णुस्मृति–३८ अध्याय ।

ब्राह्मणस्य रुजाकरणम् ॥ १ ॥ आघ्रेयमद्ययोर्घ्रातिः ॥ २ ॥ जैह्म्यम् ॥३ ॥ पशुषु मैथुनाचरणम् ॥ ४ ॥ पुंसि च ॥ ५ ॥ इति जातिभ्रंशकराणि ॥ ६ ॥

जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया । कुर्यात् सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया ॥ ७ ॥

बृहद्विष्णुस्मृति–४० अध्याय ।

निन्दितेभ्यो धनादानं वाणिज्यं कुसीदजीवनमसत्यभाषणं शूद्रसेवनमित्यपात्रीकरणम् ॥ १ ॥

बृहद्विष्णुस्मृति–४४ अध्याय ।

अभोज्यान्नभक्ष्याशी कृमिः ॥ ११ ॥ स्तेनः श्येनः ॥ १२ ॥ घृतं नकुलः ॥ २० ॥ मांसं गृध्रः ॥ २१ ॥ वसां मद्गुः ॥ २२ ॥ तैलं तैलपायिकः ॥ २३ ॥ लवणं चीचिवाक् ॥ २४ । दधि बलाका ॥ २५ ॥ कौशेयं हृत्वा भवति तित्तिरिः ॥ २६ ॥ क्षौमं दर्दुरः ॥ २७ ॥ कार्पासतान्तवं क्रौञ्चः ॥ २८ ॥ गोधा गाम् ॥ २९ ॥ वाग्गुदो गुडम् ॥३०॥ छुच्छुन्दरिर्गन्धान् ॥३१॥ पत्रशाकं बर्हीं ॥ ३२ ॥ कृतान्नं श्चावित् ॥ ३३ ॥ अकृतान्नं शल्लकः ॥ ३४ ॥ अग्निं वकः ॥ ३५ ॥ गृहकार्युपस्करम् ॥ ३६ ॥ रक्तवासांसि जीवञ्जीवकः ॥ ३७ ॥ गजं कूर्मः ॥ ३८ ॥ अश्वं व्याघ्रः ॥ ३९ ॥ फलं पुष्पं वा मर्कटः ॥ ४० ॥ ऋक्षः स्त्रियम् ॥ ४१ ॥ यानमुष्ट्रः ॥ ४२ ॥ पशूनजः ॥ ४३ ॥

यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः । अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः ॥ ४४ ॥
स्त्रियोऽप्येतेन कल्पेन हृत्वा दोषमवाप्नुयुः । एतेषामेव जन्तूनां भार्यात्वमुपयान्ति ताः ॥ ४५ ॥

बृहद्विष्णुस्मृति–४५ अध्याय ।

ब्रह्महा यक्ष्मी ॥ ३ ॥ सुरापः श्यावदन्तकः ॥ ४ ॥ सुवर्णहारी कुनखः ॥ ५ ॥ गुरुतल्पगो दुश्चर्मा ॥ ६ ॥ पूतिनासः पिशुनः ॥ ७ ॥ पूतिवक्त्रः सूचकः ॥ ८ ॥ धान्यचौरोऽङ्गहीनः ॥ ९ ॥ मिश्रचौरोऽतिरिक्ताङ्गः ॥ १० ॥ अन्नापहारकस्त्वामयावी ॥ ११ ॥ वागपहारको मूकः ॥ १२ ॥ वस्त्रापहारकः श्वित्री ॥ १३ ॥ अश्वापहारकः पङ्गुः ॥ १४॥ गोघ्नस्त्वन्धः ॥ १९ ॥ दीपापहारकश्च ॥ २० ॥ काणश्च दीपनिर्वापकः ॥ २१ ॥

बृहद्विष्णुस्मृति–४६अध्याय ।

अथ कृच्छ्राणि भवन्ति ॥ १ ॥ त्र्यहं नाश्नीयात् ॥ २ ॥ प्रत्यहञ्च त्रिषवणं स्नानमाचरेत् ॥ ३॥ त्रिः प्रतिस्नानमप्सु मज्जनम् ॥ ४ ॥ मग्नस्त्रिरघमर्षणं जपेत् ॥ ५ ॥ दिवा स्थितास्तिष्ठेत् ॥ ६ ॥ रात्रावासीनः ॥ ७ ॥ कर्मणोऽन्ते पयस्विनीं दद्यात् ॥ ८ ॥ इत्यघमर्षणम् ॥ ९ ॥ त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमयाचितमश्नीयादेष प्राजापत्यः ॥ १० ॥ त्र्यहमुष्णाः पिबेदपस्त्र्यहमुष्णं घृतं त्र्यहमुष्णं पयस्त्र्यहञ्च नाश्नीयादेष तप्तकृच्छ्रः ॥११॥कृच्छ्रातिकृच्छ्रः पयसा दिवसैकविंशतिक्षपणम् ॥ १३ ॥ निराहारस्य द्वादशाहेन पराकः ॥ १८ ॥ गोमूत्रगोमयक्षीरदधिसर्पिः कुशोदकान्येकदिवसमश्नीयाद् द्वितीयमुपवसेदेतत् सान्तपनम् ॥ १९ ॥ गोमूत्रादिभिः प्रत्यहाभ्यस्तैर्महासान्तपनम् ॥ २० ॥ त्र्यहाभ्यस्तैश्चातिसान्तपनम् ॥ २१ ॥ पिण्याकाचामतक्रोदकसक्तूनामुपवासान्तारितोऽभ्यवहारस्तुलापुरुषः ॥ २२ ॥ कुशपलाशोदुम्बरपद्म–शंखपुष्पीवट–ब्रह्मसुवर्चलापत्रैः क्वथितस्याम्भसः प्रत्येकं पानेन पर्णकृच्छ्रः ॥ २३ ॥

बृहद्विष्णुस्मृति-४७अध्याय ।

अथ चान्द्रायणम् ॥ १ ॥ ग्रासानविकारानश्नीयात् ॥ २ ॥ तांश्च कलाभिवृद्धौ क्रमेण वर्द्धये-द्धानौ ह्रसयेदमावास्यां नाश्नीयादेष चान्द्रायणो यवमध्यः ॥ ३ ॥ पिपीलिकामध्यो वा ॥ ४ ॥ यस्यामावास्यामध्ये भवति स पिपीलिकामध्यः ॥ ५ ॥ यस्य पौर्णमासी स यवमध्यः ॥ ६ ॥ अष्टौ ग्रासान् प्रतिदिवसं मासमश्नीयात् स यतिचान्द्रायणः॥७॥सायं प्रातश्चतुरश्चतुरः स शिशुचा-न्द्रायणः ॥ ८ ॥ यथाकथञ्चित् षष्ट्योनां त्रिशतीं मासेनाश्नीयात् स सामान्यचान्द्रायणः ॥ ९॥

बृहद्विष्णुस्मृति-५० अध्याय ।

वने पर्णकुटीं कृत्वा वसेत् ॥ १ ॥ त्रिषवणं स्नायात् ॥ २॥ स्वकर्म चाचक्षाणो ग्रामे भैक्ष्य-माचरेत् ॥३॥ तृणशायी च स्यात् ॥४॥ एतन्महाव्रतम् ॥५॥ ब्राह्मणं हत्वा द्वादशसंवत्सरं कुर्यात् ॥ ६ ॥ नृपतिवधे महाव्रतमेव द्विगुणं कुर्यात् ॥ ११ ॥ पादोनं क्षत्रियवधे ॥ १२ ॥ अर्द्धं वैश्य-वधे ॥ १३ ॥ तदर्द्धं शूद्रवधे ॥ १४ ॥ गजं हत्वा पञ्च नीलान् वृषभान् दद्यात् ॥ २५ ॥ तुरगं वासः ॥ २६ ॥ एकहायनमनड्वाहं खरवधे ॥ २७ ॥ मेषाजवधे च ॥ २८ ॥ सुवर्णकृष्णल-मुष्ट्रवधे ॥ २९ श्वानं हत्वा त्रिरात्रमुपवसेत् ॥ ३० ॥ हत्वा मूषकमार्जारनकुलमण्डूकडुण्डुभाज-गराणामन्यतममुपोषितः कृसरान्नं भोजयित्वा लोहदण्डं दक्षिणां दद्यात् ॥ ३१ ॥ गोधोलूक-काकझषवधे त्रिरात्रमुपवसेत् ॥ ३२ ॥ हसबककबलाक-मद्गु-वानरश्येन-भास-चक्रवाकाणामन्यत-मं हत्वा ब्राह्मणाय गां दद्यात् ॥ ३३ ॥ सर्पं हत्वा अभ्रीं कार्ष्णायसीम् ॥ ३४ ॥ षण्ढं हत्वा पलालभारकम् ॥ ३५ ॥ वराहं हत्वा घृतकुम्भम् ॥ ३६ ॥ तित्तिरिं तिलद्रोणम् ॥ ३७ ॥ शुकं द्विहायनं वत्सम् ॥ ३८ ॥ क्रौञ्चं त्रिहायणम् ॥ ३९ ॥ क्रव्यादमृगवधे पयस्विनीं गां दद्यात् ॥ ॥ ४० ॥ अक्रव्यादमृगवधे वत्सतरीम् ॥ ४१ ॥

अस्थन्वतान्तु सत्त्वानां सहस्रस्य प्रमापणे । पूर्णे चानस्यनस्थ्नान्तु शूद्रहत्याव्रतं चरेत् ॥ ४६ ॥
किंञ्चिदेव तु विप्राय दद्यादस्थिमतां वधे । अनस्थ्नाञ्चैव हिंसायां प्राणायामेन शुध्यति ॥ ४७ ॥
फलदानान्तु वृक्षाणां छेदने जप्यमृक्शतम् । गुल्मवल्लीलतानाञ्च पुष्पितानाञ्च वीरुधाम् ॥ ४८ ॥
अन्नाद्यजानां सत्त्वानां रसजानाञ्च सर्वशः । फलपुष्पोद्भवानाञ्च घृतप्राशो विशोधनम् ॥ ४९ ॥
कृष्टजानामोषधीनां जातानाञ्च स्वयं वने । वृथालम्भे तु गच्छेद्गां दिनमेकं पयोव्रतः ॥ ५० ॥

बृहद्विष्णुस्मृति—५१ अध्याय ।

मलानां मद्यानाञ्च अन्यतमस्य प्राशने चान्द्रायणं कुर्यात् ॥ २ ॥ लशुनपलाण्डुगृञ्जनैतद्ग-न्धिविड्वराहग्राम्यकुक्कुटवानरगोमांसभक्षणे च ॥ ३ ॥ अपः सुराभाण्डस्थाः पीत्वा सप्तरात्रं शंखपुष्पीशृतं पयः पिबेत् ॥ २३ ॥ खरोष्ट्रकाकमांसाशने चान्द्रायणं कुर्यात् ॥ २६ ॥ प्रा-ड्याज्ञातं सूनास्थं शुष्कमांसञ्च ॥ २७॥ क्रव्यादमृगपक्षिमांसाशने तप्तकृच्छ्रम् ॥ २८ ॥ छत्राक-कवकाशने सान्तपनम् ॥ ३४ ॥ आमश्राद्धाशने त्रिरात्रं पयसा वर्त्तेत ॥ ४९ ॥ ब्राह्मणः शूद्रोच्छिष्टाशने सप्तरात्रम् ॥ ५० ॥ वैश्योच्छिष्टाशने पञ्चरात्रम् ॥ ५१ ॥ राजन्योच्छिष्टा-शने त्रिरात्रम् ॥५२॥ब्राह्मणोच्छिष्टाशने त्वेकाहम् ॥५३॥ राजन्यः शूद्रोच्छिष्टाशी पञ्चरात्रम् ॥ ॥ ५४ ॥ वैश्योच्छिष्टाशी त्रिरात्रम् ॥५५॥ वैश्यः शूद्रोच्छिष्टाशी च ॥५६॥ चाण्डालान्नं भुक्त्वा त्रिरात्रमुपवसेत् ॥ ५७ ॥ सिद्धं भुक्त्वा पराकः ॥ ५८ ॥

मधुपर्के च यज्ञे च पितृदैवतकर्मणि । अत्रैव पशवो हिंस्या नान्यत्रेति कथञ्चन ॥ ६४ ॥
यज्ञार्थेषु पशून् हिंसन् वेदतत्त्वार्थविद् द्विजः । आत्मानञ्च पशूंश्चैव गमयत्युत्तमां गतिम् ॥ ६५ ॥
गृहे गुरावरण्येवा निवसन्नात्मवान् द्विजः । नावेदविहितां हिसामापद्यपि समाचरेत् ॥ ६६ ॥
या वेदविहिता हिंसा नियतास्मिंश्चराचरे । अहिंसामेव तां विद्याद्वेदाद्धर्मोहि निर्बभौ ॥ ६७ ॥
योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया । स जीवंश्च मृतश्चैव न क्वचित् सुखमेधते ६८ ॥
यो बन्धनवधक्लेशान् प्राणिनां न चिकीर्षति । स सर्वस्य हितप्रेप्सुः सुखमत्यन्तमश्नुते ॥ ६९ ॥
यद्ध्यायति यत्कुरुते रतिं बध्नाति यत्र च । तदवाप्नोति यत्नेन यो हिनस्ति न किञ्चन ॥ ७० ॥

न कृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् । न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ॥ समुत्पत्तिञ्च मांसस्य वधबन्धौ च देहिनाम् । प्रसमीक्ष्य निवर्तेत सर्वमांसस्य भक्षणात् ॥ ७२ ॥ न भक्षयति यो मांसं विधिं हित्वा पिशाचवत् । स लोके प्रियतां याति व्याधिभिश्च न पीड्यते॥ अनुमन्ता विशसिता निहन्ता क्रयविक्रयी । संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः ॥ ७४ ॥ स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति । अनभ्यर्च्य पितॄन् देवांस्ततोऽन्यो नास्त्यपुण्यकृत् ॥ ७५ ॥ मांसभक्षयितामुत्र यस्य मांसमिहाद्म्यहम् । एतन्मांसस्य मांसत्वं प्रवदंति मनीषिणः ॥ ७८ ॥

वृहद्विष्णुस्मृति–५२ अध्याय ।

सुवर्णस्तेयकृद्राज्ञे कर्माचक्षाणो मुसलमर्पयेत् ॥ १ ॥ वधात् त्यागाद्वा प्रयतो भवति ॥ २ ॥ महाव्रतं द्वादशाब्दानि कुर्यात् ॥ ३ ॥ धान्यधनापहारी च कृच्छ्रमब्दम् ॥ ५ ॥ मनुष्यस्त्रीकूपक्षेत्रवापीनामपहरणे चान्द्रायणम् । ६ ॥ द्रव्याणामल्पसाराणां सान्तपनम् ॥ ७ ॥ भक्ष्यभोज्यपानशय्यासनपुष्पमूलफलानां पञ्चगव्यपानम् ॥ ८ ॥ तृणकाष्ठद्रुमशुष्कान्नगुडवस्त्रचर्मामिषाणां त्रिरात्रमुपवसेत् ॥ ९ ॥ मणिमुक्ताप्रवालताम्ररजतायःकांस्यानां द्वादशाहं कणानश्नीयात् ॥१०॥ कार्पासकीटजोर्णाद्यपहरणे त्रिरात्रं पयसा वर्तेत ॥११॥ द्विशफैकशफहरणे त्रिरात्रमुपवसेत् ॥१२॥ पक्षिगन्धौषधिरज्जुवैदलानामपहरणे दिनमुपवसेत् ॥ १३ ॥

बृहद्विष्णुस्मृ–५३ अध्याय ।

गोव्रतं गोगमने च ॥ ३ ॥ चाण्डालीगमने तत्साम्यमवाप्नुयात् ॥ ५ ॥ अज्ञानतश्चान्द्रायणद्वयं कुर्यात् ॥ ६॥ पशुवेश्यागमने प्राजापत्यम् ॥ ७ ॥ यत्करोत्येकरात्रेण वृषलीसेवनाद्द्विजः । तद्भैक्षभुग् जपन् नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥ ९ ॥

बृहद्विष्णुस्मृति–५४ अध्याय ।

मृतपञ्चनखात् कूपादत्यन्तोपहताच्चोदकं पीत्वा ब्राह्मणस्त्रिरात्रमुपवसेत् ॥ २ ॥ द्व्यहं राजन्यः ॥ ३ ॥ एकाहं वैश्यः ॥ शूद्रो नक्तम् ॥ ५ ॥

बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः । शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत् ॥ ३२ ॥ अशीतिर्यस्य वर्षाणि बालोवाप्यूनषोडशः । प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च ॥ ३३ ॥

बृहद्विष्णुस्मृति–५७ अध्याय ।

द्रव्याणां वा विज्ञाय प्रतिग्रहविधिं यः प्रतिग्रहं कुर्यात् स दात्रा सह निमज्जति ॥ ८ ॥ प्रतिग्रहसमर्थश्च यः प्रतिग्रहं वर्जयेत् स दातृलोकमाप्नोति ॥ ९ ॥ एधोदकमूलफलाभयामिष–मधुशय्यासनगृहपुष्पदधिशाकांश्चाभ्युद्यतान् न निर्णुदेत् ॥ १० ॥

आहृत्याभ्युद्यतां भिक्षां पुरस्तादनुचोदिताम् । ग्राह्यां प्रजापतिर्मेने अपि दुष्कृतकर्मणः ॥ ११ ॥ नाश्नंति पितरस्तस्य दशवर्षाणि पञ्च च । न च हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते ॥ १२ ॥ गुरून् भृत्यानुज्जिहीर्षुरर्चिष्यन् पितृदेवताः । सर्वतः प्रतिगृह्णीयान्नतु तृप्येत् स्वयं ततः ॥ १३ ॥ आर्द्धिकः कुलमित्रश्च दासगोपालनापिताः । एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥ १६ ॥

बृहद्विष्णुस्मृति–५८ अध्याय ।

अथ गृहाश्रमिणस्त्रिविधोऽर्थो भवति ॥ १ ॥ शुक्लः शवलोऽसितश्च ॥ २ ॥

बृहद्विष्णुस्मृति–६३ अध्याय ।

नैकाऽध्वानं प्रपद्येत ॥ २ ॥ नाधार्मिकैः सार्द्धम् ॥ ३ ॥ न वृषलैः ॥ ४ ॥ न द्विषद्भिः ॥ ५ ॥ नातिप्रत्यूषसि ॥ ६ ॥ नातिसायम् ॥ ७ ॥ न सन्ध्ययोः ॥ ८ ॥ न मध्याह्ने ॥ ९ ॥ न सन्निहितपानीयम् ॥ १० ॥ नातितूर्णम् ॥ ११ ॥ न रात्रौ ॥ १२ ॥ न सन्ततं व्यालव्याधितार्त्तैर्वाहनैः ॥ १३ ॥ न हीनाङ्गैः ॥ १४ ॥ न दीनैः ॥ १५ ॥ न गोभिः ॥ १६ ॥ नादान्तैः ॥ १७ ॥ यवसोदके वाहनानामदत्त्वात्मनः क्षुत्तृष्णापनोदनेन कुर्यात् ॥ १८ ॥ न चतुष्पथमधितिष्ठेत् ॥ १९ ॥ न शून्यालयम् ॥ २१ ॥ न केशतुषकपालास्थिभस्माङ्गारान् ॥ २४ ॥ न कार्पासास्थि ॥ २५ ॥

बृहद्विष्णुस्मृति-६८अध्याय ।

न रात्रौ तिलसंयुक्तम् ॥ २९ ॥ न दधिसक्तून् ॥ ३० ॥
शून्यागारे वह्निगृहे देवागारे कथञ्चन । पिबेन्नाञ्जलिना तोयं नाति सौहित्यमाचरेत् ॥ ४७ ॥

बृहद्विष्णुस्मृति-७१ अध्याय ।

वयोऽनुरूपं वेषं कुर्यात् ॥ ५ ॥ श्रुतस्याभिजनस्य धनस्य देशस्य च ॥ ६ ॥ सति विभवे न जीर्णमलवद्वासाः स्यात् ॥ ९ ॥ सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः । श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥ ८२ ॥

बृहद्विष्णुस्मृति-७२ अध्याय ।

दमश्चेन्द्रियाणां प्रकीर्तितः ॥ २ ॥

बृहद्विष्णुस्मृति-७६ अध्याय ।

अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टका माघी प्रौष्ठपद्यूर्द्ध्वं कृष्णात्रयोदशी व्रीहियवपाकौ चेति ॥१॥
एतांस्तु श्राद्धकालान्वै ि त्यानाह प्रजापतिः । श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते ॥ २ ॥

बृहद्विष्णुस्मृति-७७ अध्याय ।

सन्ध्यारात्र्योर्नकर्त्तव्यं श्राद्धं खलु विचक्षणैः । तयोरपि च कर्त्तव्यं यदि स्याद्राहुदर्शनम् ॥ ८ ॥

बृहद्विष्णुस्मृति-७८ अध्याय ।

स्वर्गं कृत्तिकासु ॥८॥ अपत्यं रोहिणीषु ॥९॥ ब्रह्मवर्चस्यं सौम्ये ॥१०॥ कर्मसिद्धिं रौ ॥११॥ भुवं पुनर्वसौ ॥ १२ ॥ पुष्टिं पुष्ये ॥ १३ ॥ श्रियं सार्पे ॥ १४ ॥ सर्वान् कामान् पैत्र्ये ॥१५ ॥ सौभाग्यं भाग्ये ॥ १ ॥ धनमार्यमणे ॥ १७ ॥ ज्ञातिश्रैष्ठ्यं हस्ते ॥१८॥ रूपवतः सुतांस्त्वाष्ट्रे ॥ १९ ॥ वाणिज्यसिद्धिं स्वातौ ॥ २०॥ कनकं विशाखासु ॥ २१ ॥ मित्राणि मै ॥ २२ ॥ राज्यं शाक्रे ॥ २३ ॥ कृषिं मूले ॥ २४ ॥ समुद्रयानसिद्धिमाप्ये ॥ २५ ॥ सर्वान् कामान् वैश्वदेवे ॥ २६ ॥ श्रैष्ठ्यमभिजिति ॥ २७ ॥ सर्वान् कामान् श्रवणे ॥ २८ ॥ लवणं वासवे ॥ २९ ॥ आरोग्यं वारुणे ॥ ३० ॥ कुप्यद्रव्यमाजे ॥ ३१ ॥ गृहमाहिर्बुध्न्ये ॥ ३२ ॥ गाः पौष्णे ॥ ३३॥ तुरङ्गमश्विने ॥ ३४ ॥ जीवितं याम्ये ॥ ३५ ॥ गृहं सुरूपाः स्त्रियः प्रतिपदि ॥ ॥ ३६ ॥ कन्यां वरदां द्वितीयायाम् ॥ ३७ ॥ सर्वान् कामांस्तृतीयायाम् ॥ ३८ ॥ पशूंश्चतुर्थ्याम् ॥ ३९ ॥ श्रियं-(सुरूपान् सुतान्) पञ्चम्याम् ॥ ४० ॥ द्यूतविषयं षष्ठ्याम् ॥ ४१ ॥ कृषिं सप्तम्याम् ॥ ४२ ॥ वाणिज्यमष्टम्याम् ॥ ४३ ॥ पशून् नवम्याम् ॥ ४४ ॥ वाजिनो दशम्याम् ॥ ४५ ॥ ब्रह्मवर्चस्विनः पुत्रानेकादश्याम् ॥ ४६ ॥ आयुर्वसु राज्यजयान् (कनकरजतं) द्वादश्याम् ॥ ४७ ॥ सौभाग्यं त्रयोदश्याम् ॥ ४८ ॥ सर्वकामान् पंचदश्याम् ॥ ४९ ॥ शस्त्रहतानां श्राद्धकर्मणि चतर्दशी शस्ता ॥ ५० ॥
अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः । प्रावृट्कालेऽसिते पक्षे त्रयोदश्यां समाहितः ॥ ५२ ॥
मधूत्कटेन यः श्राद्धं पायसेन समाचरेत् । कार्त्तिकं सकलं मासं प्राक्छाये कुञ्जरस्य च ॥ ५३ ॥

बृहद्विष्णुस्मृति-९३ अध्याय ।

अब्राह्मणे दत्तं तत्सममेव पारलौकिकम् ॥ १ ॥ द्विगुणं ब्राह्मणब्रुवे ॥ २ ॥ सहस्रगुणं प्राधीते ॥ ३ ॥ अनन्तं वेदपारगे ॥ ४ ॥
न वार्यपि प्रयच्छेत बैडालव्रतिके द्विजे । न बकव्रतिके पा नावेदविदि धर्मवित् ॥ ७ ॥
धर्मध्वजी सदालुब्धश्छाद्मिको लोकदाम्भिकः । बैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धिकः ॥ ८॥
अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च बकव्रतपरो द्विजः ॥ ९ ॥
ये बकव्रतिनो लोके ये च मार्जारलिङ्गिनः । ते पतन्त्यन्धतामिस्रे तेन पापेन कर्मणा ॥ १० ॥

बृहद्विष्णुस्मृति-९६ अध्याय ।

अथ त्रिष्वाश्रमेषु पक्वकषायः प्राजापत्यामिष्टिं कृत्वा सर्वं वेदं दक्षिणां दत्त्वा प्रव्रज्याश्रमी स्यात् ॥ १ ॥ सप्तागारिकं भैक्ष्यमादद्यात् ॥ ३ ॥ मृन्मये दारुपात्रेऽलाबुपात्रे वा ॥ ७ ॥ तेषाञ्च

तस्याद्भिः शुद्धिः स्यात् ॥ ८ ॥ शून्यागारनिकेतनः स्यात् ॥ १० ॥ वृक्षमूलनिकेतनो वा॥११॥ न ग्रामे द्वितीयं रात्रिमावसेत् ॥ १२ ॥ कौपीनाच्छादनमात्रमेव वसनमादद्यात् ॥१३॥ दृष्टिपूतं न्यसेत् पादम् ॥ १४ ॥ वस्त्रपूतं जलमादद्यात् ॥ १५ ॥ सत्यपूतं वदेत् ॥ १६ ॥ मनःपूतं समाचरेत् ॥ १७ ॥

तस्यैकं तक्षतो बाहुं चन्दनेनैकमुक्षतः । नाकल्याणं न कल्याणं तयोरपि च चिन्तयेत् ॥ २३ ॥

(५) हारीतस्मृति-१ अध्याय ।

यज्ञसिद्ध्यर्थमनघान् ब्राह्मणान् मुखतोसृजत् । असृजत् क्षत्रियान् बाह्वोर्वैश्यानप्यूरुदेशतः ॥१२ ॥
शूद्रांश्च पादयोः सृष्ट्वा तेषां चैवानुपूर्वशः । यथा प्रोवाच भगवान् ब्रह्मयोनिः पितामहः ॥ १३ ॥
अध्यापनं चाध्ययनं याजनं यजनं तथा । दानं प्रतिग्रहश्चेति षट्कर्माणीति चोच्यते ॥ १८ ॥
श्रुतिस्मृती च विप्राणां चक्षुषी देवनिर्मिते । काणस्तत्रैकया हीनो द्वाभ्यामन्धः प्रकीर्तितः ॥ २५ ॥

हारीतस्मृति-३ अध्याय ।

ब्रह्मचर्यमधःशय्या तथा वह्नेरुपासना । उदकुम्भान्गुरोर्दद्याद् गोग्रासञ्चेन्धनानि च ॥ २ ॥
अजिनं दण्डकाष्ठं च मेखलाञ्चोपवीतकम् । धारयेदप्रमत्तश्च ब्रह्मचारी समाहितः ॥ ६ ॥
सायं प्रातश्चरेद्भैक्षं भोज्यार्थं संयतेन्द्रियः । आचम्य प्रयतो नित्यं न कुर्याद्दन्तधावनम् ॥ ७ ॥
तस्मिन्नेव नयेत्कालमाचार्ये यावदायुषम् । तदभावे च तत्पुत्रे तच्छिष्ये वाऽथवा कुले ॥ १४ ॥
न विवाहो न संन्यासो नैष्ठिकस्य विधीयते । इमं यो विधिमास्थाय त्यजेद्देहमतन्द्रितः ।
नेह भूयोऽपि जायेत ब्रह्मचारी दृढव्रतः ॥ १५ ॥
यो ब्रह्मचारी विधिना समाहितश्चरेत् पृथिव्यां गुरुसेवने रतः । संप्राप्य विद्यामतिदुर्लभां शिवां फलञ्च तस्याः सुलभं तु विन्दति ॥ १६ ॥

हारीतस्मृति-४ अध्याय ।

गोदोहमात्रमाकाङ्क्षेदतिथिं प्रति वै गृही । अदृष्टपूर्वमज्ञातमतिथिं प्राप्तमर्चयेत् ॥ ५६ ॥
स्वागतासनदानेन प्रत्युत्थानेन चाम्बुना । स्वागतेनाग्नयस्तुष्टा भवन्ति गृहमेधिनः ॥५७ ॥
आसनेन तु दत्तेन प्रीतो भवति देवराट् । पादशौचेन पितरः प्रीतिमायान्ति दुर्लभाम् ॥ ५८ ॥
अन्नदानेन युक्तेन तृप्यते हि प्रजापतिः । तस्मादतिथये कार्यं पूजनं गृहमेधिना ॥ ५९ ॥
विष्णुरेव यतिच्छाय इति निश्चित्य भावयेत् । सुवासिनीं कुमारीं च भोजयित्वा नरानपि ॥ ६४ ॥
बालवृद्धांस्ततः शेषं स्वयं भुञ्जीत वा गृही । प्राङ्मुखोदङ्मुखो वापि मौनी च मितभाषणः ॥६५॥
अन्नमादौ नमस्कृत्य प्रहृष्टेनांतरात्मना । एवं प्राणाहुतिं कुर्यान्मन्त्रेण च पृथक् पृथक् ॥ ६६ ॥
इतिहासपुराणाभ्यां किंचित्कालं नयेद्बुधः । ततः सन्ध्यामुपासीत बहिर्गत्वा विधानतः ॥ ६८ ॥
कृतहोमस्तु भुञ्जीत रात्रौ चातिथिभोजनम् । सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम् ॥ ६९ ॥
नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः । शिष्यानध्यापयेच्चापि अनध्याये विसर्जयेत् ॥ ७० ॥

हारीतस्मृति-५ अध्याय ।

गृहस्थः पुत्रपौत्रादीन्दृष्ट्वा पलितमात्मनः । भार्यां पुत्रेषु निःक्षिप्य सह वा प्रविशेद्वनम् ॥ २ ॥
नखरोमाणि च तथा सितगात्रत्वगादि च । धारयन् जुहुयादग्निं वनस्थो विधिमाश्रितः ॥ ३ ॥
धान्यैश्च वनसंभूतैर्नीवाराद्यैरनिन्दितैः । शाकमूलफलैर्वापि कुर्यान्नित्यं प्रयत्नतः ॥ ४ ॥
त्रिकालस्नानयुक्तस्तु कुर्यात्तीव्रं तपस्तदा । पक्षान्ते वा समश्नीयान्मासान्ते वा स्वपक्वभुक् ॥ ५ ॥
तथा चतुर्थकाले तु भुञ्जीयादष्टमेऽथवा । षष्ठे च कालेऽप्यथवा वायुभक्षोऽथवा भवेत् ॥ ६ ॥
घर्मे पञ्चाग्निमध्यस्थस्तथा वर्षे निराश्रयः । हेमन्ते च जले स्थित्वा नयेत्कालं तपश्चरन् ॥ ७ ॥
एवं च कुर्वता येन कृतबुद्धिर्यथाक्रमम् । अग्निं स्वात्मनि कृत्वा तु प्रव्रजेदुत्तरां दिशम् ॥ ८ ॥
आदेहपातं वनगो मौनमास्थाय तापसः । स्मरन्नतीन्द्रियं ब्रह्म ब्रह्मलोके महीयते ॥ ९ ॥
तपो हि यः सेवति वन्यवासः समाधियुक्तः प्रयतान्तरात्मा । विमुक्तपापो विमलः प्रशान्तः स याति दिव्यं पुरुषं पुराणम् ॥ १० ॥

हारीतस्मृति–६ अध्याय ।

एवं वनाश्रमे तिष्ठन्यातयंश्चैव किल्बिषम् । चतुर्थ आश्रमे गच्छेत्संन्यासविधिना द्विजः ॥ २ ॥
दत्त्वा पितृभ्यो देवेभ्यो मानुषेभ्यश्च यत्नतः । दत्त्वा श्राद्धं पितृभ्यश्च मानुषेभ्यस्तथात्मनः ॥ ३ ॥
इष्टिं वैश्वानरीं कृत्वा प्राङ्मुखोदङ्मुखोऽपि वा । अग्निं स्वात्मनि संरोप्य मन्त्रवित्प्रव्रजेत्पुनः ॥४॥
ततः प्रभृति पुत्रादौ स्नेहालापादि वर्जयेत् । बंधूनामभयं दद्यात्सर्वभूताभयं तथा ॥ ५ ॥
त्रिदण्डं वैणवं सम्यक् सन्ततं समपर्वकम् । वेष्टि ं कृष्णगोवालरज्जुभिश्चतुरङ्गुलम् ॥ ६ ॥
सायंकाले तु विप्राणां गृहाण्यभ्यवपद्य तु । सम्यक् याचेच्च कवलं दक्षिणेन करेण वै ॥ १२ ॥
पात्रं वामकरे स्थाप्य दक्षिणेन तु शोधयेत् । यावतान्नेन तृप्तिः स्यात्तावद्भैक्षं समाचरेत् ॥ १३ ॥
ततो निवृत्य तत्पात्रं संस्थाप्यान्यत्र संयमी । चतुर्भिरंगुलैश्छाद्य ग्रासमात्रं समाहितः ॥ १४ ॥
सर्वव्यञ्जनसंयुक्तं पृथक् पात्रे नियोजयेत् । सूर्यादिभूतदेवेभ्यो दत्त्वा संप्रोक्ष्य वारिणा ॥ १५ ॥
भुञ्जीत पात्रपुटके पात्रे वा वाग्यतो यतिः । वटकाश्वत्थपर्णेषु कुम्भीतैन्दुकपात्रके ॥ १६ ॥
कोविदारकदम्बेषु न भुञ्जीयात्कदाचन । मलाक्ताः सर्व उच्यन्ते यतयः कांस्यभोजिनः ॥ १७ ॥
कांस्यभाण्डेषु यत्पापो गृहस्थस्य तथैव च । कांस्ये भोजयतः सर्वं किल्विषं प्राप्नुयात्तयोः ॥१८ ॥
भुक्त्वा पात्रे यतिर्नित्यं क्षालयेन्मंत्रपूर्वकम् । न दुष्यते च तत्पात्रं यज्ञेषु चमसा इव ॥ १९ ॥
यदि धर्मरतिः शान्तः सर्व तसमो वशी । प्राप्नोति परमं स्थानं यत्प्राप्य न निवर्तते ॥ २६ ॥

(५ क) लघुहारीतस्मृति ।

नियमस्था व्रतस्था स्त्री रजः पश्येत्कथंचन । त्रिरात्रं तु क्षि ेदूर्ध्वं व्रतशेषं समाचरेत् ॥ ६ ॥
चण्डालस्य तु पानीयं ब्राह्मणश्च यदा पिबेत् । षड्रात्रमुपवासेन पञ्चगव्येन शुध्यति ॥ १६ ॥
रजस्वला त संस्पृष्टा ग्रामसूकरकुक्कुटैः । स्नानं कृत्वा क्षिपेत्तावद्यावच्चन्द्रस्य दर्शनम् ॥ १७ ॥
औषधं स्नेहमाहारं ददद्गोब्राह्मणेषु च । दीयमाने विपत्तिः स्यात्पुण्यमेव न पातकम् ॥ २८ ॥
अशीतिर्यस्य वर्षाणि वालोवाऽप्यूनषोडशः । प्रायश्चित्तार्धमर्हन्ति स्त्रियो रोगिण एव च ॥ ३३ ॥
असमर्थस्य वालस्य माता वा यदि वा पिता । तमुद्दिश्य चरेत्कृच्छ्रं व्रत तस्य न लुप्यते ॥ ३४ ॥
गर्भस्थः पञ्चवर्षः स्यात्कामचारस्तु स स्मृतः । न भावयति तत्तस्मात्प्रायश्चित्तं न विद्यते ॥ ३५ ॥
अकृत्वा पादशौचं तु तिष्ठन्मुक्तशिखोऽपि वा । विना यज्ञोपवीतेन आचान्तः पुनराचमेत् ॥ ३६ ॥
अन्ने भोजनसंपन्ने मक्षिकाकेशदूषिते । तदुद्धृत्य स्पृशेच्चापस्तच्चान्नं भस्मना स्पृशेत् ॥ ३७ ॥
ताम्बूले कटुकषाये भुक्तस्नेहानुलेपने । मधुपर्के च सोमे च नोच्छिष्टं मनुरब्रवीत् ॥ ३९ ॥
मूले तु द्विगुणीभूते रिक्ते सिद्धे तथोदिते । मूलतस्त भवेद्वृद्धिश्चतुर्भागेण नान्यथा ॥ ४६ ॥
स्वादुको वित्तहीनः स्याल्लग्नको वित्तवान्यदि । मूलं तस्य भवेद्देयं न वृद्धिं दातुमर्हति ॥ ४७ ॥
कालं देशं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम् । उपपत्तिमवस्थां च ज्ञात्वा शौचं समाचरेत् ॥ ५५ ॥
पुत्रिका तु हरेद्वित्तमपुत्रा सर्वमर्हति । पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ॥ ६४ ॥
तत्सुतो गोत्रजो बन्धुः शिष्यः स ह्मचारिणः ॥ ६५ ॥
भार्याऽव्यभिचारिणी यावद्यावच्च नियमे स्थिता । तावत्तस्या भवेद्द्रव्यमन्यथाऽस्या विलुप्यते ॥६६ ॥
विधवा यौवनस्था वा नारी भवति कर्कशा । आयुषः क्षपणार्थं तु दातव्यं जीवनं सदा ॥ ६७ ॥
शावाशौचे समुत्पन्ने सूत्याशौचं ततः पुनः । शवेन शुध्यते सूतिर्न सूतिः शावशोधिनी ॥ ८० ॥
क्षत्रविट्शूद्रदायादा ये तु विप्रस्य बान्धवाः । तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते ॥ ८२ ॥
राजन्यवैश्यौ च तथा हीनयोनिषु बन्धुषु । स्वमाशौचं प्रकुर्यातां विशुद्ध्यर्थं न संशयः ॥ ८३ ॥
दशाहाच्छ्ध्यते विप्रो जन्महानौ स्वयोनिषु । षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनयः ॥ ८४ ॥
सर्वेषामेव वर्णानां त्रिभागात्स्पर्शनं भवेत् । यथोक्तेनात्र शुद्धिः स्यात्सूतके मृतके तथा ॥ ८५ ॥
त्रिचतुष्पञ्चदशभिः स्पृश्या वर्णाः क्रमेण तु । भोज्यान्नो दशभिर्विप्रः शेषा शुद्धिर्यथोत्तरैः ॥८६॥
आचार्यं स्वमुपाध्यायं पितर मातरं गुरुम् । नि ्त्य तु व्रती प्रेतान्न व्रतेन वियुज्यते ॥ ९२ ॥
मातापित्रोस्तु यत्प्रोक्तं ब्रह्मचारी तु पुत्रकः । व्रतस्थोऽपि हि कुर्वीत पिण्डदानोदकक्रियाः ॥ ९३॥

भवेदशौचं नैतस्य न चाग्निस्तस्य लुप्यते । स्वाध्यायं च प्रकुर्वीत विधिवत्पूर्वचोदितम् ॥ ९४ ॥
ब्राह्मणाः कम्बला गावः सूर्योऽग्निरतिथिर्गुरुः । तिला दर्भाश्च कालश्च दशैते कुतपाः स्मृताः ॥९८॥
दिवसस्याष्टमे भागे मन्दीभवति भास्करे । स कालः कुतपो नाम पितॄणां दत्तमक्षयम् ॥ ९९ ॥
रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा । सन्ध्ययारुभयोश्चैव सूर्ये चैवाचिरोदिते ॥१०२॥
सर्वस्वेनापि कर्तव्यमक्षय्यं राहुदर्शने । दानं यज्ञस्तपः श्राद्धं प्राहुर्धर्मविदो जनाः ॥ १०३ ॥
चतुर्थे पञ्चमे चैव नवमैकादशेऽहनि । यदन्नं दीयते जन्तोर्नवश्राद्धं तदुच्यते ॥ १०८ ॥
सप्तमात्परतो यस्तु नवमात्पूर्वतः स्थितः । उभयोरपि मध्यस्थः कुतपः प्रोच्यते बुधैः ॥ १०९ ॥
पूर्वमर्धाङ्गुलच्छाया मुहूर्तं रौहिणं स्मृतम् । तस्मात्स प्रयत्नेन रौहिणं तु न लङ्घयेत् ॥ १११ ॥

(६) उशनास्मृति ।

एकोद्दिष्टं च कर्तव्यं यतीनां चैव सर्वदा । अहन्येकादशे प्राप्ते पार्वणं तु विधीयते (१) ।
सपिण्डीकरणं तेषां न कर्तव्यं सुतादिभिः । त्रिदण्डग्रहणादेव प्रतत्वं नैव जायते (२) ।
अदण्ड्या हस्तिनो ह्यश्वाः प्रजापाला हि ते स्मृताः।अदण्ड्याः काणकुब्जाश्चये शश्वत्कृतलक्षणाः(३)।

(६ क) उशनस्मृति–१अध्याय ।

उपवीतं वामबाहुसव्यबाहुसमन्वितम् । उपवीती भवेन्नित्यं निवीतं कण्ठलम्बनम् ॥ ९ ॥
सव्यबाहुं समुद्धृत्य दक्षिणेन धृतं द्विजाः । प्राचीनावीतमित्युक्तं पित्र्ये कर्मणि धारयेत् ॥ १० ॥
अग्न्यगारे गवां गोष्ठे होमे जप्ये तथैव च । स्वाध्यायभोजने नित्यं ब्राह्मणानां च सन्निधौ ॥ ११ ॥
उपासने गुरूणां च सन्ध्ययोरुभयोरपि । उपवीती भवेन्नित्य विधिरेष सनातनः ॥ १२ ॥
आयुष्मान् भव सौम्येति वाच्यो विप्रोभिवादने । अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरस्ततः१९॥
यो न वेत्त्यभिवादस्य द्विजः प्रत्यभिवादनम् । नाभिवाद्यः स विदु । यथा शूद्रस्तथैव सः ॥ २० ॥
ब्राह्मणं कुशलं पृच्छेत् क्षत्रियं चाप्यनामयम् । वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥ २४ ॥
यावत्पिता च माता च द्वावेतौ निर्विकारणम् । तावत् सर्वं परित्यज्य पुत्रः स्यात्तत्परायणः ॥३३॥
पिता माता च सुप्रीतौ स्यातां पुत्रगुणैर्यदि । स पुत्रः सकल कर्म प्राप्नुयात्तेन कर्मणा ॥ ३४ ॥
नास्ति मातृसमं दैवं नास्ति पितृसमो गुरुः । तयोः प्रत्युपकारोऽपि न हि कश्चन विद्यते ॥ ३५ ॥
तयोर्नित्यं प्रियं कुर्यात्कर्मणा मनसा गिरा । न ताभ्यामननुज्ञातो धर्ममेकं समाचरेत् ॥ ३६ ॥
मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजान् गुरून् । असावहमिति ब्रूयात् प्रत्युत्थाय यवीयसः ॥४२ ॥
अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् । भोःशब्दपूर्वकं चैनमभिभाषेत धर्मवित् ॥ ४३ ॥
गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः । पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ॥ ४७ ॥
विद्या कर्म वयो बन्धुर्वित्तं भवति यस्य वै । मान्यस्थानानि पञ्चाहुः पूर्वंपूर्वं गुरूणि च ॥ ४८ ॥
पञ्चानां त्रिषु-वर्णेषु भवेत्तु गुणवान् हि यः । यत्र स्यात्सोऽत्र मानार्हः शूद्रोऽपि स भवेद्यदि ॥४९॥
सजातीयगृहेष्वेवं सार्ववर्णिकमेव वा । भैक्षस्याचरणं प्रोक्तं पतितादिषु वर्जितम् ॥ ५४ ॥
वेदयज्ञादिहीनानां प्रशस्तानां स्वकर्मसु । ब्रह्मचारी चरेद्भैक्षं गृहस्थः प्रयतोऽन्वहम् ॥ ५५ ॥
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु । अभावेऽप्यथ गेहानां पूर्वंपूर्वं विवर्जयेत् ॥ ५६ ॥
सर्वं वापि चरेद् ग्रामं पूर्वोक्तानामसम्भवे । नियम्य प्रयतो वाचं दिशश्चानवलोकयन् ॥ ५७ ॥
भैक्षेण वर्त्तयेन्नित्यं कामनाशीर्भवेद्व्रती । भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ॥ ५९ ॥

उशनस्मृति–२अध्याय ।

शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपिवा । अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत् ॥
हृद्गाभिः पूयते विप्रः कण्ठाभिः क्षत्रियः शुचिः । प्राशिताभिस्तथा वैश्यः स्त्रीशूद्रः स्पर्शनन्ततः ॥
अन्तवद्दन्तसंलिप्तजिह्वास्पर्शोऽशुचिर्भवेत् । स्पृशन्ति बिन्दवः पादौ य आचामयतः परम् ॥ २८ ॥
भूमिगैस्ते समा ज्ञेयाः न तैरप्रयतो भवेत् । मधुपर्के च सोमे च ताम्बूलस्य च भक्षणे ॥ २९ ॥
फलमूलेक्षुदण्डे च न दोष उशना ब्रवीत् । प्रचरंश्चान्नपानेषु यदुच्छिष्टो भवेद्द्विजः ॥ ३० ॥
छायाकूपनदीगोष्ठे चैत्यांभःपथि भस्मसु । अग्नौ चैव श्मशाने च विण्मूत्रे न समाचरेत् ॥ ३६ ॥

न गोमये न कुड्ये वा न गोष्ठे नैव शाद्वले । न तिष्ठन्वा न निर्वासा न च पर्वतमस्तके ॥ ३७ ॥
न जीर्णदेवायतने न वल्मीके कदाचन । न ससत्वेषु गर्त्तेषु न च गच्छन् समाचरेत् ॥ ३८ ॥
तुषाङ्गारकपालेषु राजमार्गे तथैव च । न क्षेत्रे न विले चापि न तीर्थे च चतुष्पथे ॥ ३९ ॥
नोद्यानोपसमीपे वा नोषरे न पराशुचौ । न सोपानत्कपादश्च च्छत्री वर्णान्तरीक्षके ॥ ४० ॥
न चैवाभिमुखे स्त्रीणां गुरुब्राह्मणयोर्गवाम् । न देवदेवालययोर्नापामपि कदाचन ॥ ४१ ॥
नदीज्योतींषि वीक्षित्वा तद्वाह्याभिमुखेऽपि वा । प्रत्यादित्यं प्रत्यनिलं प्रतिसोमं तथैव च ॥ ४२ ॥
नाहरेन्मृत्तिकां विप्रः पांशुलां न च कर्दमात् । न मार्गान्नोषरादेशाच्छौचशिष्टां परस्य च ॥ ४४ ॥
न देवायतनात्कुडयाद्ग्रामान्न तु कदाचन । उपस्पृशेत्ततो नित्यं पूर्वोक्तेन विधानतः ॥ ४५ ॥

उशनस्मृति–३ अध्याय ।

गन्धमाल्ये रसं कन्यां सूक्ष्मप्राणिविहिंसनम् । अभ्यङ्गं चाञ्जनोपानच्छत्रधारणमेव च ॥ १६ ॥
कामं क्रोधं भयं निद्रां गीतवादित्रनर्त्तनम् । द्यूतं जनपरीवादं स्त्रीप्रेक्षालापनं तथा ॥ १७ ॥
परोपतापपैशुन्यं प्रयत्नेन विवर्जयेत् । उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान् ॥ १८ ॥
हरते दुष्कृतं तस्य शिष्यस्य वत्सरे गुरुः । आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः ॥ ३५ ॥
आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्मतः ॥ ३६ ॥
श्रावणस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः ॥ ५४ ॥
आषाढ्यां प्रौष्ठपद्यां वा वेदोपक्रमणं स्मृतम् । उत्सृज्य ग्रामनगरं मासान्विप्रोऽर्द्धपञ्चमान्॥५५॥
अधीयीत शुचौ देशे ब्रह्मचारी समाहितः । पुष्ये तु च्छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजाः ॥ ५६ ॥
माघे वा मासि सम्प्राप्ते पूर्वाह्णे प्रथमेऽहनि । छन्दांस्यूर्द्ध्वमधीयीत शुक्लपक्षे तु वै द्विजाः ॥ ५७ ॥
वेदाङ्गानि पुराणं वा कृष्णपक्षे तु मानवः । इमान्नित्यमनध्यायानधीयानो विसर्जयेत् ॥ ५८ ॥
अध्यापनं च कुर्वाणः अध्येष्यन्नपि यत्नतः । कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने ॥ ५९ ॥
विद्युत्स्तनितवर्षासु महोल्कानां च पातने । आकालिकमनध्यायमेतेष्वेव प्रजापतिः ॥ ६० ॥
एतांस्त्वभ्युदितान्विद्याद्यदा प्रादुष्कृताग्निषु । तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ॥ ६१ ॥
निर्घाते वातचलने ज्योतिषां चोपसर्पणे । एतानाकालिकान्विद्यादनध्यायानृतावपि ॥ ६२ ॥
प्रादुष्कृतेष्वग्निषु च विद्युत्स्तनितनिस्वने । सद्यो हि स्यादनध्यायमनृतौ मुनिरब्रवीत् ॥ ६३ ॥
नित्यानध्याय एव स्याद् ग्रामेषु नगरेषु च । कर्मनैपुण्यकामानां पूतिगन्धे च नित्यशः ॥ ६४ ॥
अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ । अनध्यायो रुद्यमाने समवाये जनस्य च ॥ ६५ ॥
उदये मध्यरात्रौ च विण्मूत्रे च विसर्जयेत् । उच्छिष्टश्राद्धभुक् चैव मनसा न विचिन्तयेत् ॥ ६६ ॥
प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् । त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥ ६७ ॥
यावदेकानुदिष्टस्य लेपो गन्धश्च तिष्ठति । विप्रस्य विदुषो देहे तावद् ब्रह्म न कीर्तयेत् ॥ ६८ ॥
शयानः प्रौढपादश्च कृत्वा वैवावसक्थिकाम् । नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ॥ ६९ ॥
नीहारैर्बाणशब्दैश्च सन्ध्ययोरुभयोरपि । अमावस्यां चतुर्दश्यां पौर्णमास्यष्टमीषु च ॥ ७० ॥
उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम् । अष्टकासु च कुर्वीत ऋत्वन्तासु च रात्रिषु ॥ ७१ ॥
मार्गशीर्षे तथा पौषे माघे मासि तथैव च । तिस्रोऽष्टकाः समाख्याताः कृष्णे पक्षे च सूरिभिः॥७२॥
श्लेष्मातकस्य च्छायायां शाल्मलेर्मधुकस्य च । कदाचिदपि नाध्येयं कोविदारकपित्थयोः ॥ ७३॥
समानविद्योऽनुस्मृते तथा सब्रह्मचारिणि । आचार्ये संस्थिते वापि त्रिरात्रं क्षपणं स्मृतम् ॥ ७४ ॥
छिद्रेष्वेतेषु विप्राणामनध्यायाः प्रकीर्त्तिताः । हिंसन्ति राक्षसास्ते च तस्मादेतान् विवर्जयेत् ॥७५॥
नैत्यकेनास्त्यनध्यायः सन्ध्योपासन एव च । उपाकर्मणि कर्मान्ते होममन्त्रेषु चैव हि ॥ ७६ ॥
एकर्चमथवैकं वा यजुः सामाथवा पुनः । अष्टकायां स्वधीयीत मारुते चापि वापदि ॥ ७७ ॥
अनध्यायो न चाङ्गेषु नेतिहासपुराणयोः । न धर्मशास्त्रेष्वन्येषु पर्वण्येतानि वर्जयेत् ॥ ७८ ॥
त्रयोदशी मघा कृष्णा वर्षासु च विशेषतः । नैमित्तिकन्तु कर्तव्यं दिवसे चन्द्रसूर्ययोः ॥ ११० ॥
गयायामक्षय श्राद्धं प्रयागे मरणादिषु । गायन्ति गाथां ते सर्वे कीर्त्तयन्ति मनीषिणः ॥ १३० ॥
एष्टव्या बहवः पुत्राः शीलवन्तो गुणान्विताः । तेषान्तु समवेतानां यद्येकोऽपि गयां व्रजेत् ॥ १३१ ॥

गयां प्राप्यानुषङ्गेण यदि श्राद्धं समाचरेत् । तारिताः पितरस्तेन स याति परमां गतिम् ॥ १३२॥
पिप्पलीं क्रमुकं चैव तथा चैव मसूरकम् । कश्मलालाबुवार्त्ताकान् मन्त्रणं सारसं तथा ॥ १४३॥
कूटं च भद्रमूलं च तण्डुलीयकमेव च । राजमाषांस्तथा क्षीरं माहिषं च विवर्जयेत् ॥ १४४ ॥
कोद्रवान् कोविदारांश्च स्थलपाक्यामरीस्तथा । वर्जयेत्सर्वयत्नेन श्राद्धकाले द्विजोत्तमः ॥ १४५ ॥

उशनस्मृति–४अध्याय ।

ये सोमपाननिरता धर्मज्ञाः सत्यवादिनः । व्रतिनो नियमस्थाश्च ऋतुकालाभिगामिनः ॥ ३ ॥
पञ्चाग्निरप्यधीयानो यजुर्वेदविदोऽपि च । बह्वस्तु सुपर्णाश्च त्रिमधुर्वाथवा भवेत् ॥ ४ ॥
त्रिर्णाचिकेतच्छन्दो वै ज्येष्ठसामगणोऽपि वा । अथर्वशिरसोऽध्येत रुद्राध्यायी विशेषतः ॥ ५ ॥
अग्निहोत्रपरो विद्वान् पापविच्च षडङ्गवित् । गुरुदेवाग्निपूजासु प्रसक्तो ज्ञानतत्परः ॥ ६ ॥
अहिंसोपरता नित्यमप्रतिग्राहिणस्तथा । सत्रिणो दाननिरता ब्राह्मणाः पङ्क्तिपावनाः ॥ ७ ॥

उशनस्मृति–५ अध्याय ।

हीनाङ्गः पतितः कुष्ठी वणिक् पुक्कसनासिकः ॥ ३१ ॥
कुक्कुटः सूकरः श्वानो वर्ज्याः श्राद्धेषु दूरतः । बीभत्समशुचिं म्लेच्छं न स्पृशेच्च रजस्वलाम्॥३२॥
नीलकाषायवसनं पाखण्डांश्च विवर्जयेत् ॥ ३३ ॥
न दद्यात्तत्र हस्तेन प्रत्यक्षलवणं तथा । न चायसेन पात्रेण न चैवाश्रद्धया पुनः ॥ ५८ ॥
पात्रे तु मृन्मये यो वै श्राद्धे भोजयते पितॄन् । स याति नरकं घोरं भोक्ता चैव पुरोधसः ॥ ६० ॥

उशनस्मृति–६अध्याय ।

आदन्तजन्मनः सद्य आचौलादेकरात्रकम् । त्रिरात्रमौपनयनाद्दशरात्रमुदाहृतम् ॥ १३ ॥
यथेष्टाचरणाज् जातो त्रिरात्रादिति निर्णयः । सूतके यदि सूतिश्च मरणे वा गतिर्भवेत् ॥ १९ ॥
शेषेणैव भवेच्छुद्धिरहःशेषे द्विरात्रकम् । मरणोत्पत्तियोगे तु मरणेन समाप्यते ॥ २० ॥
देशान्तरगतः श्रुत्वा सूतकं शावमेव वा ॥ २१ ॥
तावदप्रयतोऽस्यैव यावच्छेषः समाप्यते । अतीते सूतके प्रोक्तं सपिण्डानां त्रिरात्रकम् ॥ २२ ॥
तथैव मरणे स्नानमूर्द्ध्वं संवत्सराद्व्रती ॥ २३ ॥
त्रिरात्रं स्यात्तथाचार्ये भार्यासु प्रत्यगासु च । आचार्यपुत्रपत्न्याश्च अहोरात्रमुदाहृतम्॥ ३१ ॥
शुध्येद्द्विजो दशाहेन द्वादशाहेन भूपतिः । वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥ ३४ ॥
क्षत्रविट्शूद्रदायादा ये स्युर्विप्रस्य सेवकाः । तेषामशेषं विप्रस्य दशाहाच्छुद्धिरिष्यते ॥ ३५ ॥
राजन्यवैश्यावप्येवं हीनवर्णासु योनिषु । षड्रात्रं वा त्रिरात्रं वाप्येकरात्रक्रमेण हि ॥ ३६ ॥
वैश्यक्षत्रियविप्राणां शूद्रेष्वाशौचमेव तु । अर्द्धमासेऽथ षड्रात्रं त्रिरात्रं द्विजपुङ्गवाः ॥ ३७ ॥
शूद्रक्षत्रियविप्राणां वैश्येष्वाशौचमिष्यते । षड्रात्रं द्वादशाहश्च विप्राणां वैश्यशूद्रयोः ॥ ३८ ॥
अशौचं क्षत्रिये प्रोक्तं क्रमेण द्विजपुङ्गवाः ।
शूद्रविट्क्षत्रियाणान्तु ब्राह्मणे संस्थिते यदि । एकरात्रेण शुद्धिः स्यादित्याह कमलोद्भवः ॥ ३९ ॥
दाहादशौचं कर्त्तव्यं द्विजानामग्निहोत्रिणाम् । सपिण्डानान्तु मरणे मरणादितरेषु च ॥ ५१ ॥
सपिण्डता च पुरुषे सप्तमे विनिवर्त्तते । समानोदकभावस्तु जन्मनाम्नोरवेदने ॥ ५२ ॥
पिता पितामहश्चैव तथैव प्रपितामहः । लेपभाजस्तु यश्चात्मा सापिण्ड्यं साप्तपौरुषम् ॥ ५३ ॥
ऊर्द्ध्वानां चैव सापिण्ड्यमाह देवः प्रजापतिः । ये चैकजाता बहवो भिन्नयोनय एव च ॥ ५४ ॥
भिन्नवर्णास्तु सापिड्यं भवेत्तेषां त्रिपूरुषम् । कारवः शिल्पिनो वैद्यदासीदासास्तथैव च ॥ ५५ ॥
राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्त्तिताः । दातारो नियमी चैव ब्रह्मविद्ब्रह्मचारिणौ ॥५६॥
सत्रिणो व्रतिनस्तावत्सद्यः शौचमुदाहृतम् । राजा चैवाभिषिक्तश्च प्राणसत्रिण एव च ॥ ५७ ॥
यज्ञे विवाहकाले च देवयागे तथैव च । सद्यः शौचं समाख्यातं दुर्भिक्षे वाप्युपद्रवे ॥ ५८ ॥
विषाद्युपहतानां च विद्युता पार्थिवैर्द्विजैः । सद्यः शौचं समाख्यातं सर्पादिमरणेऽपि च ॥ ५९ ॥
अग्निमेरुप्रपतने विषौघान्नपराशने । गोब्राह्मणान्ते संन्यस्ते सद्यः शौचं विधीयते ॥ ६० ॥

उशनस्मृति-७ अध्याय ।

पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः । न चाश्रुपातपिण्डे च कार्यं श्राद्धादिकं क्वचित् ॥
व्यापादयेत्तथात्मानं स्वयं योऽग्निविषादिभिः । दहितं तस्य नाशौचं न च स्यादुदकादिकम् ॥ २ ॥
अथ कश्चित्प्रमादेन म्रियतेऽग्निविषादिभिः । तस्याशौचं विधातव्यं कार्यं चैवोदकादिकम् ॥ ३ ॥
सर्वैरास्थिसञ्चयनं ज्ञातिरेव भवेत्तथा । त्रिपूर्वं भोजयेद्विप्रानयुग्मान् श्रद्धया शुचीन् ॥ ११ ॥
पञ्चमे नवमे चैव तथैवैकादशेऽहनि । अयुग्मान्भोजयेद्विप्रान्नवश्राद्धन्तु तद्विदुः ॥ १२ ॥
मातापित्रोः सुतैः कार्यं पिण्डदानादि किञ्चन । पत्नी कुर्यात्सुताभावे पत्न्यभावे तु सोदरः ॥२१॥

उशनस्मृति-८ अध्याय ।

ब्रह्महा मद्यपः स्तेनो गुरुतल्पग एव च । महापापकिनस्त्वेते यः स तैः सह सवसेत् ॥ १ ॥
ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत् । भैक्षं चात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम् ॥ ५ ॥
ब्राह्मणावसथान् सर्वान् देवागाराणि वर्जयेत् । विनिन्द्य च स्वमात्मानं ब्राह्मणं च स्वयं स्मरेत्६॥
असङ्कराणि योग्यानि सप्तागाराणि संविशेत् । विधूमे शनकैर्नित्यं व्याहारे मुक्तवर्जिते ॥ ७ ॥
कुर्यादनशनं वाथ भृगोः पतनमेव च । ज्वलन्तं वा विशेदग्निं जलं वा प्रविशेत्स्वयम् ॥ ८ ॥
ब्राह्मणार्थे गवार्थे वा सम्यक् प्राणान् परित्यजेत् । दीर्घमामयिनं विप्रं कृत्वानामयिनं तथा ॥९॥
दत्त्वा चान्नं स विदुषे ब्रह्महत्यां व्यपोहति । अश्वमेधावभृथके स्नात्वा यः शुध्यति द्विजः ॥ १० ॥
सर्वस्वं वा वेदविदे ब्राह्मणाय प्रदापयेत् । ब्रह्महा मुच्यते पापैर्दृष्ट्वा वा सेतुदर्शनम् ॥ ११ ॥
सुरापस्तु सुरां तप्तामग्निवर्णां पिबेत्तदा । निर्दग्धकायः स तदा मुच्यते च द्विजोत्तमः ॥ १२ ॥
गोमूत्रमग्निवर्णं वा गोशकृद्द्रवमेव वा । पयो घृतं जलं वाथ मुच्यते पातकात्ततः ॥ १३ ॥
स्वर्णस्तेयी सकृद्विप्रो राजानमधिगम्य तु । स्वकर्म ख्यापयन्ब्रूयान्मां भवाननुशास्त्विति ॥ १५ ॥
गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम् । स वै पापात्ततः स्तेनो ब्राह्मणस्तपसाथवा ॥ १६ ॥
करेणादाय मुसलं लगुडं वाथ घातिनम् । संचित्योभयतस्तीक्ष्णमायसं दण्डमेव च ॥ १७ ॥
राजानस्तेन मर्दीत मुक्तकेशेन धावता । आचक्षाणश्च तत्पापमेवं कर्माणि शाधि माम् ॥ १८ ॥
शासनाद्वापि मोक्षाद्वा ततः स्तेयाद्विमुच्यते । अशासित्वा च तं राजा स्तेयस्याप्नोति किल्बिषम् १९
तपसा द्वतमन्यस्य सुवर्णस्तेयजं फलम् । चीरवासा द्विजोऽरण्ये संचरेद्ब्रह्मणो व्रतम् ॥ २० ॥
स्नात्वाश्वमेधावभृते पूतः स्यादथवा द्विजः । प्रदद्याच्चाथ विप्रेभ्यः स्वात्मतुल्यं हिरण्यकम् ॥ २१ ॥
गुरुभार्यां समारुह्य ब्राह्मणः काममोहितः । उपगूहेत् स्त्रियं तप्तां काम्यां कालायसीकृताम् ॥ २३ ॥
स्वयं वा शिश्नवृषणौ उत्कृत्याध्याय वांजलौ । आतिष्ठेद्दक्षिणामाशामानिपातमजिह्मतः ॥ २४ ॥
गुर्वर्थे वा हतः शुद्ध्यै चरेद्वा ब्रह्मणो व्रतम् । शाखां कर्कटकोपेतां परिष्वज्याथ वत्सरे ॥ २५ ॥
अधः शयीत निरतो मुच्यते गुरुतल्पगः । कृच्छ्रं चाब्दं चरेद्विप्रश्चीरवासाः समाहितः ॥ २६ ॥

उशनस्मृति-९ अध्याय ।

गत्वा दुहितरं विप्रः स्वसारं वा स्नुषामपि । प्रविशेज्ज्वलनं दीप्तं मतिपूर्वमिति स्थितिः ॥ १ ॥
मातृष्वसां मातुलानीं तथैव च पितृष्वसाम् । भागिनेयीं समारुह्य कुर्यात् कृच्छ्रादिपूर्वकम् ॥ २ ॥
चान्द्रायणानि चत्वारि पञ्च वा सुसमाहितः । पैतृष्वस्रेयीं गत्वा तु स्वस्रीयां मातुरेव च ॥ ३ ॥
मातुलस्य सुतां वापि गत्वा चान्द्रायणं चरेत । भार्यासखीं समारुह्य गत्वा श्यालीं तथैव च ॥४ ॥
अहोरात्रोषितो भूत्वा ततःकृच्छ्रं समाचरेत् । उदक्यागमने विप्रस्त्रिरात्रेण विशुद्ध्यति ॥ ५ ॥
मण्डूकं नकुलं काकं विड्वराहं च मूषिकम् । पयः पिबेत् त्रिरात्रस्तु श्वानं हत्वा त्वतन्द्रितः ॥७ ॥
मार्जारं चाथ नकुलं योजनं वाऽध्वनो व्रजेत् । कृच्छ्रद्वादशमात्रं तु कुर्यादश्ववधे द्विजः ॥ ८ ॥
अथ कृष्णायसीं दद्यात् सर्पं हत्वा द्विजोत्तमः । बलाकं रङ्कवं चैव मूषिकं कृतलम्भकम् ॥ ९ ॥
वराहं तु तिलद्रोणं तिलाढं चैव तित्तिरम् । शुकं द्विहायनं वत्सं क्रौंचं हत्वा त्रिहायनम् ॥ १० ॥
हत्वा हंसं बलाकं च बकटिट्टिभमेव च । वानरं चैव भासं च स्वयं वा ब्राह्मणाय गाम् ॥ ११ ॥
क्रव्यादांस्तु मृगान् हत्वा धेनुं दद्यात् पयस्विनीम् । अक्रव्यादं वत्सतरमुष्ट्रं हत्वा तु कृष्णलम्१२॥
किंचिदेव तु विप्राय दद्यादस्थिमतां वधे । अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यति ॥ १३ ॥

फलदानान्तु वृक्षाणां छेदने जप्यमृक्शतम् । गुल्मवल्लीलतानां च वीरुधां फलमेव च ॥ १४ ॥
मनुष्याणां च हरणं स्त्रीणां कृत्वा गृहस्य च ॥ १६ ॥
वापीकूपजलानां च शुध्येच्चान्द्रायणेन तु । द्रव्याणामल्पसाराणां स्तेयं कृत्वाऽन्यवेश्मनः ॥ १७ ॥
चरेत् सान्तपनं कृच्छ्रं चरित्वात्मविशुद्धये । धान्यादिधनचौर्यं च पञ्चगव्यविशोधनम् ॥ १८ ॥
तृणकाष्ठद्रुमाणां च पुष्पाणां च फलस्य च । चेलचर्मामिषाणां च त्रिरात्रं स्यादभोजनम् ॥ १९ ॥
मणिप्रवालरत्नानां सुवर्णरजतस्य च । अयःकांस्योपलानां च द्वादशाहमभोजनम् ॥ २० ॥
एतदेवव्रतं कुर्याद् द्विशफैकशफस्य च । पक्षिणामौषधीनां च हरेच्चापि त्र्यहं पयः ॥ २१ ॥
प्रकुर्याच्चैव संस्कारं पूर्वेणैव विधानतः । शललं च बलाकं च हंसकारण्डवं तथा ॥ २४ ॥
चक्रवाकं च जग्ध्वा च द्वादशाहमभोजनम् । कपोतं टिट्टिभं भासं शुकं सारसमेव च ॥ २५ ॥
जलौकजालपादं च जग्ध्वा ह्येतद् व्रतं चरेत् । शिशुमारं तथा मांसं मत्स्यं मांसं तथैव च ॥ २६ ॥
जग्ध्वा चैव वराहं च एतदेव व्रतं चरेत् । कोकिलं चैव मत्स्यादं मण्डूकं भुजगं तथा ॥ २७ ॥
गोमूत्रयावकाहारैर्मासेनैकेन शुध्यति । जलेचरांश्च जलजान् यातुधानविपाटितान् ॥ २८ ॥
रक्तपादांस्तथा जग्ध्वा सप्ताहं चैतदाचरेत् । मृतमांसं वृथा चैवमात्मार्थं वा यथाकृतम् ॥ २९ ॥
भुक्त्वा मासं चरेदेतत् पापकस्यापनुत्तये । कपोतं कुञ्जरं शिग्रुं कुक्कुटं रजकां तथा ॥ ३० ॥
प्राजापत्यं चरेज्जग्ध्वा तथाकुम्भीरमेव च । पलाण्डुं लशुनं चैव भुक्त्वा चान्द्रायणं चरेत् ॥ ३१ ॥
प्राजापत्येन शुद्धिः स्यात् श्वकुम्भ्यां शशभक्षणे । अलाबुं गृञ्जनं चैव भुक्त्वाप्येतद्व्रतं चरेत् ॥ ३३ ॥
गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति । अनिर्दशाया गोः क्षीरं माहिषं वार्क्षमेव च ॥ ३६ ॥
गर्भिण्या वा विवत्साया: पीत्वा दुग्धमिदं चरेत् । एतेषां च विकाराणि पीत्वा मोहेन वा पुनः ॥ ३७ ॥
गोमूत्रयावकाहारः सप्तरात्रेण शुध्यति । भुक्त्वा चैव नवश्राद्धं सूतके मृतकेऽथवा ॥ ३८ ॥
अन्त्यस्यात्ययिनोऽन्नं च तप्तकृच्छ्रमुदाहृतम्।चाण्डालान्नं द्विजो भुक्त्वा सम्यक् चान्द्रायणं चरेत् ॥
अज्ञानात् प्राश्य विण्मूत्रं सुरासंस्पर्शमेव च । पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ ४२ ॥
शुनोच्छिष्टं द्विजो भुक्त्वा त्रिरात्रेण विशुध्यति । गोमूत्रयावकाहारः पीतशेषं च वा पयः ॥ ४६ ॥
चाण्डालेन च संस्पृष्टं पीत्वा वारि द्विजोत्तमः । त्रिरात्रेण विशुध्येत पञ्चगव्येन शुध्यति ॥ ४९ ॥
भृत्यानां यजनं कृत्वा परेषामन्यकर्मणि । अभिचारमनर्हं च त्रिभिः कृच्छ्रैर्विशुध्यति ॥ ५६ ॥
तैलाभ्यक्तः प्रभाते च कुर्यान्मूत्रपुरीषके । अहोरात्रेण शुध्येत श्मश्रुकर्मणि मैथुने ॥ ५८ ॥
पतितद्रव्यमादाय तदुत्सर्गेण शुध्यति । चरेच्च विधिना कृच्छ्रमित्याह भगवान्प्रभुः ॥ ६१ ॥
अनाशकनिवृत्त्या तु प्रव्रज्योपासिता तथा । आचरेत् त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि च ॥ ६२ ॥
पुनश्च जातकर्मादिसंस्कारैः संस्कृता द्विजाः । शुद्धो यस्तद्व्रतं सम्यक् चरेयुर्धर्मदर्शिनः ॥ ६३ ॥
उपासीत न चेत्सन्ध्यां गृहस्थोऽपि प्रमादतः । स्नातकव्रतलौल्यन्तु कृत्वा चोपवसेद्दिनम् ॥ ६६ ॥
संवत्सरं चरेत्कृच्छ्रं मनुच्छन्दे द्विजोत्तमः । चान्द्रायणं चरेद्वृत्त्यां गोप्रदानेन शुध्यति ॥ ६७ ॥
उष्ट्रयानं समारुह्य खरयानं च कामतः । त्रिरात्रेण विशुध्येत नग्नेन प्रविशेज्जलम् ॥ ६९ ॥

(६ ख) औशनसस्मृति ।

सान्तरालकसंयुक्तं सर्वं संक्षिप्य चोच्यते । नृपाद्ब्राह्मणकन्यायां विवाहेषु समन्वयात् ॥ २ ॥
जातः सूतोऽत्र निर्दिष्टः प्रतिलोमविधिर्द्विजः । वेदानर्हस्तथा चैषां धर्माणामनुबोधकः ॥ ३ ॥
सूताद्विप्रप्रसूतायां सुतो वेणुक उच्यते । नृपायामेव तस्यैव जातो यश्चर्मकारकः ॥ ४ ॥
ब्राह्मण्यां क्षत्रियाच्चौर्याद्रथकारः प्रजायते । वृत्तं च शूद्रवत्तस्य द्विजत्वं प्रतिषिध्यते ॥ ६ ॥
ब्राह्मण्यां वैश्यसंसर्गाज्जातो मागध उच्यते । वन्दित्वं ब्राह्मणानां च क्षत्रियाणां विशेषतः ॥ ७ ॥
प्रशंसावृत्तिको जीवेद्वैश्यप्रेष्यकरस्तथा । ब्राह्मण्यां शूद्रसंसर्गाज्जातश्चाण्डाल उच्यते ॥ ८ ॥
सीसमाभरणं तस्य कार्ष्णायसमथापि वा । वध्रीं कंठे समाबध्य मल्लरीं कक्षतोपि वा ॥ ९ ॥
मलापकर्षणं ग्रामे पूर्वाह्णे परिशुद्धिकम् । न पराह्णे प्रविष्टोपि बहिर्ग्रामाच्च नैर्ऋते ॥ १० ॥
पिण्डीभूता भवन्त्यत्र नोचेद्वध्या विशेषतः । चाण्डालाद्वैश्यकन्यायां जातः श्वपच उच्यते ॥ ११ ॥
श्वमांसभक्षणं तेषां श्वान एव च तद्बलम् । नृपायां वैश्यसंसर्गादायोगव इति स्मृतः ॥ १२ ॥

तन्तुवाया भवन्त्येव वसुकांस्योपजीविनः । शीलिकाः केचिदत्रैव जीवनं वस्त्रनिर्मिते ॥ १३ ॥
नृपायां शूद्रसंसर्गाज्जातः पुल्कस उच्यते । सुरावृत्तिं समारुह्य मधुविक्रयकर्मणा ॥ १७ ॥
कृतकानां सुराणां च विक्रेता याचको भवेत् । पुल्कसाद्वैश्यकन्यायां जातो रजक उच्यते ॥ १८ ॥
वैश्यायां शूद्रसंसर्गाज्जातो वैदेहकः स्मृतः । अजानां पालनं कुर्यान्महिषीणां गवामपि ॥ २० ॥
दधिक्षीराज्यतक्राणां विक्रयाज्जीवनं भवेत् । वैदेहिकात्तु विप्रायां जातश्चर्मोपजीविनः ॥ २१ ॥
वैश्यायां विधिना विप्राज्जातो ह्यम्बष्ठ उच्यते । कृष्याजीवी भवेत्तस्य तथैवाग्नेयवृत्तिकः ॥ ३१ ॥
ध्वजिनी जीविका वापि अम्बष्ठाः शस्त्रजीविनः । वैश्यायां विप्रतश्चौर्यात्कुम्भकार स उच्यते ॥३२॥
कुलालवृत्त्या जीवेत्तु नापिता वा भवन्त्यतः । सूतके प्रेतके वापि दीक्षाकालेऽथ वापनम् ॥ ३३ ॥
शूद्रायां विधि विप्राज्जातः पारशवो मतः । भद्रकादीन्समाश्रित्य जीवेयु पूतकाः स्मृताः॥३६॥
शिवाद्यागमविद्याद्यैस्तथा मण्डलवृत्तिभिः । तस्यां वै चौरसो वृत्तो निषादो जात उच्यते ॥ ३७ ॥
वने दुष्टमृगान्हत्वा जीवनं मांसविक्रयः । नृपाज्जातोथ वैश्यायां गृह्यायां विधिना सुतः ॥
वैश्यवृत्त्या तु जीवित क्षत्रधर्मं न चारयेत् ॥ ३८ ॥
प्रवालानां च सूत्रित्वं शाखानां वलयक्रियाम् । शूद्रस्य विप्रसंसर्गाज्जात उग्र इति स्मृतः ॥ ४० ॥
नृपस्य दण्डधारः स्याद्दण्डं दण्ड्येषु संचरेत् । तस्यैव चार्यसवृत्त्या जातः शुण्डिक उच्यते ॥ ४१ ॥

(७) अङ्गिरास्मृति ।

रजकश्चर्मकश्चैव नटो बुरुड एव च । कैवर्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः ॥ ३ ॥
चाण्डालकूपे भाण्डेषु त्वज्ञानात्पिबते यदि । प्रायश्चित्तं कथं तेषां वर्णे वर्णे विधीयते ॥ ५ ॥
चरेत्सान्तपनं विप्रः प्राजापत्यं तु भूमिपः । तदर्धं तु चरेद्वैश्यः पादं शूद्रेषु दापयेत् ॥ ६ ॥
विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कदाचन । आचान्त एव शुद्ध्येत अङ्गिरामुनिरब्रवीत् ॥ ८ ॥
क्षत्रियेण यदा स्पृष्ट उच्छिष्टेन कदाचन । स्नानं जप्यं तु कुर्वीत दिनस्यार्द्धेन शुध्यति ॥ ९ ॥
वैश्येन तु यदा स्पृष्टः शुना शूद्रेण वा द्विजः । उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ॥ १० ॥
अनुच्छिष्टेन संस्पृष्टः स्नानं येन विधीयते । तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् ॥ ११ ॥
भोजने चैव पाने च तथा चौषधभेषजैः । एवं म्रियन्ते या गावः पादमेकं समाचरेत् ॥ २५ ॥
घण्टाभरणदोषेण यत्र गौर्विनिपीड्यते । चरेदर्धं व्रतं तेषां भूषणार्थं तु यत्कृतम् ॥ २६ ॥
दमने दामने रोधे अवघाते च वैकृते । गवां प्रभवताघातैः पादोनं व्रतमाचरेत् ॥ २७ ॥
अंगुष्ठपर्वमात्रस्तु बाहुमात्रप्रमाणतः । सपल्लवश्च साग्रश्च दण्ड इत्यभिधीयते ॥ २८ ॥
दण्डादुक्ताद्यदान्येन पुरुषाः प्रहरन्ति गाम् । द्विगुणं तु व्रतं तेषां प्रायश्चित्तं विशोधनम् ॥ २९ ॥
असमर्थस्य बालस्य पिता वा यदि वा गुरुः । यमुद्दिश्य चरेद्धर्मं पापं तस्य न विद्यते ॥ ३२ ॥
अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः । प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च ॥ ३३ ॥
रजस्वला यदा स्पृष्टा शुना शूद्रेण चैव हि । उपोष्य रजनीमेकां पञ्चगव्येन शुद्ध्यति ॥ ३९ ॥
द्वावेतावशुची स्यातां दम्पती शयनं गतौ । शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान् ॥४०॥
गण्डूषं पादशौचं च न कुर्यात्कांस्यभाजने । भस्मना शुद्ध्यते कांस्यं ताम्रमम्लेन शुद्ध्यति ॥४१॥
शौचं सौवर्णरौप्याणां वायुनार्केन्दुरश्मिभिः । रजस्पृष्टं शवस्पृष्टमाविकं च न शुद्ध्यति ॥ ४४ ॥
अद्भिर्मृदा तत्पात्र प्रक्षाल्य च विशुद्ध्यति । शुष्कमन्नमविप्रस्य भुक्त्वा सप्ताहमृच्छति ॥ ४५ ॥
यो यस्यान्नं समश्नाति स तस्याश्नाति किल्बिषम् । सूतकेषु यदा विप्रो ब्रह्मचारी जितेन्द्रियः॥५८॥
पिबेत्पानीयमज्ञानाद्भुङ्क्ते भक्तमथापि वा । उत्तार्याचम्य उदकमवतीर्य उपस्पृशेत् ॥ ५९ ॥
एवं हि समुदाचारो वरुणेनाभिमन्त्रितः । अग्न्यागारे गवां गोष्ठे देवब्राह्मणसन्निधौ ॥ ६० ॥
असपिण्डेन भोक्तव्यं चूडस्यान्ते विशेषतः । याचकान्नं नवश्राद्धमपि सूतकभोजनम् ॥ ६४ ॥
नारी प्रथमगर्भेषु भुक्त्वा चान्द्रायणं चरेत् । अन्यदत्ता तु या कन्या पुनरन्यस्य दीयते ॥ ६९ ॥
अथ भुंक्ते तु यो मोहात्पूयसं नरकं व्रजेत् । स्त्रिया धनं तु ये मोहादुपजीवन्ति मानवाः ॥ ७० ॥
स्त्रिया यानानि वासांसि ते पापा यान्त्यधोगतिम् । राजान्नं हरते तेजः शूद्रान्नं ब्रह्मवर्चसम् ॥७१॥

(७ क) दूसरी अङ्गिरास्मृति ।

ब्राह्मणान्ने पवित्रत्वं क्षत्रान्ने पशुता स्मृता । वैश्यान्ने चापि शूद्रत्वं शूद्रान्ने नरकं व्रजेत् ॥ ७९ ॥

(८) यमस्मृति ।

चाण्डालैः श्वपचैः स्पृष्टो विण्मूत्रे च कृते द्विजः । त्रिरात्रं तु प्रकुर्वीत भुक्त्वोच्छिष्टः षडाचरेत् ॥१०॥
ऋतौ तु गर्भं शङ्कित्वा स्नानं मैथुनिनः स्मृतम् । अनृतौ तु स्त्रियं गत्वा शौचं मूत्रपुरीषवत् ॥१६॥
त्यजन्तोऽपतितान्बन्धून्दण्डद्या उत्तमसाहसम् । पिता हि पतितः कामं न तु माता कदाचन ॥१९॥
श्वसृगालप्लवंगाद्यैर्मानुषैश्च रतिं विना । दष्टः स्नात्वा शुचिः सद्यो दिवा सन्ध्यासु रात्रिषु ॥ २५ ॥
अज्ञानाद्ब्राह्मणो भुक्त्वा चाण्डालान्नं कदाचन । गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति ॥ २६ ॥
चाण्डालपुक्कसानां च भुक्त्वा गत्वा च योषितम् । कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् ॥२८॥
कपालिकान्नभोक्तॄणां तन्नारीगामिनां तथा । कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् ॥ २९ ॥
अगस्यागमने विप्रो मद्यगो मांसभक्षणे । तप्तकृच्छ्रपरिक्षिप्तो मौर्वीहोमेन शुद्ध्यति ॥ ३० ॥
रजकश्चर्मकश्चैव नटो बुरुड एव च । कैवर्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः ॥ ३३ ॥
भुक्त्वा चैषां स्त्रियो गत्वा पीत्वापः प्रतिगृह्य च । कृच्छ्राब्दमाचरेज् ज्ञानादज्ञानादैन्दवद्वयम् ॥३४॥
मातरं गुरुपत्नीं च स्वसृदुहितरं स्नुषाम् । गत्वैताः प्रविशेदग्निं नान्या शुद्धिर्विधीयते ॥ ३५ ॥
राज्ञीं प्रव्रजितां धात्रीं तथा वर्णोत्तमामपि । कृच्छ्रद्वयं प्रकुर्वीत सगोत्रामभिगम्य च ॥ ३६ ॥
दण्डादूर्ध्वप्रहारेण यस्तु गां विनिपातयेत् । द्विगुणं गोव्रतं तस्य प्रायश्चित्तं विनिर्दिशेत् ॥ ४० ॥
अंगुष्ठमात्रस्थूलस्तु बाहुमात्रप्रमाणकः । सार्द्रश्च सपलाशश्च गोदण्डः परिकीर्तितः ॥ ४१ ॥
पादमुत्पन्नमात्रे तु द्वौ पादौ गात्रसंभवे । पादोनं कृच्छ्रमाचेष्ट हत्वा गर्भमचेतनम् ॥ ४३ ॥
अङ्गप्रत्यङ्गसम्पूर्णे गर्भे रेतःसमन्विते । एकैकशश्चरेत्कृच्छ्रमेषा गोघ्नस्य निष्कृतिः ॥ ४४ ॥
वन्धने रोधने चैव पोषणे वा गवां रुजा । संपद्यते चेन्मरणं निमित्ती नैव लिप्यते ॥ ४५ ॥
मूर्छितः पतितो वापि दण्डेनाभिहतस्तथा । उत्थाय षट्पदं गच्छेत्सप्त पञ्च दशापि वा ॥ ४६ ॥
ग्रासं वा यदि गृह्णीयात्तोयं वापि पिबेद्यदि । पूर्वव्याधिप्रनष्टानां प्रायश्चित्तं न विद्यते ॥ ४७ ॥
काष्ठलोष्टाश्मभिर्गावः शस्त्रैर्वा निहता यदि । प्रायश्चित्तं कथं तत्र शस्त्रे शस्त्रे निगद्यते ॥ ४८ ॥
काष्ठे सान्तपनं कुर्यात्प्राजापत्यं तु लोष्टके । तप्तकृच्छ्रं तु पाषाणे शस्त्रे चाप्यतिकृच्छ्रकम् ॥ ४९ ॥
औषधं स्नेहमाहारं दद्याद्गोब्राह्मणेषु च । दीयमाने विपत्तिः स्यात्प्रायश्चित्तं न विद्यते ॥ ५० ॥
तैलभेषजपाने च भेषजानां च भक्षणे । निःशल्यकरणे चैव प्रायश्चित्तं न विद्यते ॥ ५१ ॥
वत्सानां कण्ठबन्धे च क्रियया भेषजेन तु । सायं संगोपनार्थं च न दोषो रोधबन्धयोः ॥ ५२ ॥
पादे चैवास्य रोमाणि द्विपादे श्मश्रुकेवलम् । त्रिपादे तु शिखावर्जं मूले सर्वं समाचरेत् ॥ ५३ ॥
सर्वान्केशान्समुद्धृत्य छेदयेदंगुलद्वयम् । एवमेव तु नारीणां मुण्डमुण्डापनं स्मृतम् ॥ ५४ ॥
न स्त्रिया वपनं कार्यन्न च वीरासनं स्मृतम् । न च गोष्ठे निवासोऽस्ति न गच्छन्तीमनुव्रजेत् ॥५५ ॥
राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः । अकृत्वा वपनं तेषां प्रायश्चित्तं विनिर्दिशेत् ॥ ५६॥
केशानां रक्षणार्थं च द्विगुणं व्रतमादिशेत् । द्विगुणे तु व्रते चीर्णे द्विगुणैव तु दक्षिणा ॥ ५७ ॥
इष्टापूर्तं तु कर्त्तव्यं ब्राह्मणेन प्रयत्नतः । इष्टेन लभते स्वर्गं पूर्ते मोक्षं समश्नुते ॥ ६८ ॥
वित्तापेक्षं भवेदिष्टं तडागं पूर्तमुच्यते । आरामश्च विशेषेण देवद्रोण्यस्तथैव च ॥ ६९ ॥
वापीकूपतडागानि देवतायतनानि च । पतितान्युद्धरेद्यस्तु स पूर्तफलमश्नुते ॥ ७० ॥
शुक्लाया मूत्रं गृह्णीयात्कृष्णाया गोः शकृत्तथा । ताम्रायाश्च पयो ग्राह्यं श्वेताया दधि चोच्यते ॥७१॥
कपिलाया घृतं ग्राह्यं महापातकनाशनम् । सर्वतीर्थे नदीतोये कुशैर्द्रव्यं पृथक् पृथक् ॥ ७२ ॥
सूतके तु समुत्पन्ने द्वितीये समुपस्थिते । द्वितीये नास्ति दोषस्तु प्रथमेनैव शुद्ध्यति ॥ ७५ ॥
जातेन शुद्ध्यते जातं मृतेन मृतकन्तथा । गर्भे संस्रवणे मासे त्रीण्यहानि विनिर्दिशेत् ॥ ७६ ॥
रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति । रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ॥ ७७ ॥
नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धमथापरम् । पार्वणंश्चेति विज्ञेयं श्राद्धं पञ्चविधं बुधैः ॥ ८२ ॥

प्रथमेऽह्नि द्वितीये वा तृतीये वा चतुर्थके । अस्थिसञ्चयनं कार्यं बन्धुभिर्हितबुद्धिभिः ॥ ८७ ॥
चतुर्थे पञ्चमे चैव सप्तमे नवमे तथा । अस्थिसञ्चयनं प्रोक्तं वर्णानामनुपूर्वशः ॥ ८८ ॥

(८ क) बृहद्यमस्मृति- १अध्याय ।

जलाग्निबन्धनभ्रष्टाः प्रव्रज्यानाशकच्युताः । विषप्रपतनप्राप्ताः शस्त्राघातहताश्च ये ॥ ३ ॥
नचैते प्रत्यवसिताः सर्वधर्मबहिष्कृताः । चान्द्रायणेन शुध्यन्ति तप्तकृच्छ्रद्वयेनच ॥ ४ ॥
गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम् । एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥ १३ ॥
चाण्डालिकासु नारीषु द्विजो मैथुनकारकः । कृत्वाऽघमर्षणं पक्षं शुध्यते च पयोव्रतात् ॥ १९ ॥

बृहद्यमस्मृति-२ अध्याय ।

सुरायाः संप्रपानेन गोमांसभक्षणे कृते । तप्तकृच्छ्रं चरेद्विप्रो मौञ्जीहोमेन शुध्यति ॥ ३ ॥
यः क्षत्रियं तथा वैश्यं शूद्रं चाप्यनुलोमजम् । ज्ञात्वा विशेषेण ततश्चरेच्चान्द्रायणं व्रतम् ॥ ४ ॥
एकैकं वर्धयेद्ग्रासं शुक्ले कृष्णे च ह्रासयेत् । अमायां तु न भुञ्जीत एष चान्द्रायणो विधिः ॥ ६ ॥

बृहद्यमस्मृति-३ अध्याय ।

ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च । प्रायश्चित्तं चरेद्भ्राता पिता वाऽन्योऽपि बान्धवः ॥ १ ॥
अतो बालतरस्यापि नापराधो न पातकम् । राजदण्डो न तस्यास्ति प्रायश्चित्तं न विद्यते ॥ २ ॥
अशीत्यधिकवर्षाणि बालो वाऽप्यूनषोडशः । प्रायश्चित्तार्धमर्हन्ति स्त्रियो व्याधित एव च ॥ ३ ॥
मातरं गुरुपत्नीं च स्वसारं दुहितां तथा । गत्वा तु प्रविशेदग्निं नान्या शुद्धिर्विधीयते ॥ ७ ॥
दासनापितगोपालकुलमित्रार्धसीरिणः । एते शूद्रास्तु भोज्यान्ना यश्चाऽऽत्मानं निवेदयेत् ॥ १० ॥
यः करोत्येकरात्रेण वृषलीसेवनं द्विजः । तद्भक्षणे जपेन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥ १२ ॥
वृषलीं यस्तु गृह्णाति ब्राह्मणो मदमोहितः । सदा सूतकिता तस्य ब्रह्महत्या दिने दिने ॥ १३ ॥
वृषलीगमनं चैव मासमेकं निरन्तरम् । इह जन्मनि शूद्रत्वं पुनः श्वानो भविष्यति ॥ १४ ॥
वृषलीफेनपीतस्य निःश्वासोपगतस्य च । तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते ॥ १५ ॥
महिषीत्युच्यते भार्या सा चैव व्यभिचारिणी । तान्दोषान्क्षमते यस्तु स वै माहिषकः स्मृतः॥१७॥
पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता । भ्रूणहत्या पितुस्तस्य कन्या सा वृषली स्मृता ॥१८॥
यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः । असंभाष्यो ह्यपांक्तेयः स विप्रो वृषलीपतिः ॥ १९ ॥
प्राप्ते द्वादशमे वर्षे कन्यां यो न प्रयच्छति । मासि मासि रजस्तस्याः पिता पिबति शोणितम्॥२०॥
अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी । दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥ २१ ॥
माता चैव पिता चैव ज्येष्ठभ्राता तथैव च । त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥ २२॥
समर्घं धनमुत्सृज्य मह (हा) र्घं यः प्रयच्छति । स वै वार्धुषिको ज्ञेयो ब्रह्मवादिषु गर्हितः॥२३॥
यावदुष्णं भवेदन्नं यावद्भुञ्जन्ति वाग्यताः । पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणाः ॥ २७ ॥
हविर्गुणा न वक्तव्याः पितरो यान्त्यतर्पिताः । पितृभिस्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविः ॥ २८ ॥
तथैव मन्त्रविद्युक्तः शारीरैः पंक्तिदूषणैः । वर्जितं च यमः प्राह पंक्तिपावन एव सः ॥ ४१ ॥
सूतके वर्तमानेऽपि दासवर्गस्य का क्रिया । स्वामितुल्यं भवेत्तस्य सूतकं तु प्रशस्यते ॥ ५५ ॥
यत्र कार्यते तत्तन्नान्यं प्रत्यब्रवीद्यमः । विवाहोत्सवयज्ञेषु कार्ये चैवमुपस्थिते ॥ ५६ ॥
रजः पश्यति या नारी तस्य कालस्य का क्रिया । विपुले च जले स्नात्वा शुक्लवासास्त्वलंकृता॥५७॥
आपोहिष्ठेत्यृगभिषिक्ताऽयंगौरिति वा ऋचः (चा) । पूजान्ते होमयेत्पश्चाद्घृताहुत्या शताष्टकम्५८
गायत्र्या व्याहृतिभिश्च ततः कर्म समारभेत् । यावद्द्विजा न चार्च्यन्ते अन्नदानहिरण्यकैः ॥ ५९ ॥
अभक्ष्याणामपेयानामलेह्यानां च भक्षणे । रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत् ॥ ६२ ॥
पद्मोदुम्बरबिल्वानां कुशाश्वत्थपलाशयोः । एतेषामुदकं पीत्वा पञ्चगव्येन शुध्यति ॥ ६३ ॥

बृहद्यमस्मृति-४ अध्याय ।

न स्त्रीणां वपन कुर्यान्न च गोव्रजनं स्मृतम् । न च गोष्ठे वसेद्रात्रौ न कुर्याद्वैदिकीं श्रुतिम् ॥ १६ ॥
सर्वान्केशान्समुच्छ्रित्य च्छेदयेदङ्गुलद्वयम् । एवमेव तु नारीणां शिरोमुण्डापनं स्मृतम् ॥१७॥

प्राजापत्यैस्त्रिभिः कृच्छ्रं कृच्छ्रं वै द्वादशाब्दिकम् । एकभक्तं तथा नक्तमुपवासमथापि वा॥ २९ ॥
एतद्दिनचतुष्केण पादकृच्छ्रश्च जायते । त्रिपादकृच्छ्रो विज्ञेयः पापक्षयकरः स्मृतः ॥ २६ ॥
व्यभिचाराहतौ शुद्धिः स्त्रीणां चैव न संशयः । गर्भे जाते परित्यागो नान्यथा मम भाषितम् ॥ ३६ ॥

(९) आपस्तम्बस्मृति-१ अध्याय ।

बालानां स्तनपानादिकार्ये दोषो न विद्यते । विपत्तावपि विप्राणामामन्त्रणचिकित्सने ॥ ९ ॥
औषधं लवणं चैव स्नेहं पुष्ट्यर्थभोजनम् । प्राणिनां प्राणवृत्त्यर्थं प्रायश्चित्तं न विद्यते ॥ ११ ॥
अतिरिक्तं न दातव्यं काले स्वल्पं तु दापयेत् । अतिरिक्ते विपन्नानां कृच्छ्रमेव विधीयते ॥ १२ ॥
त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम् । सायं त्र्यहं तथा पादः पादः प्रातस्तथा त्र्यहम् ॥१३ ॥
प्रातः सायं दिनार्द्धं च पादोनं सायवर्जितम् । प्रातः पादं चरेच्छूद्रः सायं वैश्यस्य दापयेत् ॥ १४ ॥
अयाचितं तु राजन्ये त्रिरात्रं ब्राह्मणस्य च । पादमेकं चरेद्रोधे द्वौ पादौ बन्धने चरेत् ॥ १५ ॥
योजने पादहीनं च चरेत्सर्वं निपातने । घण्टाभरणदोषेण गोस्तु यत्र विपद्भवेत् ॥ १६ ॥
चरेदर्द्धव्रतं तत्र भूषणार्थं कृतं हि तत् । दमने वा निरोधे वा संघाते चैव योजने ॥ १७ ॥
स्तम्भश्शृङ्खलपाशैश्च मृते पादोनमाचरेत् । पाषाणैर्लगुडैर्वापि शस्त्रेणान्येन वा बलात् ॥ १८ ॥
निपातयंति ये पापास्तेषां सर्वं विधीयते । प्राजापत्यं चरेद्विप्रः पादोनं क्षत्रियस्तथा ॥ १९ ॥
कृच्छ्रार्द्धं तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् । द्वौ मासौ पाययेद्वत्सं द्वौ मासौ द्वौ स्तनौ दुहेत्॥२०॥
सशिखं वपनं कृत्वा प्राजापत्यं समाचरेत् । हलमष्टगवं धर्म्यं षड्गवं जीवितार्थिनाम् ॥ २२ ॥
चतुर्गवं नृशंसानां द्विगवं हि जिघांसिनाम् । अतिवाहातिदोहाभ्यां नासिकाभेदनेन वा ॥ २३ ॥
नदीपर्वतसंरोधे मृते पादोनमाचरेत् । न नारिकेलवालाभ्यां न मुञ्जेन न चर्मणा ॥ २४ ॥
एभिर्गास्तु न बध्नीयाद्बद्ध्वा परवशो भवेत् । कुशैः काशैश्च बध्नीयाद्वृषभं दक्षिणामुखम् ॥ २५ ॥
एषु गोषु विपन्नासु प्रायश्चित्तं न विद्यते। एका यदा तु बहुभिर्दैवाद्व्यापादिता क्वचित् ॥ ३० ॥
पादं पादं तु हत्यायाश्चरेयुस्ते पृथक् पृथक् । यन्त्रणे वा चिकित्सार्थे मूढगर्भविमोचने ॥ ३१ ॥
यत्ने कृते विपत्तिश्चेत्प्रायश्चित्तं न विद्यते । सरोमं प्रथमे पादे द्वितीये श्मश्रुकर्त्तनम् ॥ ३२ ॥
तृतीये तु शिखा धार्या सशिखं तु निपातने । सर्वान्केशान्समुद्धृत्य छेदयेदङ्गुलद्वयम् ॥ ३३ ॥

आपस्तम्बस्मृति-२ अध्याय ।

काष्ठहस्तगतं पण्यं यच्च पात्राद्विनिस्सृतम् । स्त्रीबालवृद्धचरितं सर्वमेतच्छुचि स्मृतम् ॥ १ ॥
प्रपास्वरण्येषु जलेषु वै गिरौ द्रोण्यां जलं कोशविनिस्सृतं च ।
श्वपाकचाण्डालपरिग्रहेषु पीत्वा जलं पञ्चगव्येन शुद्धिः ॥ २ ॥
न दुष्येत्संतता धारा वातोद्धूताश्च रेणवः । स्त्रियो वृद्धाश्च बालाश्च न दुष्यन्ति कदाचन ॥३॥
अस्थिचर्मादियुक्तं तु खरश्वानोपदूषितम् । उद्धरेदुदकं सर्वं शोधनं परिमार्जनम् ॥ ८ ॥
वापीकूपतडागानां दूषितानां च शोधनम् । कुम्भानां शतमुद्धृत्य पञ्चगव्यं ततः क्षिपेत् ॥ ११ ॥

आपस्तम्बस्मृति-३ अध्याय ।

बालो वृद्धस्तथा रोगी गर्भिणी वायुपीडिता । तेषां नक्तं प्रदातव्यं बालानां प्रहरद्वयम् ॥ ५ ॥
अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः । प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो व्याधित एव च ॥ ६ ॥

आपस्तम्बस्मृति-४ अध्याय ।

चाण्डालकूपभाण्डेषु यो ज्ञानात्पिबते जलम् । प्रायश्चित्तं कथं तस्य वर्णेवर्णे विधीयते ॥ १ ॥
चरेत्सान्तपनं विप्रः प्राजापत्यं तु भूमिपः । तदर्धं तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् ॥ २ ॥
भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा । प्रमादात्स्पर्शनं गच्छेत्तत्र कुर्याद्विशोधनम् ॥ ३ ॥
गायत्र्यष्टसहस्रं तु द्रुपदां वा शतं जपेत् । जपंस्त्रिरात्रमनश्नन्पञ्चगव्येन शुद्ध्यति ॥ ४ ॥
चाण्डालेन यदा स्पृष्टो विण्मूत्रे च कृते द्विजः । प्रायश्चित्तं त्रिरात्रं स्याद्भुक्तोच्छिष्टः षडाचरेत् ॥५॥
एकरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति । येन केनचिदुच्छिष्टी ह्यमेध्यं स्पृशति द्विजः ॥ ११ ॥
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ १२ ॥

आपस्तम्बस्मृति-५ अध्याय ।

चाण्डालेन यदा स्पृष्टो द्विजवर्णः कदाचन । अनभ्युक्ष्य पिबेत्तोयं प्रायश्चित्तं कथं भवेत् ॥ १ ॥
ब्राह्मणस्य त्रिरात्रं तु पञ्चगव्येन शुद्ध्यति । क्षत्रियस्य द्विरात्रं तु पञ्चगव्येन शुद्ध्यति ॥ २ ॥
अहोरात्रं तु वैश्यस्य पञ्चगव्येन शुद्ध्यति । चतुर्थस्य तु वर्णस्य प्रायश्चित्तं कथं भवेत् ॥ ३ ॥
व्रतं नास्ति तपो नास्ति होमो नैव च विद्यते । पञ्चगव्यं न दातव्यं तस्य मन्त्रविवर्जनात् ॥ ४ ॥
ख्यापयित्वा द्विजानां तु शूद्रो दानेन शुद्ध्यति । ब्राह्मणस्य यदोच्छिष्टमश्नात्यज्ञानतो द्विजः ॥५॥
अहोरात्रं तु गायत्र्या जपं कृत्वा विशुद्ध्यति । उच्छिष्टं वैश्यजातीनां भुंक्ते ज्ञानाद्विजो यदि ॥६॥
शङ्खपुष्पीपयः पीत्वा त्रिरात्रेणैव शुद्ध्यति । ब्राह्मण्या सह योऽश्नीयादुच्छिष्टं वा कदाचन ॥ ७ ॥
न तत्र दोषं मन्यन्ते नित्यमेव मनीषिणः । उच्छिष्टमितरस्त्रीणामश्नीयात्स्पृशतेऽपि वा ॥ ८ ॥
प्राजापत्येन शुद्धिः स्याद्भगवानङ्गिराब्रवीत् । अन्त्यानां भुक्तशेषं तु भक्षयित्वा द्विजातयः ॥ ९ ॥
चान्द्रायणं तदर्धार्धं ब्रह्मक्षत्रविशां विधिः । विण्मूत्रभक्षणे विप्रस्तप्तकृच्छ्रं समाचरेत् ॥ १० ॥
श्वकाकोच्छिष्ट गोभिश्च प्राजापत्यविधिः स्मृतः । उच्छिष्टः स्पृशते विप्रो यदि कश्चिदकामतः ॥११॥
शुनः कुक्कुटशूद्रांश्च मद्यभाण्डं तथैव च । पक्षिणाधिष्ठितं यच्च यद्यमेध्यं कदाचन ॥ १२ ॥
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति । वैश्येन च यदा स्पृष्ट उच्छिष्टेन कदाचन ॥ १३ ॥
स्नानं जप्यं च त्रैकाल्यं दिनस्यान्ते विशुद्ध्यति । विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कदाचन ॥ १४ ॥
स्नानान्ते च विशुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः ॥ १५ ॥

आपस्तम्बस्मृति-६ अध्याय ।

अत ऊर्ध्वं प्रवक्ष्यामि नीलीवस्त्रस्य यो विधिः । स्त्रीणां क्रीडार्थसम्भोगे शयनीये न दुष्यति ॥ १ ॥
पालने विक्रये चैव तद्वृत्तेरुपजीवने । पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुद्ध्यति ॥ २ ॥
स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् । पञ्चयज्ञा वृथा तस्य नीलीवस्त्रस्य धारणात् ॥ ३ ॥
नीलीरक्तं यदा वस्त्रं ब्राह्मणोङ्गेषु धारयेत् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ ४ ॥
भक्षयेद्यश्च नीलीं तु प्रमादाद्ब्राह्मणः क्वचित् । चान्द्रायणेन शुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः ॥५॥

आपस्तम्बस्मृति-७ अध्याय ।

स्नानं रजस्वलायास्तु चतुर्थेऽहनि शस्यते । वृत्ते रजसि गम्या स्त्री नानिवृत्ते कथञ्चन ॥ १ ॥
रोगेण यद्रजः स्त्रीणामत्यर्थं हि प्रवर्तते । अशुद्धास्तास्तु नैवेह तासां वैकारिको मदः ॥ २ ॥
साध्वाचारा न तावत्सा रजो यावत्प्रवर्तते । वृत्ते रजसि साध्वी स्याद्गृहकर्मणि चेन्द्रिये ॥ ३ ॥
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी । तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुद्ध्यति ॥ ४ ॥
रजस्वलान्त्यजैः स्पृष्टा शुना च श्वपचेन च । त्रिरात्रोपोषिता भूत्वा पञ्चगव्येन शुद्ध्यति ॥ ७ ॥
प्रथमेहनि षड्रात्रं द्वितीये तु त्र्यहस्तथा । तृतीये चोपवासस्तु चतुर्थे वह्निदर्शनात् ॥ ८ ॥
रजस्वला तु या नारी अन्योन्यं स्पृशते यदि । तावत्तिष्ठेन्निराहारा स्नात्वा कालेन शुद्ध्यति ॥१२॥

आपस्तम्बस्मृति- ८ अध्याय ।

भस्मना शुद्ध्यते कांस्यं सुरया यन्न लिप्यते । सुराविण्मूत्रसंस्पृष्टं शुद्ध्यते तापलेखनैः ॥ १ ॥
गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि तु । भस्मभिर्दश शुद्ध्यन्ति श्वकाकोपहतानि च ॥२॥
शौचं सौवर्णरौप्याणां वायुसूर्येन्दुरश्मिभिः । रेतःस्पृष्टं शवस्पृष्टमाविकं तु प्रदुष्यति ॥ ३ ॥
अद्भिर्मृदा च तत्पात्रं प्रक्षाल्य च विशुद्ध्यति । शुष्कमन्नमवेद्यस्य पञ्चरात्रेण जीर्यति ॥ ४ ॥
स वत्सरेण तैलं तु कोष्ठे जीर्यति वा नवा । भुञ्जते ये तु शूद्रान्नं मासमेकं निरंतरम् ॥ ६ ॥
इह जन्मनि शूद्रत्वं जायन्ते ते मृताः शुनि । शूद्रान्नं शूद्रसम्पर्कः शूद्रेणैव सहासनम् ॥ ७ ॥
स भवेत्सूकरो ग्राम्यस्तस्य वा जायते कुले । ब्राह्मणस्य सदा भुङ्क्ते क्षत्रियस्य तु पर्वणि ॥ ११॥
वैश्यस्य यज्ञदीक्षायां शूद्रस्य न कदाचन । अमृतं ब्राह्मणस्यान्नं क्षत्रियस्य पयः स्मृतम् ॥ १२ ॥
वैश्यस्याप्यन्नमेवान्नं शूद्रस्य रुधिरं स्मृतम् । वैश्वदेवेन होमेन देवताभ्यर्चनैर्जपैः ॥ १३ ॥

आपस्तम्बस्मृति–९ अध्याय ।

अशित्वा सर्वमेवान्नमकृत्वा शौचमात्मनः । मोहाद्भुक्त्वा त्रिरात्रं तु यवान्पीत्वा विशुद्ध्यति ॥ ३ ॥
प्रसृत यवसस्येन पलमेकं तु सर्पिषा । पलानि पञ्च गोमूत्रं नातिरिक्तवदाशयेत् ॥ ४ ॥
अलेह्यानामपेयानामभक्ष्याणां च भक्षणे । रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत् ॥ ५ ॥
पद्मोदुम्बरबिल्वाश्च कुशाश्च सपलाशकाः । एतेषामुदकं पीत्वा षड्रात्रेण विशुद्ध्यति ॥ ६ ॥
ये प्रत्यवसिता विप्राः प्रव्रज्याग्निजलादिषु । अनाशकनिवृत्ताश्च गृहस्थत्वं चिकीर्षिताः ॥ ७ ॥
चरेयुस्त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि वा । जातकर्मादिभिः सर्वैः पुनः संस्कारभागिनः॥८॥
तेषां सान्तपनं कृच्छ्रं चान्द्रायणमथापि वा । यद्वेष्टितं काकबलाकयोर्वा अमेध्यलिप्तं च भवेच्छरीरम्॥
मृत्तिकाशोधनं स्नानं पञ्चगव्यं विशोधनम् । दशाहाच्छुद्ध्यते विप्रो जन्महानौ स्वयोनिषु ॥ १२ ॥
षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु । उपनीतं यदा त्वन्नं भोक्तारं समुपस्थितम् ॥ १३ ॥
एवं तु श्रेयसा युक्तो वरुणेनाभिपूज्यते । अग्न्यागारे गवां गोष्ठे ब्राह्मणानां च सन्निधौ ॥ २० ॥
स्वाध्याये भोजने चैव पादुकानां विसर्जनम् । ॥ २१ ॥
असपिण्डैर्न कर्त्तव्यं चूडाकार्ये विशेषतः । याजकान्नं नवश्राद्धं संग्रहे चैव भोजनम् ॥ २२ ॥
स्त्रीणां प्रथमगर्भे च भुक्त्वा चान्द्रायणं चरेत् । ब्रह्मौदनेवसाने च सीमन्तोन्नयने तथा ॥ २३ ॥
अन्नश्राद्धे मृतश्राद्धे भुक्त्वा चान्द्रायणं चरेत् । अप्रजा या तु नारी स्यान्नाश्नीयादेव तद्गृहे ॥२४॥
अथ भुञ्जीत मोहाद्यः पूयसं नरकं व्रजेत् । अल्पेनापि हि शुल्केन पिता कन्यां ददाति यः ॥ २५॥
रौरवे बहुवर्षाणि पुरीषं मूत्रमश्नुते । स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः ॥ २६ ॥
स्वर्णं यानानि वस्त्राणि ते पापा यान्त्यधोगतिम् । राजान्नमोज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ॥ २७ ॥
विशेषाद्भुक्तमेतेषां भुक्त्वा चान्द्रायणं चरेत् । रजकव्याधशैलूषवेणुचर्मोपजीविनः ॥ ३१ ॥
भुक्त्वैषां ब्राह्मणश्चान्नं शुद्धिश्चान्द्रायणेन तु । उच्छिष्टोच्छिष्टसंस्पृष्टः कदाचिदुपजायते ॥ ३२ ॥
मोहाद्भुक्त्वा त्रिरात्रं तु गव्यं पीत्वा विशुद्ध्यति । उदक्यां यदि गच्छेत्तु ब्राह्मणो मदमोहितः॥३८॥
चान्द्रायणेन शुद्ध्येत ब्राह्मणानां च भोजनैः । भुक्तवोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा॥३९॥

आपस्तम्बस्मृति–१० अध्याय ।

सर्वं हरति तत्तस्य आमकुंभ इवोदकम् । अपमानात्तपोवृद्धिः संमानात्तपसः क्षयः ॥ ९ ॥
अर्चितः पूजितो विप्रो दुग्धा गौरिव सीदति । आप्यायते यथाधेनुस्तृणैरमृतसंभवैः ॥ १० ॥
एव जपैश्च होमैश्च पुनराप्यायते द्विजः । मातृवत्परदारांश्च परद्रव्याणि लोष्टवत् ॥ ११ ॥
या भुङ्क्ते भुक्तमेतेषां प्राजापत्यं विशोधनम् । अगम्यागमनं कृत्वा अभक्ष्यस्य च भक्षणम्॥१३॥
शुद्धिश्चान्द्रायणं कृत्वा अथर्वोक्ते तथैव च । अग्निहोत्रं त्यजेद्यस्तु स नरो वीरहा भवेत् ॥ १४ ॥
तस्य शुद्धिर्विधातव्या नान्या चान्द्रायणादृते । विवाहोत्सवयज्ञेषु अन्तरा मृतसूतके ॥ १५ ॥
सद्यः शुद्धिं विजानीयात्पूर्वसङ्कल्पितं च यत् । देवद्रोण्यां विवाहे च यज्ञेषु प्रततेषु च ॥ १६ ॥

(१०) संवर्तस्मृति ।

स्वभावाद्विचरेद्यत्र कृष्णसारः सदा मृगः । धर्मदेशः स विज्ञेयो द्विजानां धर्मसाधनम् ॥ ४ ॥
सन्ध्यां प्रातः सनक्षत्रामुपासीत यथाविधि । सादित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्करे ॥ ६ ॥
तिष्ठन्पूर्वं जपं कुर्यात्सावित्रीमार्कदर्शनात् । आसीनः पश्चिमां सन्ध्यां सम्यगृक्षविभावनात् ॥ ७ ॥
सायं प्रातस्तु भिक्षेत ब्रह्मचारी सदा व्रती । निवेद्य गुरवेऽश्नीयात्प्राङ्मुखो वाग्यतः शुचिः ॥ ११ ॥
सायं प्रातर्द्विजातीनामशनं श्रुतिनोदितम् । नान्तरा भोजनं कुर्यादग्निहोत्री समाहितः ॥ १२ ॥
शूद्रः शुद्ध्यति हस्तेन वैश्यो दन्तेषु वारिभिः । कण्ठागतैः क्षत्रियस्तु आचान्तः शुचितामियात्॥२०॥
ब्रह्मचारी तु यो गच्छेत्स्त्रियं कामप्रपीडितः । प्राजापत्यं चरेत्कृच्छ्रमथ त्वेकं सुयन्त्रितः ॥ २४ ॥
ब्रह्मचारी तु योऽश्नीयान्मधु मांसं कथञ्चन । प्राजापत्यं तु कृत्वाऽसौ मौञ्जीहोमेन शुध्यति ॥ २५ ॥
ब्राह्मेणैव विवाहेन शीलरूपगुणान्विताम् । अतः पञ्चमहायज्ञान्कुर्यादहरहर्द्विजः ॥ ३५ ॥
न हापयेत्तु ताञ्छक्तः श्रेयस्कामः कदाचन । हानिं तेषां तु कुर्वीत सदा मरणजन्मनोः ॥ ३६ ॥
विप्रो दशाहमासीत दानाध्ययनवर्जितः । क्षत्रियो द्वादशाहानि वैश्यः पञ्चदशैव तु ॥ ३७ ॥

शूद्रः शुध्यति मासेन संवर्त्तवचनं यथा । प्रेतस्य तु जलं देयं स्नात्वा तद्गोत्रजैः सह ॥ ३८ ॥
प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा । चतुर्थेऽहनि कर्तव्यमस्थिसञ्चयनं द्विजैः ॥ ३९ ॥
ततः सञ्चयनादूर्ध्वमङ्गस्पर्शो विधीयते । चतुर्थेहनि विप्रस्य षष्ठे वै क्षत्रियस्य च ॥ ४० ॥
भूताभयप्रदानेन सर्वान्कामानवाप्नुयात् । दीर्घमायुश्च लभते सुखी चैव सदा भवेत् ॥ ५३ ॥
धान्योदकप्रदायी च सर्पिर्दः सुखमेधते । अलंकृतस्त्वलंकारं दाताऽऽप्नोति महत्फलम् ॥ ५४ ॥
पादुकोपानहौ छत्रशयनान्यासनानि च । विविधानि च यानानि दत्त्वा द्रव्यपतिर्भवेत् ॥ ५७ ॥
अलंकृत्य तु यः कन्यां वराय सदृशाय वै । ब्राह्मेण तु विवाहेन दद्यात्तां तु सुपूजिताम् ॥ ६१ ॥
स कन्यायाः प्रदानेन श्रेयो विन्दन्ति पुष्कलम्।साधुवादं स वै सद्भिः कीर्तिं प्राप्नोति पुष्कलाम् ६२
ज्योतिष्टोमातिरात्राणां शतं शतगुणीकृतम् । प्राप्नोति पुरुषो दत्त्वा होममन्त्रैश्च संस्कृताम् ॥ ६३ ॥
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी । दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥ ६६ ॥
माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च । त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥ ६७॥
तस्माद्विवाहयेत्कन्यां यावन्नर्तुमती भवेत् । विवाहो ह्यष्टवर्षायाः कन्यायास्तु प्रशस्यते ॥ ६८ ॥
तैलामलकदाता च स्नानाभ्यङ्गप्रदायकः । नरः प्रहृष्टश्चासीत सुभगश्चोपजायते ॥ ६९ ॥
धेनुं च यो द्विजे दद्यादलंकृत्य पयस्विनीम् । कांस्यवस्त्रादिभिर्युक्तां स्वर्गलोके महीयते ॥ ७२ ॥
भूमिं सस्यवतीं श्रेष्ठां ब्राह्मणे वेदपारगे । गां दत्त्वार्द्धप्रसूतां च स्वर्गलोके महीयते ॥ ७३ ॥
यावन्ति सस्यमूलानि गोरोमाणि च सर्वशः । नरस्तावन्ति वर्षाणि स्वर्गलोके महीयते ॥ ७४ ॥
यो ददाति शफै रौप्यैर्हेमशृङ्गीमरोगिणीम् । सवत्सां वाससावीतां सुशीलां गां पयस्विनीम् ॥ ७५ ॥
तस्यां यावन्ति रोमाणि सवत्सायां दिवं गतः । तावन्ति वत्सरान्तानि स नरो ब्रह्मणोन्तिके ॥७६॥
यो ददाति बलीवर्दमुक्तेन विधिना शुभम् । अव्यङ्गं गोप्रदानेन दत्तं दशगुणं फलम् ॥ ७७ ॥
अन्नदस्तु भवेन्नित्यं सुतृप्तो निभृतः सदा । अम्बुदश्च सुखी नित्यं सर्वकर्मसमन्वितः ॥ ८० ॥
सर्वेषामेव दानानामन्नदानं परं स्मृतम् । सर्वेषामेव जन्तूनां यतस्तज्जीवितं परम् ॥ ८१ ॥
शुचिगन्धसमायुक्तो अवाग्दुष्टस्सदा भवेत् । पादशौचं तु यो दद्यात्तथा तु गुदलिङ्गयोः ॥ ८५ ॥
यः प्रयच्छति विप्राय शुद्धबुद्धिस्सदा भवेत् । औषधं पथ्यमाहारं स्नेहाभ्यङ्गं प्रतिश्रयम् ॥ ८६ ॥
यः प्रयच्छति रोगिभ्यः स भवेद्व्याधिवर्जितः । गुडमिक्षुरसं चैव लवणं व्यंजनानि च ॥ ८७ ॥
विद्यादानेन सुमतिर्ब्रह्मलोके महीयते । अन्योन्यान्नप्रदा विप्रा अन्योन्यप्रतिपूजकाः ॥ ८९ ॥
वलीपलितसंयुक्तस्तृतीयं तु समाश्रयेत् । वनं गच्छेत्ततः प्राज्ञः सभार्यस्त्वेक एव वा ॥ १०२ ॥
गृहीत्वा चाग्निहोत्रं च होमं तत्र न हापयेत् । कृत्वा चैव पुरोडाशं वन्यैर्मेध्यैर्यथाविधि ॥ १०३ ॥
भिक्षां च भिक्षवे दद्याच्छाकमूलफलादिभिः । कुर्यादध्ययनं नित्यमग्निहोत्रपरायणः ॥ १०४ ॥
इष्टिं पार्वायणीयां तु प्रकुर्यात्प्रतिपर्वसु । उषित्वैवं वने विप्रो विधिज्ञः सर्वकर्मसु ॥ १०५ ॥
चतुर्थमाश्रमं गच्छेज्जितक्रोधो जितेन्द्रियः । अग्निमात्मनि संस्थाप्य द्विजः प्रव्रजितो भवेत् ॥१०६॥
वेदाभ्यासरतो नित्यमात्मविद्यापरायण' । अष्टौ भिक्षाः समादाय स मुनिः सप्त पञ्च वा ॥१०७ ॥
अद्भिः प्रक्षाल्य ताः सर्वा भुञ्जीत सुसमाहितः । अरण्ये निर्जने तत्र पुनरासीत भुक्तवान् ॥१०८॥
एकाकी चिन्तयेन्नित्यं मनोवाक्कायकर्मभिः । मृत्युं च नाभिनन्देत जीवितं वा कथचन ॥ १०९ ॥
अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम् । ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥ ११२ ॥
महापातकिनस्त्वेते तत्संयोगी च पञ्चमः । ब्रह्मघ्नश्च वन गच्छेद्वल्कवासा जटी ध्वजी ॥ ११३ ॥
वन्यान्येव फलान्यश्नन् सर्वकामविवर्जितः । भिक्षार्थी विचरेद्ग्रामं वन्यैर्यदि न जीवति ॥ ११४ ॥
चातुर्वर्ण्ये चरेद्भैक्ष्यं बद्धाञ्जी संयतः सदा । भिक्षास्त्वेवं समादाय वनं गच्छेत्ततः पुनः ॥ ११५॥
वनवासी स पापः स्यात्सदाकालमतन्द्रितः । ख्यापयन्मुच्यते पापाद्ब्रह्महा पापकृत्तमः ॥ ११६ ॥
अनेन तु विधानेन द्वादशाब्दव्रतं चरेत् । सन्नियम्येंद्रियग्रामं सर्वभूतहिते रतः ॥ ११७ ॥
ब्रह्महत्यापनोदाय ततो मुच्येत किल्बिषात् । अतः परं सुरापस्य निष्कृतिं श्रोतुमर्हथ ॥ ११८ ॥
गौड़ी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा । यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः॥११९॥
सुरापस्तु सुरां तप्तां पिबेत्तत्पापमोक्षकः । गोमूत्रमग्निवर्णं वा गोमयं वा तथाविधम् ॥ १२० ॥

घृतश्चैव सुतप्तञ्च क्षीरं वापि तथाविधम्। वत्सरं वा कणानश्नन्सर्वकामविवर्जितः ॥ १२१॥
चान्द्रायणानि वा त्रीणि सुरापो व्रतमाचरेत्। मुच्यते तेन पापेन प्रायश्चित्ते कृते सति॥ १२२॥
स्तेयं कृत्वा सुवर्णस्य स्तेयं राज्ञे निवेदयेत्। ततो मुसलमादाय स्तेनं हन्यात्सकृन्नृपः ॥ १२४॥
यदि जीवति स स्तेनस्ततः स्तेयाद्विमुच्यते। अरण्ये चीरवासा वा चरेद्ब्रह्महणो व्रतम्॥ १२५ ॥
एवं शुद्धिः कृता स्तेये संवर्तवचनं यथा। गुरुतल्पे शयानस्तु तप्ते स्वप्यादयोमये ॥ १२६ ॥
समालिङ्गेत्स्त्रियं वापि दीप्तां कार्ष्णायसीं कृताम्। चांद्रायणानि कुर्याच्च च त्वारि त्रीणि वा द्विजः॥
मुच्यते च ततः पापात्प्रायश्चित्ते कृते सति। एभिः सम्पर्कमायाति यः कश्चित्पापमोहितः ॥१२८॥
तत्तत्पापविशुद्ध्यर्थं तस्य तस्य व्रतं चरेत्। क्षत्रियस्य वधं कृत्वा त्रिभिः कृच्छ्रैर्विशुद्ध्यति ॥१२९ ॥
कुर्याच्चैवानुरूपेण त्रीणि कृच्छ्राणि संयतः। वैश्यहत्यां तु संप्राप्तः कथंचित्काममोहितः ॥ १३० ॥
कृच्छ्रातिकृच्छ्रौ कुर्वीत स नरो वैश्यघातकः। कुर्याच्छूद्रवधे विप्रस्तप्तकृच्छ्रं यथाविधि ॥ १३१ ॥
एवं शुद्धिमवाप्नोति संवर्त्तवचनं यथा। गोघ्नस्यातः प्रवक्ष्यामि निष्कृतिं तत्त्वतः शुभाम्॥ १३२ ॥
व्यापन्नानां बहूनां तु रोधने बन्धनेपि वा। भिषङ्मिथ्योपचारे च द्विगुणं व्रतमाचरेत् ॥ १३७ ॥
एका चेद्बहुभिः काचिद्दैवाद्व्यापादिता क्वचित्। पादं पादं तु हत्यायाश्चरेयुस्ते पृथक्पृथक् ॥१३८॥
यन्त्रणे गोश्चिकित्सार्थे गूढगर्भविमोचने। यदि तत्र विपत्तिः स्यान्न स पापेन लिप्यते ॥ १३९ ॥
औषधं स्नेहमाहारं दद्याद्गोब्राह्मणेषु च। दीयमाने विपत्तिः स्यात्पुण्यमेव न पातकम्॥ १४० ॥
हस्तिनं तुरगं हत्वा महिषोष्ट्रकपींस्तथा। एषां वधे द्विजः कुर्यात्सप्तरात्रमभोजनम् ॥ १४३ ॥
व्याघ्रं श्वानं खरं सिंहमृक्षं सूकरमेव च। एतान्हत्वा द्विजो मोहात्त्रिरात्रेणैव शुद्ध्यति ॥ १४४ ॥
सर्वासामेव जातीनां मृगाणां वनचारिणाम्। अहोरात्रोषितस्तिष्ठेज्जपन्वै जातवेदसम्॥ १४५ ॥
हंसं काकं बलाकां च बर्हिकारण्डवावपि। सारसं चाषभासौ च हत्वा त्रिदिवसं क्षिपेत् ॥ १४६ ॥
चक्रवाकं तथा क्रौंचं सारिकाशुकतित्तिरीन्। श्येनगृध्रानुलूकांश्च पारावतमथापि वा ॥ १४७ ॥
टिट्टिभं जालपादं च कोकिलं कुक्कुटं तथा। एषां वधे नरः कुर्यादेकरात्रमभोजनम्॥ १४८ ॥
पूर्वोक्तानां तु सर्वेषां हंसादीनामशेषतः। अहोरात्रोषितस्तिष्ठेज्जपन्वै जातवेदसम् ॥ १४९ ॥
मण्डूकं चैव हत्वा च सर्पमार्जारमूषकान्। त्रिरात्रोपोषितस्तिष्ठेत्कुर्याद्ब्राह्मणभोजनम्॥ १५० ॥
अनस्थीन्ब्राह्मणो हत्वा प्राणायामेन शुद्ध्यति। अस्थिमतां वधे विप्रः किञ्चिद्दद्याद्विचक्षणः॥१५१॥
यश्चाण्डालीं द्विजो गच्छेत्कथंचित्काममोहितः। त्रिभिः कृच्छ्रैस्तु शुद्ध्येत प्राजापत्यानुपूर्वकैः१५२॥
शैलूषी रजकी चैव वेणुचर्मोपजीविनी। एता गत्वा द्विजो मोहाच्चरेच्चान्द्रायणं व्रतम् ॥ १५५ ॥
क्षत्रियां क्षत्रियो गत्वा तदेव व्रतमाचरेत्। नरो गोगमनं कृत्वा कुर्याच्चान्द्रायणं व्रतम् ॥ १५९ ॥
मातुलानीं तथा श्वश्रूं सुतां वै मातुलस्य च। एता गत्वा स्त्रियो मोहात्पराकेण विशुद्ध्यति॥१६०॥
गुरोर्दुहितरं गत्वा स्वसारं पितुरेव च। तस्या दुहितरं चैव चरेच्चान्द्रायणं व्रतम् ॥ १६१ ॥
पितृव्यदारगमने भ्रातृभार्यागमे तथा। गुरुतल्पव्रतं कुर्यान्निष्कृतिर्नान्यथा भवेत् ॥ १६२ ॥
पितृभार्यां समारुह्य मातृवर्जं नराधमः। भगिनीं मातुराप्तां च स्वसारं चान्यमातृजाम् ॥ १६३ ॥
एतास्तिस्रः स्त्रियो गत्वा तप्तकृच्छ्रं समाचरेत्। कुमारीगमने चैव व्रतमेतत्समाचरेत् ॥ १६४ ॥
पशुवेश्याभिगमने प्राजापत्यं विधीयते। सखिभार्यां समारुह्य श्वश्रूं वा श्यालिकां तथा ॥ १६५ ॥
मातरं योधिगच्छेच्च स्वसारं पुरुषोधमः। न तस्य निष्कृतिर्दद्यात्स्वां चैव तनुजां तथा ॥ १६६ ॥
रजस्वलां तु यो गच्छेद्गर्भिणीं पतितां तथा। तस्य पापविशुद्ध्यर्थमतिकृच्छ्रो विधीयते ॥ १६८ ॥
चाण्डालं पुक्कसं चैव श्वपाकं पतितं तथा। एताः श्रेष्ठाः स्त्रियो गत्वा कुर्याच्चान्द्रायणत्रयम् ॥१७३॥
नृणां विप्रतिपत्तौ च पावनः प्रेत्य चेह च। गोविप्रप्रहते चैव तथा चैवात्मघातिनि ॥ १७७ ॥
नैवाश्रुपतनं कार्यं सद्भिः श्रेयोभिकांक्षिभिः। एषामन्यतमं प्रेतं यो वहेत दहेत वा ॥ १७८ ॥
तथोदकक्रियां कृत्वा चरेच्चान्द्रायणव्रतम्। तच्छवं केवलं स्पृष्ट्वा अश्रु नो पातितं यदि ॥ १७९ ॥
चाण्डालं पतितं स्पृष्ट्वा शवमन्त्यजमेव च। उदक्यां सूतिकां नारीं सवासाः स्नानमाचरेत् ॥१८४॥
चाण्डालभाण्डसंस्पृष्टं पिबेत्कूपगतं जलम्। गोमूत्रयावकाहारस्त्रिरात्रेण विशुद्ध्यति ॥ १८८ ॥
अन्त्यजैः स्वीकृते तीर्थे तडागेषु नदीषु च। शुद्ध्यते पञ्चगव्येन पीत्वा तोयमकामतः ॥ १८९ ॥

कूपे विण्मूत्रसंस्पृष्टः प्राश्य चापो द्विजातयः । त्रिरात्रेणैव शुद्ध्यन्ति कुम्भे सान्तपनं स्मृतम् ॥ १९१ ॥
वापीकूपतडागानामुपहतानां विशोधनम् । अपां घटशतोद्धारः पञ्चगव्यं च निक्षिपेत् ॥ १९२ ॥
स्त्रीक्षीरमाविकं पीत्वा सन्धिन्याश्चैव गोः पयः । तस्य शुद्धिस्त्रिरात्रेण द्विजानां चैव भक्षणे ॥ १९३ ॥
विण्मूत्रभक्षणे चैव प्राजापत्यं समाचरेत् । श्वकाकोच्छिष्टगोच्छिष्टभक्षणे तु त्र्यहं द्विजः ॥ १९४ ॥
बिडालमूषिकोच्छिष्टे पञ्चगव्यं पिबेद्द्विजः । शूद्रोच्छिष्टं तथा भुक्त्वा त्रिरात्रेणैव शुद्ध्यति ॥ १९५ ॥
पलाण्डुं लशुनं जग्ध्वा तथैव ग्रामकुक्कुटम् । छत्राकं विड्वराहं च चरेत्सान्तपनं द्विजः ॥ १९६ ॥
श्वबिडालखरोष्ट्राणां कपेर्गोमायुकाकयोः । प्राश्य मूत्रपुरीषे वा चरेच्चान्द्रायणं व्रतम् ॥ १९७ ॥
अन्नं पर्युषितं भुक्त्वा केशकीटैरुपद्रुतम् । पतितैः प्रेक्षितं वापि पञ्चगव्यं द्विजः पिबेत् ॥ १९८ ॥
अन्त्यजाभाजने भुक्त्वा ह्युदक्याभाजने तथा। गोमूत्रयावकाहारो मासार्द्धेन विशुद्ध्यति ॥ १९९ ॥
गोमांसं मानुषं चैव शुनो हस्तात्समाहृतम् । अभक्ष्यं तद्भवेत्सर्वं भुक्त्वा चान्द्रायणं चरेत् ॥ २०० ॥
चाण्डाले संकरे विप्रः श्वपाके पुक्कसेपि वा । गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति ॥ २०१ ॥
यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः । तत्र तत्र तिलैर्होमो गायत्र्या प्रत्यहं द्विजः ॥ २०४ ॥
सुवर्णदानं गोदानं भूमिदानं तथैव च । नाशयन्त्याशु पापानि ह्यन्यजन्मकृतान्यपि ॥ २०७ ॥
अयने विषुवे चैव व्यतीपाते दिनक्षये । चन्द्रसूर्यग्रहे चैव दत्तं भवति चाक्षयम् ॥ २११ ॥
अमावास्यां च द्वादश्यां संक्रान्तौ च विशेषतः । एताः प्रशस्तास्तिथयो भानुवारस्तथैव च ॥ २१२ ॥
तत्र स्नानं जपो होमो ब्राह्मणानां च भोजनम् । उपवासस्तथा दानमेकैकं पावयेन्नरम् ॥ २१३ ॥
अयाज्ययाजनं कृत्वा भुक्त्वा चान्नं विगर्हितम् । गायत्र्यष्टसहस्रं तु जपं कृत्वा विशुद्ध्यति ॥ २२३ ॥
प्रणवेन च संयुक्ता व्याहृतीः सप्त नित्यशः । गायत्रीं शिरसा सार्द्धं मनसा त्रिः पठेद्द्विजः ॥ २२६ ॥
निगृह्य चात्मनः प्राणान्प्राणायामो विधीयते । प्राणायामत्रयं कुर्यान्नित्यमेव समाहितः ॥ २२७ ॥

(११) कात्यायनस्मृति-१ खण्ड ।

त्रिवृदूर्ध्वं वृतं कार्यं तन्तुत्रयमधोवृतम् । त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥ २ ॥
पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम् । तद्धार्यमुपवीतं स्यान्नातो लम्बं न चोच्छ्रितम् ॥ ३ ॥
सदोपवीतिना भाव्यं सदा बद्धशिखेन च । विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ॥ ४ ॥
तदासीनेन कर्त्तव्यं न प्रह्वेण न तिष्ठता । गौरी पद्मा शची मेधा सावित्री विजया जया ॥ ११ ॥
देवसेना स्वधा स्वाहा मातरो लोकमातरः । धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह ॥ १२ ॥
गणेशेनाधिका ह्येता वृद्धौ पूज्याश्चतुर्दश । कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः ॥ १३ ॥

कात्यायनस्मृति-८ खण्ड ।

वर्णे ज्येष्ठे न बह्वीभिः सवर्णाभिश्च जन्मतः । कार्यमग्निच्युतेराभिः साध्वीभिर्मन्थनं पुनः ॥ ६ ॥

कात्यायनस्मृति-१० खण्ड ।

नारदाद्युक्तवार्क्षं यदष्टांगुलमपाटितम् । सत्वचं दन्तकाष्ठं स्यात्तदग्रेण प्रधावयेत् ॥ २ ॥
उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः । परिजप्य च मन्त्रेण भक्षयेद्दन्तधावनम् ॥ ३ ॥
आयुर्बलं यशो वर्च्चः प्रजाः पशून्वसूनि च । ब्रह्म प्रज्ञाञ्च मेधाञ्च त्वन्नो धेहि वनस्पते ॥ ४ ॥
स्वर्धुन्यम्भःसमानि स्युः सर्वाण्यम्भांसि भूतले । कूपस्थान्यपि सोमार्कग्रहणेनात्र संशयः ॥ १४ ॥

कात्यायनस्मृति-१३ खण्ड ।

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥ ३ ॥
श्राद्धं वा पितृयज्ञः स्यात्पित्र्यो बलिरथापि वा । यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स चोच्यते ॥ ४ ॥
मुनिभिर्द्विरशनमुक्तं विप्राणां मर्त्यवासिनां नित्यम् । अहनि च तथा तमस्विन्यां सार्द्धप्रथमयामान्तः ९

कात्यायनस्मृति-१६ खण्ड ।

ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते । ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते ॥ ९ ॥
यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत् । यवानामिव गोधूमा व्रीहीणामिव शालयः ॥ २१ ॥

कात्यायनस्मृति–१६ खण्ड।

स्वपितुः पितृकृत्येषु ह्यधिकारी न विद्यते। न जीवन्तमतिक्रम्य किंचिद्दद्यादिति श्रुतिः॥ १२॥
पितामहे जीवति च पितुः प्रेतस्य निर्वपेत्। पितुस्तस्य च वृत्तस्य जीवेच्चेत्प्रपितामहः॥ १३॥
पितुः पितुः पितुश्चैव तस्यापि पितुरेव च। कुर्यात्पिण्डत्रयं यस्य संस्थितः प्रपितामहः॥ १४॥
जीवन्तमतिदद्याद्वा प्रेतायान्नोदके द्विजः। पितुः पितृभ्यो वा दद्यात्स पितेत्यपरा श्रुतिः॥ १५॥
पितामहः पितुः पश्चात्पञ्चत्वं यदि गच्छति। पौत्रेणैकादशाहादि कर्त्तव्यं श्राद्धषोडषम्॥ १६॥
नैतत्पौत्रेण कर्त्तव्य पुत्रवांश्चेत्पितामहः। पितुः सपिण्डनं कृत्वा कुर्यान्मासानुमासिकम्॥ १७॥

कात्यायनस्मृति–१८ खण्ड।

स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु। पिण्डानोद्वहनात्तेषां तस्याभावे तु तत्क्रमात्॥ २१॥

कात्यायनस्मृति–१९ खण्ड।

या वा स्याद्वीरसूरासामाज्ञासम्पादिनी प्रिया। दक्षा प्रियंवदा शुद्धा तामत्र विनियोजयेत्॥ ४॥

कात्यायनस्मृति–२० खण्ड।

मृतायामपि भार्यायां वैदिकाग्निं न हि त्यजेत्। उपाधिनापि तत्कर्म यावज्जीवं समाचरेत्॥ ९॥
यो दहेदग्निहोत्रेण स्वेन भार्यां कथंचन। सा स्त्री संपद्यते तेन भार्या वास्य पुमान् भवेत्॥ ११॥

कात्यायनस्मृति–२२ खण्ड।

एवमुक्त्वा व्रजेयुस्ते गृहाल्लघु पुरःसराः। स्नानाग्निस्पर्शनाज्याशैः शुध्येयुरितरे कृतैः॥ १०॥

कात्यायनस्मृति–२३ खण्ड।

विदेशमरणेस्थीनि ह्याहृत्याभ्यज्य सर्पिषा। दाहयेदूर्णयाच्छाद्य पात्रन्यासादि पूर्ववत्॥ २॥
अस्थ्नामलाभे पर्णानि सकलान्युक्तया वृता। भर्जयेदस्थिसंख्यानि ततः प्रभृति सूतकम्॥ ३॥

कात्यायनस्मृति–२४ खण्ड।

कृतमौदनसक्त्वादि तण्डुलादि कृताकृतम्। व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा बुधैः॥ ३॥
न त्यजेत्सूतके कर्म ब्रह्मचारी स्वकं क्वचित्। न दीक्षण्यात् परं यज्ञे न कृच्छ्रादितपश्चरन्॥ ५॥
पितर्यपि मृते नैषां दोषो भवति कर्हिचित्। आशौचं कर्मणोऽन्ते स्यात्र्यहं वा ब्रह्मचारिणः॥ ६॥
कर्तृसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम्। प्रत्याब्दिकं च शेषेषु पिण्डाः स्युः षडिति स्थितिः॥१४॥

कात्यायनस्मृति–२५ खण्ड।

सशिखं वपनं कार्यमास्नानाद्ब्रह्मचारिणा। आशरीरविमोक्षाय ब्रह्मचर्यं न चेद्भवेत्॥ १४॥
अनिष्ट्वा नवयज्ञेन नवान्नं योऽत्त्यकामतः। वैश्वानरश्चरुस्तस्य प्रायश्चित्तं विधीयते॥ १८॥

कात्यायनस्मृति–२६ खण्ड।

शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते। धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः॥ ९॥
व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः। यवाश्चौषधयः सप्त विपदं घ्नन्ति धारिताः॥ १३॥

कात्यायनस्मृति–२७ खण्ड।

यच्छ्राद्धं कर्मणामादौ या चान्ते दक्षिणा भवेत्। अमावास्यां द्वितीयं यदन्वाहार्यं तदुच्यते॥ १॥
अनूचो माणवो ज्ञेय एणः कृष्णमृगः स्मृतः। रुरुर्गौरमृगः प्रोक्तस्तम्बलः शोण उच्यते॥ ११॥

कात्यायनस्मृति–२८ खण्ड।

अक्षतासु यवाः प्रोक्ता भ्रष्टा धाना भवन्ति ते। भ्रष्टासु व्रीहयो लाजा घटः खाण्डिक उच्यते॥१॥

कात्यायनस्मृति–२९ खण्ड।

साक्षतं सुमनोयुक्तमुदकं दधिसंयुतम्। अर्घ्यं दधिमधुभ्यां च मधुपर्को विधीयते॥ १८॥
कांस्येनैवार्हणीयस्य निनयेदर्घ्यमञ्जलौ। कांस्यापिधानं कांस्यस्थं मधुपर्कं समर्पयेत्॥ १९॥

(१२) बृहस्पतिस्मृति ।

सुवर्णदानं गोदानं भूमिदानं च वासव । एतत्प्रयच्छमानस्तु सर्वपापैः प्रमुच्यते ॥ ४ ॥
दशहस्तेन दण्डेन त्रिंशद्दण्डा निवर्त्तनम् । दश तान्येव विस्तारो गोचर्मैतन्महाफलम् ॥ ८ ॥
सवृषं गोसहस्रं तु यत्र तिष्ठत्यतन्द्रितम् । बालवत्साप्रसूतानां तद्गोचर्म इति स्मृतम् ॥ ९ ॥
अन्नदाः सुखिनो नित्यं वस्त्रदश्चैव रूपवान् । स नरस्सर्वदो भूप यो ददाति वसुन्धराम् ॥ १३ ॥
आदित्यो वरुणो वह्निर्ब्रह्मा सोमो हुताशनः । शूलपाणिश्च भगवानभिनन्दति भूमिदम् ॥ १६ ॥
काङ्क्षन्ति पितरः सर्वे नरकाद्भयभीरवः । गयां यास्यति यः पुत्रः स नस्त्राता भविष्यति ॥ २० ॥
एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत् । यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥ २१ ॥
लोहितो यस्तु वर्णेन पुच्छाग्रे यस्तु पाण्डुरः । श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥२२ ॥
ऊर्ध्वं चाधोवतिष्ठेत यावदाभूतसंप्लवम् । अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ॥३०॥
लोकास्त्रयस्तेन भवन्ति दत्ता यःकाञ्चनं गां च महीं च दद्यात् ।षडशीति सहस्राणां योजनानां वसुन्धराम्॥
स्वयं दत्ता तु सर्वत्र सर्वकामप्रदायिनी । भूमिं यः प्रतिगृह्णाति भूमिं यश्च प्रयच्छति ॥ ३२ ॥
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ । सर्वेषामेव दानानामेकजन्मानुगं फलम् ॥ ३३ ॥
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् । यो न हिंस्यादहं ह्यात्मा भूतग्रामं चतुर्विधम् ॥ ३४ ॥
अविद्वान्प्रतिगृह्णाति भस्मीभवति काष्ठवत् । यस्य चैव गृहे मूर्खो दूरे चापि बहुश्रुतः ॥ ६० ॥
बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः । कुलं तारयते धीरः सप्तसप्त च वासव ॥ ६१ ॥
दीपालोकप्रदानेन वपुष्मान्स भवेन्नरः । प्रेक्षणीयप्रदानेन स्मृतिं मेधां च विन्दति ॥ ६६ ॥
कृत्वापि पापकर्माणि यो दद्यादन्नमर्थिने । ब्राह्मणाय विशेषेण न स पापेन लिप्यते ॥ ६७ ॥

(१३) पाराशरस्मृति-१ अध्याय ।

धर्मं कथय मे तात अनुग्राह्यो ह्यहं तव । श्रुता मे मानवा धर्मा वासिष्ठाः काश्यपास्तथा । १२ ॥
गार्गीया गौतमीयाश्च तथा चौशनसाः स्मृताः । अत्रेर्विष्णोश्च संवर्ताद्दाक्षादङ्गिरसस्तथा ॥ १३ ॥
शातातपाच्च हारीताद्याज्ञवल्क्यात्तथैव च । आपस्तंवकृताः धर्माः शङ्खस्य लिखितस्य च ॥ १४ ॥
कात्यायनकृताश्चैव तथा प्राचेतसान्मुनेः । श्रुता ह्येते भवत्प्रोक्ताः श्रौतार्था मे न विस्मृताः ॥१९ ॥
अन्ये कलियुगे नृणां युगरूपाऽनुसारतः । तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ॥ २३ ॥
द्वापरे यज्ञमेवाहुर्दानमेक कलौ युगे । कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः ॥ २४ ॥
द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः । त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ॥ २५ ॥
इष्टो वा यदि वा द्वेष्यो मूर्खः पण्डित एव वा । संप्राप्तो वैश्वदेवान्ते सोऽतिथिः स्वर्गसंक्रमः ॥४० ॥
दूराच्चोपगतं श्रान्तं वैश्वदेव उपस्थितम् । अतिथिं तं विजानीयान्नातिथिः पूर्वमागतः ॥ ४१ ॥
नैकग्रामीणमतिथिं संगृह्णीत कदाचन । अनित्यमागतो यस्मात्तस्मादऽतिथिरुच्यते ॥ ४२ ॥
अतिथिं तत्र संप्राप्तं पूजयेत्स्वागतादिना । तथासनप्रदानेन पादप्रक्षालनेन च ॥ ४३ ॥
श्रद्धया चान्नदानेन प्रियप्रश्नोत्तरेण च । गच्छतश्चानुयानेन प्रीतिमुत्पादयेद्गृही ॥ ४४ ॥
अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते । पितरस्तस्य नाश्नन्ति दश वर्षाणि पञ्च च ॥ ४५ ॥
काष्ठभारसहस्रेण घृतकुम्भशतेन च । अतिथिर्यस्य भग्नाशस्तस्य होमो निरर्थकः ॥ ४६ ॥
न पृच्छेद्गोत्रचरणे न स्वाऽध्यायं श्रुतं तथा । हृदये कल्पयेद्देवं सर्वदेवमयो हि सः ॥ ४८ ॥
वैश्वदेवे तु संप्राप्ते भिक्षुके गृहमागते । उद्धृत्य वैश्वदेवार्थं भिक्षां दत्त्वा विसर्जयेत् ॥ ५० ॥
यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ । तयोरन्नमदत्त्वा च भुक्त्वा चान्द्रायणं चरेत् ॥ ५१ ॥
दद्याच्च भिक्षात्रितयं परिव्राट् ब्रह्मचारिणाम् ।:इच्छया च ततो दद्याद्विभवे सत्यवारितम् ॥ ५२ ॥
यतिहस्ते जलं दद्याद्भैक्ष्यं दद्यात्पुनर्जलम् । तद्भैक्ष्यं मेरुणा तुल्यं तज्जलं सागरोपमम् ॥ ५३ ॥
वैश्वदेवकृतं पापं शक्तो भिक्षुर्व्यपोहितुम् । न हि भिक्षुकृतं दोषं वैश्वदेवो व्यपोहति ॥ ५५ ॥
अकृत्वा वैश्वदेवं तु भुञ्जते ये द्विजातयः । तेषामन्नं न भुञ्जीत काकयोनिं व्रजन्ति ते ॥ ५६ ॥
अकृत्वा वैश्वदेवं तु भुञ्जते ये द्विजाधमाः । सर्वे ते निष्फला ज्ञेयाः पतन्ति नरकेऽशुचौ ॥ ५७ ॥
वैश्वदेवविहीना ये आतिथ्येन बहिष्कृताः । सर्वे ते नरकं यान्ति काकयोनिं व्रजन्ति च ॥ ५८ ॥

शिरो वेष्ट्य तु यो भुङ्क्ते दक्षिणाभिमुखस्तु यः। वामपादकरः स्थित्वा तद्वै रक्षांसि भुञ्जते ॥ ५९ ॥
यतये काञ्चनं दत्त्वा ताम्बूलं ब्रह्मचारिणे। चोरेभ्योऽप्यभयं दत्त्वा दातापि नरकं व्रजेत् ॥ ६० ॥
चोरो वा यदि चाण्डालः शत्रुर्वा पितृघातकः। वैश्वदेवे तु संप्राप्ते सोऽतिथिः स्वर्गसंक्रमः ॥ ६२ ॥
न गृह्णाति तु यो विप्रोऽतिथिं वेदपरायणम्। अदत्तं चान्नपात्रं तु भुक्त्वा भुङ्क्ते तु किल्बिषम् ६३॥
अव्रता ह्यनधीयाना यत्र भैक्षचरा द्विजाः। तं ग्रामं दण्डयेद्राजा चौरभक्तप्रदो हि सः ॥ ६६ ॥
शूद्रस्य द्विजशुश्रूषा परमो धर्म उच्यते। अन्यथा कुरुते किञ्चित्तद्भवेत्तस्य निष्फलम् ॥ ७१ ॥

पाराशरस्मृति—२ अध्याय।

ब्राह्मणश्चेत्कृषिं कुर्यात्तन्महादोषमाप्नुयात्। अष्टागवं धर्महलं षड्गवं वृत्तिलक्षणम् ॥ ८ ॥
चतुर्गवं नृशंसानां द्विगवं गोजिघांसुवत्। द्विगवं वाहयेत्पादं मध्याह्नं तु चतुर्गवम् ॥ ९ ॥
षड्गवं तु त्रियामाहेऽष्टभिः पूर्णं तु वाहयेत्। न याति नरकेष्वेवं वर्तमानस्तु वै द्विजः ॥ १० ॥

पाराशरस्मृति—३ अध्याय।

अतः शुद्धिं प्रवक्ष्यामि जनने मरणे तथा। दिनत्रयेण शुध्यंति ब्राह्मणाः प्रेतसूतके ॥ १ ॥
क्षत्रियो द्वादशाहेन वैश्यः पञ्चदशाहकैः। शूद्रः शुध्यति मासेन पराशरवचो यथा ॥ २ ॥
जन्मकर्मपरिभ्रष्टः सन्ध्योपासनवर्जितः। नामधारकविप्रस्तु दशाहं सूतकी भवेत् ॥ ६ ॥
देशान्तरगतो विप्रः प्रयासात् कालकारितात्। देहनाशमनुप्राप्तस्तिथिर्न ज्ञायते यदि ॥ १३ ॥
कृष्णाष्टमी त्वमावास्या कृष्णा चैकादशी च या। उदकं पिण्डदानं च तत्र श्राद्धं च कारयेत्॥१४॥
अजातदंता ये बाला ये च गर्भाद्विनिस्सृताः। न तेषामग्निसंस्कारो नाशौचं नोदकक्रिया ॥ १५ ॥
यदि गर्भो विपद्येत स्रवते वापि योषितः। यावन्मासं स्थितो गर्भो दिनं तावत्तु सूतकम् ॥ १६ ॥
आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः। अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत् ॥ १७ ॥
आदन्ताज्जन्मतः सद्य आचूडान्नैशिकी स्मृता। त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् ॥ १९ ॥
प्रसवे गृहमेधी तु न कुर्यात्सङ्करं यदि। दशाहाच्छुध्यते माता त्ववगाह्य पिता शुचिः ॥ २५ ॥
सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम्। सूतकं मातुरेवस्यादुपस्पृश्य पिता शुचिः ॥ २६ ॥
यदि पत्न्यां प्रसूतायां सम्पर्कं कुरुते द्विजः। सूतकं तु भवेत्तस्य यदि विप्रः षडङ्गवित् ॥ २७ ॥
विवाहोत्सवयज्ञेषु त्वन्तरामृतसूतके। पूर्वसङ्कल्पितं द्रव्यं दीयमानं न दुष्यति ॥ २९ ॥
अन्तरा तु दशाहस्य पुनर्मरणजन्मनी। तावत्स्यादशुचिर्विप्रो यावत्पूर्वं न गच्छति ॥ ३० ॥
ब्राह्मणार्थं विपन्नानां बन्दीगोग्रहणे तथा। आहवेषु विपन्नानामेकरात्रमशौचकम् ॥ ३१ ॥
अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुद्ध्यति ॥ ४४ ॥

पाराशरस्मृति—४ अध्याय।

अतिमानादतिक्रोधात्स्नेहाद्वा यदि वा भयात्। उद्बध्नीयात्स्त्री पुमान्वा गतिरेषा विधीयते ॥ १ ॥
पूयशोणितसंपूर्णे त्वन्धे तमसि मज्जति। षष्टिवर्षसहस्राणि नरकं प्रतिपद्यते ॥ २ ॥
नाशौचं नोदकं नाग्निं नाश्रुपातं च कारयेत्। वोढारोऽग्निप्रदातारः पाशच्छेदकरास्तथा ॥ ३ ॥
तप्तकृच्छ्रेण शुद्ध्यन्तीत्येवमाह प्रजापतिः। गोभिर्हतं तथोद्बद्धं ब्राह्मणेन तु घातितम् ॥ ४ ॥
संस्पृशन्ति तु ये विप्रा वोढारश्चाग्निदाश्च ये। अन्ये ये चानुगन्तारः पाशच्छेदकराश्च ये ॥ ५ ॥
तप्तकृच्छ्रेण शुद्धास्ते कुर्युर्ब्राह्मणभोजनम्। अनडुत्सहितां गां च दद्युर्विप्राय दक्षिणाम् ॥ ६ ॥
त्र्यहमुष्णं पिबेद्वारि त्र्यहमुष्णं पयः पिबेत्। त्र्यहमुष्णं पिबेत्सर्पिर्वायुभक्षो दिनत्रयम् ॥ ७ ॥
षट्पलं तु पिबेदंभस्त्रिपलं तु पयः पिबेत्। पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रं विधीयते ॥ ८ ॥
ऋतुस्नाता तु या नारी भर्त्तारं नोपसर्पति। सा मृता नरकं याति विधवा च पुनः पुनः ॥ १४ ॥
ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥ १५ ॥
अदुष्टां पतितां भार्यां यौवने यः परित्यजेत्। सप्तजन्म भवेत्स्त्रीत्वं वैधव्यञ्च पुनः पुनः ॥ १६ ॥
पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत्। आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत् ॥ १७ ॥
अपृष्ट्वा चैव भर्तारं या नारी कुरुते व्रतम्। सर्वं तद्राक्षसान्गच्छेदित्येवं मनुरब्रवीत् ॥ १८ ॥
औरसः क्षेत्रजश्चैव दत्तः कृत्रिमकः सुतः। दद्यान्माता पिता वापि स पुत्रो दत्तको भवेत् ॥ २४ ॥

परिवित्तिः परीवेत्ता यया च परिविद्यते । सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ॥ २९ ॥
तिस्रः कोट्योऽर्धकोटी च यानि लोमानि मानवे । तावत्कालं वसेत्स्वर्गे भर्त्तारं याऽनुगच्छति ॥३२॥
व्यालग्राही यथा व्यालं बलादुद्धरते बिलात् । एवं स्त्री पतिमुद्धृत्य तेनैव सह मोदते ॥ ३३ ॥

पाराशरस्मृति-५ अध्याय ।

चांडालेन श्वपाकेन गोभिर्विप्रैर्हतो यदि । आहिताग्निर्मृतो विप्रो विषेणात्मा हतो यदि ॥ १० ॥
दहेत्तं ब्राह्मणं विप्रो लोकाग्नौ मन्त्रवर्जितम् । स्पृष्ट्वा वोह्य च दग्ध्वा च सपिण्डेषु च सर्वदा ॥११॥
प्राजापत्यं चरेत्पश्चाद्विप्राणामनुशासनात् । दग्ध्वास्थीनि पुनर्गृह्य क्षीरैः प्रक्षालयेद्द्विजः ॥ १२ ॥
स्वेनाऽग्निना स्वमन्त्रेण पृथगेतत्पुनर्दहेत् । आहिताग्निर्द्विजः कश्चित्प्रवसेत्कालचोदितः ॥ १३ ॥

पाराशरस्मृति-६ अध्याय ।

क्रौञ्चसारसहंसांश्च चक्रवाकं च कुक्कुटम् । जालपादं च शरभं हत्वाऽहोरात्रतः शुचिः ॥ २ ॥
बलाकाटिट्टिभौ वापि शुकपारावतावपि । अटीनवकघाती च शुद्ध्यते नक्तभोजनात् ॥ ३ ॥
वृककाककपोतानां सारीतित्तिरघातकः । अन्तर्जले उभे सन्ध्ये प्राणायामेन शुद्ध्यति ॥ ४ ॥
गृध्रश्येनशशादीनामुलूकस्य च घातकः । अपक्वाशी दिनं तिष्ठेत्त्रिकालं मारुताशनः ॥ ५ ॥
वल्गुलीचटकानां च कोकिलाखञ्जरीटके । लाविकारक्तपक्षेषु शुद्ध्यते नक्तभोजनात् ॥ ६ ॥
कारण्डवचकोराणां पिङ्गलाकुररस्य च । भारद्वाजादिकं हत्वा शिवं सम्पूज्य शुद्ध्यति ॥ ७ ॥
भेरुण्डचाषभासांश्च पारावतकपिञ्जलौ । पक्षिणां चैव सर्वेषामहोरात्रमभोजनम् ॥ ८ ॥
हत्वा मूषकमार्जारसर्पाऽजगरडुण्डुभान् । कृसरं भोजयेद्विप्रान् लोहदण्डं च दक्षिणाम् ॥ ९ ॥
शिशुमारं तथा गोधां हत्वा कूर्मं च शल्लकम् । वृन्ताकफलभक्षी वाप्यहोरात्रेण शुध्यति ॥ १० ॥
गजस्य च तुरङ्गस्य महिषोष्ट्रनिपातने । शुध्यते सप्तरात्रेण विप्राणां तर्पणेन च ॥ १२ ॥
कुरङ्गं वानरं सिंहं चित्रं व्याघ्रं च घातयेत् । शुध्यते स त्रिरात्रेण विप्राणां तर्पणेन च ॥ १३ ॥
मृगरोहिद्वराहाणामवेर्वस्तस्य घातकः । अफालकृष्टमश्नीयादहोरात्रमुपोष्य सः ॥ १४ ॥
एवं चतुष्पदानां च सर्वेषां वनचारिणाम् । अहोरात्रोषितस्तिष्ठेज्जपन्वै जातवेदसम् ॥ १५ ॥
चाण्डालखातवापीषु पीत्वा सलिलमग्रतः । अज्ञानाच्चैकनक्तेन त्वहोरात्रेण शुद्ध्यति ॥ २५ ॥
चाण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम् । गोमूत्रयावकाहारस्त्रिरात्राच्छुद्धिमाप्नुयात् ॥ २६ ॥
चाण्डालघटसंस्थं तु यत्तोयं पिबति द्विजः । तत्क्षणात्क्षिपते यस्तु प्राजापत्यं समाचरेत् ॥ २७ ॥
यदि न क्षिपते तोयं शरीरे यस्य जीर्यति । प्राजापत्यं न दातव्यं कृच्छ्रं सान्तपनं चरेत् ॥ २८ ॥
चरेत्सान्तपनं विप्रः प्राजापत्यमनन्तरः । तदर्धं तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् ॥ २९ ॥
भाण्डस्थमन्त्यजानां तु जलं दधि पयः पिबेत् । ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः ॥ ३० ॥
ब्रह्मकूर्चोपवासेन द्विजातीनां तु निष्कृतिः । शूद्रस्य चोपवासेन तथा दानेन शक्तितः ॥ ३१ ॥
पुनर्लेपनखातेन होमजाप्येन शुध्यति । आधारेण च विप्राणां भूमिदोषो न विद्यते ॥ ४२ ॥
चाण्डालैः सह सम्पर्कं मासं मासार्द्धमेव वा । गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति ॥ ४३ ॥
रजकी चर्मकारी च लुब्धकी वेणुजीविनी । चातुर्वर्ण्यस्य तु गृहे त्वविज्ञाता तु तिष्ठति ॥ ४४ ॥
ज्ञात्वा तु निष्कृतिं कुर्यात्पूर्वोक्तस्यार्द्धमेव तु । गृहदाह न कुर्वीत शेषं सर्वं च कारयेत् ॥ ४५ ॥
गृहस्याभ्यन्तरं गच्छेच्चाण्डालो यदि कस्य चित् । तमागाराद्विनिःसार्य मृद्भाण्डं तु विसर्जयेत्॥४६॥
शूद्राणां नोपवासः स्याच्छूद्रो दानेन शुध्यति । अच्छिद्रमिति यद्वाक्यं वदन्ति क्षितिदेवताः ॥५१॥
प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलं हि तत् । जपच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि ॥ ५२ ॥
सर्वं भवति निश्छिद्रं ब्राह्मणैरुपपादितम् । व्याधिव्यसनिनि श्रान्ते दुर्भिक्षे डामरे तथा ॥ ५३ ॥
ततोऽन्यथा भवेद्दोषस्तस्मान्नानुग्रहः स्मृतः । स्नेहाद्वा यदि वा लोभाद्भयादज्ञानतोऽपि वा ॥ ५६ ॥
कुर्वन्त्यनुग्रहं ये तु तत्पापं तेषु गच्छति । शरीरस्यात्यये प्राप्ते वदन्ति नियमं तु ये ॥ ५७ ॥
विप्रैः संपादितं यस्य सपूर्णं तस्य तत्फलम् । अन्नाद्ये कीटसंयुक्ते मक्षिकाकेशदूषिते ॥ ६४ ॥
तदन्तरा स्पृशेच्चापः तदन्नं भस्मना स्पृशेत् । भुञ्जानश्चैव यो विप्रो पादहस्तेन संस्पृशेत् ॥ ६५ ॥

स्वमुच्छिष्टमसौ भुंक्ते यो भुक्ते भुक्तभाजने । पादुकास्थो न भुञ्जीत पर्यङ्कस्थः स्थितोपि वा ॥ ६६ ॥
श्वानचाण्डालदृष्टू चैव भोजनं परिवर्जयेत् । यदन्न प्रतिषिद्धं स्यादन्नशुद्धिस्तथैव च ॥ ६७ ॥
वेदवेदाङ्गविद्भिर्धर्मशास्त्रानुपालकैः । प्रस्थाद्द्वात्रिंशतिर्द्रोणः स्मृतो द्विप्रस्थ आढकः ॥ ७० ॥
ततो द्रोणाऽढकस्यान्नं श्रुतिस्मृतिविदो विदुः । काकश्वानावलीढं तु गवा घ्रातं खरेण वा ॥ ७१ ॥
स्वल्पमन्नं त्यजेद्विप्रः शुद्धिर्द्रोणाढके भवेत् । अन्नस्योद्धृत्य तन्मात्रं यच्च लालाहतं भवेत् ॥ ७२॥
सुवर्णोदकमभ्युक्ष्य हुताशेनैव तापयेत् । हुताशनेन संस्पृष्टं सुवर्णसलिलेन च ॥ ७३ ॥
विप्राणां ब्रह्मघोषेण भोज्यं भवति तत्क्षणात् । स्नेहो वा गोरसो वापि तत्र शुद्धिः कथं भवेत् ॥७४ ॥
अल्पं परित्यजेत्तत्र स्नेहस्योत्पवनेन च । अनलज्वालया शुद्धिर्गोरसस्य विधीयते ॥ ७५ ॥

पाराशरस्मृति—७ अध्याय)

अथातो द्रव्यशुद्धिस्तु पराशरवचो यथा । दारवाणां तु पात्राणां तक्षणाच्छुद्धिरिष्यते ॥ १ ॥
मार्जनाद्यज्ञपात्राणां पाणिना यज्ञकर्मणि । चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन च ॥ २ ॥
चरूणां स्रुक्स्रुवाणां च शुद्धिरुष्णेन वारिणा । भस्मना शुद्ध्यते कांस्यं ताम्रमम्लेन शुध्यति ॥ ३ ॥
रजसा शुध्यते नारी विकलं या न गच्छति । नदी वेगेन शुद्ध्येत लेपो यदि न दृश्यते ॥ ४ ॥
वापीकूपतडागेषु दूषितेषु कथंचन । उद्धृत्य वै कुम्भशतं पञ्चगव्येन शुध्यति ॥ ॥ ९ ॥
अस्तं गते यदा सूर्ये चाण्डालं पतितं स्त्रियम् । सूतिकां स्पृशते चैव कथं शुद्धिर्विधीयते ॥ ११ ॥
जातवेदं सुवर्णं च सोममार्गं विलोक्य च । ब्राह्मणानुमतश्चैव स्नानं कृत्वा विशुध्यति ॥ १२ ॥
उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा पुनः । उपोष्य रजनीमेकां पञ्चगव्येन शुद्ध्यति ॥ २२ ॥
अनुच्छिष्टेन शूद्रेण स्पर्शे स्नानं विधीयते । तेनोच्छिष्टेन संस्पृष्टः प्राजापत्यं समाचरेत् ॥ २३ ॥
भस्मना शुद्ध्यते कांस्यं सुरया यन्न लिप्यते । सुरामात्रेण संस्पृष्टं शुद्ध्यतेऽग्न्युपलेखनैः ॥ २४ ॥
गवाघ्रातानि कांस्यानि श्वकाकोपहतानि च । शुध्यन्ति दशभिः क्षारैः शूद्रोच्छिष्टानि यानि च २५
गण्डूषं पादशौचं च कृत्वा वै कांस्यभाजनं । षण्मासान्भुवि निक्षिप्य उद्धृत्य पुनराहरेत् ॥ २६ ॥
आयसेष्वायसानां च सीसस्याग्नौ विशोधनम् । दन्तमस्थि तथा शृङ्गरौप्यं सौवर्णभाजनम् ॥२७॥
मणिपात्राणि शंखश्चेत्येतान्प्रक्षालयेज्जलैः । पाषाणे तु पुनर्घर्षं एषा शुद्धिरुदाहृता ॥ २८ ॥
मृन्मये दहनाच्छुद्धिर्धान्यानां मार्जनादपि । वेणुवल्कलचीराणां क्षौमकार्पासवाससाम् ॥ २९ ॥
और्णनेत्रपटानां च प्रोक्षणाच्छुद्धिरिष्यते । मुञ्जोपस्करशूर्पाणां शणस्य फलचर्मणाम् ॥ ३० ॥
तृणकाष्ठस्य रज्जूनामुदकाभ्युक्षणं मतम् । तूलिकाद्युपधानानि रक्तवस्त्रादिकानि च ॥ ३१ ॥
रथ्याकर्दमतोयानि नावः पन्थास्तृणानि च ॥ ३५ ॥
मारुतार्केण शुद्ध्यन्ति पक्वेष्टकचितानि च । अदुष्टाः सन्ततधारा वातोद्धूताश्च रेणवः ॥ ३६ ॥
स्त्रियो वृद्धाश्च बालाश्च न दुष्यन्ति कदाचन । क्षुते निष्ठीवने चैव दन्तोच्छिष्टे तथानृते ॥ ३७ ॥

पाराशरस्मृति—८ अध्याय ।

कृत्वा पापं न गूहेत गूह्यमानं विवर्द्धते । स्वल्पं वाथ प्रभूतं वा धर्मविद्भ्यो निवेदयेत् ॥ ६ ॥
अव्रता नाममन्त्राणां जातिमात्रोपजीविनाम् । सहस्रशः समेतानां परिषत्त्वं न विद्यते ॥ १२ ॥
यद्वदन्ति तमोमूढा मूर्खा धर्ममतद्विदः । तत्पापं शतधा भूत्वा तद्वक्तॄनधिगच्छति ॥ १३ ॥
अज्ञात्वा धर्मशास्त्राणि प्रायश्चित्तं ददाति यः । प्रायश्चित्ती भवेत्पूतः किल्बिषं पर्षदि व्रजेत् ॥ १४॥
यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः । ब्राह्मणास्त्वनधीयानास्त्रयस्ते नामधारकाः ॥ २४॥
यथा पण्ढोऽफलः स्त्रीषु यथा गौरूषराफला । यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः ॥२६ ॥
चातुर्विद्यो विकल्पी च अङ्गविद्धर्मपाठकः । त्रयश्चाश्रमिणो मुख्याः पर्षदेषा दशावरा ॥ ३९ ॥
ब्राह्मणार्थे गवार्थे वा यस्तु प्राणान्परित्यजेत् । मुच्यते ब्रह्महत्याया गोप्ता गोर्ब्राह्मणस्य च ॥ ४३॥

पाराशरस्मृति—९ अध्याय ।

अंगुष्ठमात्रस्थूलस्तु बाहुमात्रः प्रमाणतः । आर्द्रस्तु सपलाशश्च दण्ड इत्यभिधीयते ॥ १० ॥

पाराशरस्मृति-१० अध्याय।

एकैकं ह्रासयेद्ग्रासं कृष्णे शुक्ले च वर्द्धयेत्। अमावास्यां न भुञ्जीत ह्येष चान्द्रायणे विधिः ॥ २ ॥
कुक्कुटाण्डप्रमाणं तु ग्रासं वै परिकल्पयेत्। अन्यथा जातदोषेण न धर्मो न च शुद्ध्यते ॥ ३ ॥
प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम्। गोद्वयं वस्त्रयुग्मं च दद्याद्विप्रेषु दक्षिणाम् ॥ ४ ॥
चाण्डालीं वा श्वपाकीं वा अनुगच्छति यो द्विजः। त्रिरात्रमुपवासी च विप्राणामनुशासनात् ॥५॥
सशिखं वपनं कृत्वा प्राजापत्यत्रयं चरेत्। ब्रह्मकूर्चं ततः कृत्वा कुर्याद्ब्राह्मणतर्पणम् ॥ ६ ॥
गायत्रीं च जपेन्नित्यं दद्याद्गोमिथुनद्वयम्। विप्राय दक्षिणां दद्याच्छुद्धिमाप्नोत्यसंशयम् ॥ ७ ॥
गोद्वयं दक्षिणां दद्याच्छुद्धिं पाराशरोब्रवीत्। क्षत्रियो वाथ वैश्यो वा चाण्डालीं गच्छतो यदि ॥८॥
प्राजापत्यद्वयं कुर्याद्दद्याद्गोमिथुनं तथा। श्वपाकीमथ चाण्डालीं शूद्रो वै यदि गच्छति ॥ ९ ॥
प्राजापत्यं चरेत्कृच्छ्रं चतुर्गोमिथुनं ददेत्। मातरं यदि गच्छेत्तु भगिनीं स्वसुतां तथा ॥ १० ॥
एतास्तु मोहितो गत्वा त्रीणि कृच्छ्राणि संचरेत्। चान्द्रायणत्रयं कुर्याच्छिश्नच्छेदेन शुध्यति ११॥
मातृष्वसृगमे चैव आत्ममेढ्रनिकृन्तनम्। अज्ञानेन तु यो गच्छेत्कुर्याच्चान्द्रायणद्वयम् ॥ १२ ॥
दशगोमिथुनं दद्याच्छुद्धिं पाराशरोब्रवीत्। पितृदारान्समारुह्य मातुराप्तां च भ्रातृजाम् ॥ १३ ॥
गुरुपत्नीं स्नुषां चैव भ्रातृभार्यां तथैव च। मातुलानीं सगोत्रां च प्राजापत्यत्रयं चरेत् ॥ १४ ॥
गोद्वयं दक्षिणां दत्त्वा मुच्यते नात्र संशयः। पशुवेश्यादिगमने महिष्युष्ट्रीं कपींस्तथा ॥ १५ ॥
खरीं च सूकरीं गत्वा प्राजापत्यं समाचरेत्। गोगामी च त्रिरात्रेण गामेकां ब्राह्मणो ददेत् ॥१६॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥ २९ ॥

पाराशरस्मृति-११ अध्याय।

अमेध्यरेतो गोमांसं चाण्डालान्नमथापि वा। यदि भुक्तं तु विप्रेण कृच्छ्रं चान्द्रायणं चरेत् ॥ १ ॥
तथैवं क्षत्रियो वैश्यस्तदर्द्धन्तु समाचरेत्। शूद्रोऽप्येवं यदा भुङ्क्ते प्राजापत्यं समाचरेत् ॥ २ ॥
पञ्चगव्यं पिबेच्छूद्रो ब्रह्मकूर्चं पिबेद्द्विजः। एकद्वित्रिचतुर्गावो दद्याद्विप्राद्यनुक्रमात् ॥ ३ ॥
शूद्रान्नं सूतकस्यान्नमभोज्यस्यान्नमेव च। शङ्कितं प्रतिषिद्धान्नं पूर्वोच्छिष्टं तथैव च ॥ ४ ॥
यदि भुक्तं तु विप्रेण अज्ञानादापदा विना। ज्ञात्वा समाचरेत्कृच्छ्रं ब्रह्मकूर्चं तु पावनम् ॥ ५ ॥
व्यालैर्नकुलमार्जारैरन्नमुच्छिष्टितं यदा ॥ तिलदर्भोदकैः प्रोक्ष्य शुध्यते नात्र संशयः ॥ ६ ॥
पीयूषं श्वेतलशुनं वृन्ताकफलगृञ्जने। पलाण्डुं वृक्षनिर्यासान्देवस्वं कवकानि च ॥ १० ॥
उष्ट्रीक्षीरमवीक्षीरमज्ञानाद्भक्षयेद्द्विजः। त्रिरात्रमुपवासेन पञ्चगव्येन शुद्ध्यति ॥ ११ ॥
आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि। मनस्तापेन शुद्ध्येत द्रुपदां वा सकृज्जपेत् ॥ २१ ॥
दासनापितगोपालकुलमित्रार्द्धसीरिणः। एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥ २२ ॥
वैश्यकन्यासमुद्भूतो ब्राह्मणेन तु संस्कृतः। सद्यर्धिक इति ज्ञेयो भोज्यो विप्रैर्न संशयः ॥ २५ ॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। निर्दिष्टं पञ्चगव्यं च पवित्रं पापशोधनम् ॥ २९ ॥
गोमूत्रं कृष्णवर्णायाः श्वेतायाश्चैव गोमयम्। पयश्च ताम्रवर्णाया रक्ताया गृह्यते दधि ॥ ३० ॥
कपिलाया घृतं ग्राह्यं सर्वं कापिलमेव वा। मूत्रमेकपलं दद्यादङ्गुष्ठार्द्धं तु गोमयम् ॥ ३१ ॥
क्षीरं सप्तपलं दद्याद्दधि त्रिपलमुच्यते। घृतमेकपलं दद्यात्पलमेकं कुशोदकम् ॥ ३२ ॥
कूपे च पतितं दृष्ट्वा श्वशृगालौ च मर्कटम्। अस्थिचर्मादिपतिताः पीत्वामेध्या अपो द्विजः ॥४२॥
नारं तु कुणपं काकं विड्वराहं खरोष्ट्रकम्। गावयं सौप्रतीकं च मायूरं खाड्गकं तथा ॥ ४३ ॥
वैयाघ्रमार्क्षं सैंहं वा कूपे यदि निमज्जति। तडागस्यापि दुष्टस्य पीतं स्यादुदकं यदि ॥ ४४ ॥
प्रायश्चित्तं भवेत्पुंसः क्रमेणैतेन सर्वशः। विप्रः शुद्ध्येत्त्रिरात्रेण क्षत्रियस्तु दिनद्वयात् ॥ ४५ ॥
एकाहेन तु वैश्यस्तु शूद्रो नक्तेन शुद्ध्यति। परपाकनिवृत्तस्य परपाकरतस्य च ॥ ४६ ॥
सततं प्रातरुत्थाय परपाकरतस्तु सः। गृहस्थधर्मो यो विप्रो ददाति परिवर्जितम् ॥ ५० ॥
ऋषिभिर्धर्मतत्त्वज्ञैरपचः परिकीर्तितः। युगेयुगे तु ये धर्मास्तेषुतेषु च ये द्विजाः ॥ ५१ ॥
तेषां निन्दा न कर्त्तव्या युगरूपा हि ते द्विजाः। हुङ्कारं ब्राह्मणस्योक्त्वा त्वङ्कारं च गरीयसः ॥५२॥
स्नात्वा तिष्ठन्नहःशेषमभिवाद्य प्रसादयेत्। ताडयित्वा तृणेनापि कंठे बद्ध्वापि वाससा ॥ ५३ ॥

विवादेनापि निर्जित्य प्रणिपत्य प्रसादयेत् । अवगूर्य त्वहोरात्रं त्रिरात्रं क्षितिपातने ॥ ५४ ॥
अतिकृच्छ्रं च रुधिरे कृच्छ्रोऽभ्यन्तरशोणिते । नवाहमतिकृच्छ्री स्यात्पाणिपूरान्नभोजनः ॥ ५५ ॥
त्रिरात्रमुपवासः स्यादतिकृच्छ्रः स उच्यते । सर्वेषामेव पापानां संकरे समुपस्थिते ॥ ५६ ॥

पाराशरस्मृति–१२ अध्याय ।

अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च । पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ २ ॥
अजिनं मेखला दण्डो भैक्षचर्याव्रतानि च । निवर्त्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि ॥ ३ ॥
स्नानानि पञ्च पुण्यानि कीर्तितानि मनीषिभिः । आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च ॥ ९ ॥
आग्नेयं भस्मना स्नानमवगाह्य तु वारुणम् । आपोहिष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतम् ॥१०॥
यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते । तत्र स्नात्वा तु गङ्गायां स्नातो भवति मानवः ॥ ११ ॥
शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोपि वा । विना यज्ञोपवीतेन आचान्तोऽप्यशुचिर्भवेत् ॥ १६॥
महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयम् । प्रदोषपश्चिमौ यामौ दिनवत् स्नानमाचरेत् ॥ २४ ॥
यः शूद्रया पाचयेन्नित्यं शूद्री च गृहमेधिनी । वर्जितः पितृदेवेभ्यो रौरवं याति स द्विजः ॥ ३३ ॥
मौनव्रतं समाश्रित्य आसीनो न वदेद् द्विजः । भुञ्जानो हि वदेद्यस्तु तदन्नं परिवर्जयेत् ॥ ३७ ॥
अर्द्धभुक्ते तु यो विप्रस्तस्मिन्पात्रे जलं पिबेत् । हतं दैवं च पित्र्यञ्च आत्मानं चोपघातयेत् ॥ ३८॥
भुञ्जानेषु तु विप्रेषु योऽग्रे पात्रं विमुञ्चति । स मूढः स च पापिष्ठो ब्रह्मघ्नः स खलूच्यते ॥ ३९ ॥
भाजनेषु च तिष्ठत्सु स्वस्ति कुर्वन्ति ये द्विजाः । न देवास्तृप्तिमायान्ति निराशाः पितरस्तथा॥४०॥
अस्नात्वा वै न भुञ्जीत द्विजश्चाग्निमपूज्य च । न पर्णपृष्ठे भुञ्जीत रात्रौ दीपं विना तथा ॥ ४१ ॥
गवां शतं सैकवृषं यत्र तिष्ठत्ययन्त्रितम् । तत्क्षेत्रं दशगुणितं गोचर्म परिकीर्तितम् ॥ ४६ ॥
ब्रह्महत्यादिभिर्मर्त्यो मनोवाक्कायकर्मभिः । एतद्गोचर्मदानेन मुच्यते सर्वकिल्बिषैः ॥ ४७ ॥
विद्यमानेषु हस्तेषु ब्राह्मणो ज्ञानदुर्बलः । तोयं पिबति वक्त्रेण श्वयोनौ जायते ध्रुवम् ॥ ५३ ॥
ऊर्ध्वोच्छिष्टमधोच्छिष्टमन्तरिक्षमृतौ तथा । कृच्छ्रत्रयं प्रकुर्वीत अशौचमरणे तथा ॥ ५९ ॥
कृच्छ्रं देव्ययुतं चैव प्राणायामशतद्वयम् । पुण्यतीर्थेनार्द्रशिराः स्नानं द्वादशसंख्यया ॥ ६० ॥
द्वियोजनं तीर्थयात्रा कृच्छ्रमेकं प्रकल्पितम् । गृहस्थः कामतः कुर्याद्रेतसः स्खलनं यदि ॥ ६१ ॥
सहस्रं तु जपेद्देव्याः प्राणायामैस्त्रिभिः सह । चतुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके ॥ ६२ ॥
पराशरमतं तस्य सेतुबन्धस्य दर्शनात् । सवनस्थां स्त्रियं हत्वा ब्रह्महत्याव्रतं चरेत् ॥ ७२ ॥
सुरापश्च द्विजः कुर्यान्नदीं गत्वा समुद्रगाम् । चान्द्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ॥ ७३ ॥
अनडुत्सहितां गां च दद्याद्विप्रेषु दक्षिणाम् । सुरापानं सकृत्कृत्वा अग्निवर्णां सुरां पिबेत् ॥ ७४ ॥
स पावयेदिहात्मानमिह लोके परत्र च । अपहृत्य सुवर्णं तु ब्राह्मणस्य ततः स्वयम् ॥ ७५ ॥
गच्छेन्मुसलमादाय राजानं स्ववधाय तु । हतः शुद्धिमवाप्नोति राज्ञाऽसौ मुक्त एव च ॥ ७६ ॥
कामतस्तु कृतं यत्स्यान्नान्यथा वधमर्हति । आसनाच्छयनाद्यानात्सम्भाषात्सहभोजनात् ॥ ७७॥

(१३ क) बृहत्पाराशरीयधर्मशास्त्र—१ अध्याय ।

कृष्णो मृगश्चरेद्यत्र स्वभावेन महीतले । वसेत्तत्र द्विजातिस्तु शूद्रो यत्र तु तत्र तु ॥ ४१ ॥
हिमपर्वतविन्ध्याद्र्योर्विनशनप्रयागयोः । मध्ये तु पावनो देशो म्लेच्छदेशस्ततः परः ॥ ४२ ॥

बृहत्पाराशरीयधर्मशास्त्र—२अध्याय–षट्कर्मणि स्नानविधि ।

दिवसस्य च रात्रेश्च सन्धिः सन्ध्येति गीयते । सोपास्या सद्भिर्यत्नात्स्यात्तैर्विश्वमुपासितम् ॥१०॥
मध्याह्नेऽपि च सन्धिः स्यात्पूर्वस्याह्नोऽपरस्य च । पूर्वाह्णाह्नोऽपराह्णश्च क्षपा चेति श्रुतिक्रमः ॥ ११॥
मान्त्रं पार्थिवमाग्नेयं वायव्यं दिव्यमेव च । वारुणं मानसं चेति सप्त स्नानान्यनुक्रमात् ॥ ८३ ॥
तत्र आपस्तु वै मान्त्रं मृदालम्भंतु पार्थिवम् । भस्मना स्नानमाग्नेयं गवां रेणुभिरानिलम् ॥ ८४ ॥
आतपे सति या वृष्टिस्तद्दिव्यं स्नानमुच्यते । बहिर्नद्यादिके स्नानं वारुणं तत्प्रकीर्तितम् ॥ ८५ ॥
यद्ध्यानं मनसा विष्णोर्मानसं कथ्यते बुधैः ॥ ८६ ॥
नापो मूत्रपुरीषाभ्यां नाग्निर्दहनकर्मणा ॥ १०७ ॥

अभ्यङ्गाक्लिष्टधौते तु विद्वान्शुक्ले च वाससी । परिधाय मृदम्बुभ्यामूरू पादौ च मार्जयेत् ॥१९८॥
तद्वाससोरसंपत्तौ शाणक्षौमाविकानि तु । कुतपं योगपट्टं वा द्विवासास्तु यथा भवेत् ॥ १९९ ॥
कव्यवाहोऽनलः सोमो यमश्चैव तथार्यमा । अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदोपि च ॥ १९० ॥
एते चान्ये च पितरः पूज्याः सर्वे प्रयत्नतः । एतैस्तु तर्पितैः सर्वैः पुरुषास्तर्पिता नृभिः ॥ १९१ ॥

बृहत्पाराशरीयधर्मशास्त्र---२ अध्याय,जपविधि ।

गायत्रीं यो न जानाति ज्ञात्वोपास्ते न यो द्विजः । नामधारकमात्रोऽसौ न विप्रः शूद्र एव सः १३॥
स्फाटिकाब्जाक्षरुद्राक्षपुत्रजीवसमुद्भवैः । अक्षमाला प्रकर्तव्या प्रशस्ता चोत्तरोत्तरा ॥ ४१ ॥
अभावे त्वक्षमालायाः कुशग्रन्थ्याथ पाणिना । यथाकथञ्चिद्गणयेन्ससंख्यं तद्भवेद्यथा ॥ ४२ ॥

बृहत्पाराशरीयधर्मशास्त्र---२ अध्याय,वर्णधर्मकथन ।

शुश्रूषा ब्राह्मणादीनां तदाज्ञापालनं तथा । एष धर्मः स्मृतः शूद्रे वाणिज्येन तु जीवनम् ॥ ९ ॥
लवणं मधु तैलं च दधि तक्रं घृतं पयः । न दुष्येच्छूद्रजातीनां कुर्यात्सर्वस्य विक्रयम् ॥ १२ ॥

बृहत्पाराशरीयधर्मशास्त्र--३ अध्याय,कृषिकर्मआदि ।

अष्टमी कामभोगेन षष्ठी तैलोपभोगतः । कुहूश्च दन्तकाष्ठेन हिनस्त्यासप्तम कुलम् ॥ ४३ ॥
खलयज्ञं प्रवक्ष्यामि यत्कुर्वाणा द्विजातयः । विमुक्ताः सर्वपापेभ्यः स्वर्गौकस्त्वमवाप्नुयुः ॥ १०९ ॥
चतुर्दिक्षु खले कुर्यात्प्रोक्तामतिघनां वृतिम् । सैकद्वारपिधानां च विदध्याच्चैव सर्वतः ॥ ११० ॥
खरोष्ट्राजोरणांस्तत्र विशतोप्यनिवारयेत् । श्वसूकरशृगालादीन्काकोलूककपोतकान् ॥ १११ ॥
त्रिसन्ध्यं प्रोक्षणं कुर्यादानीतान्युक्षणाम्बुभिः । रक्षां च भस्मना कुर्याज्जलधाराभिरक्षणम् ॥११२॥
त्रिसन्ध्यमर्चयेत्सीतां पाराशरमृषिं स्मरन् । प्रेतभूतादिनामानि न वदेत्खलमध्यगः ॥ ११३ ॥
सूतिकागृहवत्तत्र कर्त्तव्यं परिरक्षणम् । हरन्त्यरक्षितं यस्माद्राक्षसाः सर्वमेव हि ॥ ११४ ॥
प्रशस्तदिनपूर्वाह्णे नापराह्णे न सन्ध्ययोः । धान्योन्मानं प्रकुर्वीत सीतापूजनपूर्वकम् ॥ ११५ ॥
यजेत्खले तु भिक्षाभिः काले रौहिण एव हि । तत्र भक्त्या प्रदत्तं यद्भवेत्सर्वं तदक्षयम् ॥ ११६ ॥
खलयज्ञे दक्षिणैषा ब्रह्मणा निर्मिता पुरा । भागधेयमयीं कृत्वा तां गृह्णन्त्विह मामिकाम् ॥११७॥
शतक्रत्वादयो देवाः पितरः सोमपादयः । सनकादिमनुष्याश्च ये चान्ये दक्षिणाशिनः ॥ ११८ ॥
एतदुद्दिश्य विप्रेभ्यः प्रदद्यात्प्रथमं हली । अन्येषामर्थिनां पश्चात्कारुकाणां ततः परम् ॥ ११९ ॥
दीनानामप्यनाथानां कुष्ठिनां कुशरीरिणाम् । क्लीबान्धबधिरादीनां सर्वेषामपि दीयते ॥ १२० ॥
वर्णानां पतितानां च ददद्भूतानि तर्पयेत् । चाण्डालांश्च श्वपाकांश्च प्रीत्या तूच्चावचानि च ॥१२१॥
ये केचिदागतास्तत्र पूज्यास्तेऽतिथिवद्द्विजाः । स्तोकशः सीरिभिः सर्वैर्वर्णिभिर्गृहमेधिभिः ॥१२२॥
दत्त्वा तु मधुरां वाचं क्रमात्तेऽथ विसर्जिताः । तत्प्रवेश्यासनं गेहे श्राद्धमाभ्युदयं श्रयेत ॥ १२३ ॥

बृहत्पाराशरीयधर्मशास्त्र--४ अध्याय ।

जात्यादिगुणयुक्ताय पुंस्त्वे सति वराय च । कन्यालंकृत्य दीयेत विवाहो वैधसः स्मृतः ॥ ३ ॥
रेतो मज्जति यस्याप्सु मूत्रं च ह्रादि फेनिलम् । स्यात्पुमाँल्लक्षणैरेतैर्विपरीतस्तु षण्ढकः ॥ ४ ॥
या यज्ञैर्वर्तमाने तु ऋत्विजे कर्मकुर्वते । कन्यालंकृत्य दीयेत विवाहः स तु दैविकः ॥ ५ ॥
वराय गुणयुक्ताय विदुषे सदृशाय च । कन्या गोद्वयमादाय दीयेतार्षः स उच्यते ॥ ६ ॥
कन्या चैव वरश्चोभौ स्वेच्छया धर्मचारिणौ । स्यातामिति हि यत्रोक्त्वादानं कायविधिस्त्वयम्॥७॥
एतावद्देहि मे द्रव्यमित्युक्त्वा प्राग्वराय च । यत्र कन्या प्रदीयेत स वै दैत्यविधिः स्मृतः ॥ ८ ॥
यत्रान्योन्याभिलाषेण उभयोर्वरकन्ययोः । ततस्तु यो विवाहः स्याद्गान्धर्वः प्रथितस्तु सः ॥ ९ ॥
युद्धे हत्वा बलात्कन्यां यत्राच्छिद्यापहृत्य च । ऊह्यते स तु विद्वद्भिर्विवाहो राक्षसः स्मृतः ॥ १०॥
सुषुप्ता वा प्रमत्ता वा छलात्कन्या प्रगृह्यते । सर्वेभ्यः स तु पापिष्ठः पैशाचः प्रथितोऽष्टमः ॥ ११ ॥
शौचं वाचं च मेध्यत्वं सोमगन्धर्वपावकाः । ददुस्तासां वरानेतांस्तस्मान्मेध्यतराः स्त्रियः ॥ ६२ ॥
सामाह सूक्तवमित्यार्यैदेवैर्न्यस्ता नृणां तनौ । अर्धकाया नराणां ताः स्त्रीणां नातः पृथग्व्रतम्॥६५॥
न दिवापि स्त्रियं गच्छेदिच्छंस्तादिच्छयापि च । न पर्वसु न सन्ध्यासु नर्तौ रात्रिचतुष्टये ॥ ६६ ॥

द्वादशाब्दं व्रतं धार्यं षडब्दं वा श्रुतिं प्रति। अधीत्याथोत्सृजेत्तद्वै दत्त्वा तु गुरवे वरम् ॥ १६३ ॥
यत्र सुस्नातकाः प्रोक्ता व्रतविद्योपसेविनः। विद्यां समाप्य यः स्नायाद्विद्यास्नातक उच्यते॥१७४॥
समाप्य च व्रतं यस्तु व्रतस्नातक उच्यते। यज्ञं समाप्य यः स्नाति सिद्धिनाम्ना स उच्यते ॥१६५॥
न गतिर्मूर्खदानेन न तारोऽम्भसि वाश्मनाम्। तस्मात्तस्य न दातव्यं सह दात्रा स मज्जति ॥२१६॥
यथा भस्म तथा मूर्खो विद्वान्प्रज्वलिताग्निवत्। होतव्यं च समृद्धेऽग्नौ जुहुयात्को नु भस्मनि॥२१७॥
यथा शूद्रस्तथा मूर्खः शूद्रस्यैव च भस्मवत्। शूद्रेण सह संवेशं दानं मूर्खे च वर्जयेत् ॥ २१८ ॥
न विद्या न तपो यस्य आदत्ते च प्रतिग्रहम्। आददानस्त्वनाचारो दातारमपि मज्जयेत् ॥ २२१ ॥
तिलान्स्वर्णं च गां भूमिमविद्वानाददाति यः। भस्मीभवति सोऽह्नाय दातुः स्यादफलं च तत्॥२२२॥
हस्तिकृष्णाजिनाद्यास्तु गर्हिता ये प्रतिग्रहाः। सद्विप्रास्तान्न गृह्णीयुर्गृह्णन्तस्तु पतन्ति ते ॥ २२५ ॥
कृष्णाजिनप्रतिग्राही हयानां शुक्रविक्रयी। नवश्राद्धेषु यो भोक्ता न भूयः पुरुषो भवेत् ॥ २२६ ॥
अनूचोऽपि निराचाराः प्रतिवेश्मनिवासिनः। अन्यत्र हव्यकव्याभ्यां भोज्याः स्युरुत्सवादिषु२३१॥
विशुद्धान्वयसंभूतो निवृत्तो मद्यमांसतः। द्विजभक्तो वणिग्वृत्तिः स सच्छूद्रः प्रकीर्तितः ॥ ३०७ ॥
कृत्वा च विधिना श्राद्धं पश्चात्तत्स्वयमश्नुते। नाद्यादविधिना मांसं मृत्युकालेऽपि धर्मवित्॥३१९॥
भक्षयेन्नरके तिष्ठत्पशुरोमसमाः समाः। गृहस्थोऽपि हि यो नाद्यात्पिशितं तु कथंचन ॥ ३२० ॥
स साक्षात्साधुभिः प्रोक्तो योगी च ब्रह्मलोकगः। न स्वयं तु पशुं हन्याच्छ्राद्धकालेऽप्युपस्थिते ॥
क्रव्याद्भिः सारमेयाद्यैर्हतं पश्वादिकं हरेत्। इदं शाकवदिच्छन्ति पवित्रं मुनिसत्तमाः ॥ ३२२ ॥
एकोऽब्दशतमश्वेन यजेत पशुना द्विजः। नान्यस्तु मांसमश्नाति स्वर्गप्राप्तिस्तयोः समा ॥ ३२५ ॥

बृहत्पाराशरीय- ५ अध्याय।

काणः पौनर्भवो रोगी पिशुनो वृद्धिजीवकः। कृतघ्नो मत्सरी क्रूरो मित्रध्रुक्कुनखी गदी ॥ ५ ॥
वृद्धो प्रजननः श्वित्री श्यावदन्तावकीर्णिनः। हीनाङ्गश्चातिरिक्ताङ्गो विक्लवः परिविन्दकः ॥ ६ ॥
क्लीबाभिशस्तवाग्दुष्टभृतकाध्यापकास्तथा। कन्यादूषी वणिग्वृत्तिर्विनाग्निः सोमविक्रयी ॥ ७ ॥
भार्याजितोऽनपत्यश्च कुण्डाशी कुण्डगोलकौ। पित्रादित्यागकृत्स्तेनो वृषलीपतितज्ञकाः ॥ ८ ॥
अनुक्तवृत्तिस्त्वज्ञातः परपूर्वापतिस्तथा। अजापालो माहिषकः कर्मदुष्टाश्च निन्दिताः ॥ ९ ॥
योऽसत्प्रतिग्रहग्राही नित्यं यश्च प्रतिग्रही। ग्रहसूचकदूतौ च पितृकार्येषु वर्जिताः ॥ १० ॥
प्रेतस्पृक्तैलनिर्णेक्ता बहुयाजकयाचकौ। बकक्राकबिडालाश्च शूद्रवृत्तिश्च गर्हितः ॥ ११ ॥
वाग्दुष्टो बालदुष्टो वा नित्यमप्रियवाक्च यः। आसक्तो द्यूतकामादावतिवाक्चैव दूषितः ॥ १२ ॥
निराचाराश्च ये विप्राः पितृमातृविवर्जिताः। विद्वांसोऽपि न तेऽभ्यर्च्याः पितृश्राद्धेषु मानवैः ॥ १३ ॥
अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत्। स एव तस्य कुर्वीत पिण्डदानोदकक्रियाम् ॥ ४३ ॥
श्राद्धं पत्यापि कार्यं स्यादपुत्रायाश्च योषितः। तस्यापि हि तया कार्यमेकत्वं हि तयोर्यतः ॥ ४५ ॥
भ्रातुर्ज्येष्ठस्य कुर्वीत स ज्येष्ठोऽप्यनुजस्य च। दैवहीनं तु तत्कुर्यादिति धर्मविदब्रवीत् ॥ ४६ ॥
पितुः पुत्रेण कर्तव्याः पिण्डदानोदकक्रियाः। पुत्राभावे तु पत्न्यापि तदभावे सहोदरैः ॥ ४७ ॥
सोमसदोऽग्निष्वात्ताश्च तथा बर्हिषदोऽपि च। सोमपाश्च तथा विद्वंस्तथैव च हविर्भुजः ॥ १६५ ॥
आज्यपाश्च तथा वत्सस्तथा ह्यन्ये सुकालिनः। एते चान्येऽपि पितरः पूज्याः सर्वे द्विजाग्रजैः॥१६६॥

बृहत्पाराशरीय-६ अध्याय।

दानोद्वाहेष्टिसंग्रामे देशविप्लवकादिषु। सद्यः शौचं द्विजातीनां सूतकाशौचयोरपि ॥ १० ॥
दातॄणां व्रतिनामेके कवयः सत्रिणामपि। सद्यः शौचमदोषाणामूचुर्धर्मविदः कलौ ॥ ११ ॥
दुर्भिक्षे राष्ट्रभङ्गे च विपत्काल उपस्थिते। उपसर्गमृते चापि सद्यः शौचं विधीयते ॥ १८ ॥
अनाथं ब्राह्मणं प्रेतं ये वहंति द्विजातयः। पदे पदे यज्ञफलमनुपूर्वं लभन्ति ते ॥ २५ ॥
अशुचित्वं न तेषां तु पापं वा शुभकारिणाम्। जलावगाहनात्तेषां सद्यः शुद्धिः प्रकीर्तिता ॥ २६ ॥
असगोत्रमसंबन्धं प्रेतभूतं तथा द्विजम्। ऊढ्वा दग्ध्वा द्विजाः सर्वे स्नानात्ते शुचयः स्मृताः ॥ २७॥
हतः शूरो विपद्येत शत्रुभिर्यत्र कुत्र चित्। स मुक्तो यतिवत्सद्यः प्रविशन्परवेश्मसि ॥ २९ ॥
संन्यासी संस्थितो योगी सम्मुखे यो रणे हतः। सूर्यमण्डलभेत्ताराविति प्राहुर्मनीषिणः ॥ ३० ॥

विवाहोत्सवयज्ञेषु अन्तरा मृतसूतके । पूर्वसङ्कल्पितानर्थान्भोज्यांस्तानब्रवीन्मनुः ॥ ४९ ॥
सर्पेण शृंगिणा वापि जलेन वह्निना तथा ॥ ५० ॥
न स्नानादौ विपन्नस्य तथा चैवात्मघातिनः । अर्वाग्वै हायनादग्निं नैव दद्यान्मृतस्य च ॥ ५१ ॥
किन्तु तान्निखनेद्भूमौ कुर्यान्नैवोदकक्रियाः । सर्पादिप्राप्तमृत्यूनां वह्निदाहादिकाः क्रियाः ॥
षण्मासे तु गते कार्या मुनिः प्राह पराशरः ॥ ५२ ॥

मेषाजघ्नो वृषं दद्यात्प्रत्येकं शुद्धये द्विजः । मनीषिणो वदन्त्येनां निष्कृतिं प्राणिनां वधे ॥ १६१॥
क्रौंचसारसहंसादिशिखिचक्राह्वकुक्कुटान् । शुकटिट्टिभसंघघ्नो नक्ताशी बकहा शुचिः ॥ १६२ ॥
मेषं च शशकं गोधां हत्वा कूर्मं च शल्लकम् । वार्त्ताकं गृञ्जनं जग्ध्वाऽहोरात्रोपोषणाच्छुचिः १६६॥
विना यज्ञोपवीतेन भोजनं कुरुते यदि । अथ मूत्रपुरीषे वा रेतःसेचनमेव वा ॥ २८८ ॥
त्रिरात्रोपोषितो विप्रः पादकृच्छ्रं तु भूमिपः । अहोरात्रोषितो वैश्यः शुद्धिरेषा पुरातनी ॥ २८९ ॥
आत्मस्त्री निजबालश्च आत्मवृद्धस्तथैव च । आत्मनः शुचयः सर्वे परेषामशुचीनि तु ॥ २९९ ॥
विवाहोत्सवयज्ञेषु संग्रामे जलसंप्लवे । पलायने तथारण्ये स्पर्शदोषो न विद्यते ॥ २९७ ॥
पद्माश्मलोहफलकाष्ठचर्मभाण्डस्थले वा स्वयमेव शौचम् । पुंसां निशास्वध्वनि निःसखानां स्त्रीणां च शुद्धिर्विहिता सदापि ॥ ३०१ ॥
पर्युषितं चिरस्थं च भोज्यं स्नेहसमन्वितम् । यवगोधूमावस्नेहौ ततो गोरसविक्रियाः ॥ ३१७ ॥
आमं मांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः।म्लेच्छभाण्डस्थिता दूष्या निष्क्रान्तौ शुचयःस्मृताः३२१

बृहत्पाराशरीयधर्मशास्त्र-८ अध्याय ।

अनुलिप्ते महीपृष्ठे वस्त्राजिनसमावृते । धर्मज्ञाः केचिदिच्छन्ति कुतपे च तिलास्तृते ॥ ९२ ॥
आस्तीर्य त्वाविकं भूमौ तत्र कृष्णाजिनं पुनः । तिलांस्तु प्रक्षिपेत्कृष्णांस्तत्राढकचतुष्टयम् ॥ ९३ ॥
कुर्यादुत्तरतोऽभ्यर्णे आढकेन तु वत्सकम् । सर्वैरत्नैरलंकुर्यात्सौरभेयीं सवत्सकाम् ॥ ९४ ॥
आस्यं गुडमयं तस्याः सास्ना सूत्रमयी तथा । ताम्रपृष्ठेक्षुपादा च कार्या मुक्ताफलेक्षणा ॥ ९५ ॥
प्रशस्तपत्रश्रवणा फलदन्तवती तथा । शुभस्रङ्मयलांगूला नवनीतस्तनान्विता ॥ ९६ ॥
नारङ्गैर्बीजपूरैश्च तथा वै नारिकेलकैः । बदराम्रकपित्थैश्च मणिमुक्ताफलार्चिता ॥ ९७ ॥
सितवस्त्रयुगच्छन्ना शतपत्रप्रपूजिता । धेनुमीदृग्विधां कृत्वा श्रद्धया परयान्वितः ॥ ९८ ॥
कांस्योपदोहनां दद्यात्केशवः प्रीयतामिति । कुर्याच्च गृष्टिवद्विद्वानिमामप्युत्तरामुखीम् ॥ ९९ ॥
सम्यगुच्चार्य विधिना दत्त्वैतेन द्विजोत्तमाः । सर्वपापैः स्वयं मुक्तः पितरं च पितामहम् ॥ ६० ॥
प्रपितामहं तथा पूर्वपुरुषाणां चतुष्टयम् । पुत्रपौत्रमधस्ताच्च तेषां चैव चतुष्टयम् ॥ ६१ ॥
दशहस्तैर्भवेद्दशश्चतुर्भिस्तैस्तु विस्तरे । दैर्घ्येपि दशभिर्वंशैर्गोचर्म परिकीर्तितम् ॥ १७५ ॥
पञ्चगुञ्जा भवेन्माषः कर्षः षोडशभिश्च तैः । तैश्चतुर्भिः पलं प्रोक्तं तौल्यमानं पुरातनैः ॥ ३०५ ॥
भद्रं नरैकहस्ताभिः प्रसृतिभिश्चतसृभिः । मानकैतैश्चतुर्भिश्च सेतिकेति निगीयते ॥ ३०६ ॥
ताभिश्चतसृभिः प्रस्थश्चतुर्भिराढकस्तथा । द्रोणैश्चतुर्भिस्तैरुक्तो धान्यमानमिति स्मृतम् ॥ ३०७ ॥
तिलप्रसृतिभिर्भाण्डं चतुर्भिर्यत्प्रपूर्यते । तैश्चतुर्भिश्च कर्षश्च तैश्चतुर्भिश्च वै पलम् ॥ ३०८ ॥
परेदंतैश्चतुर्भिः स्याच्छूीपाटी तच्चतुष्टयम् । करटं तिसृभिस्ताभिश्चतुर्भिस्तैर्घटः स्मृतः ॥ ३०९ ॥
संनिहत्य तडागानि पुष्करिण्यश्च दीर्घिकाः । तथा कूपाश्च वाप्यश्च कर्तव्या गृहमेधिभिः ॥ ३६९ ॥
पिबन्ति सर्वसत्त्वानि तृषार्तान्यम्भसामिह । वर्षाणि बिन्दुतुल्यानि तत्कर्ता दिवमावसेत् ॥ ३६८॥
उपकुर्वन्ति यावन्ति गण्डूषाणि क्रियासु च । कुर्वतां स्नानशौचादि तथैवाचाक्षतामपि ॥ ३६९ ॥
तावत्संख्यानि विप्राणां लक्षाणि दिवि मोदते । स्वर्गे अब्दसमा वासः सेव्यमानोप्सरोगणैः॥३७०॥
अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दशचिञ्चिणीकम्। कपित्थबिल्वामलकीत्रयं चःपञ्चाम्रवापी-नरकं न याति ॥ ३७५ ॥ खादन्ति यावन्ति फलानि वृक्षात्क्षुद्रह्विदग्धा नरपक्षिसङ्घाः । तावन्ति वर्षाणि वसन्ति नाके वृक्षैकवापी त्रिदशौघसेव्याः ॥३७६ ॥ यावन्ति पुष्पाणि महीरुहाणां दिवौ-कसां मूर्ध्नि भूतले वा । पिबन्ति तावन्ति च वत्सराणां शतानि नाके रमते गवापि ॥ ३७७ ॥

बृहत्पाराशरीयधर्मशास्त्र–१० अध्याय, राजधर्म।

शुचीन्प्राज्ञान्स्वधर्मज्ञान्विप्रान्मुद्राकराहितान्। लेखकानपि कायस्थाँल्लेख्यकृत्यविचक्षणान्॥ १०॥
पीड्यमानां प्रजां रक्षेत्कायस्थैश्चाटुतस्करैः। धान्यैक्षुतृणतोयैस्तु संपन्नं परमण्डलम्॥ २४॥

बृहत्पाराशरीयधर्मशास्त्र–१० अध्याय, वानप्रस्थधर्म।

अथ विप्रो वनं गच्छेद्विना वा सह भार्यया। जितेन्द्रियो वसेत्तत्र नित्यं श्रौताग्निकर्मकृत्॥ १॥
वन्यैर्मुन्यशनैर्मेध्यैः श्यामनीवारकङ्गुभिः। कन्दमूलफलैः शाकैः स्नेहैश्च फलसम्भवैः॥ २॥
सायं प्रातश्च जुहुयात्त्रिकालं स्नानमाचरेत्। चर्मचीवरवासाः स्यात् श्मश्रुलोमजटाधरः॥ ३॥
न किञ्चित्प्रतिगृह्णीयात्स्वाध्यायं नित्यमाचरेत्। सर्वसत्त्वहितोपेतो दान्तश्चाध्यात्मचिन्तकः॥ ५॥
एकाहिकं तु कुर्वीत मासिकं वाथ सञ्चयम्। षाण्मासिकं चाब्दिकं वा यज्ञार्थं च वने वसन्॥ ७॥
चान्द्रकृच्छ्रपराकाद्यैः पक्षमासोपवासकैः। त्रिरात्रैरेकरात्रैश्च आश्रमस्थः क्षिपेद्बुधः॥ ९॥
योगाभ्यासरतो नित्यं स्थानासनविहारवान्। हेमन्तग्रीष्मवर्षासु जलाग्न्याकाशमाश्रयेत्॥ ११॥
दन्तोलूखलिको वापि कालपक्वभुगेव वा। स्याद्वाश्मकुट्टको विप्रः फलस्नेहैश्च कर्मकृत्॥ १२॥
शत्रौ मित्रे समः शान्तस्तथैव सुखदुःखयोः। समदृष्टिश्च सर्वेषु न वसेद्दूरं वनम्॥ १३॥
म्लेच्छव्याप्तानि सर्वाणि वनानि स्युः कलौ युगे। न भूपाः शासितारश्च ग्रामोपान्ते वसेदतः॥१४॥
अष्टौ भुञ्जीत वा ग्रासान्ग्रामादाहृत्य यत्नवान्। वासनासंक्षयं गच्छेदनिलाशः प्रागुदीचिकः॥२४॥
आश्रमत्रयधर्मान्प्राक्चरित्वान्ते द्विजास्ततः। द्वयस्य वा ततः पश्चाच्चतुर्थाश्रममाचरेत्॥ २६॥
द्विजोत्तमो यदा पश्येद्वलीपलितमात्मनः। उपरामस्तथाक्षाणां क्षैण्यं कामस्य सद्द्विजः॥ २७॥
समीक्ष्य पुत्रं पौत्रं वा दृष्ट्वा वा दुहितुः सुतम्। अधीत्य विधिवद्वेदान्कृत्वा यागान्विधानतः॥ २८॥
निश्चयं मनसः कृत्वा चतुर्थाश्रममाविशेत्। प्राजापत्यां विधायेष्टिं वनाद्वा सद्मनोपि वा॥ २९॥
किञ्चिद्वेदं समास्थाय तेन धर्मेण वर्त्तयेत्। वाङ्मनःकायदण्डाश्च तथा सत्त्वादयो गुणाः॥ ३१॥
त्रयोऽपि नियता यस्य स त्रिदण्डीति कथ्यते॥ ३२॥
सदैव प्राणसंरोधः सदैवाध्यात्मचिन्तनम्। मृद्वेणुदार्वलाब्वश्ममयं पात्रं यतेः स्मृतम्॥ ३७॥
आत्मान्ययोः समानत्वमजस्रं चात्मचिन्तनम्। यतिभिस्त्रिभिरेकत्वं द्वाभ्यां पञ्चभिरेव वा॥ ४०॥
न स्थातव्यं कदाचित्स्यात्तिष्ठन्तो नाशमाप्नुयुः। बहुत्वे यत्र भिक्षूणां वार्तास्तत्र विचित्रिकाः॥४१॥
स्नेहपैशुन्यमात्सर्यं भिक्षूणां नृपतेरपि। तस्मादेकान्तशीलेन भवितव्यं तपोऽर्थिना॥ ४२॥
ब्रह्मण्यात्मनि गोमायौ शुनौ म्लेच्छे च तुल्यदृक्॥ ४९॥

बृहत्परा०–१० अध्याय, ब्रह्मचारी आदि ४ भेदकथन।

कृषिगोरक्षवाणिज्यैः कुर्वन्सर्वा क्रियां द्विजः। विहितैरात्मविद्यैश्च वार्तावृत्तिः स उच्यते॥ १०॥
चतुर्भेदः परिव्राट् स्यात्कुटीचरबहूदकौ। हंसः परमहंसश्च वक्ष्यन्ते ते पृथक् पृथक्॥ २०॥
पुत्रस्य भ्रातृपुत्रस्य भ्रातृदौहित्रयोरपि। तदुपान्तकुटीस्थो यः स भैक्ष्यवृत्तिभुग्द्विजः॥ २१॥
प्रातिचार्यकृतः सोपि यो वासः पूतवारिपः। कन्थात्रिदण्डभृच्छान्त आत्मज्ञः स कुटीचरः॥२२॥
ज्ञेयो बहूदको नाम यः पवित्रितपादुकः। शिखासनोपवीतानि धातुकाषायवस्त्रभृत्॥ २३॥
साधुवृत्तिर्द्विजौकस्सु भिक्षाभागात्मचिन्तकः॥ बहूदकस्त्वयं ज्ञेयो यः परिव्राट्त्रिदण्डभृत्॥ २४॥
एकदण्डधरा हंसाः शिखोपवीतधारिणः। वार्याधारकराः शान्ता भूतानामभयप्रदाः॥ २५॥
वसन्त्येकक्षपां ग्रामे नगरे पञ्चशर्वरीः। कर्शयन्तो व्रतैर्देहमात्मध्यानरताः सदा॥ २६॥
एकदण्डधरा मुण्डाः कन्थाकौपीनवाससः। अव्यक्तलिङ्गिनो व्यक्ताः सर्वदैव च मौनिनः॥ २७॥
शिखादिरहिताः शान्ता उन्मत्तवेषधारिणः। भग्नशून्यामरौकस्सु वासिनो ब्रह्मचिन्तकाः॥ २८॥

(१४) व्यासस्मृति–१ अध्याय।

यत्र यत्र स्वभावेन कृष्णसारो मृगः सदा। चरते तत्र वेदोक्तो धर्मो भवितुमर्हति॥ ३॥
श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते। तत्र श्रौतं प्रमाणं तु तयोर्द्वैधे स्मृतिर्वरा॥ ४॥
ब्राह्मणक्षत्रियविशस्त्रयो वर्णा द्विजातयः। श्रुतिस्मृतिपुराणोक्तधर्मयोग्यास्तु नेतरे॥ ५॥

शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति । वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विना ॥ ६ ॥
विप्रवद्विप्रविन्नासु क्षत्रविन्नासु क्षत्रवत् । जातकर्माणि कुर्वीत ततः शूद्रासु शूद्रवत् ॥ ७ ॥
वैश्यासु विप्रक्षत्राभ्यां ततः शूद्रासु शूद्रवत् । अधमादुत्तमायास्तु जातः शूद्राधमः स्मृतः ॥ ८ ॥
ब्राह्मण्यां शूद्रजनितश्चाण्डालो धर्मवर्जितः । कुमारीसंभवस्त्वेकः सगोत्रायां द्वितीयकः ॥ ९ ॥
ब्राह्मण्यां शूद्रजनितश्चाण्डालस्त्रिविधः स्मृतः ॥ १० ॥
तस्य प्राप्तव्रतस्यायं कालः स्याद्द्विगुणाधिकः । वेदव्रतच्युतो व्रात्यः स व्रात्यस्तोममर्हति ॥ २० ॥
द्वे जन्मनी द्विजातीनां मातुः स्यात्प्रथमं तयोः । द्वितीयं छन्दसां मातुर्ग्रहणाद्विधिवद्गुरोः ॥२१॥
उपनीतो गुरुकुले वसेन्नित्यं समाहितः । बिभृयाद्दण्डकौपीनोपवीताजिनमेखलाः ॥ २३ ॥
नापक्षिप्तोऽपि भाषेत नाव्रजेत्ताडितोऽपि वा । विद्वेषमथ पैशुन्यं हिंसनं चार्कवीक्षणम् ॥ २७ ॥
तौर्य्यत्रिकानृतोन्मादपरिवादानलंक्रियाम् । अञ्जनोद्वर्त्तनादर्शस्रग्विलेपं न योषितः ॥ २८ ॥
वृथाटनमसन्तोषं ब्रह्मचारी विवर्जयेत् । ईषच्चलितमध्याह्नेऽनुज्ञातो गुरुणा स्वयम् ॥ २९ ॥
नान्यद्भिक्षितमाद्याद्यादापन्नो द्रविणादिकम् । अनिन्द्यामन्त्रितः श्राद्धे पैत्रेद्याद्गुरुचोदितः ॥३२ ॥
एकान्नमप्यविरोधे व्रतानां प्रथमाश्रमी । भुक्त्वा गुरुमुपासीत कृत्वा संधुक्षणादिकम् ॥ ३३ ॥
तस्मादहरहर्वेदमनध्यायमृते पठेत् । यदङ्गं तदनध्याये गुरुर्वचनमाचरेत् ॥ ३८ ॥
यस्तूपनयनादेतदामृत्योर्व्रतमाचरेत् । स नैष्ठिको ब्रह्मचारी ब्रह्मसायुज्यमाप्नुयात् ॥ ४० ॥
उपकुर्वाणको यस्तु द्विजः षड्विंशवार्षिकः । केशान्तकर्मणा तत्र यथोक्तचरितव्रतः ॥ ४१ ॥
समाप्य वेदान्वेदौ वा वेदं वा प्रसभं द्विजः । स्नायति गुर्वनुज्ञातः प्रवृत्तोदितदक्षिणः ॥ ४२ ॥

व्यासस्मृति–२ अध्याय ।

एवं स्नातकतां प्राप्तो द्वितीयाश्रमकाङ्क्षया । प्रतीक्षेत विवाहार्थमनिन्द्यान्वयसंभवाम् ॥ १ ॥
अरोगादुष्टवंशोत्थामशुल्कादानदूषिताम् । सवर्णामसमानार्षाममातृपितृगोत्रजाम् ॥ २ ॥
अनन्यपूर्विकां लघ्वीं शुभलक्षणसंयुताम् । धृताधोवसनां गौरीं विख्यातदशपूरुषाम् ॥ ३ ॥
ख्यातनाम्नः पुत्रवतः सदाचारवतः सतः । दातुमिच्छोर्दुहितरं प्राप्य धर्मेण चोद्वहेत् ॥ ४ ॥
ब्राह्मोद्वाहविधानेन तदभावे परो विधिः । दातव्यैषा सदृक्षाय वयोविद्यान्वयादिभिः ॥ ५ ॥
पितृतत्पितृभ्रातृषु पितृव्यज्ञातृमातृषु । पूर्वाभावे परो दद्यात्सर्वाभावे स्वयं व्रजेत् ॥ ६ ॥
यदि सा दातृवैकल्याद्रजः पश्येत्कुमारिका । भ्रूणहत्याश्च यावत्यः पतितः स्यात्तदप्रदः ॥ ७ ॥
न तु शूद्रां द्विजः कश्चिन्नाधमः पूर्ववर्णजाम् । नानावर्णासु भार्यासु सवर्णा सहचारिणी ॥ ११ ॥
धर्माधर्म्येषु धर्मिष्ठा ज्येष्ठा तस्य स्वजातिषु । पाटितोऽयं द्विजः पूर्वमेकदेहः स्वयम्भुवा ॥ १२ ॥
कृतशौचा पुनः कर्म पूर्ववच्च समाचरेत् । रजोदर्शनतो यास्स्यू रात्रयः षोडशर्तवः ॥ ४१ ॥
ततः पुंबीजमक्लिष्टं शुद्धे क्षेत्रे प्ररोहति । चतस्रश्चादिमा रात्रीः पर्ववच्च विवर्जयेत् ॥ ४२ ॥
गच्छेद्युग्मासु रात्रीषु पौष्णपित्र्यर्क्षराक्षसान् । प्रच्छादितादित्यपथे पुमान्गच्छेत्स्वयोषितः ॥ ४३ ॥
क्षमालंकृदवाप्नोति पुत्रं पूजितलक्षणम् । ऋतुकालेऽभिगम्यैवं ब्रह्मचर्ये व्यवस्थितः ॥ ४४ ॥
गच्छन्नपि यथाकामं न दुष्टः स्यादनन्यकृत् । भ्रूणहत्यामवाप्नोति ऋतौ भार्यापराङ्मुखः ॥ ४५ ॥
विवर्णा दीनवदना देहसंस्कारवर्जिता ॥ ५१ ॥
पतिव्रता निराहारा शोष्यते प्रोषिते पतौ ॥ ५२ ॥
जीवन्ती चेत्त्यक्तकेशा तपसा शोधयेद्वपुः । सर्वावस्थासु नारीणां न युक्तं स्यादरक्षणम् ॥ ५३ ॥
तदेवानुक्रमात्कार्यं पितृभर्तृसुतादिभिः । जाताः सुरक्षिता वा ये पुत्रपौत्रप्रपौत्रकाः ॥ ५४ ॥

व्यासस्मृति– ३ अध्याय ।

आगतं दूरतः श्रान्तं भोक्तुकाममकिञ्चनम् । दृष्ट्वा सम्मुखमभ्येत्य सत्कृत्य प्रश्रयार्च्चनैः ॥ ३८ ॥
विवाह्यस्नातकक्ष्माभृदाचार्यसुहृदृत्विजः । अर्घ्या भवन्ति धर्मेण प्रतिवर्षं गृहागताः ॥ ४१ ॥
गर्भिण्यातुरभृत्येषु बालवृद्धातुरादिषु । बुभुक्षितेषु भुञ्जानो गृहस्थोऽश्नाति किल्बिषम् ॥ ४५ ॥
शूद्राभिशस्तवार्धुष्या वाग्दुष्टक्रूरतस्कराः । कुद्धापविद्धबद्धोग्रवधबन्धनजीविनः ॥ ४७ ॥
ब्राह्मणस्य सुखं क्षेत्रं निष्कर्करमकंटकम् । वापयेत्तत्र बीजानि सा कृषिः सार्वकामिकी ॥ ४८ ॥

यस्य गेहे सदाश्नन्ति हव्यानि त्रिदिवौकसः। कव्यानि चैव पितरः किम्भूतमधिकं ततः ॥ ५४ ॥
अमृतं ब्राह्मणान्नेन दारिद्र्यं क्षत्रियस्य च। वैश्यान्नेन तु शूद्रत्वं शूद्रान्नान्नरकं व्रजेत् ॥ ५६ ॥
यस्य शूद्रा पचेन्नित्यं शूद्रा वा गृहमेधिनी। वर्जितः पितृदेवैस्तु रौरवं याति स द्विजः ॥ ५८ ॥
निर्दशासन्धिसम्बन्धिवत्सवन्तीपयांसि च। पलाण्डुं श्वेतवृन्ताकं रक्तमूलकमेव च ॥ ६० ॥
गृञ्जनारुणवृक्षासृग्जन्तुगर्भफलानि च। अकालकुसुमादीनि द्विजो जग्ध्वैन्दवं चरेत् ॥ ६१ ॥

व्यासस्मृति–४ अध्याय।

अनाहूतेषु यद्दत्तं यच्च दत्तमयाचितम्। भविष्यति युगस्यान्तस्तस्यान्तो न भविष्यति ॥ २६ ॥
देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च। कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥ ३४ ॥
ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते। ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते ॥ ३५ ॥
सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत्। भोजने चैव दाने च हन्यात्त्रिपुरुषं कुलम् ॥ ३६ ॥
यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः। यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः ॥ ३७ ॥
ग्रामस्थानं यथा शून्यं यथा कूपश्च निर्जलः। यश्च विप्रोनधीयानस्त्रयस्ते नामधारकाः ॥ ३८ ॥
ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः। जातिमात्रोपजीवी च स भवेद्ब्राह्मणः समः ॥ ४१ ॥
गर्भाधानादिभिर्मन्त्रैर्वेदोपनयनेन च। नाध्यापयति नाधीते स भवेद्ब्राह्मणब्रुवः ॥ ४२ ॥
अग्निहोत्री तपस्वी च वेदमध्यापयेच्च यः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥ ४३ ॥
मीमांसते च यो वेदान् षड्भिरङ्गैः सविस्तरैः। इतिहासपुराणानि स भवेद्वेदपारगः ॥ ४५ ॥
शैलूषशौण्डिकोन्नद्धोन्मत्तव्रात्यव्रतच्युताः। नग्ननास्तिकनिर्लज्जपिशुनव्यसनान्विताः ॥ ४८ ॥
कन्दर्पस्त्रीजिता नार्यः परवादकृता नराः। अनीशाः कीर्तिमन्तोऽपि राजदेवस्वहारकाः ॥ ४९ ॥
शयनासनसंसर्गव्रतकर्मादिदूषिताः। अश्रद्दधानाः पतिता भ्रष्टाचारादयश्च ये ॥ ५० ॥
अभोज्यान्नाः स्युरन्नादो यस्य यः स्यात्स तत्समः। नापितान्वयमित्रार्द्धसीरिणो दासगोपकाः ॥
शूद्राणामप्यमीषान्तु भुक्त्वान्नं नैव दुष्यति। धर्मेणान्योन्यभोज्यान्ना द्विजास्तु विदितान्वयाः ॥५२॥

(१९) शंखस्मृति–१ अध्याय।

यजनं याजनं दानं तथैवाध्यापनक्रिया। प्रतिग्रहं चाध्ययनं विप्रकर्माणि निर्दिशेत् ॥ २ ॥
दानं चाध्ययनं चैव यजनं च यथाविधि। क्षत्रियस्य च वैश्यस्य कर्मेदं परिकीर्त्तितम् ॥ ३ ॥
क्षत्रियस्य विशेषेण प्रजानां परिपालनम्। कृषिगोरक्षवाणिज्यं विशश्च परिकीर्त्तितम् ॥ ४ ॥
शूद्रस्य द्विजशुश्रूषा सर्वशिल्पानि वाप्यथ। क्षमा सत्यं दमः शौचं सर्वेषामविशेषतः ॥ ५ ॥
ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः। तेषां जन्म द्वितीयं तु विज्ञेयं मौञ्जिबन्धनात् ॥ ६ ॥
आचार्यस्तु पिता प्रोक्तः सावित्री जननी तथा। ब्राह्मणक्षत्रियविशां मौञ्जीबन्धनजन्मनि ॥ ७ ॥
वृत्त्या शूद्रसमास्तावद्विज्ञेयास्ते विचक्षणैः। यावद्वेदेन जायन्ते द्विजा ज्ञेयास्ततः परम् ॥ ८ ॥

शंखस्मृति–२ अध्याय।

गर्भस्य स्फुटताज्ञानं निषेकः परिकीर्त्तितः। पुरा तु स्पन्दनात्कार्यं पुंसवनं विचक्षणैः ॥ १ ॥
षष्ठेऽष्टमे वा सीमन्तो जाते वै जातकर्म च। आशौचे च व्यतिक्रान्ते नामकर्म विधीयते ॥ २ ॥
नामधेयं च कर्त्तव्यं वर्णानां च समाक्षरम्। माङ्गल्यं ब्राह्मणस्योक्तं क्षत्रियस्य बलान्वितम् ॥ ३ ॥
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम्। शर्मान्तं ब्राह्मणस्योक्तं वर्मान्तं क्षत्रियस्य तु ॥ ४ ॥
धनान्तं चैव वैश्यस्य दासान्तं चान्त्यजन्मनः। चतुर्थे मासि कर्त्तव्यं बालस्यादित्यदर्शनम् ॥ ५ ॥
षष्ठेन्नप्राशनं मासि चूडा कार्या यथाकुलम्। गर्भाष्टमेऽब्दे कर्त्तव्यं ब्राह्मणस्योपनायनम् ॥ ६ ॥
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः। षोडशाब्दानि विप्रस्य राजन्यस्य द्विविंशतिः ॥ ७ ॥
विंशतिः सचतुष्का तु वैश्यस्य परिकीर्त्तिता। नातिवर्तेत सावित्री अत ऊर्ध्वं निवर्तते ॥ ८ ॥
विज्ञातव्यास्त्रयोप्येते यथाकालमसंस्कृताः। सावित्रीपतिता व्रात्याः सर्वधर्मबहिष्कृताः ॥ ९ ॥

शङ्खस्मृति–३ अध्याय।

उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः। आचारमग्निकार्यं च सन्ध्योपासनमेव च ॥ १ ॥

स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति । भृतकाध्यापको यस्तु उपाध्यायः स उच्यते ॥ २ ॥
ब्रह्मावसाने प्रारम्भे प्रणवं च प्रकीर्तयेत् । अनध्यायेष्वध्ययनं वर्जयेच्च प्रयत्नतः ॥ ६ ॥
चतुर्दशीं पञ्चदशीमष्टमीं राहुसूतकम् । उल्कापातं महीकम्पमाशौचग्रामविप्लवम् ॥ ७ ॥
इन्द्रप्रयाणं श्रुतं सर्वसङ्घातनिस्वनम् । वाद्यकोलाहलं युद्धमनध्यायान्विवर्जयेत् ॥ ८ ॥
नाधीयीताभियुक्तोपि यानगो न च नौगतः । देवायतनवल्मीकश्मशानशवसन्निधौ ॥ ९ ॥

शङ्खस्मृति-४ अध्याय ।

विन्देत विधिवद्भार्यामसमानार्षगोत्रजाम् । मातृतः पञ्चमीं वापि पितृतस्त्वथ सप्तमीम् ॥ १ ॥
संप्रार्थितः प्रयत्नेन ब्राह्मस्तु परिकीर्तितः । यज्ञस्थायर्त्विजे दैव आदायार्षस्तु गोद्वयम् ॥ ४ ॥
प्रार्थितः संप्रदानेन प्राजापत्यः प्रकीर्तितः । आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः ॥ ५ ॥
राक्षसो युद्धहरणात्पैशाच्यः कन्यकाछलात् । तिस्रस्तु भार्या विप्राय द्वे भार्ये क्षत्रियस्य तु ॥ ६ ॥
एकैव भार्या वैश्यस्य तथा शूद्रस्य कीर्तिता । ब्राह्मणी क्षत्रिया वैश्या विप्रभार्याः प्रकीर्तिताः ॥७॥
क्षत्रिया चैव वैश्या च क्षत्रियस्य विधीयते । वैश्या च भार्या वैश्यस्य शूद्रा शूद्रस्य कीर्तिता ॥ ८॥
आपद्यपि न कर्तव्या शूद्रा भार्या द्विजन्मना । तस्यां तस्य प्रसूतस्य निष्कृतिर्न विधीयते ॥ ९ ॥
सपिण्डीकरणे चार्हेन्न च शूद्रः कथञ्चन । तस्मात्सर्वप्रयत्नेन शूद्रां भार्यां विवर्जयेत् ॥ १३ ॥
पाणिर्ग्राह्यस्सवर्णासु गृह्णीयात्क्षत्रिया शरम् । वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः ॥ १४ ॥

शङ्खस्मृति-५ अध्याय ।

पञ्च सूना गृहस्थस्य चुल्लीपेषण्युपस्करः । कण्डनी चोदकुम्भश्च तस्य पापस्य शान्तये ॥ १ ॥
पञ्च यज्ञविधानं तु गृही नित्यं न हापयेत् । पञ्चयज्ञविधानेन तत्पापं तस्य नश्यति ॥ २ ॥
देवयज्ञो भूतयज्ञः पितृयज्ञस्तथैव च । ब्रह्मयज्ञो नृयज्ञश्च पञ्चयज्ञाः प्रकीर्तिताः ॥ ३ ॥
होमो दैवो बलिर्भौतः पित्र्यः पिण्डक्रिया स्मृतः । स्वाध्यायो ब्रह्मयज्ञश्च नृयज्ञोऽतिथिपूजनम् ॥ ४ ॥
वानप्रस्थो ब्रह्मचारी यतिश्चैव तथा द्विजः । गृहस्थस्य प्रसादेन जीवन्त्येते यथाविधि ॥ ५ ॥
गृहस्थ एव यजते गृहस्थस्तपते तपः । ददाति च गृहस्थश्च तस्माच्छ्रेयान् गृहाश्रमी ॥ ६ ॥
यथा भर्ता प्रभुः स्त्रीणां वर्णानां ब्राह्मणो यथा । अतिथिस्तद्वदेवास्य गृहस्थस्य प्रभुः स्मृतः ॥ ७ ॥
न यज्ञैर्दक्षिणावद्भिर्वह्निशुश्रूषया तथा । गृही स्वर्गमवाप्नोति यथा चातिथिपूजनात् ॥ १३ ॥
यजेत पशुबन्धैश्च चातुर्मास्यैस्तथैव च । त्रैवार्षिकाधिकान्नस्तु पिबेत्सोममतन्द्रितः ॥ १६ ॥
इष्टिं वैश्वानरीं कुर्यात्तथा चाल्पधनो द्विजः । न भिक्षेत धनं शूद्रात्सर्वं दद्याच्च भिक्षितम् ॥ १७ ॥

शङ्खस्मृति-६ अध्याय ।

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् ॥ १ ॥
पुत्रेषु दारान्निक्षिप्य तया वानुगतो वनम् । अग्नीनुपचरेन्नित्यं वन्यमाहारमाहरेत् ॥ २ ॥
यदाहारो भवेत्तेन पूजयेत्पितृदेवताः । तेनैव पूजयेन्नित्यमतिथिं समुपागतम् ॥ ३ ॥
ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान्समाहितः । स्वाध्यायं च तथा कुर्याज्जटाश्च बिभृयात्तथा ॥ ४ ॥
तपसा शोषयेन्नित्यं स्वयं चैव कलेवरम् । आर्द्रवासास्तु हेमन्ते ग्रीष्मे पञ्चतपास्तथा ॥ ५ ॥
प्रावृष्याकाशशायी च नक्ताशी च सदा भवेत् । चतुर्थकालिको वा स्यात्षष्ठकालिक एव वा ॥ ६॥
कृच्छ्रैर्वापि नयेत्कालं ब्रह्मचर्यं च पालयेत् । एवं नीत्वा वने कालं द्विजो ब्रह्माश्रमी भवेत् ॥ ७ ॥

शङ्खस्मृति-७ अध्याय ।

कृत्वेष्टिं विधिवत्पश्चात्सर्ववेदसदक्षिणाम् । आत्मन्यग्नीन्समारोप्य द्विजो ब्रह्माश्रमी भवेत् ॥ १ ॥
विधूमे न्यस्तमुसले व्यङ्गारे भुक्तवज्जने । अतीते पात्रसम्पाते नित्यं भिक्षां यतिश्चरेत् ॥ २ ॥
सप्तागारांश्चरेद्भैक्ष्यं भिक्षितं नानुभिक्षयेत् । न व्यथेच्च तथाऽलाभे यथालब्धेन वर्तयेत् ॥ ३ ॥
न स्वादयेत्तथैवान्नं नाश्नीयात्कस्यचिद्गृहे । मृन्मयालाबुपात्राणि यतीनां च विनिर्दिशेत् ॥ ४ ॥
तेषां संमार्जनाच्छुद्धिरद्भिश्चैव प्रकीर्तिता । कौपीनाच्छादनं वासो बिभृयादव्यथश्चरन् ॥ ५ ॥
शून्यागारनिकेतः स्याद्यत्रसायंगृहो मुनिः । दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत ॥ ६ ॥

सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् । सर्वभूतसमो मैत्रः समलोष्टाश्मकाञ्चनः ॥ ७ ॥
ध्यानयोगरतो भिक्षुः प्राप्नोति परमां गतिम् । जन्मना यस्तु निर्मुक्तो मरणेन तथैव च ॥ ८ ॥
प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् । सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ॥ १२ ॥
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते । मनसः संयमस्तज्ज्ञैर्धारणेति निगद्यते ॥ १३ ॥
संहारश्चेन्द्रियाणां च प्रत्याहारः प्रकीर्तितः । हृदिस्थध्यानयोगेन देवदेवस्य दर्शनम् ॥ १४ ॥
ध्यानं प्रोक्तं प्रवक्ष्यामि ध्यानयोगमतः परम् । हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः॥१५॥

शङ्खस्मृति–८ अध्याय।

अस्नातः पुरुषोनर्हो जप्याग्निहवनादिषु । प्रातःस्नानं तदर्थं च नित्यस्नानं प्रकीर्तितम् ॥ २ ॥
चण्डालशवपूयाद्यं स्पृष्ट्वा स्नानं रजस्वलाम् । स्नानानर्हस्तु यः स्नाति स्नानं नैमित्तिकं च तत् ॥३॥
पुष्यस्नानादिकं स्नानं दैवज्ञविधिचोदितम् । तद्धि काम्यं समुद्दिष्टं नाकामस्तत्प्रयोजयेत् ॥ ४ ॥
जप्तुः कामः पवित्राणि अर्चिष्यन्देवतान्पितॄन् । स्नानं समाचरेद्यस्तु क्रियाङ्गं तत्प्रकीर्तितम् ॥५॥
मलापकर्षणार्थाय स्नानमभ्यङ्गपूर्वकम् । मलापकर्षणार्थाय प्रवृत्तिस्तस्य नान्यथा ॥ ६ ॥
सरित्सु देवखातेषु तीर्थेषु च नदीषु च । क्रियास्नानं समुद्दिष्टं स्नानं तत्र महाक्रिया ॥ ७ ॥

शङ्खस्मृति–१० अध्याय।

अतः परं प्रवक्ष्यामि शुभामाचमनक्रियाम् । कार्यं कनिष्ठिकामूले तीर्थमुक्तं मनीषिभिः ॥ १ ॥
अङ्गुष्ठमूले च तथा प्राजापत्यं विचक्षणैः । अङ्गुल्यग्रे स्मृतं दैवं पित्र्यं तर्जनिमूलके ॥ २ ॥
विना यज्ञोपवीतेन तथा मुक्तशिखो द्विजः । अप्रक्षालितपादस्तु आचान्तोप्यशुचिर्भवेत् ॥ १४ ॥

शंखस्मृति–१२ अध्याय।

सुवर्णमणिमुक्तास्फटिकपद्माक्षरुद्राक्षपुत्रजीवकानामन्यतममादाय मालां कुर्यात् ॥ ५ ॥ कुशग्रन्थिं कृत्वा वामहस्तोपयमैर्वा गणयेत् ॥ ६ ॥

शंखस्मृति–१४ अध्याय।

ब्राह्मणान्न परीक्षेत दैवे कर्मणि धर्मवित् । पित्र्ये कर्मणि संप्राप्ते युक्तमाहुः परीक्षणम् ॥ १ ॥
षडङ्गविन्त्रिसुपर्णो बह्वृचो ज्येष्ठसामगः । त्रिणाचिकेतः पञ्चाग्निर्ब्राह्मणः पंक्तिपावनः ॥ ५ ॥
ब्रह्मदेयानुसन्तानो ब्रह्मदेयाप्रदायकः । ब्रह्मदेयापतिर्यश्च ब्राह्मणः पंक्तिपावनः ॥ ६ ॥
ऋग्यजुःपारगो यश्च साम्नां यश्चापि पारगः । अथर्वाङ्गिरसोध्येता ब्राह्मणः पंक्तिपावनः ॥ ७ ॥
नित्यं योगरतो विद्वान्समलोष्टाश्मकाञ्चनः । ध्यानशीलो हि यो विद्वान्ब्राह्मणः पंक्तिपावनः ॥८॥
द्वौ दैवे प्राङ्मुखौ त्रींश्च पित्र्ये वोदङ्मुखांस्तथा । भोजयेद्विविधान्विप्रानेकैकमुभयत्र वा ॥ ९ ॥
भोजयेदथवाप्येकं ब्राह्मणं पंक्तिपावनम् । दैवे कृत्वा तु नैवेद्यं पश्चाद्वह्नौ तु तत्क्षिपेत् ॥ १० ॥
उग्रगन्धान्यगन्धानि चैत्यवृक्षभवानि च । पुष्पाणि वर्जनीयानि रक्तवर्णानि यानि च ॥ १५ ॥
तोयोद्भवानि देयानि रक्तान्यपि विशेषतः । ऊर्णासूत्रं प्रदातव्यं कार्पासमथवा नवम् ॥ १६ ॥
दशां विवर्जयेत्प्राज्ञो यद्यप्यहतवस्त्रजाम् । घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः ॥ १७ ॥
धूपार्थं गुग्गुलं दद्याद्घृतयुक्तमधूत्कटम् । चन्दनं च तथा दद्यात्पिष्ट्वा च कुंकुमं शुभम् ॥ १८ ॥
भूतृणं सरसं शिग्रुं पालकं सिन्धुकं तथा । कूष्माण्डालाबुवार्ताककोविदारांश्च वर्जयेत् ॥ १९ ॥
पिप्पलीं मरिचं चैव तथा वै पिण्डमूलकम् । कृतं च लवणं सर्वं वंशाग्रं तु विवर्जयेत् ॥ २० ॥
राजमाषान्मसूरांश्च कोद्रवान्कोरदूषकान् । लोहितान्वृक्षनिर्यासान्छ्राद्धकर्मणि वर्जयेत् ॥ २१ ॥
आम्रमामलकीमिक्षुमृद्वीकादधिदाडिमान् । विदार्यश्चैव रम्भाद्या दद्याच्छ्राद्धे प्रयत्नतः ॥ २२ ॥
धानालाजे मधुयुते सक्तूञ्शर्करया तथा । दद्याच्छ्राद्धे प्रयत्नेन शृङ्गाटकबिसेतकान् ॥ २३ ॥
म्लेच्छदेशे तथा रात्रौ सन्ध्यायां च विशेषतः । न श्राद्धमाचरेत्प्राज्ञो म्लेच्छदेशे न च व्रजेत् ॥३०॥
हस्तिच्छायासु यद्दत्तं यद्दत्तं राहुदर्शने । विषुवत्ययने चैव सर्वमानन्त्यमुच्यते ॥ ३१ ॥
प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् । प्राप्य श्राद्धं प्रकर्त्तव्यं मधुना पायसेन वा ॥ ३२ ॥
प्रजां पुष्टिं यशः स्वर्गमारोग्यं च धनं तथा । नृणां श्राद्धैः सदा प्रीताः प्रयच्छन्ति पितामहाः॥३३॥

शंखस्मृति-१५ अध्याय।

जनने मरणे चैव सपिण्डानां द्विजोत्तम। त्र्यहाच्छुद्धिमवाप्नोति योऽग्निवेदसमन्वितः॥ १॥
रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुद्ध्यति। अजातदन्तबाले तु सद्यःशौचं विधीयते॥ ४॥
अहोरात्रात्तथा शुद्धिर्बाले त्वकृतचूडके। तथैवानुपनीते तु त्र्यहाच्छुध्यन्ति बान्धवाः॥ ५॥
पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता। तस्यां मृतायां नाशौचं कदाचिदपि शाम्यति॥८॥
देशान्तरगतः श्रुत्वा कुल्यानां मरणोद्भवौ। यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्॥ ११॥
अतीते दशरात्रे तु त्रिरात्रमशुचिर्भवेत्। तथा संवत्सरेऽतीते स्नात एव विशुद्ध्यति॥ १२॥
अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च। परपूर्वासु च स्त्रीषु त्र्यहाच्छुद्धिरिहेष्यते॥ १३॥
मातामहे व्यतीते तु आचार्ये च तथा मृते। गृहे दत्तासु कन्यासु मृतासु तु त्र्यहस्तथा॥ १४॥
निवासराजनि प्रेते जाते दौहित्रके गृहे। आचार्यपत्नीपुत्रेषु प्रेतेषु दिवसेन च॥ १५॥
एकरात्रं त्रिरात्रं च षड्रात्रं मासमेव च। शूद्रे सपिण्डे वर्णानामाशौचं क्रमशः स्मृतम्॥ १७॥
त्रिरात्रमथ षड्रात्रं पक्षं मासं तथैव च। वैश्ये सपिण्डे वर्णानामाशौचं क्रमशः स्मृतम्॥ १८॥
सपिण्डे क्षत्रिये शुद्धिः षड्रात्रं ब्राह्मणस्य तु। वर्णानां परिशिष्टानां द्वादशाहं विनिर्दिशेत्॥ १९॥
सपिण्डे ब्राह्मणे वर्णाः सर्वे एवाविशेषतः। दशरात्रेण शुध्येयुरित्याह भगवान्यमः॥ २०॥
भृग्वग्न्यनशनाम्भोभिर्मृतानामात्मघातिनाम्। पतितानां च नाशौचं शस्त्रविद्युद्धताश्च ये॥ २१॥
यतिव्रतिब्रह्मचारिनृपकारुकदीक्षिताः। नाशौचभाजः कथिता राजाज्ञाकारिणश्च ये॥ २२॥

शंखस्मृति-१६ अध्याय।

मृन्मयं भाजनं सर्वं पुनः पाकेन शुद्ध्यति। मद्यैर्मूत्रैः पुरीषैर्वा ष्ठीवनैः पूयशोणितैः॥ १॥
संस्पृष्टं नैव शुद्ध्येत पुनः पाकेन मृन्मयम्। एतैरेव तथा स्पृष्टं ताम्रसौवर्णराजतम्॥ २॥
शुद्ध्यत्यावर्तितं पश्चादन्यथा केवलाम्भसा। अम्लोदकेन ताम्रस्य सीसस्य त्रपुणस्तथा॥ ३॥
क्षारेण शुद्धिः कांस्यस्य लोहस्य च विनिर्दिशेत्। मुक्तामणिप्रवालानां शुद्धिः प्रक्षालनेन तु॥ ४॥
अब्जानां चैव भाण्डानां सर्वस्याश्ममयस्य च। शाकमूलफलानां च विदलानां तथैव च॥ ५॥
मार्जनाद्यज्ञपात्राणां पाणिना यज्ञकर्मणि। उष्णाम्भसा तथा शुद्धिं सस्नेहानां विनिर्दिशेत्॥ ६॥
मार्जनाद्वेश्मनां शुद्धिः क्षितेः शोधस्तु तत्क्षणात्। संमार्जितेन तोयेन वाससां शुद्धिरिष्यते॥ ८॥
बहूनां प्रोक्षणाच्छुद्धिर्धान्यादीनां विनिर्दिशेत्। प्रोक्षणात्संहतानां च दारवाणां च तक्षणात्॥ ९॥
सिद्धार्थकानां कल्केन शृङ्गदन्तमयस्य च। गोवालैः फलपात्राणामस्थ्नां शृङ्गवतां तथा॥ ११॥
प्रोक्षणात्कथिता शुद्धिरित्याह भगवान्यमः। भूमिस्थमुदकं शुद्धं शुचि तोयं शिलागतम्॥ १२॥
वर्णगन्धरसैर्दुष्टैर्वर्जितं यदि तद्भवेत्। शुद्धं नदीगतं तोयं सर्वदैव तथा करः॥ १३॥
शुद्धं प्रसारितं पण्यं शुद्धे चाजाश्वयोर्मुखे। मुखवर्जं तु गौः शुद्धा मार्जारश्चाश्रमं शुचिः॥ १४॥
शय्या भार्या शिशुर्वस्त्रमुपवीतं कमण्डलुः। आत्मनः कथितं शुद्धं न शुद्धं हि परस्य च॥ १५॥
नारीणां चैव वत्सानां शकुनीनां शुनां मुखम्। रात्रौ प्रस्रवणे वृक्षे मृगयायां सदा शुचिः॥ १६॥
शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला। दैवे कर्मणि पित्र्ये च पञ्चमेहनि शुध्यति॥ १७॥
रथ्यामाक्रम्य वाचामेद्वासो विपरिधाय च। कृत्वा मूत्रं पुरीषं च लेपगन्धापहं द्विजः॥ २०॥
उद्धृतेनाम्भसा शौचं मृदा चैव समाचरेत्। मेहने मृत्तिकाः सप्त लिङ्गे द्वे परिकीर्तिते॥ २१॥
एकस्मिन्विंशतिर्हस्ते द्वे ज्ञेये च चतुर्दश। तिस्रस्तु मृतिका ज्ञेयाः कृत्वा नखविशोधनम्॥ २२॥
तिस्रस्तु पादयोर्ज्ञेयाः शौचकामस्य सर्वदा। शौचमेतद्गृहस्थानां द्विगुणं ब्रह्मचारिणाम्॥ २३॥
त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणम्। मृत्तिका च विनिर्दिष्टा त्रिपर्वं पूर्यते यया॥ २४॥

शंखस्मृति-१७ अध्याय।

नित्यं त्रिषवणस्नायी कृत्वा पर्णकुटीं वने। अधःशायी जटाधारी पर्णमूलफलाशनः॥ १॥
ग्रामं विशेच्च भिक्षार्थं स्वकर्म परिकीर्तयन्। एककालं समश्नीयाद्वर्षे तु द्वादशे गते॥ २॥
यागस्थं क्षत्रियं हत्वा वैश्यं हत्वा च याजकम्। एतदेव व्रतं कुर्यादात्रेयीविनिषूदकः॥ ४॥
कूटसाक्ष्यं तथैवोक्त्वा निक्षेपमपहृत्य च। एतदेव व्रतं कुर्यात्त्यक्त्वा च शरणागतम्॥ ५॥

आहिताग्नेः स्त्रियं हत्वा मित्रं हत्वा तथैव च। हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत् ॥ ६ ॥
हत्वा द्विजं तथा सर्पजलेशयविलेशयान्। सप्तरात्रं तथा कुर्याद्व्रतं ब्रह्महणस्तथा ॥ ११ ॥
अनस्थ्नां शकटं हत्वा अस्थ्नां दशशतं तथा। ब्रह्महत्याव्रतं कुर्यात्पूर्णं संवत्सरं नरः ॥ १२ ॥
गोजाश्वस्यापहरणे मणीनां रजतस्य च। जलापहरणे चैव कुर्यात्संवत्सरं व्रतम् ॥ १५ ॥
तिलानां धान्यवस्त्राणां मद्यानामामिषस्य च। संवत्सरार्द्धं कुर्वीत व्रतमेतत्समाहितः ॥ १६ ॥
तृणेक्षुकाष्ठतक्राणां रसानामपहारकः। मासमेकं व्रतं कुर्याद्दन्तानां सर्पिषां तथा ॥ १७ ॥
लवणानां गुडानां च मूलानां कुसुमस्य च। मासार्द्धं तु व्रतं कुर्यादेतदेव समाहितः ॥ १८ ॥
लोहानां वैदलानां च सूत्राणां चर्मणां तथा। एकरात्रं व्रतं कुर्यादेतदेव समाहितः ॥ १९ ॥
भुक्त्वा पलाण्डुं लशुनं मद्यं च कवकानि च। नारं मलं तथा मांसं विड्वराहं खरं तथा ॥ २० ॥
गौधेयकुञ्जरोष्ट्रं च सर्वं पाञ्चनखं तथा। क्रव्यादं कुक्कुटं ग्राम्यं कुर्यात्संवत्सरं व्रतम् ॥ २१ ॥
भक्ष्याः पञ्चनखास्त्वेते गोधाकच्छपशल्लकाः। खड्गश्च शशकश्चैव तान्हत्वा च चरेद्व्रतम् ॥ २२ ॥
हंसं मद्गुरकं काकं काकोलं खञ्जरीटकम्। मत्स्यादांश्च तथा मत्स्यान्बलाकं शुकसारिके ॥ २३ ॥
चक्रवाकं प्लवं कोकं मण्डूकं भुजगं तथा। मासमेकं व्रतं कुर्यादेतच्चैव न भक्षयेत् ॥ २४ ॥
जलेचरांश्च जलजान्मुखाग्रनखविष्किरान्। रक्तपादाञ्जालपादान्सप्ताहं व्रतमाचरेत् ॥ २६ ॥
तित्तिरिं च मयूरं च लावकं च कपिञ्जलम्। वार्ध्रीणसं वर्त्तकं च भक्षानाह यमस्तथा ॥ २७ ॥
भुक्त्वा चोभयतोदन्तस्तथैकशफदंष्ट्रिणः। तथा भुक्त्वा तु मांसं वै मासार्द्धं व्रतमाचरेत् ॥ २८ ॥
स्वयं मृतं वृथा मांसं माहिषं त्वाजमेव च। गोश्च क्षीरं विवत्सायाः सन्धिन्याश्च तथा पयः ॥ २९॥
सन्धिन्यमेध्यं भक्षित्वा पक्षं तु व्रतमाचरेत्। क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ॥ ३० ॥
सप्तरात्रं व्रतं कुर्याद्यदेतत्परिकीर्तितम्। लोहितान्वृक्षनिर्यासान्व्रश्चनप्रभवांस्तथा ॥ ३१ ॥
शूद्रान्नं ब्राह्मणो भुक्त्वा तथा रङ्गावतारिणः। चिकित्सकस्य क्षुद्रस्य तथा स्त्रीमृगजीविनः ॥ ३६॥
मौञ्जिकान्नं सूतिकान्नं भुक्त्वा मासं व्रतं चरेत्। शूद्रस्य सततं भुक्त्वा षण्मासान्व्रतमाचरेत् ॥४०॥
मद्यभाण्डगताः पीत्वा सप्तरात्रं व्रतं चरेत्। शूद्रोच्छिष्टाशने मासं पक्षमेकं तथा विशः ॥ ४३ ॥
क्षत्रियस्य तु सप्ताहं ब्राह्मणस्य तथा दिनम्। अग्रश्राद्धाशने विद्वान्मासमेकं व्रती भवेत् ॥ ४४ ॥
परिवित्तिः परिवेत्ता यया च परिविन्दति। व्रतं संवत्सरं कुर्युर्दातृयाजकपञ्चमाः ॥ ४५ ॥
काकोच्छिष्टं गवाघ्रातं भुक्त्वा पक्षं व्रती भवेत्। दूषितं केशकीटैश्च मूषिकालाङ्गलेन च ॥ ४६ ॥
मक्षिकामशकेनापि त्रिरात्रं तु व्रती भवेत्। वृथा कृसरसंयावपायसापूपशष्कुलीः ॥ ४७ ॥
कुशैः प्रमृज्य पादौ च दिनमेकं व्रती भवेत्। नीलीवस्त्रं परीधाय भुक्त्वा स्नानार्हणस्तथा ॥ ५० ॥
त्रिरात्रं च व्रतं कुर्याच्छित्त्वा गुल्मलतास्तथा। अध्यास्य शयनं यानमासनं पादुके तथा ॥ ५१ ॥
क्षत्रियस्तु रणे दत्त्वा पृष्ठं प्राणपरायणः। संवत्सरं व्रतं कुर्याच्छित्त्वा वृक्षं फलप्रदम् ॥ ५३ ॥
दिवा च मैथुनं गत्वा स्नात्वा नग्नस्तथाम्भसि। नग्नां परस्त्रियं दृष्ट्वा दिनमेकं व्रती भवेत् ॥ ५४ ॥
क्षिप्त्वाग्नावशुचिद्रव्यं तदेवाम्भसि मानवः। मासमेकं व्रतं कुर्यादुपक्रुश्य तथा गुरुम् ॥ ५५ ॥
हुङ्कारं ब्राह्मणस्योक्त्वा त्वङ्कारं च गरीयसः। दिनमेकं व्रतं कुर्यात्प्रयतः सुसमाहितः ॥ ६० ॥
प्रेतस्य प्रेतकार्याणि अकृत्वा धनहारकः। वर्णानां यद्व्रतं प्रोक्तं तद्व्रतं प्रयतश्चरेत् ॥ ६१ ॥

शंखस्मृति—१८ अध्याय।

त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम्। त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्व्रतम् ॥ ३ ॥
त्र्यहमुष्णं पिबेत्तोयं त्र्यहमुष्णं घृतं पिबेत्। त्र्यहमुष्णं पयः पीत्वा वायुभक्षस्त्र्यहं भवेत् ॥ ४ ॥
तप्तकृच्छ्रं विजानीयाच्छीतैः शीतमुदाहृतम्। द्वादशाहोपवासेन पराकः परिकीर्तितः ॥ ५ ॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥ ८ ॥
एतत्तु त्र्यहमभ्यस्तं महासान्तपनं स्मृतम्। पिण्याकं वाऽऽमतक्राम्बुसक्तूनां प्रतिवासरम् ॥ ९ ॥
उपवासान्तराभ्यासात्तुलापुरुष उच्यते। गोपुरीषाशनो भूत्वा मासं नित्यं समाहितः ॥ १० ॥
व्रतं तु यावकं कुर्यात् सर्वपापापनुत्तये। ग्रासं चन्द्रकलावृद्ध्या प्राश्नीयाद्वर्द्धयन्सदा ॥ ११ ॥
ह्रासयेच्च कलावृद्ध्या व्रतं चान्द्रायणं चरन्। मुण्डस्त्रिषवणस्नायी अधःशायी जितेन्द्रियः ॥ १२ ॥

स्त्रीशूद्रपतितानां च वर्जयेत्परिभाषणम्। पवित्राणि जपेच्छक्त्या जुहुयाच्चैव शक्तितः ॥ १३ ॥
अयं विधिः स विज्ञेयः सर्वकृच्छ्रेषु सर्वदा। पापात्मानस्तु पापेभ्यः कृच्छ्रैः सन्तारिता नराः॥१४॥

(१५ क)लघुशंखस्मृति।

यावदस्थीनि गङ्गायां तिष्ठन्ति पुरुषस्य च। तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ७ ॥
एकादशाहे प्रेतस्य यस्य चोत्सृज्य ते वृषः। मुच्यते प्रेतलोकाच्च स्वर्गलोकं च गच्छति ॥ ९ ॥
त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते। प्राप्ते चैकादशदिने पार्वणं तु विधीयते ॥ १८ ॥
मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिकासुतः। द्वितीयं तु पितुस्तस्यास्तृतीयं तु पितुः पितुः ॥ २१ ॥
अथ चेन्मन्त्रविद्युक्तः शारीरैः पंक्तिदूषणैः। अदोषं तं यमः प्राह पंक्तिपावन एव सः ॥ २२ ॥
मृन्मयेषु च पात्रेषु श्राद्धं भोजयते द्विजः। अन्नदाताऽपहर्ता च भोक्ता च नरकं व्रजेत् ॥ २५ ॥
हस्तदत्तास्तु ये स्नेहा लवणव्यञ्जनादयः। दातारं नोपतिष्ठन्ति भोक्ता भुंक्ते च किल्बिषम् ॥ २६ ॥
आयसेन तु पात्रेण यदन्नमुपदीयते। भोक्ता विष्ठासमं भुंक्ते दाता च नरकं व्रजेत् ॥ २७ ॥
पुनर्भोजनमध्वानं भाराध्ययनमैथुनम्। दानं प्रतिग्रहो होमः श्राद्धं भुक्त्वाऽष्ट वर्जयेत् ॥ २९ ॥
चाण्डालघटमध्यस्थं यस्तोयं पिबति द्विजः। तत्क्षणात्क्षय (क्षिप) ते यस्तु प्राजापत्यं समाचरेत्॥४३
यदि न क्षिपते तोयं शरीरे यस्य जीर्यति। प्राजापत्यं न दातव्यं कृच्छ्रं सान्तपनं स्मृतम् ॥ ४४ ॥
चरेत्सान्तपनं विप्रः प्राजापत्यं तु क्षत्रियः। तदर्धं तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् ॥ ४५ ॥
एकं च बहुभिः कैश्चिद्दैवाद्व्यापादितं क्वचित्। कृच्छ्रपादं तु हत्यायाश्चरेयुस्ते पृथक् पृथक् ॥ ५४ ॥
एकपादं चरेद्रोधे द्वौ पादौ बन्धने चरेत्। योक्त्रे च पादहीनं स्याच्चरेत्सर्वं निपातने ॥ ५५ ॥
रोमाणि प्रथमे पादे द्वितीये श्मश्रुघातनम्। तृतीये तु शिखा धार्या सशिखं तु निपातने ॥ ५६ ॥
केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत्। द्विगुणव्रते समादिष्टे द्विगुणा दक्षिणा भवेत् ॥ ५७ ॥
राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः। अकृत्वा वपनं तेषां प्रायश्चित्तं न विद्यते ॥ ५८ ॥
यन्त्रिते गोचिकित्सायां मूढगर्भविमोचने। यत्ने कृते विपद्येत प्रायश्चित्तं न विद्यते ॥ ६० ॥
औषधं स्नेहमाहारं दत्तं गोब्राह्मणाय च। यदि काचिद्विपत्तिः स्यात्प्रायश्चित्तं न विद्यते ॥ ६१ ॥
आममांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः। म्लेच्छभाण्डस्थिता ह्येते निष्क्रान्ताः शुचयः स्मृताः६७
दिवा कपित्थच्छायासु रात्रौ दधिशमीषु च। धात्रीफलेषु सप्तम्यामलक्ष्मीर्वसते सदा ॥ ६८ ॥
अर्धवासास्तु यः कुर्याज्जपहोमक्रिया द्विजः। तत्सर्वं राक्षसं विद्याद्बहिर्जानु च यत्कृतम् ॥ ७० ॥

(१६) लिखितस्मृति।

इष्टापूर्ते तु कर्त्तव्ये ब्राह्मणेन प्रयत्नतः। इष्टेन लभते स्वर्गं पूर्ते मोक्षमवाप्नुयात् ॥ १ ॥
एकाहमपि कर्त्तव्यं भूमिष्ठमुदकं शुभम्। कुलानि तारयेत्सप्त यत्र गौर्वितृषी भवेत् ॥ २ ॥
भूमिदानेन ये लोका गोदानेन च कीर्त्तिताः। ताँल्लोकान्प्राप्नुयान्मर्त्यः पादपानां प्ररोपणे ॥ ३ ॥
वापीकूपतडागानि देवतायतनानि च। पतितान्युद्धरेद्यस्तु स पूर्तफलमश्नुते ॥ ४ ॥
अग्निहोत्रं तपः सत्यं वेदानां चैव पालनम्। आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ॥ ५ ॥
इष्टापूर्तौ द्विजातीनां सामान्यौ धर्म उच्यते। अधिकारी भवेच्छूद्रः पूर्ते धर्मे न वैदिके ॥ ६ ॥
यावदस्थि मनुष्यस्य गङ्गातोयेषु तिष्ठति। तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ७ ॥
एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः। मुच्यते प्रेतलोकात्तु पितृलोकं स गच्छति ॥ ९ ॥
एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत्। यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥ १० ॥
वाराणस्यां प्रविष्टस्तु कदाचिन्निष्क्रमेद्यदि। हसन्ति तस्य भूतानि अन्योन्यं करताडनैः ॥ ११ ॥
गयाशिरे तु यत्किंचिन्नाम्ना पिण्डन्तु निर्वपेत्। नरकस्थो दिवं याति स्वर्गस्थो मोक्षमाप्नुयात् १२॥
लोहितो यस्तु वर्णेन शंखवर्णखुरस्तथा। लाङ्गूलशिरसोश्चैव स वै नीलवृषः स्मृतः ॥ १४ ॥
नवश्राद्धं त्रिपक्षे च द्वादशस्वेव मासिकम्। षण्मासं चाब्दिकं चैव श्राद्धान्येतानि षोडश ॥ १५ ॥
यस्यैतानि न कुर्वीत एकोद्दिष्टानि षोडश। पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥ १६ ॥
यस्य संवत्सरादर्वाक्सपिण्डीकरणं स्मृतम्। प्रत्यहं तस्योदकुम्भं दद्यात्संवत्सरं द्विजः ॥ २३ ॥
पत्या चैकेन कर्त्तव्यं सपिण्डीकरणं स्त्रियाः। पितामह्यापि तत्तास्मिन्सत्येवन्तु क्षयेऽहनि ॥ २४ ॥

तस्यां सत्यां प्रकर्तव्यं तस्याः श्वश्रेति निश्चितम् । विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु ॥ २५ ॥
एकत्वं सा गता भर्त्तुः पिण्डे गोत्रे च सूतके । स्वगोत्राद्भ्रश्यते नारी उद्वाहात्सप्तमे पदे ॥ २६ ॥
भर्तृगोत्रेण कर्तव्या दानपिण्डोदकक्रियाः ॥ २७ ॥
यस्यास्तु न भवेद् भ्राता न विज्ञायेत वा पिता । नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया ॥ ५१ ॥
अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम् । अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति५२॥
मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिकासुतः । द्वितीयं तु पितुस्तस्यास्तृतीयन्तत्पितुः पितुः ॥ ५३ ॥
मृन्मयेषु च पात्रेषु श्राद्धे यो भोजयेत्पितॄन् । अन्नदाता पुरोधाश्च भोक्ता च नरकं व्रजेत् ॥ ५४ ॥
अलाभे मृन्मयं दद्यादनुज्ञातस्तु तैर्द्विजैः । घृतेन प्रोक्षणं कार्यं मृदः पात्रं पवित्रकम् ॥ ५५ ॥
पुनर्भोजनमध्वानं भाराध्ययनमैथुनम् । दानं प्रतिग्रहो होमं श्राद्धभुक्त्वष्ट वर्जयेत् ॥ ५८ ॥
अध्वगामी भवेदश्वः पुनर्भोक्ता च वायसः । कर्मकृज्जायते दासः स्त्रीगामी सूकरः स्मृतः ॥ ५९ ॥
चान्द्रायणं नवश्राद्धे पराको मासिके तथा । पक्षत्रये तु कृच्छ्रं स्यात्षण्मासे कृच्छ्रमेव च ॥ ६२ ॥
ऊनाब्दिके द्विरात्रं स्यादेकाहः पुनराब्दिके । शावे मासस्तु भुक्त्वा वा पादकृच्छ्रं विधीयते ॥ ६३ ॥
सर्पविप्रहतानां च शृङ्गिदंष्ट्रिसरीसृपैः । आत्मनस्त्यागिनां चैव श्राद्धमेषां न कारयेत् ॥ ६४ ॥
गोभिर्हतं तथोद्बद्धं ब्राह्मणेन तु घातितम् । तं स्पृशन्ति च ये विप्रा गोजाश्वाश्च भवन्ति ते ॥ ६५ ॥
अग्निदाता तथा चान्ये पाशच्छेदकराश्च ये । तप्तकृच्छ्रेण शुध्यन्ति मनुराह प्रजापतिः ॥ ६६ ॥
पतितान्नं यदा भुंक्ते भुक्ते चाण्डालवेश्मनि । स मासार्द्धं चरेद्वारि मासं कामकृते न तु ॥ ७० ॥
कुब्जवामनषण्ढेषु गद्गदेषु जडेषु च । जात्यन्धे बधिरे मूके न दोषः परिवेदने ॥ ७५ ॥
क्लीबे देशान्तरस्थे च पतिते व्रजितेपि वा । योगशास्त्राभियुक्ते च न दोषः परिवेदने ॥ ७६ ॥
चाण्डालस्पृष्टभाण्डस्थं यत्तोयं पिबति द्विजः । तत्क्षणात्क्षिपते यस्तु प्राजापत्यं समाचरेत् ॥ ८० ॥
यदि वोत्क्षिप्यते तोयं शरीरे तस्य जीर्यति । प्राजापत्यं न दातव्यं कृच्छ्रं सान्तपनं चरेत् ॥ ८१ ॥
चरेत्सान्तपनं विप्रः प्राजापत्यं तु क्षत्रियः । तदर्धं तु चरेद्वैश्यः पादं शूद्रे तु दापयेत् ॥ ८२ ॥
रजस्वला यदा स्पृष्टा शुना सूकरवायसैः । उपोष्य रजनीमेकां पञ्चगव्येन शुद्ध्यति ॥ ८३ ॥
शावसूतक उत्पन्ने सूतकं तु यदा भवेत् । शावेन शुध्यते सूतिर्न सूतिः शावशोधिनी ॥ ८६ ॥
षष्ठेन शुद्ध्यत्येकाहं पञ्चमे द्व्यहमेव तु । चतुर्थे सप्तरात्रं स्यात्त्रिपुरुषं दशमेऽहनि ॥ ८७ ॥
आमं मांसं घृतं क्षौद्रं स्नेहाश्च फलसंभवाः । अन्त्यभाण्डस्थिता ह्येते निष्क्रान्ताः शुचयः स्मृताः॥
दिवा कपित्थच्छायायां रात्रौ दधि च सक्तुषु । धात्रीफलेषु सर्वत्र अलक्ष्मीर्वसते सदा ॥ ९१ ॥
यत्रयत्र च सङ्कीर्णमात्मानं मन्यते द्विजः । तत्रतत्र तिलैर्होमं गायत्र्यष्टशतं जपेत् ॥ ९२ ॥

(१६ क) शंखलिखितस्मृति ।

परान्नेन तु भुक्तेन मैथुनं योऽधिगच्छति । यस्यान्नं तस्य ते पुत्रा अन्नाच्छुक्रं प्रवर्तते ॥ १५ ॥
परान्नं परवस्त्रं च परयानं परस्त्रियः । परवेश्मनि वासश्च शक्रस्यापि श्रियं हरेत् ॥ १७ ॥
आहिताग्निस्तु यो विप्रो मत्स्यमांसानि भोजयेत् । कालरूपी कृष्णसर्पो जायते ब्रह्मराक्षसः ॥ १८॥

(१७) दक्षस्मृति–१ अध्याय ।

द्विविधो ब्रह्मचारी तु स्मृतः शास्त्रमनीषिभिः । उपकुर्वाणकस्त्वाद्यो द्वितीयो नैष्ठिकः स्मृतः ॥८ ॥

दक्षस्मृति–२ अध्याय ।

समित्पुष्पकुशादीनां द्वितीये समुदाहृतः । तृतीये चैव भागे तु पोष्यवर्गार्थसाधनम् ॥ ३१ ॥
माता पिता गुरुर्भार्या प्रजादीनः समाश्रितः । अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः ॥ ३२॥
ज्ञातिर्बन्धुजनः क्षीणस्तथानाथः समाश्रितः । अन्योऽपि धनमुक्तस्य पोष्यवर्ग उदाहृतः ॥ ३३ ॥
नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते । तेषां मध्ये तु यन्नित्यं तत्पुनर्भिद्यते त्रिधा ॥ ४० ॥
मलापकर्षणं पश्चान्मन्त्रवत्तु जले स्मृतम् । सन्ध्यास्नानमुभाभ्यां तु स्नानभेदाः प्रकीर्तिताः ॥४१॥

दक्षस्मृति–३ अध्याय ।

दाने फलविशेषः स्याद्विशेषाद्यत्न एव हि । सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ॥ २६ ॥
सहस्रगुणमाचार्ये त्वनन्तं वेदपारगे । विधिहीने यथाऽपात्रे यो ददा प्रतिग्रहम् ॥ २७ ॥

दक्षस्मृति–४ अध्याय ।

दरिद्रं व्याधितं चैव भर्तारं यावमन्यते ॥ १६ ॥
शुनी गृध्री च मकरी जायते सा पुनः पुनः ॥ १७ ॥

दक्षस्मृति–५ अध्याय ।

एका लिङ्गे गुदे तिस्रो दश वामकरे तथा । उभयोः सप्त दातव्या मृदस्तिस्रस्तु पादयोः ॥ ५ ॥
गृहस्थे शौचमाख्यातं त्रिष्वन्येषु क्रमेण तु । द्विगुणं त्रिगुणं चैव चतुर्थस्य चतुर्गुणम् ॥ ६ ॥
अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता । द्वितीया च तृतीया च तदर्द्धं परिकीर्तिता ॥ ७ ॥

दक्षस्मृति–६ अध्याय ।

राजर्त्विग्दीक्षितानाञ्च बाले देशान्तरे तथा । व्रतिनां सत्रिणाञ्चैव सद्यः शौचं विधीयते ॥ ९ ॥
सूतके मृतके चैव तथा च मृतसूतके । एतत्संहतशौचानां मृताशौचेन शुध्यति ॥ १२ ॥
दानं च विधिना देयमशुभात्तारकं हि तत् । मृतकान्ते मृतो यस्तु सूतकान्ते च सूतकम् ॥ १४ ॥
एतत्संहतशौचानां पूर्वाशौचेन शुद्ध्यति । उभयत्र दशाहानि कुलस्यान्नं न भुज्यते ॥ १५ ॥
चतुर्थेहनि कर्त्तव्यमस्थिसञ्चयनं द्विजैः । ततः सञ्चयनादूर्ध्वमङ्गस्पर्शो विधीयते ॥ १६ ॥
स्वस्थकाले त्विदं सर्वमशौचं परिकीर्तितम् । आपद्गतस्य सर्वस्य सूतकेपि न सूतकम् ॥ १८ ॥
यज्ञे प्रवर्तमाने तु जायेताथ म्रियेत वा । पूर्वसङ्कल्पिते कार्ये न दोषस्तत्र विद्यते ॥ १९ ॥
यज्ञकाले विवाहे च देवयागे तथैव च । हूयमाने तथा चाग्नौ नाशौचं नापि सूतकम् ॥ २० ॥

दक्षस्मृति–७ अध्याय ।

प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा । तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥ २ ॥
त्यक्त्वा विषयभोगांस्तु मनो निश्चलताङ्गतम् । आत्मशक्तिस्वरूपेण समाधिः परिकीर्तितः ॥२२॥
ब्रह्मचर्यं सदा रक्षेदष्टधा रक्षणं पृथक् । स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ॥ ३१ ॥
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च । एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ॥ ३२ ॥

(१८) गौतमस्मृति–१ अध्याय ।

उपनयनं ब्राह्मणस्याष्टमे नवमे पञ्चमे वा काम्यं गर्भादिः संख्यावर्षाणां तद्द्वितीयं जन्म ॥ ३ ॥ आषोडशाद्ब्राह्मणस्यापतिता सावित्री द्वाविंशते राजन्यस्य द्व्यधिकाया वैश्यस्य ॥ ६ ॥ मौञ्जी ज्यामौर्वीसौत्र्यो मेखलाः क्रमेण कृष्णरुरुवस्ताजिनानि वासांसि शाणक्षौमचीरकुतपाः सर्वेषां कार्पासं चाविकृतम् ॥ ७ ॥ काषायमप्येके ॥ ८ ॥ वार्क्षं ब्राह्मणस्य माञ्जिष्ठहारिद्रे इतरयोः ॥ ९ ॥ बैल्वपालाशौ दण्डौ ॥ १० ॥ आश्वत्थपैलवौ शेषे ॥ ११ ॥ यज्ञिया वा सर्वेषाम् ॥ १२ ॥ अपीडिता यूपचक्राः सवल्कला मूर्द्धललाटनासाग्रप्रमाणा मुण्डजटिलशिखाजटाश्च ॥ १३ ॥ द्रव्यशुद्धिः परिमार्जनप्रदाहतक्षणनिर्णेजनानि तैजसमार्त्तिकदारवतान्तवानाम् ॥ १५ ॥ तैजसवदुपलमणिशङ्खशुक्तीनां दारुवदस्थिभूम्योरावपनं च भूमेश्चैलवद्रज्जुविदलचर्मणामुत्सर्गो वात्यन्तोपहतानाम् ॥ १६ ॥ दन्तश्लिष्टेषु दन्तवदन्यत्र जिह्वाभिमर्शनात्प्राक्च्युतेरित्येके ॥ २० ॥ च्युतेरास्रावविद्यान्निगिरन्नेव तच्छुचिः ॥ २१ ॥ न मुख्या विप्रुष उच्छिष्टं कुर्वन्ति ताश्चेदङ्गे निपतन्ति ॥ २२ ॥

गौतमस्मृति–२ अध्याय ।

प्रागुपनयनात्कामचारवादभक्षोऽहुतोऽब्रह्मचारी यथोपपादमूत्रपुरीषो भवति नास्याचमनकल्पो विद्यतेऽन्यत्रापमार्जनप्रधावनावोक्षणेभ्यो न तदुपस्पर्शनादशौचं न त्वेनमग्निहवनबलिहरणयोर्नियुज्यान्न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनात् ॥ १ ॥ बहिः सन्ध्यार्थं चातिष्ठेत्पूर्वामासीनोत्तरां सज्योतिष्याज्योतिषो दर्शनाद्वाग्यतो नादित्यमीक्षेत ॥ ५ ॥ वर्जयेन्मधुमांसगन्धमाल्यदिवास्वप्नाञ्जनाभ्यञ्जनयानोपानच्छत्रकामक्रोधलोभमोहवाद्यवादनस्नानदन्तधावनहर्षनृत्यगीतपरिवादभयानि गुरुदर्शने कर्णप्रावृतावसक्थिकायाश्रयणपादप्रसारणानि निष्ठीवितहसितविजृम्भितास्फोटनानि स्त्रीप्रेक्षणालम्भने मैथुनशङ्कायां द्यूतं हीनसेवामदत्तादानं हिंसामाचार्यतत्पुत्रस्त्री-

दीक्षितनामानि शुष्कां वाचं मद्यं नित्यं ब्राह्मणः ॥ ६ ॥ गुरुदर्शने चोत्तिष्ठेत्, गच्छन्तमनुव्रजेत्, कर्म विज्ञाप्याख्यायाऽहूताध्यायी युक्तः प्रियहितयोस्तद्भार्यापुत्रेषु चैवम् ॥ ११ ॥ नोच्छिष्टाशन-स्नपनप्रसाधनपादप्रक्षालनोन्मर्दनोपसंग्रहणानि ॥ १२ ॥ व्यवहारप्राप्तेन सार्ववर्णिकं भैक्षचरण-मभिशस्तपतितवर्जम् ॥ १६ ॥ आचार्यज्ञातिगुरुष्वेष्वलाभेऽन्यत्र ॥ १७ ॥ तेषां पूर्वं पूर्वं परि-हरन्निवेद्य गुरवेऽनुज्ञातो भुञ्जीत ॥ १८ ॥ द्वादशवर्षाण्येकैकवेदे ब्रह्मचर्यं चरेत् प्रतिद्वादशसु सर्वेषु ग्रहणान्तं वा ॥ २२ ॥

गौतमस्मृति—३ अध्याय।

तत्रोक्तं ब्रह्मचारिण आचार्याधीनत्वमात्रं गुरोः कर्मशेषेण जयेत्, गुर्वभावे तदपत्यवृत्तिस्तदभावे वृद्धे सब्रह्मचारिण्यग्नौ वा ॥ २ ॥ एवं वृत्तो ब्रह्मलोकमवाप्नोति जितेन्द्रियः ॥ ३ ॥ कौपीना-च्छादनार्थं वासो बिभृयात् ॥ ७ ॥ प्रहीणमेके निर्णेजनाविप्रयुक्तम् ॥ ८ ॥ मुण्डः शिखी वा वर्जयेज्जीववधम् ॥ ११ ॥ वैखानसो वने मूलफलाशी तपःशीलः श्रावणकेनाग्निमाधायाग्राम्य-भोजी देवपितृमनुष्यभूतर्षिपूजकः सर्वातिथिप्रतिषिद्धवर्जं भैक्षमप्युपयुञ्जीत न फालकृष्टमधितिष्ठेत्, ग्रामं च न प्रविशेत्, जटिलश्चीराजिनवासा नातिसांवत्सरं भुञ्जीत ॥ १३ ॥

गौतमस्मृति—४ अध्याय।

गृहस्थः सदृशीं भार्यां विन्देतानन्यपूर्वां यवीयसीम् ॥ १ ॥ असमानप्रवरैर्विवाह ऊर्ध्वं सप्तमा-त्पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमात् ॥ २ ॥ ब्राह्मो विद्याचारित्रबन्धुशीलसंपन्नाय दद्यादाच्छाद्यालंकृता संयोगमन्त्रः प्राजापत्ये सह धर्मं चरतामिति आर्षे गोमिथुनं कन्यावते दद्यादन्तर्वेद्यृत्विजे दानं दैवोऽलङ्कृत्येच्छन्त्याः स्वयं संयोगो गान्धर्वो वित्तेनानीतस्त्रीमता-मासुरः प्रसह्यादानाद्राक्षसोऽसंविज्ञानोपसङ्गमनात्पैशाचः ॥ ३ ॥ चत्वारो धर्म्याः प्रथमाः षडित्येके ॥ ४ ॥ ब्राह्मण्यजीजनत्पुत्रान् वर्णेभ्य आनुपूर्व्यात्, ब्राह्मणसूतमागधचाण्डालान् तेभ्य एव क्षत्रिया मूर्द्धाभिषिक्तक्षत्रियधीवरपुल्कसान्, तेभ्य एव वैश्या भृज्जकण्टकमाहिष्यवैश्यवै-देहान्, तेभ्य एव पारशवयवनकरणशूद्रान् शूद्रेत्येके ॥ ७ ॥ वर्णान्तरगमनमुत्कर्षापकर्षाभ्यां सप्तमेन पञ्चमेन चाचार्याः ॥ ८ ॥ सृष्ट्यन्तरजातानां च प्रतिलोमास्तु धर्महीनाः शूद्रायां चासमानायां च शूद्रात्पतितवृत्तिरन्त्यः पापिष्ठः ॥ ९ ॥ पुनन्ति साधवः पुत्रास्त्रिपौरुषानार्षाद्दश दैवाद्दशैव प्राजापत्याद्दश पूर्वान्दशापरानात्मानं च ब्राह्मीपुत्रा ब्राह्मीपुत्राः ॥ १० ॥

गौतमस्मृति—५ अध्याय।

समद्विगुणसाहस्रानन्त्यानि फलान्यब्राह्मणब्राह्मणश्रोत्रियवेदपारगेभ्यः ॥ ८ ॥ गुर्वर्थनिवेशौ-षधार्थवृत्तिक्षीणयक्ष्यमाणाध्ययनाध्वसंयोगवैश्वजितेषु द्रव्यसंविभागो बहिर्वेदि भिक्षमाणेषु कृतान्न-मितरेषु ॥ ९ ॥ प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात् ॥ १० ॥

गौतमस्मृति—६ अध्याय।

स्वनाम प्रोच्याहमयमित्यभिवादोऽज्ञसमवाये स्त्रीपुंयोगेऽभिवादतोऽनियममेकेनाविप्रोष्य स्त्रीणाममा-तृपितृव्यभार्याभगिनीनां नोपसङ्ग्रहणं भ्रातृभार्याणां श्वश्र्वाश्च॥३॥ऋत्विक्श्वशुरपितृव्यमातुलानां यवीयसां प्रत्युत्थानमनभिवाद्यास्तथान्यः पौर्वः पौरोऽशीतिकावरः शूद्रोप्यपत्यसमेनावरोऽप्यार्यः शूद्रेण नाम चास्य वर्जयेद्राज्ञश्चाजपः प्रेष्यो भो भवन्निति वयस्यः समानेऽहनि जातो दशवर्षवृद्धः पौरः पञ्चभिः कलाभरः श्रोत्रियस्सदाचरणस्त्रिभिः राजन्यो वैश्यकर्मा विद्याहीनो दीक्षितस्य प्राक्क्रुर्यात् ॥ ४ ॥ वित्तबन्धुकर्मजातिविद्यावयांसि मान्यानि परबलीयांसि श्रुतन्तु सर्वेभ्यो गरीयस्तन्मूलत्वाद्धर्मस्य श्रुतेश्च ॥ ९ ॥

गौतमस्मृति—७ अध्याय।

आपत्कल्पो ब्राह्मणस्याब्राह्मणविद्योपयोगोऽनुगमनं शुश्रूषाऽऽसमाप्तेर्ब्राह्मणो गुरुर्याजनाध्यापन-प्रतिग्रहाः सर्वेषां पूर्वः पूर्वो गुरुस्तदभावे क्षत्रवृत्तिस्तदभावे वैश्यवृत्तिः ॥ १ ॥ तस्यापण्यंगन्धर-

सक्तुतान्नतिलशाणक्षौमाजिनानि रक्तनिर्णिक्ते वाससी क्षीरं च सविकारं मूलफलपुष्पौषधमधुमांसतृणोदकापथ्यानि पशवश्च हिंसासंयोगे पुरुषवशा कुमारीवेहतश्च नित्य भूमिव्रीहियवाजात्यश्वर्षभधेन्वनड्डुहश्चैके ॥ २ ॥

गौतमस्मृति–८ अध्याय ।

स एष बहुश्रुतो भवति लोकवेदवेदाङ्गविद् वाकोवाक्येतिहासपुराणकुशलस्तदपेक्षस्तद्वृत्तिश्चत्वारिंशतसंस्कारैः संस्कृतस्त्रिषु कर्मस्वभिरतः षट्सु वा समयाचारिकेष्वभिविनीतः षड्भिः परिहार्यो राज्ञा वध्यश्चावध्यश्चादण्ड्यश्चाबहिष्कार्यश्चापरिवाद्यश्चापरिहार्यश्चेति ॥ २ ॥ गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौडोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानं देवपितृमनुष्यभूतब्रह्मणामेतेषां चाष्टकापार्वणश्राद्धश्रावण्याग्रहायणीचैत्र्याश्वयुजीति सप्तपाकयज्ञसंस्था अग्न्याधेयमग्निहोत्रदर्शपौर्णमासावाग्रयणं चातुर्मास्यनिरूढपशुबन्धसौत्रामणीति सप्त हविर्यज्ञसंस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्था इत्येते चत्वारिंशत्संस्काराः ॥ ३ ॥

गौतमस्मृति–९ अध्याय ।

सविधिपूर्वं स्नात्वा भार्यामधिगम्य यथोक्तान् गृहस्थधर्मान्प्रयुञ्जान इमानि व्रतान्यनुकर्षेत् स्नातको नित्यं शुचिः सुगन्धः स्नानशीलः सति विभवे न जीर्णमलवद्वासाः स्यान्न रक्तमलवदन्यधृतं वा वासो बिभृयान्न स्रगुपानहौ निर्णिक्तमशक्तौ न रूढश्मश्रुरकस्मान्नाग्निमपश्च युगपद्धारयेन्नापो मध्येन संसृज्येन्नाञ्जलिना पिबेन्न तिष्ठन्नुद्धृतेनोदकेनाचामेन्न शूद्राशुच्येकपाण्यावर्जितेन न वाय्वग्निविप्रादित्यापोदेवतागाश्च प्रतिपश्यन् वा मूत्रपुरीषामेध्यान्युदस्येन्नैता देवताः प्रति पादौ प्रसारयेन्न पर्णलोष्टाश्मभिर्मूत्रपुरीषापकर्षणं कुर्यान्न भस्मकेशनखतुषकपालामेध्यान्यधितिष्ठेन्न म्लेच्छाशुच्यधार्मिकैः सह संभाषेत संभाष्य वा पुण्यकृतो मनसा ध्यायेद् ब्राह्मणेन वा सह संभाषेत ॥ १ ॥ अधेनुं धेनुभव्येति ब्रूयादभद्रं भद्रमिति कपालं भगालमिति मणिधनुरितन्द्रिधनुः ॥ २ ॥ गां धयन्तीं परस्मै नाचक्षीत न चैनांवारयेन्न मिथुनी भूत्वा शौचं प्रति विलम्बेत न च तस्मिञ्छयने स्वाध्यायमधीयीत न चापररात्रमधीत्य पुनः प्रतिसंविशेन्नाकल्पां नारीमभिरमयेन्न रजस्वलां न चैनां श्लिष्येन्न कन्यामग्निमुखोपधमनविगृह्यवादबहिर्गन्धमाल्यधारणपापीयसावलेखनभार्यासहभोजनाञ्जन्त्यवेक्षणकुद्वारप्रवेशनपादधावनसंदिग्धभोजननदीबाहुतरणवृक्षवृषमारोहणावरोहणप्राणव्यवस्थानि च वर्जयेन्न संदिग्धां नावमधिरोहेत् सर्वत एवात्मानं गोपायेन्न प्रावृत्य शिरोऽहनि पर्यटेत्, प्रावृत्य तु रात्रौ मूत्रोच्चारे च न भूमावनन्तर्द्धाय नाराद्रावसथान्न भस्मकरीषकृष्टच्छायापथिकाम्येषूभे मूत्रपुरीषे दिवा कुर्यादुदङ्मुखः–सन्ध्ययोश्च रात्रौ दक्षिणामुखः पालाशमासनं पादुक दन्तधावनमिति वर्जयेत् ॥ ३ ॥

गौतमस्मृति–१० अध्याय ।

द्विजातीनामध्ययनमिज्यादानं ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः पूर्वेषु नियमस्त्वाचार्यज्ञातिप्रियगुरुधनविद्याविनिमयेषु ब्राह्मणः संप्रदानमन्यत्र यथोक्तात् कृषिवाणिज्ये चास्वयंकृते कुसीदं च ॥ १ ॥ राज्ञोधिकं रक्षणं सर्वभूतानां न्याय्यदण्डत्वं बिभृयाद् ब्राह्मणान् श्रोत्रियान् निरुत्साहाश्चाब्राह्मणानकरांश्चोपकुर्वाणांश्च योगश्च विजये भये विशेषेण चर्या च रथधनुर्भ्यां संग्रामे संस्थानमनिवृत्तिश्च न दोषो हिंसायामाहवेऽन्यत्र व्यश्वसारथ्यायुधकृताञ्जलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षाधिरूढदूतगोब्राह्मणवादिभ्यः क्षत्रियश्चेदन्यस्तमुपजीवेत्तद्वृत्तिः स्यात् जेतालभेत सांग्रामिकं वित्तं वाहनं तु राज्ञ उद्धारश्चापृथग् जयेऽन्यत्तु यथार्हं भाजयेद्राजा,राज्ञे बलिदानं कर्षकैर्दशममष्टमं षष्ठं वा पशुहिरण्ययोरप्येके पञ्चाशद्भागं विंशतिभागः शुल्कः पण्ये मूलफलपुष्पौषधमधुमांसतृणेन्धनानां षष्ठं तद्रक्षणधर्मित्वात्तेषु तु नित्ययुक्तः स्यादधिकेन वृत्तिः शिल्पिनो मासि मास्येकैकं कर्म कुर्युरेतेनात्मोपजीविनो व्याख्याताः, नौचक्रीवन्तश्च भक्तं तेभ्यो दद्यात्पण्यं वणिग्भिरर्घापचयेन देयम् । प्रणष्टमस्वामिकमधिगम्य राज्ञे प्रब्रूयुर्विख्याप्य राज्ञा संवत्सरं रक्ष्यमूर्ध्व-

अधिगन्तुश्चतुर्थं राज्ञः शेषं स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्ध क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोर्निध्यधिगमो राजधनं न ब्राह्मणस्याभिरूपस्याब्राह्मणो व्याख्यातः षष्ठं लभेतेत्येके चौरहृतमुपजित्य यथास्थानं गमयेत् कोशाद्वा दद्याद्रक्ष्यं बालधनमाव्यवहारप्रापणाद्वासमावृत्तेर्वा ॥ २ ॥ वैश्यस्याधिकं कृषिवणिक्पाशुपाल्यकुसीदम् ॥ ३ ॥

गौतमस्मृति—११ अध्याय ।

राजा सर्वस्येष्टे ब्राह्मणवर्जं साधुकारी स्यात्साधुवादी त्रय्यामान्वीक्षिक्यां चाभिविनीतः शुचिर्जितेन्द्रियो गुणवत्सहायोऽपायसंपन्नः समः प्रजासु स्याद्धितं चासां कुर्वीत, तमुपर्यासीनमधस्तादुपासीरन्नन्ये ब्राह्मणेभ्यस्तेऽप्येनं मन्येरन्, वर्णानाश्रमांश्च न्यायतोऽभिरक्षेच्चलतश्चैनान्स्वधर्मे एव स्थापयेद्धर्मस्थोंऽशभाग्भवतीति विज्ञायते । ब्राह्मणं च पुरो दधीत विद्याभिजनवाग्रूपवयःशीलसम्पन्नं न्यायवृत्तं तपस्विनं तत्प्रसूतः कर्माणि कुर्वीत, ब्रह्मप्रसूतं हि क्षत्रमृध्यते न व्यथत इति च विज्ञायते । यानि च दैवोत्पातचिन्तकाः प्रब्रूयुस्तान्याद्रियेत तदधीनमपि ह्येके, योगक्षेमं प्रतिजानते शान्तिपुण्याहस्वस्त्ययनायुष्यमङ्गलसंयुक्तान्याभ्युदयिकानि विद्वेषिणां संवलनमभिचारद्विषद्व्याधिसंयुक्तानि च शालाग्नौ कुर्याद् यथोक्तमृत्विजोऽन्यानि, तस्य व्यवहारो वेदो धर्मशास्त्राण्यङ्गान्युपवेदाः पुराणं देशजातिकुलधर्माश्चाम्नायैरविरुद्धाः प्रमाणं कर्षकवणिक्पशुपालकुसीदकारवः स्वेस्वे वर्गे तेभ्यो यथाधिकारमर्थान् प्रत्यवहृत्य धर्मव्यवस्थान्यायाधिगमे तर्कोऽभ्युपायस्तेनाभ्यूह्य यथास्थानं गमयेद्विप्रतिपत्तौ त्रयीविद्यावृद्धेभ्यः प्रत्यवहृत्य निष्ठां गमयेत्तथाह्यस्य निःश्रेयसं भवति, ब्रह्म क्षत्रेण संपृक्तं देवपितृमनुष्यान् धारयतीति विज्ञायते, दण्डो दमनादित्याहुस्तेनादान्तान् दमयेद्वर्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवित्तवृत्तसुखमेधसो जन्म प्रतिपद्यन्ते, विष्वञ्चो विपरीता नश्यंति तानाचार्योपदेशो दण्डश्च पालयते तस्माद्राजाचार्यावनिन्द्यावनिन्द्यौ ॥ १ ॥

गौतमस्मृति—१२ अध्याय ।

शूद्रो द्विजातीनभिसन्ध्यायाभिहत्य च वाग्दण्डपारुष्याभ्यामङ्गेन मोच्योयेनोपहन्यादार्यस्त्र्यभिगमने लिङ्गोद्धारः स्वप्रहरणं च गोप्ता चेद्वधोऽधिकोऽथाहास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमुदाहरणे जिह्वाच्छेदो धारणे शरीरभेदे आसनशयनवाक्पथिषु समप्रेप्सुर्दण्ड्यः शतम् ॥ १ ॥ क्षत्रियो ब्राह्मणाक्रोशे दण्डपारुष्ये द्विगुणमध्यर्द्धं वैश्यो ब्राह्मणस्तु क्षत्रिये पञ्चाशत्तदर्धं वैश्ये न शूद्रे किंचित्, ब्राह्मणराजन्यवत् क्षत्रियवैश्यावष्टापाद्यं स्तेयकिल्विषं शूद्रस्य द्विगुणोत्तराणीतरेषां प्रतिवर्णं विदुषोऽतिक्रमे दण्डभूयस्त्वं फलहरितधान्यशाकादाने पञ्चकृष्णलमल्पे पशुपीडिते स्वामिदोषः पालसंयुक्ते तु तस्मिन् पथि क्षेत्रेऽनावृते पालक्षेत्रिकयोः पञ्चमाषा गवि षडुष्ट्रे खरेऽश्वमहिष्योर्दशाजाविषु द्वौ द्वौ सर्वविनाशे शतं, शिष्टाकरणे प्रतिषिद्धसेवायां च नित्यं चेलपिण्डादूर्ध्वं स्वहरणश्च, गोऽग्न्यर्थे तृणमेधान् वीरुद्वनस्पतीनां च पुष्पाणि स्ववदाददीत फलानि चापरिवृतानां कुसीदवृद्धिर्धर्म्या विंशतिः पञ्चमाषको मासं नातिसांवत्सरीमेके चिरस्थाने द्वैगुण्यं प्रयोगस्य मुक्ताभिर्न वर्द्धते दित्सतोऽवरुद्धस्य च चक्रकालवृद्धिः कारिता कायिकाऽधिभोगाश्च कुसीदं पशूपजलोपक्षेत्रशतवाह्येषु नातिपञ्चगुणमजडापौगण्डधनं दशवर्षभुक्तं परैः सन्निधौ भोक्तुरश्रोत्रियप्रव्रजितराजन्यधर्मपुरुषैः पशुभूमिस्त्रीणामनतिभोगे रिक्थभाजि ऋणं प्रतिकुर्युः । प्रातिभाव्यवणिक्शुल्कमद्यद्यूतदण्डान्पुत्रानाध्याभवेयुः । निध्यं वाधियाचितावक्रीताधयो नष्टाः सर्वा न निन्दिता न पुरुषापराधेन, स्तेनः प्रकीर्णकेशो मुसली राजानमियात्कर्म्म चक्षाणः पूतो वधमोक्षाभ्यामघ्नन्नेनस्वी राजा न शारीरो ब्राह्मणदण्डः कर्मवियोगविख्यापनविवासनाङ्ककरणप्रवृत्तौ प्रायश्चित्ती स चौरसमः, सचिवो मतिपूर्वं प्रतिगृहीतोप्यधर्मसंयुक्ते पुरुषशक्त्यपराधानुबन्धविज्ञानाद्दण्डनियोगोऽनुज्ञानं वा वेदवित्समवायवचनात् ॥ २ ॥

गौतमस्मृति—१३ अध्याय ।

अनिबद्धैरपि वक्तव्यं पीडाकृते निबन्धः प्रमत्तोक्ते च साक्षिसभ्यराजकर्तृषु दोषो धर्मतन्त्रपीडायां शपथेनैके सत्यकर्मणा तद्देवराजब्राह्मणसंसदि स्यादब्राह्मणानां क्षुद्रपश्वनृते साक्षी दश हन्ति

गोऽश्वपुरुषभूमिषु दशगुणोत्तरान् सर्वं वा भूमौ हरणे नरको भूमिवदप्सु मैथुनसंयोगे च पशुवन्मधुसर्पिषोर्गोवद्वस्त्रहिरण्यधान्यब्रह्मसु यानेष्वश्ववन्मिथ्यावचने याप्यो दण्ड्यश्च साक्षी नानृतवचने दोषो जीवनं चेत्तदधीनं न तु पापीयसो जीवनं राजा प्राड्विवाको ब्राह्मणो वा शास्त्रवित् । प्राड्विवाको मध्यो भवेत्, संवत्सरं प्रतीक्षेत प्रतिभार्या धेन्वनडुत्स्त्रीप्रजनसंयुक्तेषु शीघ्रमात्ययिके च सर्वधर्मेभ्यो गरीयः प्राड्विवाके सत्यवचनं सत्यवचनम् ॥ २ ॥

गौतमस्मृति–१४ अध्याय ।

शावमाशौचं दशरात्रमनृत्विग्दीक्षितब्रह्मचारिणां सपिण्डानामेकादशरात्रं क्षत्रियस्य द्वादशरात्रं वैश्यस्यार्द्धमासमेकमासं शूद्रस्य तच्चेदन्तः पुनरापतेत्तच्छेषेण शुद्ध्येरन्, रात्रिशेषे द्वाभ्यां प्रभाते तिसृभिर्गोब्राह्मणहतानामन्वक्ष राजक्रोधाच्च युद्धे प्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छतां पिण्डनिवृत्तिः सप्तमे पञ्चमे वा, जननेप्येवं मातापित्रोस्तन्मातुर्वा गर्भमाससमा रात्रीः स्रंसने गर्भस्य त्र्यहं श्रुत्वा चोर्ध्वं दशम्याः पक्षिण्यसपिण्डे योनिसम्बन्धे सहाध्यायिनि च सब्रह्मचारिण्येकाहं श्रोत्रिये चोपसंपन्ने प्रेतोपस्पर्शने दशरात्रमाशौचमभिसन्धाय चेदुक्तं वैश्यशूद्रयोरार्तवीर्वापूर्वयोश्च त्र्यहं वाऽऽचार्यतत्पुत्रस्त्रीयाज्यशिष्येषु चैवमवरश्चेद्वर्णः पूर्वं वर्णमुपस्पृशेत् पूर्वो वाऽवरं तत्र शावोक्तमाशौचम्, पतितचाण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचैलोदकोपस्पर्शनाच्छुध्येच्छवानुगमे च शुनश्च यदुपहन्यादित्येके, उदकदानं सपिण्डैः कृतचूडस्य तत्स्त्रीणां चानतिभोग एके प्रदत्तानामधःशय्यासनिनो ब्रह्मचारिणः सर्वे न मार्जयेरन्न मांसं भक्षयेयुरामदानात् प्रथमतृतीयपञ्चमसप्तमनवमेषूदकक्रिया वाससां च त्यागः, अन्त्ये त्वन्त्यानां दन्तजन्मादि मातापितृभ्यां तूष्णीं माता, बालदेशान्तरितप्रव्रजितासपिण्डानां सद्यः शौचं, राज्ञां च कार्यविरोधाद्ब्राह्मणस्य च स्वाध्यायानिवृत्त्यर्थं स्वाध्यायनिवृत्त्यर्थम् ॥ १ ॥

गौतमस्मृति–१५ अध्याय ।

अथ श्राद्धममावास्यायां पितृभ्यो दद्यात्, पञ्चमिप्रभृति वापरपक्षस्य यथाश्राद्धं सर्वस्मिन्वा द्रव्यदेशब्राह्मणसन्निधाने वा कालनियमः शक्तितः प्रकर्षे गुणसंस्कारविधिरन्नस्य नवावरान् भोजयेदयुजो यथोत्साहं वा ब्राह्मणान् श्रोत्रियान् वा गुरूपवयःशीलसंपन्नान् युवभ्यो दानं प्रथममेके पितृवन्न च तेन मित्रकर्म कुर्यात्, पुत्राभावे सपिण्डा मातृसपिण्डाः शिष्याश्च दद्युस्तदभावे ऋत्विगाचार्यौ॥१॥ सद्यःश्राद्धी शूद्रातल्पगस्तत्पुत्ररोषे मासं नयति पितॄंस्तस्मात्तदहर्ब्रह्मचारी स्यात्, श्वचाण्डालपतितावेक्षणे दुष्टं तस्मात् परिश्रिते दद्यात्, तिलैर्वा विकिरेत्, पङ्क्तिपावनो वा शमयेत्, पंक्तिपावनः षडङ्गविज्ज्येष्ठसामगस्त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः पञ्चाग्निः स्नातको मन्त्रब्राह्मणविद्धर्मज्ञो ब्रह्मदेयानुसन्तान इति हविःषु चैवं दुर्वलादीन् श्राद्ध एवैके श्राद्ध एवैके ॥ ४ ॥

गौतमस्मृति–१६ अध्याय ।

श्रवणादिवार्षिकं प्रौष्ठपदीं वोपाकृत्याधीयीत छन्दांस्यर्धपञ्चमासान् पञ्चदक्षिणायनं वा ब्रह्मचार्युत्सृष्टलोमा न मांसं भुञ्जीत द्वैमास्यो वा नियमो नाधीयीत वायौ दिवा पांसुहरे कर्णश्राविणि नक्तं वाणभेरीमृदङ्गगर्जार्त्तशब्देषु च श्वशृगालगर्दभसंह्रादे लोहितेन्द्रधनुर्नीहारेष्वभ्रदर्शने चापर्त्तौ मूत्रित उच्चरिते निशासन्ध्योदकेषु वर्षति चैके वलीकसन्तान आचार्यपरिवेषणे ज्योतिषोश्च भीतो यानस्थः शयानः प्रौढपादः श्मशानग्रामान्तमहापथाशौचेषु पूतिगन्धांतःशवदिवाकीर्तिशूद्रसन्निधाने सूतके चोद्गारे ऋग्यजुषं च सामशब्दे यावदाकालिकानिर्घातभूमिकम्पराहुदर्शनोल्कास्तनयित्नुवर्षविद्युतः प्रादुष्कृताग्निष्वनृतौ विद्युति नक्तं चापररात्रात् त्रिभागादिप्रवृत्तौ सर्वमुल्का विद्युत्समस्मित्येकेषाम् ॥ १ ॥ स्तनयित्नुपराह्णेऽपि प्रदोषे सर्वं नक्तमर्द्धरात्रादहश्चेत्सज्योतिर्विषयस्थे च राज्ञि प्रेते विप्रोष्य चान्योन्येन सह संकुलोपाहितवेदसमाप्तिच्छर्दिश्राद्धमनुष्ययज्ञभोजनेष्वहोरात्रममावास्यायां च द्व्यहं वा कार्तिकीफाल्गुन्याषाढी पौर्णमासी तिस्रोऽष्टकास्त्रिरात्रमन्त्यामेके अभितो वार्षिकं सर्वैर्वर्षविद्युत्स्तनयित्नुसन्निपाते प्रस्यन्दिन्यूर्ध्वं भोजनादुत्सवे प्राधीतस्य च निशायां चतुर्मुहूर्त्तं नित्यमेके नगरे मानसमप्यशुचिश्राद्धिनामाकालिकमकृतान्नश्राद्धिकसंयोगेऽपि प्रतिविद्यं च यावत्स्मरन्ति यावत्स्मरन्ति ॥ २ ॥

गौतमस्मृति–१७ अध्याय।

प्रशस्तानां स्वकर्मसु द्विजातीनां ब्राह्मणो भुञ्जीत, प्रतिगृह्णीयाच्चैधोदकयवसमूलफलमध्वभयाभ्युद्यतशय्यासनावसथयानपयोदधिधानाशफरीप्रियंगुस्रङ्मार्गशाकान्यप्रणोद्यानि सर्वेषां पितृदेवगुरुभृत्यभरणे चान्यवृत्तिश्चेन्नोत्तरेण शूद्रात्, पशुपालक्षेत्रकर्षककुलसङ्गतकारयितृपरिचारकाभोज्यान्ना-वणिक् चाशिल्पी, नित्यमभोज्यं केशकीटावपन्नं रजस्वलाकृष्णशकुनिपदोपहतं भ्रूणघ्नावेक्षितं गवोपघ्रातं भावदुष्टं शुक्तं केवलमदधि पुनः सिद्धं पर्युषितमशाकभक्ष्यस्नेहमांसमधून्युत्सृष्टपुंश्चल्यभिशस्तानपदेश्यदण्डिकतक्षकदर्यबन्धनिकचिकित्सकमृगयुर्वायूच्छिष्टभोजिगणविद्विषाणामपाङ्क्तानां प्रागदुर्बलात् वृथान्नानि च मनोत्थापनव्यपेतानि समासमाभ्यां विषमसमे पूजान्तरानर्चितश्च गोश्च क्षीरमनिर्दशायाः सूतके चाजामहिष्योश्च नित्यमाविकमपेयमौष्ट्रमैकशफं च स्यन्दिनीयमसूसन्धिनीनां च याश्च व्यपेतवत्साः पञ्चनखाश्चाशल्यकशशकश्वाविद्गोधाखड्गकच्छपा उभयतोदत्केशलोमैकशफकलविङ्कप्लवचक्रवाकहंसाः काककङ्कगृध्रश्येना जलजा रक्तपादतुण्डा ग्राम्यकुक्कुटसूकरौ धेन्वनडुहौ चापन्नदावसन्नवृथामांसानि किसलयक्याकुलसूननिर्यासलोहिता व्रश्चनाः श्वनिहतदारुवकबलाका शुकटिट्टिभमान्धातृनक्तञ्चरा अभक्ष्याः ॥ १ ॥ न भक्ष्याः प्रतुदा विकिरा जालपादा मत्स्याश्चाविकृता वध्याश्च धर्मार्थेऽव्यालहतादृष्टदोषवाक्प्रशस्तान्यभ्युक्ष्योपयुञ्जीतोपयुञ्जीत ॥ २ ॥

गौतमस्मृति–१८ अध्याय।

अस्वतन्त्रा धर्मे स्त्री नातिचरेद्भर्त्तारं वाक्चक्षुःकर्मसंयताऽपतिरपत्यलिप्सुर्देवराद्गुरुप्रसूतान्नर्तुमतीयात्पिण्डगोत्रऋषिसंबन्धिभ्यो योनिमात्राद्वा, नादेवरादित्येके, नातिद्वितीयं, जनयितुरपत्यं समयादन्यत्र जीवतश्च क्षेत्रे परस्मात्तस्य द्वयोर्वा रक्षणाद्भर्त्तुरेव नष्टे भर्त्तरि षाड्वार्षिकं क्षपणं श्रूयमाणेऽभिगमनं प्रव्रजिते तु निवृत्तिः प्रसङ्गात् तस्य द्वादश वर्षाणि ब्राह्मणस्य विद्यासंबन्धभ्रातरि चैवं ज्यायसि यवीयान् कन्याग्न्युपयमनेषु षडित्येके त्रीन्कुमार्यृतूनतीत्य स्वयं युज्येतानिन्दितेनोत्सृज्य पित्र्यानलङ्कारान् प्रदानं प्रागृतोरप्रयच्छन् दोषी प्राग्वाससः प्रतिपत्तेरित्येके द्रव्यदानं विवाहसिद्ध्यर्थं धर्मतन्त्रप्रसङ्गे च शूद्रादन्यत्रापि शूद्राद्बहुपशोर्हीनकर्मणः शतगोरनाहिताग्नेः सहस्रगोर्वा सोमपात्सप्तमीं चाभुक्त्वाऽनिचयायाप्यहीनकर्मभ्य आचक्षीत राज्ञा पृष्टस्तेन हि भर्तव्यः श्रुतशीलसंपन्नश्चेद्धर्मतन्त्रपीडायां तस्याकरणेऽदोषोऽदोषः ॥ १ ॥

गौतमस्मृति–१९ अध्याय।

तस्य निष्क्रयणानि जपस्तपो होम उपवासो दानमुपनिषदो वेदान्ताः सर्वच्छन्दःसु संहितामधून्यघमर्षणमथर्वशिरोरुद्राः पुरुषसूक्तं राजनरौहिणे सामनी बृहद्रथन्तरे पुरुषगतिर्महानाम्न्यो महावैराजं महादिवाकीर्त्यं ज्येष्ठसाम्नामन्यतमद्बहिष्पवमानं कूष्माण्डानि पावमान्यः सावित्री चेति पावनानि ॥ २ ॥

ब्रह्मचर्यं सत्यवचनं सवनेषूदकोपस्पर्शनमार्द्रवस्त्रताऽधःशायितानाशक इति तपांसि ॥ ५ ॥

गौतमस्मृति–२० अध्याय।

अथ चतुःषष्टिषु यातनास्थानेषु दुःखान्यनुभूय तत्रेमानि लक्षणानि भवन्ति। ब्रह्महार्द्रकुष्ठी, सुरापः श्यावदन्तो, गुरुतल्पगः पंगुः, स्वर्णहारी कुनखी, श्वित्री वस्त्रापहारी, दर्दुरी तेजोपहारी, मण्डली स्नेहापहारी, क्षयी तथा अजीर्णवानन्नापहारी, ज्ञानापहारी मूकः, प्रतिहन्ता गुरोरपस्मारी, गोघ्नो जात्यन्धः, पिशुनः पूतिनासः, पूतिवक्त्रस्तु सूचकः, शूद्राध्यापकः श्वपाकस्त्रपुसीसचामरविक्रयी मद्यप एकशफविक्रयी मृगव्याधः कुण्डाशी, भृतकश्चैलिको वा नक्षत्री चार्बुदी नास्तिको रङ्गोपजीव्यभक्ष्यभक्षी गण्डरी ब्रह्मपुरुषतस्कराणां देशिकः पिण्डितः षण्ढो महापथिको गण्डिकश्चाण्डाली पुक्कसी गोष्ववकीर्णी मध्वामेही धर्मपत्नीषु स्यान्मैथुनप्रवर्तकः खल्वाटसगोत्रसमयस्त्र्यभिगामी श्लीपदी पितृमातृभगिनीस्त्र्यभिगाम्यावीजितस्तेषां कुब्जकुण्ठमण्डव्याधितव्यङ्गदरिद्राल्पायुषोऽल्पबुद्धयश्चण्डपण्डशैलूषतस्करपरपुरुषप्रेष्यपरकर्मकराः खल्वाटवक्राङ्गसंकीर्णाः क्रूरक-

र्माणः कर्मशश्चान्यथाश्चोपपद्यन्ते तस्मात्कर्तव्यमेवेह प्रायश्चित्तं विशुद्धैर्लक्षणैर्जायन्ते धर्मस्य धारणादिति धर्मस्य धारणादिति ॥ १ ॥

गौतमस्मृति—२१ अध्याय ।

त्यजेत्पितरं राजघातकं शूद्रयाजकं वेदविप्लावकं भ्रूणहनं यश्चान्त्यावसायिभिः सह संवसेदन्त्यावसायिन्या वा तस्य विद्यागुरून्योनिसम्बन्धांश्च सन्निपात्य सर्वाण्युदकादीनि प्रेतकर्माणि कुर्युः पात्रं चास्य विपर्यस्येयुः ॥ १ ॥ दासः कर्मकरो वाऽवकरादमेध्यपात्रमानीय दासीघटात् पूरयित्वा दक्षिणाभिमुखः पदा विपर्यस्येदमुमनुदकं करोमीति नामग्राहं तं सर्वेऽन्वालभेरन् प्राचीनावीतिनो मुक्तशिखा विद्यागुरवो योनिसम्बन्धाश्च वीक्षेरन्नप उपस्पृश्य ग्रामं प्रविशन्ति ॥ २ ॥ अत ऊर्ध्वं तेन संभाष्य तिष्ठेदेकरात्रं जपन्सावित्रीमज्ञानपूर्वं ज्ञानपूर्वं चेत्त्रिरात्रम् ॥ ३ ॥ यस्तु प्रायश्चित्तेन शुध्येत्तस्मिन् शुद्धे शातकुम्भमयं पात्रं पुण्यतमाद्ध्रदात्पूरयित्वा स्रवन्तीभ्यो वा तत एनमप उपस्पर्शयेयुः ॥४ ॥ अथास्मै तत्पात्रं दद्युस्तत्संप्रतिगृह्य जपेत् ओं शान्ता द्यौः शान्ता पृथिवी शान्तं शिवमन्तरिक्षम् । यो रोचनस्तमिह गृह्णामीत्येतैर्यजुर्भिस्तरत्समन्दीभिः पावमानीभिः कूष्माण्डैश्चाज्यं जुहुयाद्धिरण्यं ब्राह्मणाय वा दद्याद्गामाचार्याय ॥ ५ ॥

गौतमस्मृति—२२ अध्याय ।

ब्रह्महसुरापगुरुतल्पगमातृपितृयोनिसंबन्धगस्तेननास्तिकानिन्दितकर्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताः पातकसंयाजकाश्च तैश्चाब्दं समाचरन् ॥ १ ॥

गौतमस्मृति—२३ अध्याय ।

प्रायश्चित्तमग्नौ सक्तिर्ब्रह्मघ्नस्त्रिरवच्छादितस्य लक्ष्यं वा स्याज्जन्ये शस्त्रभृताम् ॥ १ ॥ खट्वाङ्गकपालपाणिर्वा द्वादशसंवत्सरान् ब्रह्मचारी भैक्षाय ग्रामं प्रविशेत् स्वकर्माचक्षाणः पथोऽपक्रामेत्संदर्शनादार्यस्य स्थानासनाभ्यां विहरन् सवनेषूदकोपस्पर्शी शुध्येत्, प्राणलाभे वा तन्निमित्ते ब्राह्मणस्य द्रव्यापचये वा त्र्यवरं प्रतिरोद्धाऽश्वमेधावभृथे वान्ययज्ञेऽप्यग्निष्टुदन्तश्चोत्सृष्टश्चेद्ब्राह्मणवधे ॥ २ ॥ हत्वाप्यात्रेयीं चैव गर्भे चाविज्ञाते ॥ ३ ॥ ब्राह्मणस्य राजन्यवधे षड्वार्षिकं प्राकृतं ब्रह्मचर्यमृषभैकसहस्राश्च गा दद्यात् ॥४॥ वैश्ये त्रैवार्षिकमृषभैकशताश्च गा दद्यात् ॥ ५ ॥ शूद्रे संवत्सरमृषभैकादशाश्च गा दद्यादनात्रेय्यां चैवं गां च ॥६ ॥ शूद्रवन्मण्डूकनकुलकाकाव्यश्वहरमूषिकाश्च ॥ ७ ॥ हिंसासु चास्थिमतां सहस्रं हत्वाऽनस्थितामनुडुद्भारं च ॥ ८ ॥ अपि वाऽस्थिमतानेकैकस्मिन् किंचित् किंचिद्दद्यात् ॥ ९ ॥ षण्ढे च पलालभारः सीसमाषकश्च वराहे घृतघटः सर्पे लोहदण्डः ब्रह्मबन्ध्वां च ललनायां जीवोबैजिकेन किंचित् तल्पान्नधनलाभवधेषु पृथग्वर्षाणि द्वे परदारे त्रीणि श्रोत्रियस्य द्रव्यलाभे चोत्सर्गो यथास्थानं वा गमयेत् प्रतिषिद्धमनःसंयोगे सहस्रवाक् चेदग्न्युत्सादिनिराकृत्युपपातकेषु चैवं स्त्री चातिचारिणी गुप्ता पिण्डं तु लभेताप्यमानुषीषु गोवर्जं स्त्रीकृते कूष्माण्डैर्घृतहोमो घृतहोमः ॥ १० ॥

गौतमस्मृति—२४ अध्याय ।

सुरापस्य ब्राह्मणस्योष्णामासिञ्चेयुः सुरामास्ये मृतः शुद्धचेदमत्या पाने पयोघृतमुदकं वायुं प्रति त्र्यहं तप्तानि सकृच्छ्रस्ततोऽस्य संस्कारः ॥ १ ॥ मूत्रपुरीषरेतसां च प्राशने श्वापदोष्ट्रखराणां चाङ्गस्य ग्रामकुक्कुटशूकरयोश्च गन्धाघ्राणे सुरापस्य प्राणायामो घृतप्राशनं च पूर्वैश्च दष्टस्य॥२॥ तल्पे लोहशयने गुरुतल्पगः शयीत सूर्मीं ज्वलन्तीं वाश्लिष्येल्लिङ्गं वा सवृषणमुत्कृत्याञ्जलावाधाय दक्षिणाप्रतीचिं दिशं व्रजेदजिह्ममाशरीरनिपातान्मृतः शुध्येत् ॥ ३ ॥ सखिसयोनिसगोत्राशिष्यभार्यासु स्नुषायां गवि च गुरुतल्पसमोऽवकर इत्येके, श्वभिः खादयेद्राजा निहीनवर्णगमने स्त्रियं प्रकाशं पुमांसं घातयेद्यथोक्तं वा गर्दभेनावकर्णी निर्ऋतिं चतुष्पथे यजेत्तस्याजिनमूर्ध्ववालं परिधाय लोहितपात्रः सप्तगृहान् भैक्षं चरेत्कर्माचक्षाणः संवत्सरेण शुध्येत् ॥ ४ ॥

गौतमस्मृति—२७ अध्याय ।

अथातः कृच्छ्रान् व्याख्यास्यामो हविष्यान्प्रातराशान् भुक्त्वा तिस्रो रात्रीर्नाश्नीयादथापरं त्र्यहं

नक्तं भुञ्जीत, अथापरं त्र्यहं न कंचन याचेदथापरं त्र्यहमुपवसेत्तिष्ठेदहनि रात्रावासीत क्षिप्रकामः सत्यं वदेदनार्यैर्न सम्भाषेत रौरवयौधाजिने नित्यं प्रयुञ्जीतानुसवनमुदकोपस्पर्शनमापोहिष्ठेति तिसृभिः पवित्रवतीभिर्मार्जयेत्, हिरण्यवर्णाः शुचयः पावका इत्यष्टाभिः ॥१॥ अथोदकतर्पणम् । ॐनमो हमाय मोहमाय संहमाय धुन्वते तपसाय पुनर्वसवे नमो नमो मौञ्ज्यायोर्म्याय वसुविन्दाय सर्वविन्दाय नमो नमः पाराय सुपाराय महापाराय पारयिष्णवे नमो नमो रुद्राय पशुपतये महते देवाय त्र्यम्बकायैकचराधिपतये हराय शर्वायेशानायोग्राय वज्रिणे घृणिने कपर्दिने नमो नमः सूर्यायादित्याय नमो नमो नीलग्रीवाय शितिकण्ठाय नमो नमः कृष्णाय पिङ्गलाय नमो नमो ज्येष्ठाय श्रेष्ठाय वृद्धायेन्द्राय हरिकेशायोर्ध्वरेतसे नमो नमः सत्याय पावकाय वर्णाय नमो नमः कामाय कामरूपिणे नमो नमो दीप्ताय दीप्तरूपिणे नमो नमस्तीक्ष्णाय तीक्ष्णरूपिणे नमो नमः सौम्याय सुपुरुषाय महापुरुषाय मध्यमपुरुषायोत्तमपुरुषाय नमो नमो ब्रह्मचारिणे नमो नमश्चन्द्रललाटाय नमो नमः कृत्तिवाससे पिनाकहस्ताय नमो नम इति ॥ २ ॥ एतदेवादित्योपस्थानमेता एवाज्याहुतयो द्वादशरात्रस्यान्ते चरुं श्रपयित्वैताभ्यो देवताभ्यो जुहुयात् । अग्नये स्वाहा, सोमाय स्वाहा, अग्नीषोमाभ्यां स्वाहा, इन्द्राग्निभ्यामिन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे प्रजापतयेऽग्नये स्विष्टकृत इति ॥ ३ ॥ ततो ब्राह्मणतर्पणम् ॥ ४ ॥ एतेनैवातिकृच्छ्रो व्याख्यातो यावत्सकृदाददीत तावदश्नीयादब्भक्षस्तृतीयः सकृच्छ्रातिकृच्छ्रः ॥ ५ ॥

गौतमस्मृति—२८ अध्याय ।

अथातश्चान्द्रायणं तस्योक्तो विधिः कृच्छ्रे वपनं व्रतं चरेत् श्वोभूतां पौर्णमासीमुपवसेत् आप्यायस्व, संते पयांसि, नवो नव, इति चैताभिस्तर्पणमाज्यहोमो हविषश्चानुमन्त्रणमुपस्थानं चन्द्रमसो यद्देवादेवहेलनमिति चतसृभिराज्यं जुहुयात्, देवकृतस्येति चान्ते समिद्भिः—ओंभूर्भुवः स्वस्तपः सत्यं, यशः, श्रीरूपं गोरोजस्तेजः पुरुषो धर्मः शिवशिव इत्येतैर्ग्रासानुमन्त्रणं प्रतिमन्त्रं मनसा नमः स्वाहेति वा, सर्वं ग्रासप्रमाणमास्याविकारेण चरुभैक्षसक्तुकणयावकशाकपयोदधिघृतमूलफलोदकानि हवींष्युत्तरोत्तरं प्रशस्तानि पौर्णमास्यां पञ्चदशग्रासान् भुक्त्वैकापचयेनापरपक्षमश्नीयादमावास्यायामुपोष्यैकोपचयेन पूर्वपक्षं विपरीतमेषाम् ॥ १ ॥ एष चान्द्रायणो मासो मासमेकमाप्त्वा विपापो विपाप्मा सर्वमेनो हन्ति द्वितीयमाप्त्वा दशपूर्वान्दशावरानात्मानं चैकविंशं पङ्क्तीश्च पुनाति संवत्सरमाप्त्वा चन्द्रमसः सलोकतामाप्नोत्याप्नोति ॥२॥

गौतमस्मृति—२९ अध्याय ।

ऊर्ध्वं पितुः पुत्रा रिक्थं भजेरन् निवृत्ते रजसि मातुर्जीवति चेच्छति सर्वं वा पूर्वजस्येतरान्बिभृयात् पितृवत् ॥१॥ विभागे तु धर्मवृद्धिर्विंशतिभागो ज्येष्ठस्य मिथुनमुभयतोदद्युक्तो रथो गोवृषः काणखोरकूटखञ्जमध्यमस्यानेकश्चेदविर्धान्यायसी गृहमनोयुक्तं चतुष्पदां चैकैकं यवीयसः समं चेतरत् सर्व द्व्यंशी वा पूर्वजः स्यादेकैकमितरेषामेकैकं वा धनरूपं काम्यं पूर्वः पूर्वो लभेत दशतः पशूनां नैकशफो नैकशफानां वृषभोऽधिको ज्येष्ठस्य ऋषभषोडशाज्ज्यैष्ठिने यस्य समं वा ज्यैष्ठिने येन यवीयसां प्रतिमातृ वा स्ववर्गे भागविशेषं पितोत्सृजेत् ॥२॥ पुत्रिकामनपत्योऽग्निं प्रजापतिं चेष्ट्वाऽस्मदर्थमपत्यमिति संवाद्याभिसन्धिमात्रात्पुत्रिकेत्येकेषां तत्संशयान्नोपयच्छेदभ्रातृकाम् ॥ ३ ॥ पिण्डगोत्रर्षिसंबन्धा रिक्थं भजेरन् स्त्री चानपत्यस्य बीजं वा लिप्सेद्देवरवत्यन्यतो जातमभागम् ॥ ४ ॥ पुत्रा औरसक्षेत्रजदत्तकृत्रिमगूढोत्पन्नापविद्धा रिक्थभाजः कानीनसहोढपौनर्भवपुत्रिकापुत्रस्वयंदत्तक्रीता गोत्रभाजश्चतुर्थांशिनश्चौरसाद्यभावे ब्राह्मणस्य राजन्या पुत्रो ज्येष्ठो गुणसंपन्नस्तुल्यांशभाग् ज्येष्ठांशहीनमन्यद् राजन्यावैश्यापुत्रसमवाये स यथा ब्राह्मणीपुत्रेण क्षत्रियाच्चेच्छूद्रापुत्रोऽप्यनपत्यस्य शुश्रूषुश्चेल्लभेत वृत्तिमूलमन्तेवासिविधिना सवर्णापुत्रोऽप्यन्यायवृत्तो न लभेतैकेषां ब्राह्मणस्याऽनपत्यस्य श्रोत्रिया रिक्थं भजेरन् राजेतरेषां जडक्लीबौ भर्तव्यावपत्यं जडस्य भागार्हं शूद्रापुत्रवत्प्रतिलोमास्तूदकयोगक्षेमकृतान्नेष्वविभागः स्त्रीषु च संयुक्तास्वनाज्ञाते दशावरैः शिष्टैरूहवद्भिरलुब्धैः प्रशस्तं कार्यम् ॥ ५ ॥ चत्वारश्चतुर्णां पारगा वेदानां प्रागुत्तमास्त्रय आश्रमिणः पृथग्धर्मविदस्त्रय एतान् दशावरान् परिषदित्याचक्षते, असम्भवे त्वेतेषां श्रोत्रियो

वेदविच्छिष्टो विमतिपत्तौ यदाह यतोऽयमप्रभवो भूतानां हिंसानुग्रहयोगेषु धर्मिणां विशेषेण स्वर्गं लोकं धर्मविदाप्नोति ज्ञानाभिनिवेशाभ्यामिति धर्मो धर्मः ॥ १० ॥

(१९) शातातपस्मृति ।

ब्राह्मणं हत्वा तस्य शिरः कपालमादाय तीर्थान्तरं संचरेदात्मनः पापकीर्तनं कुर्वन्द्वादशाब्दे विशुध्यति ॥ २ ॥ ब्राह्मणसुवर्णराजसंनिधानात्सोमपानेन शुद्धिः स्यात् ॥५॥ नकुलभोजने लशुनपलाण्डुगृञ्जनभक्षणे तप्तकृच्छ्रम् ॥९॥ उष्ट्रीखरीमानुषीक्षीरपाने पुनरुपनयनं कृच्छ्रं च ॥ १० ॥ शूद्रोच्छिष्टभोजने त्रिरात्रम् ॥ ११ ॥ सुराभाण्डोदकपाने छर्दनं घृतप्राशनमहोरात्रं च ॥ १२ ॥ अनुदकमूत्रपुरीषकरणे श्वकाकस्पर्शने सचैलस्नानं महाव्याहृतिमाचरेत् ॥ १३ ॥ अग्नेरुत्सादने मांसस्पर्थे(स्पर्शे) काकश्वानमण्डूकमूषकदर्दुरनकुलादीन्हत्वा यानि चान्यानि भूतानि एषामनुक्रमायश्चित्तेषु वधं कृत्वा प्राजापत्यं समाचरेत् ॥ १६॥ अग्न्युत्सादने कृच्छ्रम् ॥ २२ ॥ कन्यादूषणेऽर्धपादम् ॥ २३ ॥

विवाहयेन्न सगोत्रां समानप्रवरां तथा । तस्याः (कथञ्चित्) संबन्धेऽ(प्य)तिकृच्छ्रं चरेद्द्विजः ॥३२॥
नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् । नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम् ॥
नर्क्षवृक्षनदीनाम्नीं न च भीषणनामिकाम् ॥ ३५ ॥
यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता । नोपयच्छेत तां कन्यां पुत्रिकाधर्मशङ्कया ॥ ३६ ॥
दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ ३९ ॥
परिवित्तिः परिवेत्ता यया च परिविद्यते । सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ॥ ४० ॥
प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डित एव च । वैश्वदेवे तु सम्प्राप्तः सोऽतिथिः स्वर्गसंक्रमः ॥ ५३॥
अनिमित्तमनाहूतं देशकालमुपस्थितम् । अतिथिं तं विजानीयान्नातिथिः पूर्वसङ्गतः ॥ ५५ ॥
यावन्मात्राशनो वा स्याद्भुताशी स्नातको द्विजः । तस्यान्नस्य चतुर्भागं हन्तकारं विदुर्बुधाः ॥ ५६ ॥
ग्रासमात्रं भवेद्भिक्षा पुष्कलं तु चतुर्गुणम् । पुष्कलानि च चत्वारि हन्तकारो विधीयते ॥ ५७ ॥
हस्तदत्तास्तु ये स्नेहा लवणव्यञ्जनादयः । दातारं नोपतिष्ठन्ति भोक्ता भुञ्जीत किल्बिषम् ॥ ७१ ॥
आयसेन तु पात्रेण यदन्नमुपनीयते । भोक्ता विष्ठासमं भुंक्ते दाता च नरकं व्रजेत् ॥ ७२ ॥
दन्तधावनमंगुल्या प्रत्यक्षलवणं च यत् । मृत्तिकाभक्षणं चैव तुल्यं गोमांसभक्षणैः ॥ ७३ ॥
अन्यतो वसते मूर्खो दूरेणापि बहुश्रुतः । बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः ॥ ७६ ॥
ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते । ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते ॥ ७७ ॥
संनिकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत् । भोजने चैव दाने च दहत्यासप्तमं कुलम् ॥ ७८ ॥
वेदविद्याव्रतस्नाते श्रोत्रिये गृहमागते । मोदन्त्योषधयः सर्वा यास्यामः परमां गतिम् ॥ ८३ ॥
न वाशौचे परिभ्रष्टे विप्रे वेदविवर्जिते । दीयमानं रुदत्यन्नं किं मया दुष्कृतं कृतम् ॥ ८४ ॥
यावतो ग्रसते पिण्डान्हव्यकव्येष्वमन्त्रवित् । तावतो ग्रसते प्रेत्य दीप्तान्स्थूलानयोगुडान् ॥ ८६ ॥
मधुमांससुरासोमं लाक्षालवणमेव च । एतेषां विक्रयेणैव द्विजश्चान्द्रायणं चरेत् ॥ ८७ ॥
रात्रौ श्राद्धं न कुर्वीत राहोरन्यत्र दर्शनात् । सन्ध्ययोरुभयोश्चैव न कुर्वीत कदा च न ॥ ९४ ॥
यावदुष्णं भवेदन्नं यावदश्नन्ति वाग्यताः । पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणाः ॥ १०३ ॥
हविर्गुणा न वक्तव्या न यावत्पितरोऽर्चिताः । पितृभिस्तर्पितैस्त (त्व)स्य वक्तव्यं शोभनं हविः ॥१०४
त्रीणि श्राद्धे पवित्राणि दौहित्रं कुतपस्तिलाः । त्रीणि चात्र प्रशंसन्ति सत्यमक्रोधमार्जवम् ॥ १०७॥
दिवसस्याष्टमे भागे मन्दीभवति भास्करः । स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम् ॥ १०९ ॥
गणान्नं गणिकान्नं च यच्चान्नं बहुयाचितम् । नारीप्रथमगर्भेषु भुक्त्वा चान्द्रायणं चरेत् ॥ ११६ ॥
अज्ञानाद्भुञ्जते विप्राः सूतके मृतकेऽपि च । गायत्र्यष्टसहस्रेण शुध्यते शूद्रसूतके ॥ १२१ ॥
वैश्यस्य सूतके भुक्त्वा गायत्र्याः पञ्चभिः शुचिः । सूतके क्षत्रियस्यैतद्विंशतिः शतमुच्यते ॥१२२॥
सत्रिणां दीक्षितानां च यतीनां ब्रह्मचारिणाम् । एतेषां सूतकं नास्ति कर्म कुर्वन्ति ऋत्विजः॥१२३
अग्न्यगारे गवां गोष्ठे देवतानां च संनिधौ । आहारे जपकाले च पादुकां च विवर्जयेत् ॥१२६॥
शिरः प्रावृत्य कण्ठं वा अप्सु मुक्तशिखोऽपि वा । अकृत्वा पादशौचं तु आचान्तोऽप्यशुचिर्भवेत् १२७

यातुधानाः पिशाचाश्च राक्षसाः क्रूरकर्मिणः । हरन्ते रसमन्नस्य मण्डलेन विवर्जितम् ॥ १३१ ॥
ब्राह्मणस्य चतुष्कोणं त्रिकोणं क्षत्रियस्य च । वैश्यस्य मण्डलं प्रोक्तं शूद्रस्य प्रोक्षणं स्मृतम् ॥१३३॥
दन्तलग्ने फले मूले भुक्तशेषानुलेपने । ताम्बूले चेक्षुखण्डे च नोच्छिष्टो भवति द्विजः ॥ १३४ ॥
न स्नानमाचरेद्भुक्त्वा नाऽऽतुरो न महानिशि । न वासोभिः सहाजस्रं नाविज्ञाते जलाशये ॥ १३५ ॥
बहूनामेकलग्नानां यद्येकोऽप्यशुचिर्भवेत् । अशौचं तस्य मात्रस्य नेतरेषां कदा च न ॥ १३८ ॥
ऋतुमतीं तु यो भार्यां संनिधौ नोपगच्छति । तस्या रजांसि तन्मासं पितरस्तस्य शेरते ॥१४४ ॥
अर्वाक् षोडश विज्ञेया नाड्यः पश्चाच्च षोडश । कालः पुण्योऽर्कसंक्रान्त्यां विद्वद्भिः परिकीर्तितः१४६
ब्रह्मकूर्चं प्रवक्ष्यामि सर्वपापप्रणाशनम् । अनादिष्टेषु सर्वेषु ब्रह्मकूर्चं विधीयते ॥ १५६ ॥
नदीप्रस्रवणे तीर्थे ह्रदे चान्तर्जलेऽपि वा । धौतवासा विशुद्धात्मा जपेच्चैव जितेन्द्रियः ॥ १५७ ॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । निर्दिष्टं पञ्चगव्यं च पवित्रं कायशोधनम् ॥ १५८ ॥
गोमूत्रैकपलं दद्यादर्धांगुष्ठेन गोमयम् । क्षीरं सप्तपलं दद्यात्पलमेकं कुशोदकम् ॥ १५९ ॥
गायत्र्याऽऽगृह्य गोमूत्रं गन्धद्वारेति गोमयम् । आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि॥१६०॥
तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् । ब्रह्मकूर्चं भवेदेवमापोहिष्ठेति ऋग्जपेत् ॥ १६१ ॥
मध्यमेन पलाशेन पद्मपत्रेण वा पिबेत् । अथवा ताम्रपात्रेण ब्रह्मपात्रेण वा द्विजः ॥ १६२ ॥
अग्नये स्वाहा सोमाय स्वाहा इरावती इदं विष्णुः । मानस्तोके गायत्रीं च जुहुयात् ॥ १६३ ॥
प्रजापतेनत्वदेतान्यन्य इत्यालोड्य प्रणवेन पिबेत् ॥ १६४ ॥
आहृत्य प्रणवेनैव उद्धृत्य प्रणवेन च । आलोड्य प्रणवेनैव पिबेच्च प्रणवेन च ॥ १६५ ॥
एतद्द्विजनिमित्तं हि सर्वपापप्रणाशनम् । पलं कोष्ठगतं सर्वं दहत्यग्निरिवेन्धनम् ॥ १६६ ॥
धर्मशास्त्रं समारूढो वेदखड्गधरो द्विजः । विद्वान्स्वयं तु यद्ब्रूयात्स धर्मः परमः स्मृतः ॥ १७१ ॥

(१९ क) दूसरी शातातपस्मृति–१ अध्याय ।

दशहस्तेन दण्डेन त्रिंशद्दण्डं निवर्तनम् । दश तान्येव गोचर्म दत्त्वा स्वर्गे महीयते ॥ १५ ॥

(१९ ख) वृद्धशातातपस्मृति ।

नदीतीरेषु गोष्ठेषु पुण्येष्वायतनेषु च । तत्र गत्वा शुचौ देशे ब्रह्मकूर्चं समाचरेत् ॥ २ ॥
पालाशं पद्मपत्रं वा ताम्रं वाऽथ हिरण्मयम् । तत्र भुङ्क्ते व्रती नित्यं तत्पात्रं समुदाहृतम् ॥ ३ ॥
गायत्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम् । आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ॥ ४ ॥
तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् । चतुर्दशीमुपोष्यैवं योऽमावास्यां समाचरेत् ॥ ५ ॥
गोमूत्रकं पलं दद्यादङ्गुष्ठार्धं तु गोमयम् । क्षीरं सप्तपलं दद्याद्दध्नस्त्रिपलमेव च ॥ ६ ॥
आज्यमेकपलं प्रोक्तं पलमेकं कुशोदकम् । एवं क्रमेण कर्तव्यं पञ्चगव्यं यथाविधि ॥ ७ ॥
सप्तपर्णाः शुभा दर्भा अच्छिन्नाग्राः समायताः । समुद्धृतैस्तैर्होतव्यं देवताभ्यो यथाविधि ॥ ८ ॥
अग्नये सोमायेति इरावतीदं विष्णुरिति । विष्णोर्नुकं शुमित्रिया नः सुजानातकस्तथा ॥ ९ ॥
एतासां देवताहुतीनां हुतशेषं तु यः पिबेत् । आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु ॥ १० ॥
उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन तु । एवं कुर्वन्ब्रह्मकूर्चं मासे मासे च वै द्विजः ।
सर्वपापविशुद्धात्मा जायते नात्र संशयः ॥ ११ ॥
यत्त्वगस्थिगतं पापं देहे तिष्ठति देहिनाम् । ब्रह्मकूर्चो दहेत्पापं प्रदीप्ताग्निरिवेन्धनम् ॥ १२ ॥
भोजनस्य तु काले च योऽशुचिर्भवति द्विजः । भूमौ निक्षिप्य तं ग्रासं स्नात्वा शुद्धिमवाप्नुयात् १६॥
रजस्वले च द्वे नार्यावन्योन्यं स्पृशतो यदि । सुवर्णपञ्चगव्येन स्नात्वा शुद्धिमवाप्नुयात् ॥ २० ॥
अनधीत्य धर्मशास्त्रं प्रायश्चित्तं ददाति यः । प्रायश्चित्ती भवेत्पूतस्तत्पापं पर्षदं व्रजेत् ॥ ३० ॥
अथ कश्चित्प्रमादेन म्रियतेऽग्न्युदकादिभिः । तस्याशौचं विधातव्यं कर्तव्या चोदकक्रिया ॥ ३२ ॥
शोधितानां तु पात्राणां यद्येकमुपहन्यते । तावन्मात्रस्य तच्छौचं नेतरेषामिति स्थितिः ॥ ३६ ॥
पिण्याकाचामतक्राम्बुसक्तवः प्रतिवासरम् । एकरात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते ॥ ३७ ॥
एषामेव त्रिरभ्यासादेकैकस्य यथाक्रमम् । तुलापुरुष इत्येष ज्ञेयः पञ्चदशाहिकः ॥ ३८ ॥
मृताहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् । प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ॥ ४० ॥

पात्रे तु मृन्मये यस्तु श्राद्धे वै भोजयेद्द्विजान् । अन्नदाता पुरो धाता भोक्ता च नरकं व्रजेत् ॥ ९० ॥
श्राद्धे भुक्त्वा य उच्छिष्टं वृषलाय प्रयच्छति । स गच्छेन्नरकं घोरं तिर्यग्योनौ च जायते ॥ ९१ ॥
आसनारूढपादो वा वस्त्रार्धप्रावृतोऽपि वा । मुखेन फूत्कृतं भुङ्क्ते भुक्त्वा चान्द्रायणं चरेत् ॥ ९२ ॥
कुमारप्रसवे नाड्यामच्छिन्नायां गुडघृतहिरण्यवस्त्रप्रावरणप्रतिग्रहे न दोषः स्यात्तदहनीत्येके ॥९९॥

(२०) वसिष्ठस्मृति—१ अध्याय ।

श्रुतिस्मृतिविहितो धर्मः ॥ ३ ॥ आर्यावर्तः प्रागादर्शात् प्रत्यक्कालकवनादुदक् पारियात्राद्दक्षिणेन हिमवत उत्तरेण विन्ध्यस्य ॥ ७ ॥ तस्मिन्देशे ये धर्मा ये चाचारास्ते सर्वे प्रत्येतव्याः ॥ ८ ॥ न त्वन्ये प्रतिलोमकल्पधर्माणः ॥ ९ ॥ गंगायमुनयोरन्तरेऽप्येके ॥ ११ ॥ यावद्वा कृष्णमृगो विचरति तावद्ब्रह्मवर्चसमित्यन्ये ॥ १२ ॥ अथापि भाल्लविनो निदाने गाथामुदाहरन्ति ॥ १३ ॥ पश्चात्सिन्धुर्विहरिणी सूर्यस्योदयनं पुरः । यावत्कृष्णोऽभिधावति तावद्वै ब्रह्मवर्चसम् ॥ १४ ॥ गोमिथुनेन चाऽऽर्षः ॥ ३२ ॥

वसिष्ठस्मृति—२ अध्याय ।

चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः ॥ १ ॥ त्रयो वर्णा द्विजातयो ब्राह्मणक्षत्रियवैश्याः ॥ २॥ तेषां मातुरग्रेऽधिजननं द्वितीयं मौञ्जीबन्धने ॥३॥ तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥४॥ न ह्यस्य विद्यते कर्म किञ्चिदामौञ्जिबन्धनात् । वृत्त्या शूद्रसमो ज्ञेयो यावद्वेदे न जायत इति ॥१२॥ अन्यत्रौदककर्मस्वधापितृसंयुक्तेभ्यः ॥१३ ॥ षट् कर्माणि ब्राह्मणस्य ॥१९ ॥ अध्ययनमध्याप यजनं याजनं दानं प्रतिग्रहश्चेति ॥ २० ॥ त्रीणि राजन्यस्य ॥ २१ ॥ अध्ययनं यजनं दानं च शस्त्रेण च प्रजापालनं स्वधर्मस्तेन जीवेत् ॥ २२ ॥ एतान्येव त्रीणि वैश्यस्य, कृषिवाणिज्यं पाशुपाल्यं कुसीदं च ॥ २३ ॥ एतेषां परिचर्या शूद्रस्य ॥२४॥ वैश्यजीविकामास्थाय पण्येन जीवन्तोऽश्मलवणमणिशाणकौशेयक्षौमाजिनानि च तान्तवं रक्तं सर्वं च कृतान्नं पुष्पमूलफलानि च गन्धरसा उदकं चौषधीनां रसः सोमश्च शस्त्रं विषं मांसं च क्षीरं च साविकारमयस्त्रपुजतुसीसं च ॥ २९॥ अथाप्युदाहरन्ति ॥ ३४ ॥ भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुते तिलैः । कृमीभूतः श्वविष्ठायां पितृभिः सह मज्जति । इति ॥ ३५ ॥ तस्मात्साण्डाभ्यां मनस्योताभ्यां प्राक्प्रातराशात्कर्षी स्यात् ॥ ३७ ॥ निदाघेऽपः प्रयच्छेत् ॥ ३८ ॥ नातिपीडयं लाङ्गलं प्रवीरवत्सुशेवं सोमपित्सरु तदुद्वपति गामविं चाजानश्वानश्वतरखरोष्ट्रांश्च प्रफर्व्यं च पीवरीं प्रस्थावद्रथवाहनमिति ॥ ३९ ॥ लाङ्गलं प्रवीरवद्वीरवत्सु मनुष्यवदनडुद्वत् सुशेवं कल्याणनासिकं कल्याणी ह्यस्य नासिकानासिकयोद्वपति दूरेऽपविद्ध्यति, सोमपित्सरु सोमो ह्यस्य प्राप्नोति तत्सरु तदुद्वपति गाश्चाविश्चाजानश्वानश्वतरखरोष्ट्रांश्च प्रफर्व्यं च पीवरीं दर्शनीयां कल्याणीं च प्रथमयुवतीम् ॥ ४० ॥ कथं हि लांगलमुद्वपेदन्यत्र धान्यविक्रयात् ॥ ४१ ॥
ब्राह्मणराजन्यौ वार्धुषान्नं नाद्याताम् ॥ ४४ ॥
समर्घं धान्यमुद्धृत्य महार्घं यः प्रयच्छति । स वै वार्धुषिको नाम ब्रह्मवादिषु गर्हितः ॥
वृद्धींश्च भ्रूणहत्यांश्च तुलया समतोलयत् । अतिष्ठद्भ्रूणहा कोट्यां वार्धुषिर्न व्यकम्पत ॥ ४६ ॥
कामं वा परिलुप्तकृत्याय पापीयसे दद्याताम् ॥ ४७ ॥ द्विगुणं हिरण्यं त्रिगुणं धान्यम् ॥ ४८ ॥
धान्येनैव रसा व्याख्याताः ॥ ४९ ॥ पुष्पमूलफलानि च ॥ ५० ॥ तुलावृतमष्टगुणम् ॥ ५१ ॥
राजाऽनुमतभावेन द्रव्यवृद्धिं विनाशयेत् । पुना राजाभिषेकेण द्रव्यवृद्धिं च वर्जयेत् ॥ ५३ ॥
द्विकं त्रिकं चतुष्कं च पञ्चकं च शतं स्मृतम्। मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः ॥ ५४ ॥
वसिष्ठवचनप्रोक्तां वृद्धिं वार्धुषिके शृणु । पञ्चमाषांस्तु विंशत्या एवं धर्मो न हीयते ॥ इति ॥ ५५ ॥

वसिष्ठस्मृति—३ अध्याय ।

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ ३ ॥
अव्रता ह्यनधीयाना यत्र भैक्षचरा द्विजाः । तं ग्रामं दण्डयेद्राजा चोरभक्तप्रदो हि सः ॥ ५ ॥
चत्वारोऽपि त्रयो वापि यद्ब्रूयुर्वेदपारगाः । स धर्म इति विज्ञेयो नेतरेषां सहस्रशः ॥ ६ ॥

अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् । सहस्रशः समेतानां परिषत्त्वं न विद्यते ॥ ७ ॥
यं वदन्ति तमोमूढा मूर्खा धर्ममतद्विदः । तत्पापं शतधा भूत्वा तद्वक्तॄनधिगच्छति ॥ ८ ॥
यस्य चैव गृहे मूर्खो दूरे चैव बहुश्रुतः । बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः ॥ १० ॥
ब्राह्मणातिक्रमो नास्ति मूर्खे वेदविवर्जिते । ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते ॥ ११ ॥
यश्च काष्ठमयो हस्ती यश्च चर्ममयो मृगः । यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः ॥ १२ ॥
विद्वद्भोज्यान्यविद्वांसो येषु राष्ट्रेषु भुञ्जते । तान्यनावृष्टिमृच्छन्ति महद्वा जायते भयम् ॥ १३ ॥
अप्रज्ञायमानं वित्तं योऽधिगच्छेद्राजा तद्धरेदधिगन्त्रे षष्ठमंशं प्रदाय ॥ १४ ॥
अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते आततायिनः ॥ १९ ॥
आततायिनमायान्तमपि वेदान्तपारगम् । जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् ॥ २० ॥
त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णवांश्चतुर्मेधा वाजसनेयी षडङ्गविद्ब्रह्मदेयानुसन्तानश्छन्दोगो ज्येष्ठसामगो मन्त्रब्राह्मणवित्यः स्वधर्मानधीते यस्य दशपुरुषं मातृपितृवंशः श्रोत्रियो विज्ञायते विद्वांसः स्नातकाश्च ते पंक्तिपावना भवन्ति ॥ २२ ॥
चातुर्विद्यो विकल्पी च अंगविद्धर्मपाठकः । आश्रमस्थास्त्रयो मुख्याः परिषत्स्याद्दशावरा॥ २३ ॥
आत्मत्राणे वर्णसंकरे वा ब्राह्मणवैश्यौ शस्त्रमाददीयाताम् ॥ २६ ॥ अंगुष्ठमूलस्योत्तरतो रेखा ब्राह्मं तीर्थं तेन त्रिराचामेदशब्दवद्भिः परिमृज्यात् ॥ २९ ॥ हृदयङ्गमाभिरद्भिरबुद्बुदाभिरफेनाभिर्ब्राह्मणः कण्ठगाभिः क्षत्रियः शुचिः ॥ ३३ ॥ वैश्योऽद्भिः प्राशिताभिस्तु स्त्रीशूद्रौ स्पृष्टाभिरेव च ॥ ३४ ॥
दन्तवद्दन्तसक्तेषु यच्चान्तर्मुखे भवेत् । आचान्तस्यावशिष्टं स्यान्निगिरन्नेव तच्छुचिः ॥ ४० ॥
परानथाऽऽचामयतः पादौ या विप्रुषो गताः । भूम्यास्तास्तु समाः प्रोक्तास्ताभिर्नोच्छिष्टभाग्भवेत्॥४१
प्रसारितं च यत्पण्यं ये दोषाः स्त्रीमुखेषु च । मशकैर्मक्षिकाभिश्च नीली येनोपहन्यते ॥ ४५ ॥
क्षितिस्थाश्चैव या आपो गवां तृप्तिकराश्च याः ।: परिसंख्याय तान्सर्वाञ्छुचीनाह प्रजापतिः ॥४६॥
तैजसमृन्मयदारवतान्तवानां भस्मपरिमार्जनप्रदाहतक्षणनिर्णेजनानि ॥ ४८ ॥ तैजसवदुपलमणीनां मणिवच्छङ्खशुक्तीनां दारुवदस्न्थां रज्जुविदलचर्मणा चैलवच्छौचम् ॥ ४९ ॥ गोवालैः फलमयानां गौरसर्षपकल्केन क्षौमजानाम् ॥ ५० ॥ भूम्यास्तु संमार्जनप्रोक्षणोपलेपनोल्लेखनैर्यथास्थानं दोषविषेषात्प्राजापत्यमुपैति ॥ ५१ ॥ अथाप्युदाहरन्ति ॥ ५२ ॥
खननाद्दहनाद्वर्षाद्गोभिराक्रमणादपि । चतुर्भिः शुध्यते भूमिः पञ्चमाच्चोपलेपनात् ॥ ५३ ॥
रजसा शुध्यते नारी नदी वेगेन शुध्यति । भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति ॥ ५४ ॥
मद्यैर्मूत्रैः पुरीषैर्वा श्लेष्मपूयाश्रुशोणितैः । संस्पृष्टं नैव शुध्येत पुनः पाकेन मृन्मयम् ॥ ५५ ॥
अद्भिरेव काञ्चनं पूयते तथा राजतम् ॥ ५७ ॥ अङ्गुल्यग्रे मानुषम् ॥ ५९ ॥ पाणिमध्य आग्नेयम् ॥ ६० ॥ प्रदेशिन्यङ्गुष्ठयोरन्तरा पित्र्यम् ॥ ६१ ॥

वसिष्ठस्मृति-४ अध्याय।

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत ॥ इति निगमो भवति ॥ २ ॥ सर्वेषां सत्यमक्रोधो दानमहिंसा प्रजननं च ॥ ४॥ मरणात्प्रभृति दिवसगणना सपिण्डता तु सप्तपुरुषं विज्ञायते॥१७॥ अप्रत्तानां स्त्रीणां त्रिपुरुषं त्रिदिनं विज्ञायते ॥१८॥
नाशौचं सूतके पुंसः संसर्गं चेन्न गच्छति । रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यते ॥ २१ ॥
तच्चेदन्तः पुनरापतेच्छेषेण शुध्येरन् ॥ २२ ॥ रात्रिशेषे द्वाभ्यां प्रभाते तिसृभिः ॥ २३ ॥
ब्राह्मणो दशरात्रेण पक्षमात्रेण भूमिपः । वैश्यो विंशतिरात्रेण शूद्रो मासेन शुध्यति ॥ २४ ॥
ऊनद्विवर्षे प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रमाशौचं सद्यः शौचमिति गौतमः ॥ २९ ॥

वसिष्ठस्मृति-५ अध्याय।

पिता रक्षति कौमारे भर्त्ता रक्षति यौवने । पुत्राश्च स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ ४ ॥
विज्ञायते हीन्द्रस्त्रिशीर्षाणं त्वाष्ट्रं हत्वा पाप्मना गृहीतो महत्तमाधर्मसम्बद्धोऽहमित्येवमात्मानममन्यत तं सर्वाणि भूतान्यभ्याक्रोशन् भ्रूणहन्भ्रूणहन्निति सस्त्रिय उपाधावत् अस्यै मे ब्रह्महत्या-

ये तृतीयं भागं गृह्णीतेति गत्वैवमुवाच, ता अब्रुवन् किन्नोऽभूदिति, सोऽब्रवीद्वरं वृणीध्वमिति, ता अब्रुवन्नृतौ प्रजां विन्दामहा इति, काम मा विजानीमोऽलं भवाम इति (यथेच्छयाऽऽप्रसवकालात्पुरुषेण सह मैथुनभावेन संभवाम इति) एषोऽस्माकं वरस्तथेन्द्रेणोक्तास्ताः प्रतिजगृहुस्तृतीयं भ्रूणहत्यायाः ॥ ८ ॥ सैषा भ्रूणहत्या मासि मास्याविर्भवति ॥ ९ ॥

वसिष्ठस्मृति-६ अध्याय ।

उभे मूत्रपुरीषे तु दिवा कुर्यादुदङ्मुखः । रात्रौ कुर्याद्दक्षिणास्य एवं ह्यायुर्न हीयते ॥ १० ॥
प्रत्यग्निं प्रति सूर्यं च प्रति गां प्रति च द्विजम् । प्रति सोमोदकं सन्ध्यां प्रज्ञा नश्यति मेहतः ॥११॥
न नद्यां मेहनं कार्यं न भस्मनि न गोमये । न वा कृष्टे न मार्गे च नोप्ते क्षेत्रे न शाड्वले ॥१२ ॥
छायायामन्धकारे वा रात्रावहनि वा द्विजः । यथासुखमुखः कुर्यात्प्राणबाधाभयेषु च ॥ १३ ॥
उद्धृताभिरद्भिः कार्यं कुर्यात्स्नानमनुद्धृताभिरपि ॥ १४ ॥
आहरेन्मृत्तिकां विप्रः कूलात्ससिकतां तथा । अन्तर्जले देवगृहे वल्मीके मूषिकस्थले ॥
कृतशौचावशिष्टा च न ग्राह्याः पञ्चमृत्तिकाः ॥ १५ ॥
एका लिङ्गे करे तिस्र उभाभ्यां द्वे तु मृत्तिके । पञ्चापाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः ॥१६॥
एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः । वानप्रस्थस्य त्रिगुणं यतीनां तु चतुर्गुणम् ॥ १७ ॥
अष्टौ ग्रासा मुनेर्भक्त वानप्रस्थस्य षोडश । द्वात्रिंशच्च गृहस्थस्य अमितं ब्रह्मचारिणः ॥ १८ ॥
आमपात्रे यथा न्यस्तं क्षीरं दधि घृतं मधु । विनश्येत्पात्रदौर्बल्यात्तच्च पात्रं रसाश्च ते ॥ ३० ॥
एव गां च हिरण्यं च वस्त्रमश्वं महीतिलान् । अविद्वान्प्रतिगृह्णानो भस्मीभवति दारुवत् ॥ ३१ ॥
पारंपर्यागतो येषां वेदः सपरिबृंहणः । ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ॥ ४० ॥

वसिष्ठस्मृति-७ अध्याय ।

संयतवाक्चतुर्थषष्ठाष्टमकालभोजी भैक्षमाचरेत ॥ ७ ॥ गुर्वधीनो जटिलः शिखाजटो वा गुरुं गच्छन्तमनुगच्छेत् ॥ ८ ॥

वसिष्ठस्मृति-८ अध्याय ।

गृहस्थो विनीतक्रोधहर्षो गुरुणाऽनुज्ञातः स्नात्वाऽसमानार्षामस्पृष्टमैथुनां यवीयसीं सदृशीं भार्यां विन्देत ॥ १ ॥ पञ्चमीं मातृबन्धुभ्यः सप्तमीं पितृबन्धुभ्यः ॥ २ ॥
एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः । अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥ ७ ॥
नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा । काले प्राप्ते अकाले वा नास्यानश्नन्गृहे वसेत् ॥ ८ ॥
गृहस्थ एव यजते गृहस्थस्तप्यते तपः । चतुर्णामाश्रमाणां तु गृहस्थस्तु विशिष्यते ॥ १४ ॥
यथा नदी नदाः सर्वे समुद्रे यान्ति संस्थितिम् । एवमाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्१५ ॥

वसिष्ठस्मृति-९ अध्याय ।

वानप्रस्थो जटिलश्चीराजिनवासा ग्रामं च न प्रविशेत् ॥ १ ॥ न फालकृष्टमधितिष्ठेत् ॥ २ ॥ अकृष्टं मूलफलं सञ्चिन्वीत, ऊर्ध्वरेताः क्षमाशयः ॥ ३ ॥ मूलफलभैक्षेणाऽऽश्रमागतमतिथिमभ्यर्चयेत् ॥ ४ ॥ दद्यादेव न प्रतिगृह्णीयात् ॥ ५ ॥ त्रिषवणमुदकमुपस्पृशेत् ॥६ ॥ श्रावणकेनाग्निमाधायाऽऽहिताग्निः स्याद्वृक्षमूलिकः ॥ ७ ॥ दद्याद्देवपितृमनुष्येभ्यः स गच्छेत्स्वर्गमानन्त्यमानन्त्यम् ॥ ९ ॥

वसिष्ठस्मृति-१० अध्याय ।

परिव्राजकः सर्वभूताभयदक्षिणां दत्त्वा प्रतिष्ठेत ॥ १ ॥ मुण्डोऽममोऽपरिग्रहः सप्तागाराण्यसङ्कल्पितानि चरेद्भैक्षं विधूमे सन्नमुसले ॥ ७॥ एकशाटीपरिवृतोऽजिनेन वा गोप्रलूनैस्तृणैर्वेष्टितशरीरः स्थण्डिलशाय्यनित्यां वसतिं वसेत्, ग्रामान्ते देवगृहे शून्यागारे वृक्षमूले वा मनसा ज्ञानमधीयमानः ॥ ८ ॥ अरण्यनित्यो न ग्राम्यपशूनां संदर्शने विहरेत् ॥ ९॥ अथाप्युदाहरन्ति ॥१०॥ अरण्यनित्यस्य जितेन्द्रियस्य सर्वेन्द्रियप्रीतिनिवर्त्तकस्य । अध्यात्मचिन्तागतमानसस्य ध्रुवा ह्यनावृत्तिरुपेक्षकस्य ॥ ११ ॥

वसिष्ठस्मृति–११ अध्याय।

अपरपक्ष ऊर्ध्वं चतुर्थ्याः पितृभ्यो दद्यात्पूर्वेद्युर्ब्राह्मणान्सन्निपात्य यतीन् गृहस्थान् साधून् वा परिणतवयसोऽविकर्मस्थान् श्रोत्रियाञ्छिष्यानन्तेवासिनः शिष्यानपि गुणवतो भोजयेत् ॥ १४ ॥
अथ चेन्मन्त्रविद्युक्तः शारीरैः पङ्क्तिदूषणैः। अदूष्यन्तं यमः प्राह पङ्क्तिपावन एव सः ॥ १७ ॥
श्राद्धेनोद्वासनीयानि उच्छिष्टान्यादिनक्षयात्। श्च्योतन्ते हि सुधाधारास्ताः पिबन्त्यकृतोदकाः ॥१८॥
उच्छिष्टं न प्रमृज्यात्तु यावन्नास्तमितो रविः। क्षीरधारास्ततो यान्ति अक्षय्याः पङ्क्तिभागिनः॥१९॥
प्राक्संस्कारप्रमीतानां स्ववंश्यानामिति श्रुतिः। भागधेयं मनुः प्राह उच्छिष्टोच्छेषणे उभे ॥ २०॥
उच्छेषणं भूमिगतं विकिरँल्लेपसोदकम्। अन्नं प्रेतेषु विसृजेदप्रजानामनायुषाम् ॥ २१ ॥
द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा। भोजयेत्सुसमृद्धोऽपि न प्रसज्येत विस्तरे ॥ २४ ॥
सत्क्रियां देशकालौ च शौचं ब्राह्मणसम्पदः। पञ्चैतान् विस्तरो हन्ति तस्मात्तं परिवर्जयेत् ॥२५॥
अपि वा भोजयेदेकं ब्राह्मणं वेदपारगम्। श्रुतशीलोपसंपन्नं सर्वालक्षणवर्जितम् ॥ २६ ॥
यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत्। अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य तु ॥ २७ ॥
देवतायतने कृत्वा ततः श्राद्धं प्रवर्त्तयेत्। प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे ॥ २८ ॥
यावदुष्णं भवत्यन्नं यावदश्नन्ति वाग्यताः। तावद्धि पितरोऽश्नन्ति यावन्नोक्ता हविर्गुणाः ॥२९॥
हविर्गुणा न वक्तव्याः पितरोऽस्यवतर्पिताः। पितृभिस्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविः ॥ ३० ॥
त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः। त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वराम्॥३२॥
दिवसस्याष्टमे भागे मन्दी भवति भास्करः। स कालः कुतपो नाम पितॄणां दत्तमक्षयम् ॥ ३३ ॥
मधुमांसैश्च शाकैश्च पयसा पायसेन वा। एष नो दास्यति श्राद्धं वर्षासु च मघासु च ॥ ३७ ॥
श्रावण्याग्रहायण्योश्चान्वष्टक्यां च पितृभ्यो दद्याद्द्रव्यदेशब्राह्मणसन्निधाने वा, न कालनियमः ४०॥ विज्ञायते हि त्रिभिर्ऋणैर्ऋणवान् ब्राह्मणो जायते इति ॥ ४२ ॥ यज्ञेन देवेभ्यः, प्रजया पितृभ्यो, ब्रह्मचर्येण ऋषिभ्य इत्येष वाऽनृणो यज्वा यः पुत्री ब्रह्मचर्यवानिति ॥ ४३ ॥ गर्भाष्टमेषु ब्राह्मणमुपनयीत, गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यम् ॥ ४४ ॥ केशसमितो ब्राह्मणस्य ललाटसंमितः क्षत्रियस्य घ्राणसंमितो वैश्यस्य ॥ ४६ ॥ मौञ्जी रशना ब्राह्मणस्य धनुर्ज्या क्षत्रियस्य शणतान्तवी वैश्यस्य ॥ ४७ ॥ कृष्णाजिनमुत्तरीयं ब्राह्मणस्य रौरवं क्षत्रियस्य गव्यं वस्ताजिनं वा वैश्यस्य ॥ ४८ ॥ शुक्लमहत वासो ब्राह्मणस्य माञ्जिष्ठं क्षत्रियस्य हारिद्रं कौशेयं वैश्यस्य सर्वेषां वा तान्तवमरक्तम् ॥ ४९ ॥ भवत्पूर्वां ब्राह्मणो भिक्षां याचेत भवन्मध्यां राजन्यो भवदन्त्यां वैश्यः ॥ ५० ॥ पतितसावित्रीक उद्दालकव्रतं चरेत् ॥ ५६ ॥ अश्वमेधावभृथं वा गच्छेत् ॥ ५८ ॥ व्रात्यस्तोमेन वा यजेद्वा यजेत् ॥ ५९ ॥

वसिष्ठस्मृति–१२ अध्याय।

अथातः स्नातकव्रतानि ॥ १ ॥ स न किंचिद्याचेतान्यत्र राजान्तेवासिभ्यः ॥ २ ॥ क्षुधापरीतस्तु किंचिदेव याचेत कृतमकृतं वा क्षेत्रं गामजाविकमन्ततो हिरण्यं धान्यमन्नं वा, न तु स्नातकः क्षुधाऽवसीदेदित्युपदेशः ॥ ३ ॥ परिवेष्टितशिरा भूमिमयज्ञियैस्तृणैरन्तर्धाय मूत्रपुरीषे कुर्यात् ॥ ॥ १० ॥ स्नातकानान्तु नित्यं स्यादन्तर्वासस्तथोत्तरम्। यज्ञोपवीते द्वे यष्टिः सोदकश्च कमण्डलुः ॥ १२ ॥ प्राङ्मुखोऽन्नानि भुञ्जति ॥ १५ ॥ तूष्णीं सांगुष्ठं कृत्स्नग्रासं ग्रसेत् ॥ १६॥ आपि नः श्वो विजनिष्यमाणाः पतिभिः सह शयीरन्निति स्त्रीणामिन्द्रदत्तो वर इति ॥ २४ ॥ पालाशमासनं पादुके दन्तधावनमिति वर्जयेत् ॥ ३२ ॥ वैष्णवं दण्डं धारयेद्रुक्मकुण्डले च ॥ ३४ ॥ न बहिर्मालां धारयेदन्यत्र रुक्ममय्याः ॥ ३५ ॥

वसिष्ठस्मृति–१३ अध्याय।

अथातः स्वाध्यायोपाकर्म श्रावण्यां पौर्णमास्यां प्रौष्ठपद्यां वाऽग्निमुपसमाधाय कृताधानो जुहोति देवेभ्य ऋषिभ्यश्छन्दोभ्यश्चेति ॥ १ ॥ ब्राह्मणान्स्वास्तिवाच्य दधि प्राश्य ततोऽध्यायानुपाकुर्वीरन् ॥ २॥ अर्धपञ्चममासानर्द्धषष्ठान्वाऽत ऊर्द्धं शुक्लपक्षेष्वधीयीत कामं तु वेदाङ्गानि ॥३॥ तस्यानध्यायाः ॥ ४ ॥ सन्ध्यास्तमिते सन्ध्यास्वन्तःशवदिवाकीर्त्येषु नगरेषु कामं गोमयपर्यु-

षिते परिलिखिते वा श्मशानान्ते शयानस्य श्राद्धिकस्य ॥५॥ मानवं चात्र श्लोकमुदाहरन्ति॥६॥
फलान्यापस्तिलाभक्ष्याण्यन्नान्यच्छ्राद्धिकं भवेत्। प्रतिगृह्याप्यनध्यायः पाण्यास्या ब्राह्मणाः स्मृताः ॥
धातवः पूतिगन्धप्रभृतावीरिणे वृक्षमारूढस्य नावि सेनायां च भुक्त्वा चाऽऽर्द्रपाणेर्वाणशब्दे चतुर्दश्याममावास्यायामष्टम्यामष्टकासु प्रसारितपादोपस्थकृतस्योपाश्रितस्य च गुरुसमीपे मैथुनव्यपेतायां वाससा मैथुनव्यपेतेनानिर्णिक्तेन ग्रामान्ते छर्दितस्य मूत्रितस्योच्चारितस्य ऋग्यजुषां च सामशब्दे वाऽजीर्णे निर्घाते भूमिचलने चन्द्रसूर्योपरागे दिङ्नादपर्वतनादकम्पपातेषूपलरुधिरपांशुवर्षेष्वाकालिकम् ॥ ८ ॥ उल्काविद्युत्समासे त्रिरात्रम् ॥ ९ ॥ उल्काविद्युत्सज्योतिषम् ॥ ॥ १० ॥ अपर्त्तावाकालिकमाचार्ये प्रेते त्रिरात्रमाचार्यपुत्रशिष्यभार्यास्वहोरात्रम् ॥ ११ ॥ ऋत्विग्योनिसंबन्धेषु च गुरोः पादोपसंग्रहणं कार्यम् ॥ १२ ॥ ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसः प्रत्युत्थायाभिवदेत् ॥ १३ ॥ पतितः पिता त्याज्यो माता तु पुत्रे न पतति ॥ १५ ॥ उपाध्यायाद्दशाऽऽचार्य आचार्याणां शतं पिता। पितुर्दशशतं माता गौरवेणातिरिच्यते ॥ १७ ॥ भार्याः पुत्राश्च शिष्याश्च संसृष्टाः पापकर्मभिः। परिभाष्य परित्याज्याः पतितो योऽन्यथा त्यजेत् ॥ १८ ॥ विद्या वित्तं वयः संबन्धः कर्म च मान्यम् ॥ २४ ॥ पूर्वः पूर्वो गरीयान् स्थविरबालातुरभारिकस्त्रीचक्रिवतां पन्थाः समागमे परस्मै देयः ॥ २५ ॥ राजस्नातकयोः समागमे राज्ञा स्नातकाय देयः ॥ २६ ॥ सर्वैरेव च वध्वा उह्यमानायै ॥ २७ ॥

वसिष्ठस्मृति–१४ अध्याय।

अथातो भोज्याभोज्यं च वर्णयिष्यामः ॥ १ ॥ चिकित्सकमृगयुपुंश्चलीदंभिकस्तेनाभिशस्तपण्डपतितानामन्नमभोज्यम् ॥ २॥ कदर्यदीक्षितबद्धातुरसोमविक्रयितक्षकरजकशौण्डिकसूचकवार्धुषिकचर्मावकृत्तानां शूद्रस्य चास्त्रभृतश्चोपपत्तेर्यश्चोपपत्तिं मन्यते, यश्च गृहान्दहेत् यश्च वधार्हं नोपहन्यात्, क्रौ भक्ष्यत इति ॥ ३ ॥ वाचाभिघुष्टं गणान्नं गणिकान्नं चेति ॥ ४ ॥ अथाप्युदाहरन्ति ॥ ५ ॥
नाश्नन्ति श्ववतो देवा नाश्नन्ति वृषलीपतेः। भार्याजितस्य नाश्नन्ति यस्य चोपपतिर्गृहे ॥ ६ ॥
गुरून् भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन्देवतातिथीन्। सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः ॥ ९ ॥
यदशनं केशकीटोपहतं च ॥ १८ ॥ कामं तु केशकीटानुधृत्याद्भिः प्रोक्ष्य भस्मनाऽवकीर्य वाचा प्रशस्तमुपभुञ्जीत ॥ १९ ॥
त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन्। अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥ २१ ॥
देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च। काकैः श्वभिश्च संस्पृष्टमन्नं तन्न विसर्जयेत् ॥ २२ ॥
तस्मात्तदन्नमुत्सृत्य शेषं संस्कारमर्हति। द्रवाणां प्लावनेनैव घनानां प्रोक्षणेन तु ॥ २३ ॥
मार्जारमुखसंस्पृष्टं शुचिरेव हि तद्भवेत् ॥ २३ ॥
हस्तदत्तास्तु ये स्नेहा लवणव्यञ्जनानि च। दातारं नोपतिष्ठन्ति भोक्ता भुङ्क्ते च किल्बिषम् ॥२६॥
लशुनपलाण्डुकवकगृञ्जनश्लेष्मातवृक्षनिर्यासलोहितव्रश्चनाश्वश्वकाकावलीढशूद्रोच्छिष्टभोजनेषु कृच्छ्रातिकृच्छ् इतरेऽप्यन्यत्र मधुमांसफलकविकारैश्चग्राम्यपशुविषयः ॥ २८ ॥ सन्धिनीक्षीरमवत्साक्षीरं गोमहिष्यजानामनिर्दशाहानामन्तर्नाव्युदकमपूपधानाकरम्भसक्तुवटकतैलपायसशाकानि शुक्तानि वर्जयेत् अन्यांश्च क्षीरयवपिष्टविकारान् ॥ २९ ॥ श्वाविच्छल्लकशशकच्छपगोधाः पञ्चनखानां भक्ष्याः ॥ ३० ॥ खड्गे तु विवदन्त्यग्राम्यशूकरे च ॥ ३५ ॥ कलविङ्कप्लवहंसचक्रवाकभासवायसपारावतकुक्कुटसारङ्गपाण्डुकपोतक्रौञ्चक्रकरगृध्रश्येनबकबलाकमद्गुटिट्टिभमान्धातृनक्तञ्चरदार्वाघाटचटकरैलातकहारीतखञ्जरीटग्राम्यकुक्कुटशुकसारिकाकोकिलक्रव्यादा ग्रामचारिणश्च ग्रामचारिणश्चेति ॥ ३७॥

वसिष्ठस्मृति–१५ अध्याय।

तस्मिंश्चेत्प्रतिगृहीत औरसः पुत्र उत्पद्येत, चतुर्थभागभागीस्याद्दत्तकः ॥ ९ ॥ यदि नाभ्युदयिकेषु युक्तः स्याद्वेदविप्लविनः सव्येन पादेन प्रवृत्ताग्रान् दर्भान् लोहितान् वोपस्तीर्य पूर्णपात्रमस्मै निनयेत् ॥ १० ॥ नेतारं चास्य प्रकीर्णकेशा ज्ञातयोऽन्वालभेरन्नपसव्यं कृत्वा गृहेषु स्वैरमापद्येरन्नत ऊर्ध्वं तेन धर्मयेयुस्तद्धर्माणस्तं धर्मयन्तः ॥ ११ ॥ पतितानां तु चरितव्रतानां प्रत्युद्धारः ॥ १२ ॥

वसिष्ठस्मृति—१६ अध्याय।

राजमन्त्री सदःकार्याणि कुर्यात् ॥ २ ॥ द्वयोर्विवदमानयोर्न पक्षान्तरं गच्छेत् ॥ ३ ॥ यथासनमपराधो ह्यन्तेनापराधः ॥ ४ ॥
लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम्। धनस्वीकरणं पूर्वं धनी धनमवाप्नुयात्,इति॥७॥
गृहक्षेत्रविरोधे सामन्तप्रत्ययः ॥ ९ ॥ सामन्तविरोधे लेख्यप्रत्ययः ॥ १० ॥ प्रत्यभिलेख्यविरोधे ग्रामनगरवृद्धश्रेणिप्रत्ययः ॥ ११ ॥ अथाप्युदाहरन्ति ॥ १२ ॥
पैतृकं क्रीतमाधेयमन्वाधेयं प्रतिग्रहम्। यज्ञादुपगमो वेणिस्तथा धूमशिखाष्टमी, इति ॥ १३ ॥
तत्र भुक्तानुभुक्तदशवर्षम् ॥ १४ ॥
आधिः सीमा बालधनं निक्षेपोपनिधिः स्त्रियः। राजस्वं श्रोत्रियद्रव्यं न राजाऽऽदातुमर्हति ॥ १६ ॥
श्रोत्रियो रूपवाञ्छीलवान् पुण्यवान् सत्यवान् साक्षिणः सर्वेषु सर्व एव वा ॥ २३ ॥
स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्विजानां सदृशा द्विजाः। शूद्राणां सन्तः शूद्राश्च, अन्त्यानामन्त्ययोनयः २४
प्रातिभाव्यं वृथादानमाक्षिकं शौरिकं च यत्। दण्डशुल्कावशिष्टं च न पुत्रो दातुमर्हति, इति ॥२६॥
ब्रूहि साक्षिन्यथा तत्त्वं लम्बन्ते पितरस्तव। तव वाक्यमुदीक्षाणा उत्पतन्ति पतन्ति च ॥ २७ ॥
नग्नो मुण्डः कपाली च भिक्षार्थी क्षुत्पिपासितः। अन्धः शत्रुकुले गच्छेद्यः साक्ष्यमनृतं वदेत् ॥ २८॥
पञ्च पश्वनृते हन्ति दश हन्ति गवानृते। शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥ २९ ॥
उद्वाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे। विप्रस्य चार्थे ह्यनृतं वदेयुः पञ्चानृतान्याहुरपातकानि।
स्वजनस्यार्थे यदि वार्थहेतोः पक्षाश्रयेणैव वदन्ति कार्यम्। ते शब्दवंशस्य कुलस्य पूर्वान् स्वर्गस्थितांस्तानपि पातयन्ति अपि पातयन्ति। इति ॥ ३२ ॥

वसिष्ठस्मृति—१७ अध्याय।

ऋणमस्मिन् सन्नयति अमृतत्वं च गच्छति। पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥ १ ॥
पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते। अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥ इति ॥५ ॥
बहूनामेकजातानामेकश्चेत्पुत्रवान्नरः। सर्वे ते तेन पुत्रेण पुत्रवन्त इति श्रुतिः ॥ १० ॥
बह्वीनामेकपत्नीनामेका पुत्रवती यदि। सर्वास्तास्तेन पुत्रेण पुत्रवत्य इति श्रुतिः ॥ ११ ॥
स्वयमुत्पादितः स्वक्षेत्रे संस्कृतायां प्रथमः ॥ १३ ॥ तदलाभे नियुक्तायां क्षेत्रजो द्वितीयः ॥ १४ ॥
तृतीयः पुत्रिका विज्ञायते ॥ १५ ॥ अभ्रातृकां पुंसः पितॄनभ्येति प्रतीचीनं गच्छति पुत्रत्वम् ॥
॥ १६ ॥ तत्र श्लोकः ॥ १७ ॥
अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्। अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति॥१८॥
पौनर्भवश्चतुर्थः ॥ १९ ॥ या कौमारं भर्त्तारमुत्सृज्यान्यैः सह चरित्वा तस्यैव कुटुम्बमाश्रयति सा पुनर्भूर्भवति ॥ २० ॥ या च क्लीबं पतितमुन्मत्तं वा भर्त्तारमुत्सृज्यान्यं पतिं विन्दते मृते वा सा पुनर्भूर्भवति ॥ २१ ॥ कानीनः पञ्चमः ॥ २२ ॥ या पितृगृहेऽसंस्कृता कामादुत्पादयेत्, मातामहस्य पुत्रो भवतीत्याहुः ॥ २३ ॥ अथाप्युदाहरन्ति ॥ २४ ॥
अप्रत्ता दुहिता यस्य पुत्रं विन्देत तुल्यतः। पुत्रो मातामहस्तेन दद्यात्पिण्डं हरेद्धनम्, इति ॥ २५ ॥
गृहे च गूढोत्पन्नः षष्ठः ॥ २६ ॥ इत्येते दायादा बान्धवास्त्रातारो महतो भयादित्याहुः ॥ २७ ॥
अथादायादबन्धूनां सहोढ एव प्रथमो या गर्भिणी संस्क्रियते तस्यां जातः सहोढः पुत्रो भवति ॥
॥ २८ ॥ दत्तको द्वितीयो यं मातापितरौ दद्याताम् ॥ २९ ॥ क्रीतस्तृतीयस्तच्छुनःशेपेन व्याख्यातम् ॥ ३० ॥ हरिश्चन्द्रो ह वै राजा सोऽजीगर्तस्य सौयवसेः पुत्रं चिक्राय ॥ ३१ ॥ स्वयं क्रीतवान्स्वयमुपागतश्चतुर्थः तच्छुनःशेपेन व्याख्यातम् ॥ ३२ ॥ अपविद्धः पञ्चमोयं मातापितृभ्यामपास्तं प्रतिगृह्णीयात् ॥ ३४ ॥ शूद्रापुत्र एव षष्ठो भवतीत्याहुः ॥ ३५ ॥ द्व्यंशं ज्येष्ठो हरेद्गवाश्वस्य चानुदशमम् ॥ ४० ॥ अजावयो गृहं च कनिष्ठस्य ॥ ४१ ॥ कार्ष्णायसं गृहोपकरणानि च मध्यमस्य ॥ ४२ ॥ कुमार्यृतुमती त्रीणि वर्षाण्युपासीतोर्ध्वं त्रिभ्यो वर्षेभ्यः पतिं विन्देत्तुल्यम् ॥ ५९ ॥ यस्य पूर्वेषां षण्णां न कश्चिद्दायादः स्यात् सपिण्डः पुत्रस्थानीया वा तस्य धनं विभजेरन् ॥ ७२ ॥ तेषामलाभ आचार्यान्तेवासिनौ हरेयाताम् ॥ ७३ ॥ तयोरलाभे राजा

हरेत् ॥ ७४ ॥ न तु ब्राह्मणस्य राजा हरेत् ॥ ७५ ॥ त्रैविद्यसाधुभ्यः संप्रयच्छेदिति ॥ ७८ ॥

वसिष्ठस्मृति–१८ अध्याय ।

शूद्रेण ब्राह्मण्यामुत्पन्नश्चाण्डालो भवतीत्याहुः । राजन्यायां वैणो वैश्यायामन्त्यावसायी ॥ १ ॥ राजन्येन ब्राह्मण्यामुत्पन्नः सूतो भवतीत्याहुः ॥३॥ एकान्तरद्व्यन्तरत्र्यन्तरानुजाता ब्राह्मणक्षत्रियवैश्यैरम्बष्ठोग्रनिषादा भवन्ति ॥६॥ कृष्णवर्णा या रामा रमणायैव न धर्माय न धर्मायेति ॥१६॥

वसिष्ठस्मृति–१९ अध्याय ।

राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः । निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥३०॥ एनो राजानमृच्छति उत्सृजन्तं सकिल्बिषम् ॥ तं चेद्घातयते राजा हन्ति धर्मेण दुष्कृतम् इति ॥ ॥ ३१ ॥ नाघदोषोऽस्ति राज्ञां वै व्रतिनां न च सत्रिणाम् । ऐन्द्रं स्थानमुपासीना ब्रह्मभूता हि ते सदा ॥ ३४ ॥

वसिष्ठस्मृति–२० अध्याय ।

अनभिसंधिकृते प्रायश्चित्तमपराधे ॥ १ ॥ अभिसन्धिकृतेऽप्येके ॥ २ ॥ परिवित्तिः कृच्छ्रं द्वादशरात्रं चरित्वा निविशेत तां चैवोपयच्छेत् ॥ ८ ॥ अथ परिविविदानः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्त्वा पुनर्निविशेत तामेवोपयच्छेत् ॥९॥ ब्रह्मोज्झः कृच्छ्रं द्वादशरात्रं चरित्वा पुनरुपयुञ्जीत वेदमाचार्यात् ॥ १३ ॥ गुरुतल्पगः सवृषणं शिश्नमुत्कृत्याञ्जलावाधाय दक्षिणामुखो गच्छेत् ॥ १४ ॥ यत्रैव प्रतिहन्यात्तत्र तिष्ठेदाप्रलयम् ॥ १५ ॥ निष्कालको वा घृताभ्यक्तस्तप्तां सूर्मिं परिष्वजेन्मरणात्पूतो भवतीति विज्ञायते ॥ १६ ॥ आचार्यपुत्रशिष्यभार्यासु चैवम् ॥ १७॥ योनिषु च गुर्वीं सखीं गुरुसखीमपपात्रां पतितां च गत्वा कृच्छ्राब्दपादं चरेत् ॥ १८ ॥ एतदेवं च चाण्डालपतितान्नभोजनेषु ततः पुनरुपनयनं वपनादीनां तु निवृत्तिः ॥ १९ ॥ मत्या मद्यपाने त्वसुरायाश्चाज्ञाने कृच्छ्रातिकृच्छ्रौ घृतं प्राश्य पुनः संस्कारश्च ॥ २२ ॥ मूत्रशकृच्छुक्राभ्यवहारेषु चैवम् ॥ २३ ॥ मद्यभाण्डे स्थिता आपो यदि कश्चिद्द्विजः पिबेत् । पद्मोदुम्बरबिल्वपलाशानामुदकं पीत्वा त्रिरात्रेणैव शुद्ध्यति ॥ २४ ॥ अभ्यासे तु सुरा या अग्निवर्णा तां द्विजः पिबेन्मरणात्पूतो भवतीति ॥ २५ ॥ भ्रूणहन वक्ष्यामो ब्राह्मणं हत्वा भ्रूणहा भवत्यविज्ञातं च गर्भमविज्ञाता हि गर्भाः पुंमांसो भवन्ति ॥ २६ ॥ एवं राजन्यं हत्वाऽष्टौ वर्षाणि चरेत् षड्वैश्यं त्रीणि शूद्रं ब्राह्मणीं चात्रेयीं हत्वा, सवनगतौ च राजन्यवैश्यौ ॥ ४१ ॥ आत्रेयीं वक्ष्यामो–रजस्वलामृतुस्नातामात्रेयीमाहुः ॥ ४२ ॥

ब्राह्मणः सुवर्णहरणे प्रकीर्य केशान् राजानमभिधावेत् स्तेनोऽस्मि भोः शास्तु मां भवानिति तस्मै राजोदुम्बरं शस्त्रं दद्यात्तेनात्मानं प्रमापयेन्मरणात्पूतो भवतीति विज्ञायते ॥ ४५ ॥ निष्कालको वा घृताक्तो गोमयाग्निना पादप्रभृत्यात्मानमभिदाहयेन्मरणात्पूतो भवतीति विज्ञायते ॥४६॥ स्तेनः कुनखी भवति श्वित्री भवति ब्रह्महा । सुरापः श्यावदन्तस्तु दुश्चर्मा गुरुतल्पगः इति ॥४९ ॥

वसिष्ठस्मृति–२१ अध्याय ।

ब्राह्मणश्चेदप्रेक्षापूर्वं ब्राह्मणदारानभिगच्छेदनिवृत्तधर्मकर्मणः कृच्छ्रो निवृत्तधर्मकर्मणोऽतिकृच्छ्रः ॥ ॥ १७ ॥ एवं राजन्यवैश्ययोः ॥ १८ ॥

त्र्यहमुष्णं पिबेच्चापस्त्र्यहमुष्णं पयः पिबेत् । त्र्यहमुष्णं घृतं पीत्वा वायुभक्षः परं त्र्यहम् ॥ २२ ॥

वसिष्ठस्मृति–२३ अध्याय ।

य आत्मत्यागाभिशस्तो भवति स पिण्डानां प्रेतकर्मच्छेदः ॥ ११ ॥ काष्ठलोष्टजलपाषाणशस्त्रविषरज्जुभिर्य आत्मानमवसादयति, स आत्महा भवति ॥ १२ ॥ अथाप्युदाहरन्ति ॥१३॥ य आत्मत्यागिनः कुर्यात्स्नेहात् प्रेतक्रियां द्विजः । स तप्तकृच्छ्रसहितं चरेच्चान्द्रायणव्रतम् इति॥ १४॥ अहः प्रातरहर्नक्तमहरेकमयाचितम् । अहः पराकं तत्रैकमेवं चतुरहौ परौ ॥ ३७ ॥ अनुग्रहार्थं विप्राणां मनुर्धर्मभृतां वरः । बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुवाच ह ॥ ३८ ॥

मासस्य कृष्णपक्षादौ ग्रासानद्याच्चतुर्दश । ग्रासापचयभोजी स्यात्पक्षशेषं समापयेत् ॥ ४० ॥
एवं हि शुक्लपक्षादौ ग्रासमेकं तु भक्षयेत् । ग्रासोपचयभोजी स्यात्पक्षशेषं समापयेत् ॥ ४१ ॥

वसिष्ठस्मृति–२४ अध्याय ।

त्र्यहं प्रातस्तथा सायमयाचितं पराक इति कृच्छ्रः ॥ २ ॥ यावत्सकृदाददीत तावदश्नीयात्पूर्ववत्सोऽतिकृच्छ्रः ॥ ३ ॥ अब्भक्षः स कृच्छ्रातिकृच्छ्रः ॥ ४ ॥

वसिष्ठस्मृति–२६ अध्याय ।

क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः । धनेन वैश्यशूद्रौ तु जपैर्होमैर्द्विजोत्तमः ॥ १७ ॥

वसिष्ठस्मृति–२७ अध्याय ।

शङ्कास्थाने समुत्पन्ने भोज्याभोज्यान्नसंज्ञके । आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु ॥ १०॥
अक्षारलवणां रूक्षां पिबेद्ब्राह्मीं सुवर्चलाम् । त्रिरात्रं शङ्खपुष्पीं च ब्राह्मणः पयसा सह ॥ ११ ॥
पालाशबिल्वपत्राणि कुशान्पद्मानुदुम्बरान् । क्वाथयित्वा पिबेदापस्त्रिरात्रेणैव शुध्यति ॥ १२ ॥

वसिष्ठस्मृति–२८ अध्याय ।

नाऽऽपोमूत्रपुरीषेण नाग्निर्दहनकर्मणा ॥ १ ॥
स्वयं विप्रतिपन्ना वा यदि वा विप्रवासिता । बलात्कारोपभुक्ता वा चोरहस्तगताऽपि वा ॥ २ ॥
न त्याज्या दूषिता नारी नास्यास्त्यागो विधीयते । पुष्पकालमुपासीत ऋतुकालेन शुध्यति ॥ ३ ॥
तासां सोमोऽददच्छौचं गन्धर्वः शिक्षितां गिरम् । अग्निश्च सर्वभक्षत्वं तस्मान्निष्कल्मषाः स्त्रियः॥६॥
त्रीणि स्त्रियः पातकानि लोके धर्मविदो विदुः । भर्तुर्वधो भ्रूणहत्या स्वस्य गर्भस्य पातनम् ॥ ७ ॥

(२० क) वृद्धवसिष्ठस्मृति ।

मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा । अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यति (१) ।
स्पृष्टे रजस्वलेऽन्योन्यं सवर्णे त्वेकभर्तृके । कामादकामतो वापि सद्यः स्नानेन शुद्ध्यतः (२) ।

(२१) प्रजापतिस्मृति ।

ब्राह्मणः क्षत्रियविशां जीव्यवृत्तिं समाश्रयेत् । स्ववृत्तेरुपहानित्वान्न श्ववृत्तिं कदाचन ॥ ४७ ॥
वृषोत्सर्गस्य कर्तारो वर्जनीयाः सदैव हि । पितुर्गृहेषु या कन्या रजः पश्यत्यसंस्कृता ॥ ८५ ॥
सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः । महिषीत्युच्यते भार्या सा चैव व्यभिचारिणी ॥८६ ॥
तान्दोषान्क्षमते यस्तु स वै माहिषकः स्मृतः । अज्ञानादथवा लोभान्मोहाद्वाऽपि विशेषतः ॥ ८७॥
समर्घं योऽन्नमादाय महार्घं तु प्रयच्छति । स वै वार्धुषिको नाम अनर्हः सर्वकर्मसु ॥ ८८ ॥
लोहपात्रेषु यत्पक्वं तदन्नं काकमांसवत् । भुक्त्वा चान्द्रायणं कुर्याच्छ्राद्धे नान्येषु कर्मसु ॥ ११३ ॥
ताम्रपात्रे न गोक्षीरं पचेदन्नं न लोहजे । क्रमेण घृततैलाक्ते ताम्रलोहे न दुष्यतः ॥ ११४ ॥
श्यामाकान्कोद्रवान्कंगून्कलञ्जान्राजमाषकान् । निष्पावकान्कदम्बानि वर्जयेच्छ्राद्धकर्मणि ॥१२६॥
कलिङ्गं चैव वृन्ताकं कूष्माण्डं रक्तनीलकम् । हस्तीमुण्डफलं वर्ज्यमलाबु च तुषाम्रकम् ॥ १२७॥
करीरजं कुमारीजं सार्षपं राजिकोद्भवम् । वर्ज्येत्पितृकार्येषु वल्लकौसुम्भपर्पटौ ॥ १२८ ॥
क्षीरं दधि घृतं तक्रमविच्छागसमुद्भवम् । माहिषं च दधि क्षीरं श्राद्धे वर्ज्यं प्रयत्नतः ॥ १२९ ॥
अतो माषान्नमेवैतन्मांसार्थे ब्रह्मणा कृतम् । पितरस्तेन तृप्यन्ति श्राद्धं कुर्यान्न तद्विना ॥ १५२ ॥
त्रिमुहूर्त्तस्तु प्रातः स्यात्तावानेव तु सङ्गवः । मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्तथैव च ॥ १५६ ॥
सायं तु त्रिमुहूर्त्तः स्यात्पञ्चधा काल उच्यते । अतोऽपराह्णः पूर्वेषां भोज्यकाल उदाहृतः ॥ १५७ ॥
मुहूर्त्तास्तत्र विज्ञेया दश पञ्च च सर्वदा । तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः ॥ १५९ ॥
विवृद्धा यत्र पुरतः कुतपस्पर्शिनी तिथिः । श्राद्धे सांवत्सराङ्के च निर्णयोऽयं कृतः सदा ॥ १६० ॥
सापिण्डे कालकामौ तौ वृद्धौ सत्यवसू स्मृतौ । यज्ञे च बहवः सन्ति श्राद्धे श्राद्धे पृथक्पृथक् १८०॥

(२२) देवलस्मृति ।

मृतसूते तु दासीनां पत्नीनां चानुलोमिनाम् । स्वामितुल्यं भवेच्छौचं मृते स्वामिनि यौनिकम् ॥६॥
असवर्णेन यो गर्भः स्त्रीणां योनौ निषिच्यते । अशुद्धा सा भवेन्नारी यावच्छल्यं न मुञ्चति ॥ ५० ॥

विनिःसृते ततः शल्ये रजसो वाऽपि दर्शने । तदा सा शुध्यते नारी विमलं काञ्चनं यथा ॥ ५१ ॥
माता म्लेच्छत्वमागच्छेत्पितरो वा कथंचन । असूतकं च नष्टस्य देवलस्य वचो यथा ॥ ५९ ॥
मातरं च परित्यज्य पितरं च तथा सुतः । ततः पितामहं चैव शेषपिण्डं तु निर्वपेत् ॥ ६० ॥

(२२ क) देवलस्मृति ।

ऊर्णकौशेयकुतपपट्टक्षौमदुकूलजाः । अल्पशौचा भवंत्येते शोषणप्रोक्षणादिभिः (१) ।
तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः । धान्यकल्कैस्तु फलजैः रसैः क्षारानुगैरपि (२) ।
मानुषास्थिवसां विष्ठामार्तवं मूत्ररेतसी । मज्जानं शोणितं स्पृष्ट्वा परस्य स्नानमाचरेत् (३) ।
तान्येव स्वानि संस्पृश्य प्रक्षाल्याचम्य शुद्ध्यति (४) ।
पूर्वाह्णे दैविकं कर्म अपराह्णे तु पैतृकम् । एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् (५) ।
दशमेहनि सम्प्राप्ते स्नानं ग्रामाद्बहिर्भवेत् । तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च (६) ।
काषायी मुण्डस्त्रिदण्डी कमण्डलुपवित्रपादुकासनकन्थामात्रः (७) ।
चाण्डालकूपभाण्डस्थमज्ञानादुदकं पिबेत् । स तु त्र्यहेण शुद्ध्येत शूद्रस्त्वेकेन शुद्ध्यति (८) ।

(२३) गोभिलस्मृति-१ प्रपाठक ।

त्रिवृदूर्ध्ववृतं कार्यं तन्तुत्रयमधोवृतम् । त्रिवृत्तच्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥ २ ॥
पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम् । तद्धार्यमुपवीतं स्यान्नातिलम्बं नचोच्छ्रितम् ॥ ३ ॥
यत्रोपदिश्यते कर्म कर्तुरङ्गं न तूच्यते । दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः ॥ ८ ॥
यत्र दिङ्नियमो न स्याज्जपहोमादिकर्मसु । तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्रीसौम्यापराजिताः ॥ ९ ॥
तिष्ठन्नासीनः प्रह्वो वा नियमो यत्र नेदृशः । तदासीनेन कर्त्तव्यं न प्रह्वेण न तिष्ठता ॥ १० ॥
दाराधिगमनाधाने यः कुर्यादग्रजाग्रिमः । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ ७० ॥
परिवित्तिपरिवेत्तारौ नरकं गच्छतो ध्रुवम् । अपि चीर्णप्रायश्चित्तौ पादोनफलभागिनौ ॥ ७१ ॥
देशान्तरस्थक्लीबैकवृषणानसहोदरान् । वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः ॥ ७२ ॥
जडमूकान्धबधिरकुब्जवामनकुण्ठकान् । अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च ॥ ७३ ॥
धनवृद्धिप्रसक्तांश्च कामतोऽकारिणस्तथा । कुलटोन्मत्तचौरांश्च परिविन्दन्न दुष्यति ॥ ७४ ॥
धनवार्धुषिकं राजसेवकं कर्मकं तथा । प्रोषितं च प्रतीक्षेत वर्षत्रयमपि त्वरन् ॥ ७५ ॥
प्रोषितं यद्यशृण्वानस्त्वब्दादन्ते समाचरेत् । आगते तु पुनस्तस्मिन्पादं वा शुद्धये चरेत् ॥ ७६ ॥
सूर्येऽस्तशैलमप्राप्ते षट्त्रिंशद्भिः सदाऽङ्गुलैः । प्रादुष्करणमग्नीनां प्रातर्भासां च दर्शनात् ॥ १२२ ॥
हस्तादूर्ध्वं रविर्यावद्गिरिं हित्वा न गच्छति । तावद्धोमविधिः पुण्यो नापोऽभ्युदितहोमिनाम् ॥ १२३॥
यावत्सम्यङ्न भासन्ते नभस्यृक्षाणि सर्वतः । न च लोहितमापैति तावत्सायं न हूयते ॥ १२४ ॥
रजो नीहारधूमाभ्रवृक्षाग्रान्तरिते रवौ । सन्ध्यामुद्दिश्य जुहुयाद्धूतमस्य न लुप्यते ॥ १२५ ॥
न कुर्यात्क्षिप्रहोमेषु द्विजः परिसमूहनम् । वैरूपाक्षं च न जपेत्प्रपदं च विवर्जयेत् ॥ १२६ ॥
पर्युक्षणं तु सर्वत्र कर्तव्यमुदितेऽन्विति । अन्ते च वामदेव्यस्य गानं कुर्यादृचैर्चिषा ॥ १२७ ॥
अहोमकेष्वपि भवेद्यथोक्तं चन्द्रदर्शने । वामदेव्यं गणेष्वन्ते बल्यन्ते वैश्वदेविके ॥ १२८ ॥
येष्वधस्तरणाम्नानं न तेषु स्तरणं भवेत् । एककार्यार्थसाध्यत्वात्परिधीनपि वर्जयेत् ॥ १२९ ॥
बहिः पर्युक्षणं चैव वामदेव्यजपं तथा । कृत्वाऽऽहुतीषु सर्वासु त्रिकमेतन्न विद्यते ॥ १३० ॥
हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः । माषकोद्रवगौरादि सर्वलाभे विवर्जयेत् ॥ १३१ ॥

पाण्याहुतिर्द्वादशपर्वपूरिका कंसादिनाचेत्स्रुवपूरमात्रिका ।
दैवेन तीर्थेन च हूयते हविःस्वङ्गारिणि स्वर्चिषि तच्च पावके ॥ १३२ ॥

योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः । मन्दाग्निरामयावी च दरिद्रश्च स जायते ॥ १३३ ॥
तस्मात्समिद्धे होतव्यं नासमिद्धे कदाचन । आरोग्यमिच्छताऽऽयुश्च श्रियमात्यन्तिकीं पराम्॥१३४॥
होतव्ये च हुते चैव पाणिशूर्पास्यदर्विभिः । न कुर्यादग्निधमनं कुर्याद्वा व्यजनादिना ॥ १३५ ॥
मुखेनैके धमन्त्यग्निं मुखाद्ध्येषोऽध्यजायत । नाग्निं मुखेनेति च यल्लौकिके योजयन्ति तत् ॥१३६॥
नारदाद्युक्तवार्क्षं यदष्टाङ्गुलमपाटितम् । सत्वचन्दन्तकाष्ठं स्यात्तदग्रेण प्रधावयेत् ॥ १३८ ॥

उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः। परिजप्य च मन्त्रेण भक्षयेद्दन्तधावनम् ॥ १३९ ॥
आयुर्बलं यशो वर्चः प्रजां पशून्वसूनि च। ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ १४० ॥
मासद्वयं श्रावणादि सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः ॥ १४१ ॥
धनुःसहस्राण्यष्टौ तु तोयं यासां न विद्यते। न ता नदीशब्दवाच्या गर्तास्ते परिकीर्त्तिताः ॥ १४२ ॥
उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च। चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ॥ १४३ ॥
वेदाश्छन्दांसि सर्वाणि ब्रह्माद्याश्च दिवौकसः। जलार्थिनोऽथ पितरो मरीच्याद्यास्त्वथर्षयः॥१४४॥
उपाकर्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः। यियासूननुगच्छन्ति संहृष्टाश्च शरीरिणः ॥ १४५ ॥
समागमस्तु यत्रैषां तत्र हत्यादयो मलाः। नूनं सर्वे क्षयं यान्ति:किमुतैकं नदीरजः ॥ १४६ ॥
स्वर्धुन्यम्भःसमानि स्युः सर्वाण्यम्भांसि भूतले। कूपस्थान्यपि सोमार्कग्रहणे नात्र संशयः ॥ १५० ॥

गोभिलस्मृति–२ प्रपाठक।

भूयस्त्वं ब्रुवते तत्र कृच्छ्राच्छ्रेयो ह्यवाप्यत। तिष्ठेदुदयनात्पूर्वां मध्यमामपि शक्तितः ॥ १४ ॥
आसीतास्तमयाच्चान्त्यां सन्ध्यां पूर्वत्रिकं जपेत्। एतत्सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यत्र तिष्ठति॥ १५॥
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते। सन्ध्यालोपाच्च चकितः स्नानशीलस्तु यः सदा ॥१६॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भूतनृयज्ञोऽतिथिपूजनम् ॥ २७ ॥
श्राद्धं वा पितृयज्ञः स्यात्पित्र्योर्बलिरथापि वा। यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स चोच्यते ॥२८॥
इतरेभ्यस्ततो देयादेष दानविधिः परः। संनिकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत् ॥ ६६ ॥
यद्ददाति तमुल्लंघ्य तत्स्तेयेन स युज्यते। यस्य चास्ति गृहे मूर्खो दूरस्थश्च गुणान्वितः ॥ ६७ ॥
गुणान्विताय दातव्यं नास्ति मूर्खे व्यतिक्रमः। ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते ॥ ६८ ॥
ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते। आज्यस्थाली च कर्तव्या तैजसद्रव्यसम्भवा ॥ ६९ ॥
श्रोत्रियं सुभगां गां वा साग्निमग्निचितं यथा। प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते ॥१६३॥
पापिष्ठं दुर्भगामन्त्यं नग्नमुत्कृत्तनासिकम्। प्रातरुत्थाय यः पश्येत्स कलि उपयुज्यते ॥ १६५ ॥
पतिमुल्लङ्घ्य मोहात्स्त्री कं कं न नरकं व्रजेत्। कृच्छ्रान्मानुषतां प्राप्य किं किं दुःखं न पश्यति१६६
पतिशुश्रूषयैव स्त्री सर्वांल्लोकान्समश्नुते। दिवः पुनरिहाऽऽयाता सुखानामम्बुधिर्भवेत् ॥ १६७ ॥

गोभिलस्मृति–३ प्रपाठक।

दाहयित्वाऽग्निभिर्भार्यां सदृशीं पूर्वसंस्थिताम्। पात्रैश्चाथाग्निमादध्यात्कृतदारोऽविलम्बितः ॥ ५ ॥
एवं वृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीम्। दाहयित्वाऽग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् ॥ ६ ॥
द्वितीयां चैव यः पत्नीं दहेद्वैतानिकाग्निभिः। जीवन्त्यां प्रथमायान्तु ब्रह्मघ्नेन समं हि तत् ॥ ७ ॥
यो दहेदग्निहोत्रेण स्वेन भार्यां कथञ्चन। स स्त्री संपद्यते तेन भार्या चास्य पुमान्भवेत् ॥ ११ ॥
मान्या चेन्म्रियते पूर्वं भार्या पतिविमानिता। त्रीणि जन्मानि सा पुंस्त्वं पुरुषः स्त्रीत्वमर्हति ॥१३ ॥
सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते। होमः श्रौतस्तु कर्तव्यः शुष्कान्नेनापि वा फलैः ६०
न त्यजेत्सूतके कर्म ब्रह्मचारी स्वकं क्वचित्। न दीक्षिण्यात्परं यज्ञे न कृच्छ्रादि तपश्चरन् ॥६४ ॥
पितर्यपि मृते नैषां दोषो भवति कर्हिचित्। आशौचं कर्मणोऽन्ते स्यात्त्र्यहं वा ब्रह्मचारिणः॥६५॥
श्राद्धमग्निमतः कार्यं दाहादेकादशेऽहनि। प्रत्याब्दिकं प्रकुर्वीत प्रमीताहनि सर्वदा ॥ ६६ ॥
द्वादशप्रतिमास्यानि आद्यं षाण्मासिके तथा। सपिण्डीकरणं चैव एतद्वै श्राद्धषोडशम् ॥ ६७ ॥
एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः। न्यूना संवत्सराच्चैव स्यातां षाण्मासिके तथा॥६८॥
सशिखं वपनं कार्यमास्नानब्रह्मचारिणाम्। आशरीरविमोक्षाय ब्रह्मचर्यं न चेद्भवेत् ॥ ८९ ॥
वपनं नास्य कर्त्तव्यमर्वागौदनिकव्रतात्। व्रतिनो वत्सरं यावत्षण्मासानिति गौतमः ॥ ९० ॥
अक्षतास्तु यवाः प्रोक्ता भृष्टा धाना भवन्ति ते। भृष्टास्तु व्रीहयो लाजा घटाः पण्डिक उच्यते१३३

(२४) लघ्वाश्वलायनस्मृति–१ आचारप्रकरणम्।

एका लिङ्गे करे तिस्रः करयोर्मृद्द्वयं गुदे। पञ्च वामे दश प्रोक्ताः करे सप्ताथ हस्तयोः ॥ १० ॥
एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः। वानप्रस्थस्य त्रिगुणं यतेश्चैव चतुर्गुणम् ॥ ११ ॥

स्वपादं पाणिना विप्रो वामेन क्षालयेत्सदा । शौचे दक्षिणपादं तु पश्चात्सव्यं करावुभौ ॥ १२ ॥
शौचं विना सदाऽन्यत्र सव्यं प्रक्षाल्य दक्षिणम् । एवमेवाऽऽत्मनः पादौ परस्याऽऽदौ तु दक्षिणम् १३
गण्डूषैः शोधयेदास्यमाचामेद्दन्तधावनम् । काष्ठैः पर्णैस्तृणैर्वाऽपि केचित्पर्णैः सदा तृणैः ॥ १४ ॥
नवमी द्वादशी नन्दा पर्व चार्कमुपोषणम् । श्राद्धाहं च परित्यज्य दन्तधावनमाचरेत् ॥ १५ ॥
आचम्याथ द्विजः स्नायान्नद्यां वा देवनिर्मिते । तीर्थे सरोवरे चैव कूपे वा द्विजनिर्मिते ॥ १६ ॥
अशक्तश्चेज्जलस्नाने मन्त्रस्नानं समाचरेत् । आपोहिष्ठादिभिर्मन्त्रैस्त्रिभिश्चानुक्रमेण तु ॥ २३ ॥
परिधाने सितं शस्तं वासः प्रावरणे तथा । पट्टकूलं तथालाभे ब्राह्मणस्य विधीयते ॥ २८ ॥
आविकं त्रसरं चैव परिधाने परित्यजेत् । शस्तं प्रावरणे प्रोक्तं स्पर्शदोषो न हि द्वयोः ॥ २९ ॥
कालद्वये यदा होमं द्विजः कर्तुं न शक्यते । सायमाज्याहुतिं चैव जुहुयात्प्रातराहुतिम् ॥ ६५ ॥
सायंकाले समस्तं स्यादाज्याहुतिचतुष्टयम् । हुत्वा कुर्यादुपस्थानं समस्येत्यग्निसूर्ययोः ॥ ६६ ॥
होमश्चेत्पुरतः काले प्राप्तः स्यात्काल उत्तरः । हुत्वा व्याहृतिभिश्चाऽऽज्यं कुर्याद्धोमद्वयं च हि ॥६७॥
विच्छिन्नवह्निसन्धानमपराह्णे विधीयते । सायमौपासनं कुर्यादस्तादुपरि भास्वतः ॥ ६८ ॥
नैव गच्छेद्विना भार्यां सीमामुल्लङ्घ्य योऽग्निमान् । यत्र तिष्ठति वै भार्या तत्र होमो विधीयते ॥६९॥
गत्वा भार्यां विना होमं सीमामुल्लङ्घ्य यो द्विजः । कुरुते तत्र चेन्मोहाद्धुतं तस्य वृथा भवेत्॥७०॥
यथा जातोऽग्निमान्विप्रस्तन्निवासालये सदा । तस्या एवानुचारेण होमस्तत्र विधीयते ॥ ७१ ॥
धर्मानुचारिणी भार्या सवर्णा यत्र तिष्ठति । कुर्यात्तत्राग्निहोत्रादि प्रवदन्ति महर्षयः ॥ ७२ ॥
माता पिता गुरुर्भार्या पुत्रः शिष्यस्तथैव च । अभ्यागतोऽतिथिश्चैव पोष्यवर्ग इति स्मृतः ॥ ७४ ॥
स्पृशेदुच्छिष्टमुच्छिष्टः श्वानं शूद्रमथापि च । उपोष्य रजनीमेकां पञ्चगव्यं पिबेच्छुचिः ॥ १६२ ॥
श्वानं शूद्रं तथोच्छिष्टमनुच्छिष्टो न संस्पृशेत् । मोहाद्विप्रः स्पृशेद्यस्तु स्नानं तस्य विधीयते ॥१६३॥
उच्छिष्टस्पर्शने चैव भुञ्जानश्च भवेद्यदि । पात्रस्थं चापि वाऽश्नीयादन्नं पात्रस्थितं च यत् ॥ १६८ ॥
गायत्र्या संस्कृतं चान्नं न त्यजेदभिमन्त्रितम् । गृहीतं चेत्पुनश्चाद्याद्गायत्रीं च शतं जपेत् ॥१६९॥
अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसञ्चितम् । अस्नेहा अपि गोधूमा यवगोरसविक्रियाः ॥ १७० ॥
ब्राह्मणो नैव भुञ्जीयाद्दुहितुरन्नं कदाचन । अज्ञानाद्यदि भुञ्जीत रौरवं नरकं व्रजेत् ॥ १७५ ॥
ततः स्वपेद्यथाकामं न कदाचिदुदक्शिराः । एतावन्नैत्यकं कर्म प्रवदन्ति मनीषिणः ॥ १८५ ॥

लघ्वाश्वलायनस्मृति-१२ उपाकर्मप्रकरणम् ।

श्रवणे स्यादुपाकर्म हस्ते वा श्रावणस्य तु । नो चेद्भाद्रपदे वाऽपि कुर्याच्छिष्यैर्गुरुः सह ॥ १ ॥
ग्रहदोषादुपाकर्म प्रथमं न भवेद्यदि । उक्तकालेऽथवाऽऽषाढे कुर्याच्छरदि वाऽपि वा ॥ २ ॥
अकाले नैव तत्कुर्यादुपाकर्म कथंचन । अकृत्वा नोद्वहेत्कन्यां मोहाच्चेत्पतितो भवेत् ॥ ३ ॥

लघ्वाश्वलायनस्मृति-१४ गोदानादित्रयप्रकरणम् ।

कृत्वा तु स्नातकः पश्येत्समावर्तनकं भवेत् । समाग्ने प्रत्यृचं हुत्वा समिधश्च दशस्वयम् ॥ ६ ॥
स्पृष्ट्वा पादौ नमस्कुर्याद्गुरोर्दस्वेति तत्फलम् । न नक्तमिति चानुज्ञा लब्धस्तेन यथोदितम् ॥ ७ ॥
ततः स्विष्टकृतं कृत्वा होमशेषं समापयेत् । लभेदाज्ञां विवाहार्थं गुरुर्निर्मुच्य मेखलाम् ॥ ८ ॥

लघ्वाश्वलायनस्मृति-१५ विवाहप्रकरणम् ।

कुलजां सुमुखीं स्वङ्गीं सुवासां च मनोहराम् । सुनेत्रां सुभगां कन्यां निरीक्ष्य वरयेद्बुधः ॥ २ ॥
स्नातकाय सुशीलाय कुलोत्तमभवाय च । दद्याद्वेदविदे कन्यामुचिताय वराय च ॥ ३ ॥
मधुनाऽऽज्येन वा युक्तं मधुपर्काभिधं दधि । दध्यलाभे पयो ग्राह्यं मध्वलाभे तु वै गुडः ॥ ५ ॥
निदध्यात्तं नवे कांस्ये तस्योपरि पिधाय च । वेष्टयेद्विष्टरेणैव मधुपर्कं तदुच्यते ॥ ६ ॥
यावत्सप्तपदीमध्ये विवाहो नैव सिध्यति । सद्योऽतो होममिच्छन्ति सन्तः सायमुपासनम् ॥ ६० ॥
विवाहोत्सवयज्ञेषु दैवे पित्र्ये च कर्मणि । प्रारब्धे सूतकं नास्ति प्रवदन्ति महर्षयः ॥ ७२ ॥
प्रारम्भकर्मणश्चैव क्रियाप्रारम्भकस्य च । क्रियावसानपर्यन्तं न तस्याशौचमिष्यते ॥ ७३ ॥
प्रारम्भो वरणं यज्ञे सङ्कल्पे व्रतसत्रयोः । नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया ॥ ७४ ॥
ऊढाया दुहितुश्चान्नं नाद्याद्विप्रः कथञ्चन । अज्ञानाद्यदि भुञ्जीत नरकं प्रतिपद्यते ॥ ८० ॥

लघ्वाश्वलायनस्मृति–२० प्रेतकर्मविधिप्रकरणम् ।

भवेत्तदूर्ध्वमेकाहं तत्पश्चात्स्नानतः शुचिः । पित्रादयस्त्रयश्चैवं तथा तत्पूर्वजास्त्रयः ॥ ८२ ॥
सप्तमः स्यात्स्वयं चैव तत्सापिण्ड्यं बुधैः स्मृतम् । सापिण्ड्यं सोदकं चैव सगोत्रं तच्च वै क्रमात् ८३
एकैकं सप्तकं चैकं सापिण्ड्यकमुदाहृतम् ॥ ८४ ॥
दीक्षितस्याऽऽहिताग्नेश्च स्वाध्यायनिरतस्य च । वृतस्याऽऽमन्त्रितस्येह नाशौचं विद्यते क्वचित् ॥९०॥
संप्रक्षालितपात्रस्य श्राद्धे विप्रस्य चैव हि । गृहानुव्रजपर्यन्तं न तस्याशौचमिष्यते ॥ ९१ ॥

लघ्वाश्वलायनस्मृति–२१ लोके निन्द्यप्र० ।

माहिषी सोच्यते भार्या भगेनार्जति या धनम् । तस्यां यो जायते पुत्रो माहिषेयः सुतः स्मृतः ॥४॥
रजस्वला च या कन्या यदि स्यादविवाहिता । वृषलीवार्षलेयः स्याज्जातस्तस्यां स चैव हि ॥ ९ ॥
विधवायाः सुतश्चैव गोलकः कुण्ड इत्यथ । त्रयश्चैव हि निन्द्याः स्युः सर्वधर्मबहिष्कृताः ॥ १३ ॥

लघ्वाश्वलायनस्मृति–२२ वर्णधर्मप्र० ।

उदक्यां शूतिकां चैव पतितं शवमन्त्यजम् । श्वकाकरासभान्स्पृष्ट्वा सवासा जलमाविशेत् ॥ १३ ॥
उच्छिष्टस्पर्शनं चेत्स्यादश्नतो याजकस्य च । अन्नं पात्रस्थमश्नीयान्नान्यद्द्यात्कथंचन ॥ १९ ॥
अनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ २३ ॥

लघ्वाश्वलायनस्मृति–२४ श्राद्धोपयोगिप्रक० ।

दर्शाष्टका व्यतीपाता वैधृतिश्च महालयः । युगाश्च मनवः श्राद्धकालाः संक्रान्तयस्तथा ॥ २३ ॥
गजच्छायोपरागश्च षष्ठी या कपिला तथा । अर्धोदयादयश्चैव श्राद्धकालाः स्मृता बुधैः ॥ २४ ॥
संभूते च नवे धान्ये श्रोत्रिये गृहमागते । आचार्याः केचिदिच्छन्ति श्राद्धं तीर्थे च सर्वदा ॥२९॥

(२५) बौधायनस्मृति–१ प्रश्न १ अध्याय।

धर्मेणाधिगतो येषां वेदः सपरिबृंहणः । शिष्टास्तदनुमानज्ञाः श्रुतिप्रत्यक्षहेतवः ॥ ६ ॥
चातुर्वैद्यो विकल्पी च अङ्गविद्धर्मपाठकः । आश्रमस्थास्त्रयो विप्राः पर्षदेषादशावरा ॥ ९ ॥
पञ्च वा स्युस्त्रयो वा स्युरेको वा स्यादनिन्दितः । प्रतिवक्ता तु धर्मस्य नेतरे तु सहस्रशः ॥ १० ॥
यथा दारुमयो हस्ती यथा चर्ममयो मृगः । ब्राह्मणश्चानधीयानस्त्रयस्ते नामधारकाः ॥ ११ ॥
धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः । क्रीडार्थमपि यद्ब्रूयुः स धर्मः परमः स्मृतः ॥ १४ ॥
अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् । सहस्रशः समेतानां परिषत्त्वं न विद्यते ॥ १७ ॥
प्राग्विनशनात्प्रत्यक्कालकाद्वनाद्दक्षिणेन हिमवन्तमुदक्पारियात्रमेतदार्यावर्तं तस्मिन्य आचारः स प्रमाणम् ॥ २७ ॥ गङ्गायमुनयोरन्तरमित्येके ॥ २८ ॥ अथाप्यत्र भाल्लविनो गाथामुदाहरन्ति ॥ २९ ॥
पश्चात्सिन्धुर्विहरणी सूर्यस्योदयनं पुरः । यावत्कृष्णा विधावन्ति तावद्धि ब्रह्मवर्चसम् ॥ ३० ॥

बौधायनस्मृति–१ प्रश्न–२ अध्याय ।

वसन्तो ग्रीष्मः शरदित्यृतवो वर्णानुपूर्व्येण ॥ १० ॥ गायत्रीत्रिष्टुब्जगतीभिर्यथाक्रमम् ॥ ११ ॥ प्रसाधनोत्सादनस्नापनोच्छिष्टभोजनानीति गुरोः ॥ ३४ ॥ उच्छिष्टवर्जनं तत्पुत्रेऽनूचाने वा ॥ ॥ ३५ ॥ प्रसाधनोत्सादनस्नापनवर्जनं च तत्पत्न्याम् ॥ ३६ ॥ अब्राह्मणादध्ययनमापदि ॥ ४०॥ शुश्रूषाऽनुव्रज्या च यावदध्ययनम् ॥ ४१ ॥ तयोस्तदेव पावनम् ॥ ४२ ॥ ऋत्विक्श्वशुरपितृव्यमातुलानां तु यवीयसां प्रत्युत्थायाभिभाषणम् ॥ ४४ ॥ प्रत्यभिवादमिति कात्यः ॥ ४५ ॥ शिशावाङ्गिरसे दर्शनात् ॥ ४६ ॥
धर्मार्थौ यत्र न स्यातां शुश्रूषावाऽपि तद्विधा । विद्यया सह मर्त्तव्यं न चैनामूषरे वपेत् ॥ ४८ ॥
अग्निरिव कक्षं दहति ब्रह्मपृष्टमनादृतम् । तस्माद्वै शक्यं न ब्रूयाद्ब्रह्ममानमकुर्वतामिति ॥ ४९ ॥

बौधायनस्मृति–१प्र०–५अध्याय।

अंगुष्ठाग्रं पित्र्यम् ॥ १६ ॥ अंगुल्यग्रं दैवम् ॥ १७ ॥ अंगुलिमूलमार्षम् ॥ १८ ॥ तैजसानामुच्छिष्टानां गोशकृन्मृद्भस्मभिः परिमार्जनमन्यतमेन वा ॥ ३४ ॥ ताम्ररजतसुवर्णानामम्ले = ३५॥

दारवाणां तक्षणम् ॥ ३७ ॥ कुतपानामरिष्टैः ॥ ४१ ॥ और्णानामादित्येन ॥ ४२ ॥ क्षौमाणां गौरसर्षपकल्केन ॥ ४३ ॥ तैजसवदुपलमणीनाम् ॥ ४६ ॥ दारुवदस्थ्नाम् ॥ ४७ ॥ क्षौमवच्छंखशृङ्गशुक्तिदन्तानाम् पयसा वा ॥ ४८ ॥ चक्षुर्घ्राणानुकूल्याद्वा मूत्रपुरीषासृक्शुक्रकुणपस्पृष्टानां पूर्वोक्तानामन्यतमेन त्रिःसप्तकृत्वः परिमार्जनम् ॥ ४९ ॥ अतैजसानामेवंभूतानामुत्सर्गः ॥ ५० ॥
नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम् । ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति श्रुतिः॥५६॥
वत्सः प्रस्रवणे मेध्यः शकुनिः फलशातने । स्त्रियश्च रतिसंसर्गे श्वा मृगग्रहणे शुचिः ॥ ५७ ॥
आकराः शुचयः सर्वे वर्जयित्वा सुराकरम् । अदूष्याः सततधारा वातोद्धूताश्च रेणवः ॥ ५८ ॥
अमेध्येषु च ये वृक्षा उप्ताः पुष्पफलोपगाः । तेषामपि न दुष्यन्ति पुष्पाणि च फलानि च ॥५९॥
आत्मशय्यासनं वस्त्रं जायापत्यं कमण्डलुः । शुचीन्यात्मन एतानि परेषामशुचीनि तु ॥ ६१ ॥
खलक्षेत्रेषु यद्धान्यं कूपवापीषु यज्जलम् । अभोज्यादपि तद्भोज्यं यच्च गोष्ठगतं पयः ॥ ६३ ॥
त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् । अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥ ६४॥
आपः पवित्रं भूमिगता गोतृप्तिर्यासु जायते । अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः ॥ ६५ ॥
शूद्राणामार्याधिष्ठितानामर्धमासि मासि वा वपनमार्यवदाचमनकल्पः ॥ ८९ ॥
यः समर्घमृणं गृह्य महार्घं संप्रयोजयेत् । स वै वार्धुषिको नाम सर्वधर्मेषु गर्हितः ॥ ९३ ॥
वृद्धिं च भ्रूणहत्यां च तुलयासमतोलयत् । अतिष्ठद्भ्रूणहा कोट्यां वार्धुषिः समकम्पत ॥ ९४ ॥
स्पृशन्ति बिन्दवः पादौ य आचामयतः परान् । न तैरुच्छिष्टभावः स्यात्तुल्यास्ते भूमिगैः सहेति १०५
आसप्तमासादादन्तजननाद्वोदकोपस्पर्शनम् । पिण्डोदकक्रिया प्रेते नात्रिवर्षे विधीयते ॥ १०९ ॥
लोकसंग्रहणार्थं हि तदमन्त्राः स्त्रियो मताः । स्त्रीणां कृतविवाहानां त्र्यहाच्छुध्यन्ति बान्धवाः१११
अपि च प्रपितामहः पितामहः पिता स्वयं सोदर्या भ्रातरः सवर्णायाः पुत्रः पौत्रः प्रपौत्रस्तत्पुत्रवर्ज्यं तेषां च पुत्रपौत्रमविभक्तदायं सपिण्डानाचक्षते ॥ ११३ ॥ विभक्तदायानपि सकुल्याना चक्षते ॥ ११४ ॥ सपिण्डाभावे सकुल्यः ॥ ११६ ॥ तदभावे पिताऽऽचार्योऽन्तेवास्यृत्विग्वा हरेत् ॥ ११७ ॥ तदभावे राजा तत्स्वं त्रैविद्यवृद्धेभ्यः संप्रयच्छेत् ॥ ११८ ॥
गर्भस्रावे गर्भमाससंमिता रात्रयः स्त्रीणाम् ॥ १३६ ॥

बौधायनस्मृति-१ प्र०-६ अध्याय ।

अग्न्याधाने क्षौमाणि वासांसि तेषामलाभे कार्पासिकान्यौर्णानि वा भवन्ति ॥ ११ ॥ मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानां मृदाऽद्भिरिति प्रक्षालनम् ॥ १२ ॥ असंस्कृतायां भूमौ न्यस्तानां तृणानां प्रक्षालनम् ॥ २२ ॥ परोक्षोपहतानामभ्युक्षणम् ॥ २३ ॥ एवं क्षुद्रसमिधाम् ॥ २४ ॥ महतां काष्ठानामुपघाते प्रक्षाल्यावशोषणम् ॥ २५ ॥ बहूनां तु प्रोक्षणम् ॥ २६ ॥ मृन्मयानां पात्राणामुच्छिष्टसमन्वारब्धानामवकूलनम् ॥ ३४ ॥ उच्छिष्टलेपोपहतानां पुनर्दहनम् ॥ ३५ ॥ मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानामुत्सर्गः ॥ ३६ ॥ मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानां पुनः करणम् ॥ ३९ ॥ गोमूत्रे वा सप्तरात्रं परिशायनम् ॥ ४० ॥ महानद्यां वैवम् ॥ ४१ ॥

बौधायनस्मृति-१ प्रश्न-८ अध्याय ।

तेषां वर्णानुपूर्व्येण चतस्रो भार्या ब्राह्मणस्य ॥ २ ॥ तिस्रो राजन्यस्य ॥ ३ ॥ द्वे वैश्यस्य ॥ ४ ॥ एका शूद्रस्य ॥ ५ ॥ तासु पुत्राः सवर्णानन्तरासु सवर्णाः ॥ ६ ॥ निषादेन निषाद्यामापञ्चमाज्जातोऽपहन्ति शूद्रताम् ॥ १३ ॥ तमुपनयेत्षष्ठं याजयेत् ॥ १४ ॥ सप्तमो विकृतबीजः समबीजः सम इत्यकेषां संज्ञाः क्रमेण निपतन्ति ॥ १५ ॥

बौधायनस्मृति-१प्रश्न-९ अध्याय ।

ब्राह्मणात्क्षत्रियायां ब्राह्मणो वैश्यायामम्बष्ठः शूद्रायां निषादः ॥ ३ ॥ क्षत्रियाद्वैश्यायां क्षत्रियः शूद्रायामुग्रः ॥ ५ ॥ वैश्याच्छूद्रायां रथकारः ॥ ६ ॥ शूद्राद्वैश्यायां मागधः क्षत्रियायां क्षत्ता ब्राह्मण्यां चण्डालः ॥ ७ ॥ वैश्यात्क्षत्रियायामायोगवो ब्राह्मण्यां वैदेहकः ॥८॥ क्षत्रियाद्ब्राह्मण्यां सूतः ॥ ९ ॥ उग्राज्जातः क्षत्रियां श्वपाकः ॥ १२ ॥ वैदेहकादम्बष्ठायां वैणः ॥ १३ ॥ निषादाच्छूद्रायां पुक्कसः ॥ १४ ॥ शूद्रान्निषाद्यां कुक्कुटः ॥ १५ ॥

बौधायनस्मृति–१ प्रश्न-१० अध्याय।

क्षत्रे बलमध्ययनयजनदानशस्त्रकोशभूतरक्षणसंयुक्तं क्षत्रस्य वृद्ध्यै ॥ ३ ॥ अवध्यो वै ब्राह्मणः सर्वापराधेषु ॥ १८ ॥ ब्राह्मणस्य ब्रह्महत्यागुरुतल्पगमनसुवर्णस्तेयसुरापानेषु कुसिन्धभगसृगालसुराध्वजांस्तप्तेनायसा ललाटेऽङ्कयित्वा विषयान्निर्धमनम् ॥ १९ ॥ हंसभासबर्हिणचक्रवाकप्रचलाककाकोलूकमण्डूकडिड्डिकडेरिकाश्वबभ्रुनकुलादीनां वधे शूद्रवत् ॥ २८ ॥

पादो धर्मस्य कर्तारं पादो गच्छति साक्षिणम् । पादः सभासदः सर्वान्पादो राजानमृच्छति ॥३०॥
एतयोरन्तरा यत्तु सुकृतं दुष्कृतं भवेत् । तत्सर्वं राजगामि स्यादनृतं ब्रुवतस्तव ॥ ३३ ॥
त्रीनेव पितॄन्हन्ति त्रीनेव च पितामहान् । सप्तजातानजातांश्च साक्षी साक्ष्यं मृषा वदन् ॥ ३४ ॥
हिरण्यार्थेऽनृते हन्ति त्रीनेव च पितामहान् । पञ्च पश्वनृते हन्ति दश हन्ति गवानृते ॥ ३५ ॥
शतमश्वानृते हन्ति सहस्रं पुरुषानृते । सर्वं भूम्यनृते हन्ति साक्षी साक्ष्यं मृषा वदन् ॥ ३६ ॥
चत्वारो वर्णाः पुत्रिणः साक्षिणः स्युरन्यत्र श्रोत्रियराजन्यप्रव्रजितमानुष्यहीनेभ्यः ॥ ३७ ॥

बौधायनस्मृति–१ प्रश्न-११ अध्याय।

श्रुतशीले विज्ञाय ब्रह्मचारिणेऽर्थिने दीयते स ब्राह्मः ॥ २ ॥ आच्छाद्यालंकृतया सह धर्मश्चर्यतामिति प्राजापत्यः ॥ ३ ॥ पूर्वां लाजाहुतिं हुत्वा गोमिथुनं कन्यावते दद्यात्स आर्षः ॥४॥ दक्षिणासु नीयमानास्वन्तर्वेद्यृत्विजे स दैवः ॥ ५ ॥ धनेनोपतोष्याऽऽसुरः ॥ ६ ॥ सकामेन सकामया मिथः संयोगो गान्धर्वः ॥ ७ ॥ प्रसह्य हरणाद्राक्षसः ॥ ८ ॥ सुप्तां मत्तां प्रमत्तां वोपयच्छेदिति पैशाचः ॥ ९ ॥

शुल्केन ये प्रयच्छन्ति स्वसुतां लोभमोहिताः । आत्मविक्रयिणः पापा महाकिल्बिषकारकाः॥२१॥
पतन्ति नरके घोरे घ्नन्ति चाऽऽसप्तमं कुलम् । गमनागमनं चैव सर्वं शुल्को विधीयते ॥ २२ ॥
पौर्णमास्याष्टकामावास्याग्न्युत्पातभूमिकम्पश्मशानदेशपतिश्रोत्रियैकतीर्थ्यप्रयाणेष्वहोरात्रमनध्यायः ॥ २३ ॥ वाते पूतिगन्धे नीहारे च नृत्तगीतवादित्ररुदितसामशब्देषु तावन्तं कालम् ॥ २४ ॥ स्तनयित्नुवर्षविद्युत्सन्निपाते त्र्यहमनध्यायोऽन्यत्र वर्षाकालात् ॥ २५ ॥ वर्षाकालेऽपि वर्षवर्जमहोरात्रयोश्च तत्कालम् ॥ २६ ॥ पित्र्यप्रतिग्रहभोजनयोश्च तद्दिवसशेषम् ॥ २७ ॥ भोजनेष्वाजीर्णान्तम् ॥ २८ ॥

हन्त्यष्टमी उपाध्यायं हन्ति शिष्यं चतुर्दशी । हन्ति पञ्चदशी विद्यां तस्मात्पर्वणि वर्जयेत् ॥४३॥

बौधायनस्मृति–२ प्रश्न–१ अध्याय।

भ्रूणहा द्वादशसमाः ॥ २ ॥ कपाली खट्वाङ्गी गर्दभचर्मवासा अरण्यनिकेतनः श्मशाने ध्वजं शवशिरः कृत्वा कुटीं कारयेत्तामावसेत्सप्तागाराणि भैक्षं चरन्स्वकर्माऽऽचक्षाणस्तेन प्राणान्धारयेदलब्धोपवासः ॥ ३ ॥ अश्वमेधेन गोसवेनाग्निष्टुता वा यजेत अश्वमेधावभृथेवाऽऽत्मानं प्लावयेत् ॥ ४ ॥

अमत्या ब्राह्मणं हत्वा दुष्टो भवति धर्मतः । ऋषयो निष्कृतिं तस्य वदन्त्यमतिपूर्वके ॥ ६ ॥
मतिपूर्वं घ्नतस्तस्य निष्कृतिर्नोपलभ्यते । अपगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने ॥ ७ ॥
कृच्छ्रं चान्द्रायणं चैव लोहितस्य प्रवर्तने । तस्मान्नैवापगुरेत्त च कुर्वीत शोणितम् ॥ ८ ॥
नवसमा राजन्यस्य ॥ ९ ॥ तिस्रो वैश्यस्य ॥ १० ॥ संवत्सरं शूद्रस्य ॥ ११ ॥ स्त्रियाश्च ॥ १२॥ ब्राह्मणवदात्रेय्याः ॥ १३ ॥ गुरुतल्पगस्तप्ते लोहशयने शयीत ॥ १४ ॥ सूर्मिं वा ज्वलन्तीं श्लिष्येत् ॥ १५ ॥ लिङ्गं वा सवृषणं परिवास्याञ्जलावाधाय दक्षिणाप्रतीच्योर्दिशमन्तरेण गच्छेदानिपतनात् ॥१६॥ स्तेनः प्रकीर्यकेशान्सैधकं मुसलमादाय स्कन्धेन राजानं गच्छेदनेन मां जहीति तेनैनं हन्यात् ॥ १७ ॥ अथाप्युदाहरन्ति ॥ १८ ॥

स्कन्धेनाऽऽदाय मुसलं स्तेनो राजानमन्वियात् । अनेन शाधि मां राजन्क्षत्रधर्ममनुस्मरन् ॥ १९॥
शासने वा विसर्गे वा स्तेनो मुच्येत किल्बिषात् । अशासनात्तु तद्राजा स्तेनादाप्नोति किल्बिषम् २०
सुरां पीत्वोष्णया कायं दहेत् ॥ २१ ॥ अमत्या पाने कृच्छ्राब्दपादं चरेत्पुनरुपनयनं च ॥ २२ ॥
अमत्या वारुणीं पीत्वा प्राश्य मूत्रपुरीषयोः । ब्राह्मणः क्षत्रियो वैश्यः पुनः संस्कारमर्हति ॥ २५॥

सुराधाने तु यो भाण्डे अपः पर्युषिताः पिबेत् । शङ्खपुष्पीविपक्केन षडहं क्षीरेण वर्तयेत् ॥ २६॥ गुरुप्रयुक्तश्चेन्म्रियेत गुरुस्त्रीन्कृच्छ्रांश्चरेत् ॥ २७ ॥ ब्रह्मचारिणः शवकर्मणाव्रतावृत्तिरन्यत्र माता-पित्रोराचार्याच्च ॥ २९ ॥ सगोत्रां चेदमत्योपयच्छेद्भ्रातृवदेनां बिभृयात् ॥ ४६ ॥ प्रजाता चे-त्कृच्छ्राब्दपादं चरित्वा यन्म आत्मनो मिन्दाऽभूत्पुनरग्निश्चक्षुरदादिति एताभ्यो जुहुयात् ॥ ४७॥ परिवित्तः परिवेत्ता या चैनं परिविन्दति । सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ॥ ४८ ॥ परिवित्तिः परिवेत्ता दाता यश्चापि याजकः । कृच्छ्रद्वादशरात्रेण स्त्री त्रिरात्रेण शुध्यति ॥ ४९॥ भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुते तिलैः । श्वविष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जतीति ॥ ७६ ॥ पितॄन्वा एष विक्रीणीते यस्तिलान्विक्रीणीते ॥ ७७ ॥ प्राणान्वा एष विक्रीणीते यस्तण्डुलान्वि-क्रीणीते ॥७८॥ प्रातः सायमयाचितं पराक इति त्रयश्चतूरात्राः स एष स्त्रीबालवृद्धानां कृच्छ्रः ॥ ९२ ॥ अब्भक्षस्तृतीयः स कृच्छ्रातिकृच्छ्रः ॥ ९४ ॥

बौधायनस्मृति-२ प्रश्न-२ अध्याय ।

दशानां वैकमुद्धरेज्ज्येष्ठः ॥ ६ ॥ सममितरे विभजेरन् ॥ ७ ॥ पितुरनुमत्या दायविभागः सति पितरि ॥ ८ ॥ चतुर्णां वर्णानां गोश्वाजावयो ज्येष्ठांशः ॥ ९ ॥ नानावर्णस्त्रीपुत्रसमवाये दायं दशांशान्कृत्वा चतुरस्त्रीन्द्वावेकमिति यथाक्रमं विभजेरन् ॥ १० ॥ सवर्णा पुत्रानन्तरा पुत्रयो-रनन्तरा पुत्रश्चेद्गुणवान्स ज्येष्ठांशं हरेत् ॥ १२ ॥ गुणवान् हि शेषाणां भर्ता भवति ॥ १३ ॥ सवर्णायां संस्कृतायां स्वयमुत्पादितमौरसं पुत्रं विद्यात् ॥ १४ ॥ अभ्युपगम्य दुहितरि जातं पुत्रिकापुत्रमन्यं दौहित्रम् ॥ १७ ॥ मृतस्य प्रसूतो यः क्लीवव्याधितयोर्वाऽन्येनानुमते स्वक्षेत्रे स क्षेत्रजः ॥ २० ॥ स एष द्विपिता द्विगोत्रश्च द्वयोरपि स्वधारिक्थभाग्भवति ॥ २१ ॥ मातापितृ-भ्यां दत्तोऽन्यतरेण वा योऽपत्यार्थे परिगृह्यते स दत्तः ॥ २४ ॥ सदृशं यं सकामं स्वयं कुर्यात्स कृत्रिमः ॥ २५ ॥ गृहे गूढोत्पन्नोऽन्तेज्ञातो गूढजः ॥ २६ ॥ मातापितृभ्यामुत्सृष्टोऽन्यतरेण वा योऽपत्यार्थे परिगृह्यते सोऽपविद्धः ॥ २७ ॥ असंस्कृतामनतिसृष्टां यामुपयच्छेत्तस्यां यो जातः स कानीनः ॥ २८ ॥ या गर्भिणी संस्क्रियते विज्ञाता वाऽविज्ञाता वा तस्यां यो जातः स सहोढः ॥ २९ ॥ मातापित्रोर्हस्तात्क्रीतोऽन्यतरेण वा योऽपत्यार्थे परिगृह्यते स क्रीतः ॥ ३० ॥ क्लीबं त्यक्त्वा पतितं वा याऽन्यं पतिं विन्देत्तस्यां पुनर्भ्वां यो जातः स पौनर्भवः ॥ ३१ ॥ माता-पितृविहीनो यः स्वयमात्मानं दद्यात्स स्वयंदत्तः ॥ ३२ ॥ द्विजातिप्रवराच्छूद्रायां जातो निषादः ॥ ३३ ॥ कामात्पारशव इति पुत्राः ॥ ३४ ॥

औरसं पुत्रिकापुत्रं क्षेत्रजं दत्तकृत्रिमौ । गूढजं चापविद्धं च रिक्थभाजः प्रचक्षते ॥ ३६ ॥
कानीनं च सहोढं च क्रीतं पौनर्भवं तथा । स्वयंदत्तं निषादं च गोत्रभाजः प्रचक्षते ॥ ३७ ॥
पतितामपि तु मातरं बिभृयादनभिभाषमाणः ॥ ४८ ॥

सोमः शौचं ददौ तासां गन्धर्वः शिक्षितां गिरम् । अग्निश्च सर्वभक्षत्वं तस्मान्निष्कल्मषाः स्त्रियः६४
अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत् । मृतप्रजां पञ्चदशे सद्यस्त्वप्रियवादिनीम् ॥ ६५ ॥
मातुलपितृष्वसा भगिनी भागिनेयी स्नुषा मातुलानी सखी वधूरित्यगम्याः ॥ ७१॥ अगम्यानां गमने कृच्छ्रातिकृच्छ्रौ चान्द्रायणमिति प्रायश्चित्तिः ॥ ७२ ॥

चण्डालीं ब्राह्मणो गत्वा भुक्त्वा च प्रतिगृह्य च । अज्ञानात्पतितो विप्रो ज्ञानात्तु समतां व्रजेत् ७५
पितुर्गुरोर्नरेन्द्रस्य भार्यां गत्वा प्रमादतः । गुरुतल्पी भवेत्तेन पूर्वोक्तस्तस्य निश्चय इति ॥ ७६ ॥
अध्यापनयाजनप्रतिग्रहैरशक्तः क्षत्रधर्मेण जीवेत्प्रत्यनन्तरत्वात् ॥ ७७ ॥
गवार्थे ब्राह्मणार्थे वा वर्णानां वाऽपि सङ्करे । गृह्णीयातां विप्रविशौ शस्त्रं धर्मव्यपेक्षया ॥ ८० ॥

बौधायनस्मृति-२ प्रश्न-३ अध्याय ।

स्रवन्तीष्वनिरुद्धासु त्रयो वर्णा द्विजातयः । प्रातरुत्थाय कुर्वीरन्देवर्षिपितृतर्पणम् ॥ ६ ॥
निरुद्धासु न कुर्वीरन्नंशभाक्तत्र सेतुकृत् । तस्मात्परकृतान्सेतून्कूपांश्च परिवर्जयेत् ॥ ७ ॥
उद्धृत्य वाऽपि त्रीन्पिण्डान्कुर्यादापत्सु नो सदा । निरुद्धासु तु मृत्पिण्डान्कूपात्त्रीनब्घटां स्तथेति ९॥
अथ स्नातकव्रतानि ॥ १३ ॥ सायं प्रातर्यदशनीयं स्यात्तेनान्नेन वैश्वदेवं बलिमुपहृत्य ब्राह्मण-

क्षत्रियविट्शूद्रानभ्यागतानन्यथाशक्ति पूजयेत् ॥ १४ ॥ यदि बहूनां न शक्नुयादेकस्मै गुणवते दद्यात् ॥ १५ ॥ यो वा प्रथममुपगतः स्यात् ॥ १६ ॥ शूद्रश्चेदागतस्तं कर्मणि नियुञ्ज्यात् ॥ १७ ॥ श्रोत्रियाय वाऽग्रं दद्यात् ॥१८॥ ये नित्या भाक्तिकाः स्युस्तेषामनुपरोधेन संविभोगो विहितः ॥ १९ ॥ सुब्राह्मणश्रोत्रियवेदपारगेभ्यो गुर्वर्थनिवेशौषधार्थवृत्तिक्षीणयक्ष्यमाणाध्ययनाध्वसंयोगवैश्वजितेषु द्रव्यसंविभागो यथाशक्ति कार्यो बहिर्वेदिभिक्षमाणेषु कृतान्नमितरेषु ॥२४॥ पालाशमासनं पादुके दन्तधावनमिति वर्जयेत् ॥ ३० ॥ वैणवं दण्डं धारयेत् ॥ ३३ ॥ रुक्मकुण्डले च ॥३४॥ पदा पादस्य प्रक्षालनमधिष्ठानं च वर्जयेत् ॥ ३५॥ न बहिर्मालां धारयेत् ॥ ३६॥ सूर्यमुदयास्तमये न निरीक्षेत ॥ ३७ ॥

अन्ने श्रितानि भूतानि अन्नं प्राणमिति श्रुतिः । तस्मादन्नं प्रदातव्यमन्नं हि परमं हविः ॥ ६८ ॥ हुतेन शाम्यते पापं हुतमन्नेन शाम्यति । अन्नं दक्षिणया शान्तिमुपयातीति नः श्रुतिः ॥ ६९ ॥

बौधायनस्मृति–२ प्रश्न–६ अध्याय ।

अरण्यं गत्वा शिखामुण्डः कौपीनाच्छादनः ॥ २२ ॥ काषायवासाः सन्नमुसले व्यङ्गारे निवृत्तशरावसंपाते भिक्षेत ॥ २४ ॥

बौधायनस्मृति–२ प्रश्न–७ अध्याय ।

अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः । द्वात्रिंशतं गृहस्थस्यापरिमितं ब्रह्मचारिणः ॥ ३१ ॥
आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः । अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नताम्ििति ॥३२॥
गृहस्थो ब्रह्मचारी वा योऽनश्नंस्तु तपश्चरेत् । प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः ॥ ३३ ॥
अन्यत्र प्रायश्चित्तात्प्रायश्चित्ते तदेव विधानम् ॥ ३४ ॥ अथाप्युदाहरन्ति ॥ ३५ ॥
अन्तरा प्रातराशं च सायमाशं तथैव च । सदोपवासी भवति यो न भुङ्क्ते कदाचन ॥ ३६ ॥
प्राणाग्निहोत्रमन्त्रांस्तु निरुद्धे भोजने जपेत् । त्रेताग्निहोत्रमन्त्रांस्तु द्रव्यालाभे यथा जपेत् ॥ ३७ ॥

बौधायनस्मृति–२ प्रश्न–८ अध्याय ।

द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा । भोजयेत्सुसमृद्धोऽपि न प्रसज्येत विस्तरे ॥ २९ ॥
सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदम् । पञ्चैतान्विस्तरो हन्ति तस्मात्तं परिवर्जयेत् ॥ ३० ॥

बौधायनस्मृति–२ प्रश्न–९ अध्याय ।

पुत्रेण लोकाञ्जयति पौत्रेणाऽऽनन्त्यमश्नुते । अथ पुत्रस्य पौत्रेण नाकमेवाधिरोहतीति ॥ ७ ॥

बौधायनस्मृति–२ प्रश्न–१० अध्याय ।

अथातः संन्यासविधिं व्याख्यास्यामः ॥ १ ॥ सोऽत एव ब्रह्मचर्यवान् प्रव्रजतीत्येकेषाम् ॥ २ ॥
अथ शालीनयायावराणामनपत्यानाम् ॥ ३ ॥ विधुरो वा प्रजाः स्वधर्मे प्रतिष्ठाप्य वा ॥ ४ ॥
सप्तत्या ऊर्ध्वं संन्याससमुपदिशन्ति ॥ ५ ॥ वानप्रस्थस्य वा कर्म विरामे ॥ ६ ॥

अथ भैक्षचर्या ॥ ५७ ॥ ब्राह्मणानां शालीनयायावराणामप्रवृत्ते वैश्वदेवे भिक्षां लिप्सेत भवत्पूर्वां प्रचोदयेत् ॥ ५८ ॥ गोदोहमात्रमाकांक्षेत ॥ ५९ ॥ अथ भैक्षचर्यादुपावृत्य शुचौ देशे न्यस्य हस्ते पादान्प्रक्षाल्याऽऽदित्यस्याग्रं निवेदयेत् ॥ ६० ॥ उद्धुत्यं चित्रमिति ब्रह्मणे निवेदयते ब्रह्मजज्ञानमिति विज्ञायते ॥ ६१ ॥ आधानप्रभृतियजमान एवाग्नयो भवन्ति तस्य प्राणो गार्हपत्योऽपानोऽन्वाहार्यपचनो व्यान आहवनीय उदानसमानौ सभ्यावसथ्यौ पञ्च वा एतेग्नय आत्मस्था आत्मन्येव जुहोति स एष आत्मयज्ञ आत्मनिष्ठ आत्मप्रतिष्ठ आत्मानं क्षेमं नयतीति विज्ञायते ॥६२॥ भूतेभ्यो दयापूर्वं संविभज्य शेषमद्भिः संस्पृश्यौषधवत्प्राश्नीयात् ॥ ६३ ॥ प्राश्याप आचम्य ज्योतिष्मत्याऽऽदित्यमुपतिष्ठते–उद्वयं तमसस्परीति ॥ ३४ ॥ वाङ्म आसन्नसोः प्राण इति जपित्वा ॥ ६५ ॥

अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया । आहारमात्रं भुञ्जीत केवलं प्राणयात्रिकम् ॥ ६६ ॥
अथाप्युदाहरन्ति ॥ ६७ ॥
अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः । द्वात्रिंशतं गृहस्थस्यापरिमितं ब्रह्मचारिणः ॥ ६८ ॥
भैक्षं वा सर्ववर्णेभ्य एकान्नं वा द्विजातिषु । अपि वा सर्ववर्णेभ्यो न चैकान्नं द्विजातिष्विति ॥६९॥

बौधायनस्मृति-३ प्रश्न-५ अध्याय ।

अथातः पवित्रातिपवित्रस्याघमर्षणस्य कल्पं व्याख्यास्यामः ॥ १॥ तीर्थं गत्वा स्नातः शुचिवासा उदकान्ते स्थण्डिलमुद्धृत्य सकृत्क्लिन्नेन वाससा सकृत्पूर्णेन पाणिनाऽऽदित्याभिमुखोऽघमर्षणं स्वाध्यायमधीयीत ॥ २ ॥ प्रातः शतं मध्याह्ने शतमपराह्णे शतमपरिमितं वा ॥ ३ ॥ उदितेषु नक्षत्रेषु प्रसृतयावकं प्राश्नीयात् ॥ ४ ॥ ज्ञानकृतेभ्योऽज्ञानकृतेभ्यश्चोपपातकेभ्यः सप्तरात्रात्प्रमुच्यते ॥ ५ ॥ द्वादशरात्राद्भ्रूणहननं गुरुतल्पगमनं सुवर्णस्तैन्यं सुरापानमिति च वर्जयित्वैकविंशतिरात्रात्तान्यपि तरति तान्यपि जयति ॥ ६ ॥

बौधायनस्मृति-३ प्रश्न-६ अध्याय ।

अपि वा गोनिष्क्रान्तानां यवानामेकविंशतिरात्रं पीत्वा गणान्पश्यति ॥ १६९ ॥
गणाधिपतिं पश्यति विद्यां पश्यति विद्याधिपतिं पश्यतीत्याह भगवान्बौधायनः ॥ २१ ॥

बौधायनस्मृति-३ प्रश्न ८ अध्याय ।

प्रथमायामपरपक्षस्य चतुर्दशग्रासान् ॥ २६ ॥ एवमेकापचयेनाऽमावास्यायाः ॥ २७ ॥ अमावास्यायां ग्रासो न विद्यते ॥ २८ ॥ प्रथमायां पूर्वपक्षस्यैको द्वौ द्वितीयस्याम् ॥ २९ ॥ एवमेकोपचये वाऽऽपौर्णमास्याः ॥ ३० ॥ पौर्णमास्यां स्थालीपाकस्य जुहोत्यग्नये या तिथिः स्यान्नक्षत्रेभ्यश्च स दैवतेभ्यः ॥ ३१ ॥ पुरस्ताच्छ्रोणाया अभिजितः स दैवतस्य हुत्वा गां ब्राह्मणेभ्यो दद्यात् ॥ ३२ ॥ तदेतच्चान्द्रायणं पिपीलिकामध्यं विपरीतं यवमध्यम् ॥ ३३ ॥

बौधायनस्मृति-४ प्रश्न-१ अध्याय ।

त्रीणि वर्षाण्यृतुमती कांक्षेत पितृशासनम् । ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम् ॥
अविद्यमाने सदृशे गुणहीनमपि श्रयेत् ॥ ॥ १५ ॥
बलाच्चेत्प्रहृता कन्या मन्त्रैर्यदि न संस्कृता । अन्यस्मै विधिवद्देया यथा कन्या तथैव सा ॥ १६ ॥
निसृष्टायां हुते वाऽपि यस्यै भर्ता म्रियेत सः । स चेदक्षतयोनिः स्याद्गतप्रत्यागता सती ॥ १७॥
पौनर्भवेन विधिना पुनः संस्कारमर्हति ॥ १८॥
सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥ ३० ॥

बौधायनस्मृति-४ प्रश्न-५अध्याय ।

प्राजापत्यो भवेत्कृच्छ्रो दिवा रात्रावयाचितम् । क्रमशो वायुभक्षश्च द्वादशाहं त्र्यहं त्र्यहम् ॥ ६ ॥
एकैकं ग्रासमश्नीयात्पूर्वोक्तेन त्र्यहं त्र्यहम् । वायुभक्षस्त्र्यहं चान्यदतिकृच्छ्रः स उच्यते ॥ ८ ॥
त्र्यहं त्र्यहं पिबेदुष्णं पयः सर्पिः कुशोदकम् । वायुभक्षस्त्र्यहं चान्यत्तप्तकृच्छ्रः स उच्यते ॥ १० ॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । एकरात्रोपवासश्च कृच्छ्रः सान्तपनः स्मृतः ॥ ११॥
यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् । पराको नाम कृच्छ्रोऽयं सर्वपापप्रणाशनः ॥ १६ ॥
गोमूत्रादिभिरभ्यस्तमेकैकं तन्त्रिसप्तकम् । महासान्तपनं कृच्छ्रं वदन्ति ब्रह्मवादिनः ॥ २१ ॥
चतुरः प्रातरश्नीयात्पिण्डान्विप्रः समाहितः । चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं चरेत् ॥ १९ ॥
अष्टावष्टौ मासमेकं पिण्डान्मध्यंदिने स्थिते । नियतात्मा हविष्यस्य व्रतं चान्द्रायणं चरेत् ॥२० ॥
यथाकथंचित्पिण्डानां द्विजस्तिस्रस्त्वशीतयः । मासेनाश्नन्हविष्यस्य चन्द्रस्यैति सलोकताम् ॥२१॥
कणपिण्याकतक्राणि यवाचामोऽनिलाशनः । एकत्रिपञ्चसप्तेति पापघ्नोऽयं तुलापुमान् ॥ २३ ॥

(२६,) नारदस्मृति-१ विवादपद १ अध्याय ।

स चतुष्पाच्चतुःस्थानश्चतुःसाधन एव च । चतुर्हितश्चतुर्व्यापी चतुष्कारी च कीर्त्यते ॥ ९ ॥
अष्टांगोष्टादशपदः शतशाखस्तथैव च । त्रियोनिर्द्व्यभियोगश्च द्विद्वारो द्विगतिस्तथा ॥ १० ॥
धर्मश्च व्यवहारश्च चरित्रं राजशासनम् । चतुष्पाद्व्यवहारोयमुत्तरः पूर्वबाधकः ॥ ११ ॥
तत्र सभ्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु । चरित्रं पुस्तकरणे राजाज्ञायां तु शासनम् ॥ १२ ॥
सामाद्युपायसाध्यत्वाच्चतुःसाधन उच्यते । चतुर्णामाश्रमाणां च रक्षणात्स चतुर्हितः ॥ १३ ॥
कर्तॄनथो साक्षिणश्च सभ्यान् राजानमेव च । व्याप्नोति पादशो यस्माच्चतुर्व्यापी ततः स्मृतः॥१४॥

धर्मस्यार्थस्य यशसो लोकप्रीतेस्तथैव च । चतुर्णां करणादेषां चतुष्कारी प्रकीर्त्यते ॥ १५ ॥
राजसपुरुषः सभ्याः शास्त्रं गणकलेखकौ । हिरण्यमग्निरुदकमष्टाङ्गः स उदाहृतः ॥ १६ ॥
ऋणादानं ह्युपनिधिः संभूयोत्थानमेव च । दत्तस्य पुनरादानमशुश्रूषाभ्युपेत्य च ॥ १७ ॥
वेतनस्यानपाकर्म तथैवास्वामिविक्रयः । विक्रीयासंप्रदानं च क्रीत्वानुशय एव च ॥ १८ ॥
समयस्यानपाकर्म विवादः क्षेत्रजस्तथा । स्त्रीपुंसयोश्च सम्बन्धो दायभागोऽथ साहसम् ॥ १९ ॥
वाक्पारुष्यं तथैवोक्तं दण्डपारुष्यमेव च । द्यूतं प्रकीर्णकं चैवेत्यष्टादशपदः स्मृतः ॥ २० ॥
तेषामेव प्रभेदोऽन्यः शतमष्टोत्तरं स्मृतम् । क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते ॥ २१ ॥
कामात्क्रोधाच्च लोभाच्च त्रिभ्यो यः संप्रवर्त्तते । त्रियोनिः कीर्त्यते तेन त्रयमेतद्विवादकृत् ॥ २२ ॥
ह्यभियोगस्तु विज्ञेयः शंका तत्त्वाभिदर्शनात् । शंका सदा असत्सङ्गात्तत्वं होढाभिदर्शनात् ॥ २३ ॥
पक्षद्वयाभिसम्बन्धाद्द्विद्वारः समुदाहृतः । पूर्ववादस्तयोः पक्षः प्रतिपक्षस्तदुत्तरम् ॥ २४ ॥
भूतच्छलानुसारित्वाद्द्विगतिः समुदाहृतः । भूतं तत्त्वार्थसंयुक्तं प्रमादाभिहितं छलम् ॥ २६ ॥
धर्मशास्त्रार्थशास्त्राभ्यामविरोधेन मार्गतः । समीक्षमाणो निपुणं व्यवहारगतिं नयेत् ॥ ३४ ॥
यत्र विप्रतिपत्तिः स्याद्धर्मशास्त्रार्थशास्त्रयोः । अर्थशास्त्रोक्तमुत्सृज्य धर्मशास्त्रोक्तमाचरेत् ॥ ३९ ॥
वक्तव्येऽर्थे ह्यतिष्ठन्तमुत्क्रामन्तं च तद्वचः । आसेधयेद्विवादार्थी यावदाह्वानदर्शनम् ॥ ४५ ॥
स्थानासेधः कालकृतः प्रवासात्कर्मणस्तथा । चतुर्विधः स्यादासेधो नासिद्धस्तं विलंघयेत् ॥ ४६ ॥

नारदस्मृति–१ विवादपद–२ अध्याय ।

व्यवहारेषु सर्वेषु नियोक्तव्या बहुश्रुताः । गुणवत्यपि नैकस्मिन्विश्वसेद्धि विचक्षणः ॥ ३ ॥
दश वा वेदशास्त्रज्ञास्त्रयो वा वेदपारगाः । यद्ब्रूयुः कार्यमुत्पन्नं स धर्माधर्मसाधनः ॥ ४ ॥
तत्प्रतिष्ठः स्मृतो धर्मो धर्ममूलश्च पार्थिवः । सह सद्भिरतो राजा व्यवहारान्विशोधयेत् ॥ ९ ॥
धर्मो विद्धो ह्यधर्मेण सभां यत्रोपतिष्ठते । न चेद्विशल्यः क्रियते विद्धास्तत्र सभासदः ॥ १६ ॥
सभायां न प्रवेष्टव्यं वक्तव्यं वा समंजसम् । अब्रुवन्विब्रुवन्वापि नरो भवति किल्विषी ॥ १७ ॥
पादोऽधर्मस्य कर्त्तारं पादः साक्षिणमृच्छति । पादः सभासदः सर्वान् पादो राजानमृच्छति ॥१९॥

नारदस्मृति–१ विवादपद–३ अध्याय ।

ऋणं देयमदेयं च येन यत्र यथा च यत् । दानग्रहणधर्माश्च ऋणादानमिति स्मृतम् ॥ १ ॥
वैशेषिकं धनं ज्ञेयं वैश्यस्यापि त्रिलक्षणम् ॥ ५६ ॥
कृषिगोरक्षवाणिज्यैः शूद्रस्यैभ्यस्त्वनुग्रहात् ॥ ५७ ॥
विपर्ययादधर्म्यं स्यान्न चेदापद्गरीयसी । आपत्स्वनन्तरा वृत्तिर्ब्राह्मणस्य विधीयते ॥ ५८ ॥
वैश्यवृत्तिस्ततश्चोक्ता न जघन्या कथंचन । न कथंचन कुर्वीत ब्राह्मणः कर्म वार्षलम् ॥ ५९ ॥
वृषलः कर्म वा ब्राह्मं पतनीये हि ते तयोः । उत्कृष्टं वापकृष्टं वा तयोः कर्म न विद्यते ॥ ६० ॥
मध्यमे कर्मणी हित्वा सर्वधारणे हिते । आपदं ब्राह्मणस्तीर्त्वा क्षत्रवृत्त्यर्जितैर्धनैः ॥ ६१ ॥
उत्सृजेत्क्षत्रवृत्तिं तां कृत्वा पावनमात्मनः । तस्यामेव तु यो मोहाद्ब्राह्मणो रमते सदा ॥ ६२ ॥
कांडपृष्ठश्च्युतो मार्गादपांक्तेयः प्रकीर्तितः । वैश्यवृत्त्या त्वविक्रेयं ब्राह्मणस्य पयो दधि ॥ ६३ ॥

नारदस्मृति–१ विवादपद–४ अध्याय ।

लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम् । धनस्वीकरणं येन धनी धनमवाप्नुयात् ॥ २ ॥
यत्किंचिद्दशवर्षाणि संनिधौ प्रेक्षते धनी । भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥ ७ ॥
अजडश्चेदपोगण्डो विषये चास्य भुज्यते । भग्नं तद्व्यवहारेण भोक्ता तद्धनमर्हति ॥ ९ ॥
आधिः सीमा बालधनं निक्षेपोपनिधिः स्त्रियः । राजस्वं श्रोत्रियद्रव्यं नोपभोगेन जीर्यते ॥ १० ॥
प्रत्यक्षपरिभोगाच्च स्वामिनो द्विदशाः समाः । आध्यादीनपि जीर्यंते स्त्रीनरेन्द्रधनादृते ॥ ११ ॥
क्रियार्थादिषु सर्वेषु बलवत्युत्तरोत्तरा । प्रतिग्रहादिक्रीतेषु पूर्वा पूर्वा बलीयसी ॥ २७ ॥
कालिका कायिका चैव कारिता च तथा परा । चक्रवृद्धिश्च शास्त्रेषु तस्य वृद्धिश्चतुर्विधा ॥ २९ ॥
कायाविरोधिनी शश्वत्पणपादादिकायिका । प्रतिमासं स्रवन्ती या वृद्धिः सा कालिका स्मृता ३०॥
वृद्धिः सा कारिता नामाऽधमर्णेन स्वयं कृता । भिन्देदर्थपरीमाणं कालेनेहर्णिकस्य यत् ॥ ३१ ॥

वृद्धैरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता । ऋणानां सार्वभौमोयं विधिवृद्धिकरः स्मृतः ॥ ३२ ॥
देशाचारविधिस्त्वन्यो यत्रर्णमवतिष्ठते । हिरण्यवस्त्रधान्यानां वृद्धिर्द्वित्रिचतुर्गुणा ॥ ३३ ॥
रसस्याष्टगुणा वृद्धिः स्त्रीपशूनां च सन्ततिः । सूत्रकार्पासकिण्वानां त्रपुणः सीसकस्य च ॥ ३४ ॥
आयुधानां च सर्वेषां चर्मणस्ताम्रलोहयोः । अन्येषां चैव सर्वेषामिष्टकानां तथैव च ॥ ३५ ॥
अक्षय्या वृद्धिरेतेषां मनुराह प्रजापतिः । तैलानां चैव सर्वेषां मद्यानां मधुसर्पिषाम् ॥ ३६ ॥
वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य च । न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित् ॥ ३७ ॥
अनाकारितमप्यूर्ध्वं वत्सरार्द्धाद्विवर्द्धते । एष वृद्धिविधिः प्रोक्तः प्रीतिदत्तस्य धर्मतः ॥ ३८ ॥
वृद्धिस्तु योक्ता धान्यानां वार्धुषं तदुदाहृतम् । आपदं निस्तरेद्वैश्यः कामं वार्धुषि कर्मणा ॥ ३९ ॥
आपत्स्वपि हि कष्टासु ब्राह्मणः स्यान्न वार्धुषी । ब्राह्मणस्य तु यद्देयं सान्वयस्य न चास्ति सः॥४०॥
धनिकस्यैव वर्धेत तदृणं यत्र लेखितम् । विश्रम्भहेतू द्वावत्र प्रतिभूराधिरेव च ॥ ४५ ॥
लिखितं साक्षिणश्चेति प्रमाणं व्यक्तिकारके । उपस्थानाय दानाय प्रत्ययाय तथैव च ॥ ४६ ॥
त्रिविधः प्रतिभूर्दृष्टस्त्रिष्वेवार्थेषु सूरिभिः । निःक्षेपः प्रातिभाव्यं च ऋणशेषश्च यो भवेत् ॥ ४७ ॥
अर्थे विशेषिते ह्येषु धनिनश्छन्दतः क्रिया । यमर्थं प्रतिभूर्दद्याद्धनिकेनोपपीडितः ॥ ५१ ॥
ऋणिकस्तत्प्रतिभुवे द्विगुणं प्रतिदापयेत् । अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः ॥ ५२ ॥
कृतकालोपनेयश्च यावद्देयोद्यतस्तथा । स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च ॥ ५३ ॥
उपचारस्तथैवास्य लाभहानिर्विपर्यये । प्रमादाद्धनिनस्तद्वदाधौ विकृतिमागते ॥ ५४ ॥
विनष्टे मूलनाशः स्याद्दैवराजभयादृते । रक्ष्यमाणोपि यत्राधिः कालेनेयादसारताम् ॥ ५५ ॥
आधिरन्योथवा कार्यो देयं वा धनिने धनम् । बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चावलेखितम् ॥ ५६ ॥
तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरम् । मत्ताभियुक्तस्त्रीबालबलात्कारकृत च यत् ॥ ६२ ॥
तदप्रमाणं लिखितं भीतोपाधिकृतं तथा । मृताः स्युः साक्षिणो यत्र धनिकर्णिकलेखकाः ॥ ६३ ॥
प्रमाणमेव लिखितं मृता यद्यपि साक्षिणः । आधिस्तु द्विविधः प्रोक्तो जंगमः स्थावरस्तथा ॥६५॥
सिद्धिरत्रोभयस्यास्य भोगो यद्यस्ति नान्यथा । दर्शितं प्रतिकालं यच्छ्रावितं स्मारितं तथा ॥ ६६ ॥
न लेख्यं सिद्धिमाप्नोति जीवत्स्वपि हि साक्षिषु । लेखे देशान्तरन्यस्ते दग्धे दुर्लिखिते हृते ॥ ६८ ॥
सतस्तत्कालकरणमसतो दृष्टिदर्शनम् । यस्मिन्स्यात्संशयो लेख्ये भूताभूतकृते क्वचित् ॥ ६९ ॥
तत्स्वहस्तक्रियाचिह्नयुक्तिप्राप्तिभिरुद्धरेत् । लेख्यं यच्चान्यनामाङ्कं हेत्वन्तरकृतं भवेत् ॥ ७० ॥

नारदस्मृति-१ विवादपद-५ अध्याय ।

एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः । कृतः पञ्चविधस्तेषां षड्विधोऽकृत उच्यते ॥ ३ ॥
लिखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च । गूढश्चोत्तरसाक्षी च साक्षी पञ्चविधः कृतः ॥ ४ ॥
अकृतः षड्विधस्तेषां सूरिभिः परिकीर्तितः । त्रयः पुनरनिर्दिष्टाः साक्षिणः समुदाहृताः ॥ ५ ॥
ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम् । कार्येष्वभ्यन्तरो यः स्यादर्थिनां प्रहितश्च यः ॥ ६ ॥
कुल्याः कुलविवादेषु भवेयुस्तेपि साक्षिणः । कुलीना ऋजवः शुद्धा जन्मतः कर्मतोर्थतः ॥ ७ ॥
तच्छ्रोतारः प्रमाणं तु प्रमाणं ह्युत्तरक्रिया । सुचिरेणापि कालेन लिखितं सिद्धिमाप्नुयात् ॥ २४ ॥
आत्मनैव लिखेज्जानन्नजानंस्तु न लेखयेत् । आष्टमाद्वत्सरात्सिद्धिः स्मारितस्येह साक्षिणः ॥२५॥
आपञ्चमात्तथा सिद्धिर्यदृच्छोपगतस्य च । आतृतीयात्तथा वर्षात्सिद्धिर्गूढस्य साक्षिणः ॥ २६ ॥
आसंवत्सरतः सिद्धिंवदन्त्युत्तरसाक्षिणः । अथवा कालनियमो न दृष्टः साक्षिणं प्रति ॥ २७ ॥
स्मृत्यपेक्षं हि साक्षित्वमाहुः शास्त्रविदो जनाः । यस्य नोपहता बुद्धिः स्मृतिः श्रोत्रं च नित्यशः ॥
सुदीर्घेणापि कालेन स साक्षी साक्ष्यमर्हति । असाक्षिप्रत्ययास्त्वन्ये षड्विवादाः प्रकीर्तिताः ॥२९ ॥
अज्ञानाद्बालभावाच्च साक्षी यद्यनृतं वदेत् । लोभात्साहसं दण्ड्यस्तु मोहात्पूर्वं तु साहसम् ॥ ९६ ॥
भयाद्द्वे(द्वौ)मध्यमौ दण्डौ मैत्र्यात्पूर्वं चतुर्गुणम् । कामाद्दशगुणं प्रोक्तं क्रोधात्तु त्रिगुणं परम्॥९७॥
तत्साम्ये शुचयो ग्राह्यास्तत्साम्ये शुचिमत्तराः । शुद्धिमत्साक्षिसाम्यं तु विवादे यत्र दृश्यते ॥ ९३॥
तदप्ययुक्तं विज्ञेयमेष साक्ष्यविधिः स्मृतः । प्रमादाद्धनिनो यत्र न स्याल्लेख्यं न साक्षिणः ॥ ९८ ॥
अर्थं चाऽपह्नुते वादी तत्रोक्तस्त्रिविधो विधिः । चोदना प्रतिकालं च युक्तिलेशस्तथैव च ॥ ९९ ॥
तृतीयः शपथः प्रोक्तस्तैरेनं साधयेत्क्रमात् । अभीक्ष्णं चोद्यमानो यः प्रतिहन्यान्न तद्वचः ॥ १००॥

नारदस्मृति—२ विवादपद ।

स्वद्रव्यं यत्र विश्रम्भान्निक्षिपत्यविशङ्कितः । निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः ॥ १ ॥
अन्यद्द्रव्यव्यवहितं द्रव्यमव्याहृतं च यत् । निक्षिप्यते परगृहे तदौपनिधिकं स्मृतम् ॥ २ ॥
स पुनर्द्विविधः प्रोक्तः साक्षिमानितरस्तथा । प्रतिदानं तथैवास्य प्रत्ययः स्याद्विपर्यये ॥ ३ ॥
यं चार्थं साधयेत्तेन निक्षेप्तुरननुज्ञया । तत्रापि दंड्यः स भवेत्तं च सोदयमावहेत् ॥ ५ ॥
ग्रहीतुः सह योऽर्थेन नष्टो नष्टः स दायिनः । दैवराजकृते तद्वच्चेत्तज्जिह्मकारितम् ॥ ७ ॥
एष एव विधिर्दृष्टो याचितान्वाहितेषु च । शिल्पिषूपनिधौ न्यासे प्रतिन्यासे तथैव च ॥ ८ ॥

नारदस्मृति—३ विवादपद ।

वणिक्प्रभृतयो यत्र कर्म सम्भूय कुर्वते । तत्संभूय समुत्थानं विवादपदमुच्यते ॥ १ ॥
प्रमादान्नाशितं दाप्यः प्रतिषिद्धकृतं च यत् । अनिर्दिष्टं च यः कुर्यात्सर्वैः संभूयकारिभिः ॥ ५ ॥
दैवतस्कारराजभ्यो व्यसने समुपस्थिते । यस्तत्स्वशक्त्या रक्षेत्तु तस्यांशो दशमः स्मृतः ॥ ६ ॥
ऋत्विग्याज्यमदुष्टं यं त्यजेदनपकारिणम् । अदुष्टं चर्त्विजं याज्यो विनेयौ तावुभावपि ॥ ९ ॥
ऋत्विक्तु त्रिविधो दृष्टः पूर्वजुष्टः स्वयं कृतः । यदृच्छया तु यः कुर्यादार्त्विज्यं प्रीतिपूर्वकम् ॥ १० ॥
क्रमागतेष्वेष धर्मो वृतेष्वृत्विक्षु च स्वयम् । याहच्छिके तु संयाज्ये तत्यागे नास्ति किल्बिषम् ११

नारदस्मृति—४ विवादपद ।

अन्वाहितं याचितकमाधिः साधारणं च यत् । निक्षेपः पुत्रदाराश्च सर्वस्वं चान्वये सति ॥ ४ ॥
कुटुम्बभरणाद्द्रव्यं यत्किंचिदतिरिच्यते । तद्देयमुपहन्त्याद्यद्दत्तं नाप्नुयात् ॥ ६ ॥

नारदस्मृति—५ विवादपद ।

शुभकर्मकरास्त्वेते चत्वारः समुदाहृताः । जघन्यकर्मभाजस्तु शेषदासास्त्रिपञ्चकाः ॥ २३ ॥

नारदस्मृति—६ विवादपद ।

भृतावनिश्चितायां तु दशभागं समाप्नुयुः । लाभगोबीजसस्यानां वणिग्गोपकृषीवलाः ॥ ३ ॥
कर्माकुर्वन् प्रतिश्रुत्य कार्यो दत्त्वा भृतिं बलात् । भृतिं गृहीत्वाकुर्वाणो द्विगुणो भृतिमावहेत् ॥५ ॥
कर्मारम्भन्तु यः कृत्वा सिद्धिं नैव तु कारयेत् । बलात्कारयितव्यः स्यादकुर्वन्दण्डमर्हति ॥ ६ ॥
अदत्त्वाकारयित्वा तु दंड्यान्याधिकं च न । दाप्यो भृतिश्चतुर्भागं सप्तमर्धपथे त्यजन् ॥ ७ ॥
अनयन्वाहकोऽप्येवं भृतिहानिमवाप्नुयात् । द्विगुणां तु भृतिं दाप्यः प्रस्थाने विघ्नमाचरन् ॥ ८ ॥
भाण्डं व्यसनमागच्छेद्यदि वाहकदोषतः । स दाप्यो यत्प्रनष्टं स्याद्दैवराजकृताद्दृते ॥ ९ ॥
गवां शताद्वत्सतरी धेनुः स्याद्द्विशताद्भृतिः । प्रतिसंवत्सरं गोपे सन्दोहश्चाष्टमेऽहनि ॥ १० ॥
नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतम् । हीनं पुरुषकारेण पालायैव निपातयेत् ॥ १४ ॥

नारदस्मृति—७ विवादपद ।

निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य वा ॥ विक्रीयते समक्षं यद्विज्ञेयोऽस्वामिविक्रयः ॥ १ ॥
अस्वाम्यनुमताद्दासादसतश्च जनाद्रहः । हीनमूल्यमवेलायां क्रीतस्तद्दोषभाग्भवेत् ॥ ३ ॥

नारदस्मृति—८ विवादपद ।

विक्रीय पण्यं मूल्येन क्रेत्रे यन्न प्रदीयते । विक्रीयासंप्रदानं तद्विवादपदमुच्यते ॥ १॥

नारदस्मृति—९ विवादपद ।

क्रीत्वा मूल्येन यत्पण्यं क्रेता न बहु मन्यते । क्रीतानुशय इत्येतद्विवादपदमुच्यते ॥ १ ॥
क्रीत्वा मूल्येन यत्पण्यं दुष्क्रीतं मन्यते क्रयी । विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यविक्षतम् ॥ २ ॥
द्वितीयेऽह्नि ददत्क्रेता मूल्यात्त्रिंशांशमावहेत् । द्विगुणं तु तृतीयेऽह्नि परतः क्रेतुरेव तत् ॥ ३ ॥
क्रेता पण्यं परीक्षेत प्राक्स्वयं गुणदोषतः । परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत्पुनः ॥ ४ ॥
त्र्यहाद्दोह्यं परीक्ष्येत पञ्चाहाद्वाह्यमेव तु । मणिमुक्ताप्रवालानां सप्ताहात्स्यात्परीक्षणम् ॥ ५ ॥
द्विपदामर्धमासात्स्यात्पुंसां तद्द्विगुणात्स्त्रियाः । दशाहात्सर्वबीजानामेकाहाल्लोहवाससाम् ॥ ६ ॥

नारदस्मृति-१० विवादपद ।

पाखण्डिनैगमादीनां स्थितिः समय उच्यते । समयस्यानपाकर्म तद्विवादपदं स्मृतम् ॥ १ ॥
पाखण्डिनैगमश्रेणीपूगव्रातगणादिषु । संरक्षेत्समयं राजा दुर्गे जनपदे तथा ॥ २ ॥

नारदस्मृति-११ विवादपद ।

क्षेत्रसीमाविवादेषु सामन्तेभ्यो विनिश्चयः । नगरग्रामगुणिनो ये च वृद्धतमा नराः ॥ २ ॥
ग्रामसीमासु च बहिर्ये स्युस्तत्कृषिजीविनः । गोपशाकुनिकव्याधा ये चान्ये वनजीविनः ॥ ३ ॥
समुन्नयेयुस्ते सीमां लक्षणैरुपलक्षिताम् । तुषाङ्गारकपालैश्च कूपैरायतनैर्द्रुमैः ॥ ४ ॥
अभिज्ञातैश्च वल्मीकस्थलनिम्नोन्नतादिभिः । केदारारामगार्गैश्च पुराणैः सेतुभिस्तथा ॥ ५ ॥
अथ चेदनृतं ब्रूयुः सामन्तास्तद्विनिश्चये । सर्वे पृथक्पृथग् दण्ड्या राज्ञा मध्यमसाहसम् ॥ ७ ॥
नैकः समुन्नयेत्सीमां नरः प्रत्ययवानपि । गुरुत्वादस्य धर्मस्य क्रियैषा बहुषु स्थिता ॥ ९ ॥
एकश्चेदुन्नयेत्सीमां सोपवासः समाहितः । रक्तमाल्याम्बरधरः क्षितिमारोप्य मूर्द्धनि ॥ १० ॥
यदा च न स्युर्ज्ञातारः सीमायां च न लक्षणम् । तदा राजा द्वयोः सीमामुन्नयेदिष्टतः स्वयम्॥११॥
उत्क्रम्य यत्र तु वृतिं सस्यघातो गवादिभिः । पालः शास्यो भवेत्तत्र न चेच्छक्त्या निवारयेत्॥२८॥
समूलसस्यघाते तु तत्स्वामी सममाप्नुयात् । वधेन पालो मुच्येत दण्डं स्वामिनि पातयेत् ॥ २९ ॥
गौः प्रसूता दशाहं च महोक्षो वाजिकुञ्जरौ । निवार्याः स्युः प्रयत्नेन तेषां स्वामी न दण्डभाक्॥३०॥
माषं गां दापयेद्दण्डं द्वौ माषौ महिषीं तथा । अजाविके सवत्से तु दण्डः स्यादर्द्धमाषकः ॥ ३१॥
अदण्ड्या हस्तिनोऽश्वाश्च प्रजापाला हि ते मताः।अदण्ड्यागन्तुकी गौश्च सूतिका वाभिसारिणी३२
या नष्टाः पालदोषेण गावः क्षेत्रं पराप्नुयुः । न तत्र गोमिनां दण्डः पालस्तं दण्डमर्हति ॥ ३९ ॥
एवं हि विनयः प्रोक्तो गोपैः सस्यार्द्धपातनात् । ग्रामोपान्ते च यत्क्षेत्रं विवीतान्ते महापथे ॥ ४० ॥
अनावृते चेत्तन्नाशे न पालस्य व्यतिक्रमः । पथि क्षेत्रे वृतिः कार्या यामुष्ट्रो नावलोकयेत् ॥ ४१ ॥
नालंघयेत्पशुर्वाश्वो न भिन्द्याद्यां च शूकरः । गृहक्षेत्रे च द्वे द्वे वासहेतू कुटुम्बिनाम् ॥ ४२ ॥

नारदस्मृति-१२ विवादपद ।

आसप्तमात्पञ्चमाद्वा बन्धुभ्यः पितृमातृतः । अविवाह्याः सगोत्राः स्युः समानप्रवरास्तथा ॥ ७ ॥
परीक्ष्यः पुरुषः पुंस्त्वे निजैरेवाङ्गलक्षणैः । पुमांश्चेदविकल्पेन स कन्यां लब्धुमर्हति ॥ ८ ॥
रेत उत्प्लवते नाप्सु ह्लादि मूत्रं च फेनिलम् । पुमान्स्याल्लक्षणैरेतैर्विपरीतैस्तु षण्ढकः ॥ १० ॥
अपत्यार्थं स्त्रियः सृष्टाः स्त्रीक्षेत्रं बीजिनो नराः । क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हति ॥ १९ ॥
पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः । पितामहो मातुलश्च सकुल्या बान्धवास्तथा ॥२०॥
माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते । तस्यामप्रकृतिस्थायां दद्युः कन्यां सनाभयः ॥ २१ ॥
सकृदंशो निपतति सकृत्कन्या प्रदीयते । सकृदाह ददानीति त्रीण्येतानि सतां सकृत् ॥ २८ ॥
ब्राह्मादिषु विवाहेषु पञ्चस्वेषु विधिः स्मृतः । गुणापेक्षं भवेद्दानमासुरादिषु च त्रिषु ॥ २९ ॥
कन्यायां दत्तशुल्कायां ज्यायांश्चेद्वर आव्रजेत् । धर्मार्थकामसंयुक्तं वाच्यं तत्रानृतं भवेत् ॥ ३० ॥
नादुष्टां दूषयेत्कन्यां नादुष्टं दूषयेद्वरम् । यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ॥ ३१ ॥
अदुष्टश्चेद्वरो राज्ञा स दण्डस्तत्र चौरवत् । यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ॥ ३३ ॥
तस्य कुर्यान्नृपो दण्डं पूर्वसाहसचोदितम् । अकन्येति तु यः कन्यां ब्रूयाद्द्वेषेण मानवः ॥ ३४ ॥
राक्षसोऽनवरस्तस्मात्पैशाचस्त्वष्टमः स्मृतः । सत्कृत्याहूय कन्यां तु दद्याद्ब्राह्मे त्वलंकृताम् ॥ ४० ॥
सह धर्मं चरेत्युक्त्वा प्राजापत्यो विधिः स्मृतः । वस्त्रगोमिथुनाभ्यां तु विवाहस्त्वार्ष उच्यते ॥४१॥
अन्तर्वेद्यां तु दैवं स्यादृत्विजे कर्मकुर्वते । इच्छन्तीमिच्छतः प्राहुर्गान्धर्वं नाम पञ्चमम् ॥ ४२ ॥
विवाहस्त्वासुरो ज्ञेयः शुल्कसंव्यवहारतः । प्रसह्य हरणादुक्तो विवाहो राक्षसस्तथा ॥ ४३ ॥
सुप्तप्रमत्तोपगमात्पैशाचस्त्वष्टमोऽधमः । एषां तु धर्म्याश्चत्वारो ब्राह्माद्याः समुदाहृताः ॥ ४४ ॥
साधारणः स्याद्गान्धर्वस्त्रयोऽधर्मास्ततः परे । परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम् ॥ ४५ ॥
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा । कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ॥ ४६ ॥

पुनर्भूः प्रथमा प्रोक्ता पुनः संस्कारमर्हति । कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता ॥ ४७ ॥
पुनः पत्युर्गृहमियात्सा द्वितीया प्रकीर्त्तिता । असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते ॥ ४८ ॥
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्त्तिता । स्त्री प्रसूताऽप्रसूता वा पत्यावेव तु जीवति ॥ ४९ ॥
कामात्समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा । मृते भर्त्तरि संप्राप्तान्देवरादीनपास्य या ॥ ५० ॥
उपगच्छेत्परं कामात्सा द्वितीया प्रकीर्त्तिता । प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या ॥ ५१ ॥
तवाहमित्युपगता सा तृतीया प्रकीर्त्तिता । देशधर्मानपेक्ष्य स्त्री गुरुभिर्या प्रदीयते ॥ ५२ ॥
उत्पन्नसाहसान्यस्मै अन्त्या सा स्वैरिणी स्मृता । पुनर्भुवां विधिस्त्वेष स्वैरिणीनां प्रकीर्तितः॥५३॥
पूर्वा पूर्वा जघन्या सा श्रेयसी तूत्तरोत्तरा । अपत्यमुत्पादयितुस्तासां या शुल्कतो हृता ॥ ५४ ॥
न तत्र बीजिनो भागः क्षेत्रिकस्यैव तत्फलम् । ओघवाताहृतं बीजं क्षेत्रे यस्य प्ररोहति ॥ ५६ ॥
फलभुक्तस्य तत्क्षेत्री न बीजी फलभाग्भवेत् । महोक्षो जनयेद्वत्सान् यस्य गोषु व्रजे चरन् ॥ ५७ ॥
तस्य ते यस्य ता गावो मोघः स्कन्दितमार्षभम् । क्षेत्रियानुमतो बीजं यस्य क्षेत्रे समुप्यते ॥ ५८ ॥
तदपत्यं द्वयोरेव बीजिक्षेत्रिकयोर्मतम् । न स्यात्क्षेत्रं विना सस्यं न वा बीजं विनास्ति तत् ॥ ५९ ॥
स्थानसम्भाषणामोदास्त्रयः संग्रहणक्रमाः । नदीनां सङ्गमे तीर्थेष्वारामेषु वनेषु च ॥ ६३ ॥
स्त्रीपुंसौ यत्समीयातां तच्च संग्रहणं स्मृतम् । दूतीप्रस्थापनैर्वापि लेखसंप्रेषणैरपि ॥ ६४ ॥
अन्यैश्च विविधैर्दोषैर्ग्राह्यं संग्रहणं बुधैः । स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तथा ॥ ६५ ॥
परस्परस्यानुमतं सर्वं संग्रहणं स्मृतम् । उपकारक्रियाकेलिः स्पर्शो भूषणवाससाम् ॥ ६६ ॥
सह खट्वासनं चैव सर्वं संग्रहणं स्मृतम् । पाणौ यच्च निगृह्णीयाद्वेण्यां वस्त्राञ्चलेऽपि वा ॥ ६७ ॥
तिष्ठतिष्ठेति वा ब्रूयात्सर्वं संग्रहणं स्मृतम् । वस्त्रैस्संभरणैर्माल्यैः पानैर्भक्ष्यैस्तथैव च ॥ ६८ ॥
संप्रेष्यमाणैर्गन्धैश्च वेद्यं संग्रहणं बुधैः । दर्पाद्वा यदि वा मोहाच्छ्लाघया वा स्वयं वदेत् ॥ ६९ ॥
मयेयं भुक्तपूर्वेति तच्च संग्रहणं स्मृतम् । सजात्यतिशये पुंसां दण्ड उत्तमसाहसः ॥ ७० ॥
मध्यमस्त्वानुलोम्येन प्रातिलोम्ये प्रमापणम् । कन्यायामसकामायां द्व्यङ्गुलस्यावकर्त्तनम् ॥ ७१ ॥
उत्तमायां वधस्त्वेव सर्वस्वग्रहणं तथा । सकामायान्तु कन्यायां सङ्गमे नास्त्यतिक्रमः ॥ ७२ ॥
किंत्वलंकृत्य सत्कृत्य स एवैनां समुद्वहेत् । माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ॥ ७३ ॥
शिश्नस्योत्कर्त्तनं तस्य नान्यो दण्डो विधीयते । पशुयोनौ प्रवृत्तः स विनेयः सदशं शतम् ॥ ७४ ॥
मध्यमं साहसं गोषु तदेवान्त्यावसायिषु । अगम्यागामिनं चास्ति दण्डो राज्ञा प्रचोदितः ॥ ७७ ॥
नियुक्ता गुरुभिर्गच्छेद्देवरं पुत्रकाम्यया । स च तां प्रतिपद्येत तथैवाऽपुत्रजन्मतः ॥ ८१ ॥
पुत्रे जाते निवर्तेत सङ्करः स्यादतोऽन्यथा । घृतेनाभ्यज्य गात्राणि तैलेनाऽविकृतेन वा ॥ ८२ ॥
न गच्छेद्गर्भिणीं निन्द्यामनियुक्तं च बन्धुभिः । अनियुक्ता तु या नारी देवराज्जनयेत्सुतम् ॥८४॥
जारजातमरिक्थीयं तमाहुर्ब्रह्मवादिनः । तथाऽनियुक्तो यो भार्यां यवीयाञ्ज्यायसो व्रजेत् ॥ ८५ ॥
यवीयसो वा यो ज्यायसुभौ तौ गुरुतल्पगौ । कुले तदवशिष्टे तु सन्तानार्थमकामतः ॥ ८६ ॥
बन्धुभिः सा नियोक्तव्या निर्बन्धुः स्वयमाश्रयेत् । नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ॥ ९७ ॥
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते । अष्टौ वर्षाण्युदीक्षेत ब्राह्मणी प्रोषितं पतिम् ॥ ९८ ॥
अप्रसूता तु चत्वारि परतोन्यं समाश्रयेत् । क्षत्रिया षट् समास्तिष्ठेदप्रसूता समात्रयम् ॥ ९९ ॥
वैश्या प्रसूता चत्वारि द्वे वर्षे त्वितरा वसेत् । न शूद्रायाः स्मृतः काल एष प्रोषितयोषिताम् १००॥
जीवति श्रूयमाणे तु स्यादेष द्विगुणो विधिः । अप्रवृत्तौ तु भूतानां दृष्टिरेषा प्रजापते ॥ १०१ ॥
प्रातिलोम्येन यज्जन्म स ज्ञेयो वर्णसङ्करः । अनन्तरः स्मृतः पुत्रः पुत्र एकान्तरस्तथा ॥ १०३ ॥

नारदस्मृति–१३ विवादपद।

विभागोर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते । दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥ १॥
पितर्यूर्ध्वं गते पुत्रा विभजेरन् धनं क्रमात् । मातुर्दुहितरोभावे दुहितॄणां तदन्वयः ॥ २ ॥
मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च । निवृत्ते वापि रमणे पितर्युपरतस्पृहे ॥ ३ ॥
पितैव वा स्वयं पुत्रान्विभजेद्वयसि स्थिते । ज्येष्ठं वा श्रेष्ठभागेन यथा वास्य मतिर्भवेत् ॥ ४ ॥
बिभृयादिच्छतः सर्वान् ज्येष्ठो भ्राता पिता यथा । भ्राताशक्तः कनिष्ठो वा शक्त्यपेक्ष्याः कुले स्थिरः॥५

शौर्यभार्याधने चोभे यच्च विद्याधनं भवेत् । त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः ॥ ६ ॥
मात्रा च स्वधनं दत्तं यस्मै स्यात्प्रीतिपूर्वकम् । तस्याप्येष विधिर्दृष्टो मातापि हि यथा पिता ॥ ७ ॥
अध्यग्न्यध्यावाहनिकं भर्तृदायस्तथैव च । भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ॥ ८ ॥
स्त्रीधनं तदपत्यानां भर्तृगास्वप्रजासु तु । ब्राह्मादिषु चतुर्ष्वाहुः पितृगामीतरेषु च ॥ ९ ॥
कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः । भागं विद्याधनात्तस्मात्स लभेताश्रुतोपि सन् ॥ १० ॥
द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता । समांशभागिनी माता पुत्राणां स्यान्मृते पतौ ॥ १२ ॥
ज्येष्ठायांशोधिको ज्ञेयः कनिष्ठायावरः स्मृतः । समांशभाजः शेषाः स्युरप्रत्ता भगिनी तथा ॥ १३ ॥
पित्रैव तु विभक्ता ये हीनाधिकसमैर्धनैः । तेषां स एव धर्मः स्यात्सर्वस्य हि पिता प्रभुः ॥ १५ ॥
व्याधितः कुपितश्चैव विषयासक्तमानसः । अन्यथाशास्त्रकारी च न विभागे पिता प्रभुः ॥ १६ ॥
कानीनश्च सहोढश्च गूढायां यश्च जायते । तेषां वोढा पिता ज्ञेयस्ते न भागहराः स्मृताः ॥ १७ ॥
अज्ञातपितृको यश्च कानीनोऽमृतमातृकः । मातामहाय दद्यात्स पिण्डं रिक्थं हरेत च ॥ १८ ॥
जाता ये त्वनियुक्तायामेकेन बहुभिस्तथा । अरिक्थभाजस्सर्वे स्युर्बीजिनामेव तत्सुताः ॥ १९ ॥
द्व्यामुष्यायणा दद्युर्द्वाभ्यां पिण्डोदके पृथक् । रिक्थादर्धं समादद्युर्बीजिक्षेत्रिकयोस्तथा ॥ २३ ॥
भ्रातॄणामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत्तु वा । विभजेरन् धनं तस्य शेषास्तु स्त्रीधनं विना ॥ २५ ॥
भरणं चास्य कुर्वीरन् स्त्रीणामाजीवितक्षयात् । रक्षन्ति शय्यां भर्तुश्चेदाच्छिन्द्युरितरासु च ॥ २६ ॥
अस्वातन्त्र्यमतस्तासां प्रजापतिरकल्पयत् । पिता रक्षति कौमारे भर्ता रक्षति यौवने ॥ ३० ॥
पुत्राश्च स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति । यच्छिष्टं पितृदायेभ्यो दत्त्वर्णं पैतृकञ्च यत् ॥ ३१ ॥
कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य तु । ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम् ॥ ४३ ॥
संसृष्टास्तेन वा ये स्युर्विभजेरन्निति स्थितिः । औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च ॥ ४४ ॥
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च । पौनर्भवोपविद्धश्च लब्धः क्रीतः कृतस्तथा ॥ ४५ ॥
स्वयं चोपगतः पुत्रा द्वादशैत उदाहृताः । एषां षड् बन्धुदायादाः षडदायादबान्धवाः ॥ ४६ ॥
ज्यायसो ज्यायसोऽलाभे कनीयान् रिक्थमर्हति । पुत्राभावे तु दुहिता तुल्यसन्तानकारणात् ॥ ४९ ॥
पुत्रश्च दुहिता चोभौ पितुः सन्तानकारकौ । अभावे तु दुहितॄणां सकुल्या बान्धवास्ततः ॥ ५० ॥

नारदस्मृति—१४ विवादपद ।

सहसा क्रियते कर्म यत्किञ्चिद्बलदर्पितैः । तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते ॥ १ ॥
तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमं तथा । उत्तमं चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक् ॥ ३ ॥
फलमूलोदकादीनां क्षेत्रोपकरणस्य च । भङ्गाक्षेपोपमर्दाद्यैः प्रथमं साहसं स्मृतम् ॥ ४ ॥
वासः पश्वन्नपानानां गृहोपकरणस्य च । एतेनैव प्रकारेण मध्यमं साहसं स्मृतम् ॥ ५ ॥
व्यापादो विषशस्त्राद्यैः परदाराभिमर्षणम् । प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसम् ॥ ६ ॥
तस्य दण्डः क्रियापेक्षः प्रथमस्य शतावरः । मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पञ्चशतावरः ॥ ७ ॥
उत्तमे साहसे दण्डः सहस्रावर इष्यते । वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने ॥ ८ ॥
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे ॥ ९ ॥
वधादृते ब्राह्मणस्य न वधं ब्राह्मणोऽर्हति । शिरसो मुण्डनं दण्डस्तस्य निर्वासनं पुरात् ॥ १० ॥
ललाटे चाभिशस्ताङ्कः प्रयाणं गर्दभेन च । स्यातां संव्यवहार्यौ तौ धृतदण्डौ तु पूर्वयोः ॥ ११ ॥
शङ्का त्वसज्जने कार्यादनायव्ययतस्तथा । भक्तावकाशदातारः स्तेनानां ये प्रसर्पताम् ॥ १९ ॥
शक्ताश्च य उपेक्षन्ते तेपि तद्दोषभागिनः । उत्क्रोशतां जनानां च ह्रियमाणे धने तथा ॥ २० ॥
श्रुत्वा येनाभिधावन्ति तेपि तद्दोषभागिनः । साहसेषु य एवोक्तास्त्रिषु दण्डो मनीषिभिः ॥ २१ ॥
नैवान्तरिक्षान्न दिवो न समुद्रान्न चान्यतः । दस्यवः सम्प्रवर्तन्ते तस्मादेवम्प्रकल्पयेत् ॥ २७ ॥
रात्रिसंचारिणो ये च बहिः कुर्युर्बहिश्चराः । स्तेनेष्वलभ्यमानेषु राजा दद्यात्स्वकाद्गृहात् ॥ २८ ॥
उपेक्षमाणो ह्येनस्वी धर्मादर्थाच्च हीयते ॥ २९ ॥

नारदस्मृति—१५ विवादपद ।

देशजातिकुलादीनामाक्रोशं न्यङ्गसंयुतम् । यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते ॥ १ ॥

निष्ठुराश्लीलतीव्रत्वात्तदपि त्रिविधं स्मृतम् । गौरवानुक्रमात्तस्य दण्डोऽप्यत्र क्रमाद्गुरुः ॥ २ ॥
साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गसंयुतम् । पातनीयैरुपक्रोशैस्तीव्रमाहुर्मनीषिणः ॥ ३ ॥
परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः । भस्मादीनामुपक्षेपैर्दण्डपारुष्यमुच्यते ॥ ४ ॥
तस्यापि दृष्टं त्रैविध्यं हीनमध्योत्तमं क्रमात् । अवगूरणनिःशंकपातनक्षतदर्शनैः ॥ ५ ॥
शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति । वैश्योऽप्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति ॥ १५ ॥
पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने । वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दमः ॥ १६ ॥
समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे । वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् ॥ १७ ॥
काणमप्यथवा खञ्जमन्यं वापि तथाविधम् । तथ्येनापि ब्रुवन्दण्ड्यो राज्ञा कार्षापणावरम् ॥ १८ ॥
नामजातिग्रहांस्त्वेषामभिद्रोहेण कुर्वतः । निक्षेप्योऽयोमयः शंकुर्ज्वलन्नास्ये दशांगुलः ॥ २२ ॥
धर्मोपदेशं दर्पेण द्विजानामस्य कुर्वतः । तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥ २३ ॥
येनाङ्गेनावरो वर्णो ब्राह्मणस्यापराध्नुयात् । तदङ्गं तस्य छेत्तव्यमेवं शुद्धिमवाप्नुयात् ॥ २४ ॥
सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः । कट्यां कृताङ्को निर्वास्यः स्फिचं वास्यावकर्त्तयेत् ॥ २५ ॥
अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः । अवमूत्रयतो शिश्नमवशर्द्धयतो गुदम् ॥ २६ ॥
केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् । पादयोर्नासिकायां च ग्रीवायां वृषणेषु च ॥ २७ ॥
त्वक्छेदकः शतं दण्ड्यो लोहितस्य च दर्शकः । मांसभेत्ता तु षण्निष्कान्प्रवास्यस्त्वस्थिभेदकः ॥ २८

नारदस्मृति—१६ विवादपद ।

अक्षवध्रशलाकाद्यैर्देवनं जिह्मकारितम् । पणक्रीडावयोभिश्च पदं द्यूतसमाह्वयम् ॥ १ ॥

(२७) सुमन्तुस्मृति ।

नित्यं भूमिव्रीहियवाजाव्यश्वर्षभधेन्वनडुहश्चैके ॥ १ ॥
यः पतितैः सह यौनमुख्यस्रौवानां सम्बन्धानामन्यतमं सम्बन्धं कुर्यात्स तस्याप्येतदेव प्रायश्चित्तम् ॥२॥
पञ्चाहे तु चरेत्कृच्छ्रं दशाहे तप्तकृच्छ्रकम् । पराकस्त्वर्धमासे स्यान्मासे चान्द्रायणं चरेत् ॥ ३ ॥
मासत्रये प्रकुर्वीत कृच्छ्रं चान्द्रायणोत्तरम् । षाण्मासिके तु संसर्गे कृच्छ्रं त्वब्दार्धमाचरेत् ॥ ४ ॥
संसर्गे त्वाब्दिके कुर्यादब्दं चान्द्रायणं नरः ॥ ५ ॥
लशुनपलाण्डुगृंजनकवकभक्षणे सावित्र्यष्टसहस्रेण मूर्ध्नि सम्पातान्नयेत् ॥ ६ ॥
एतान्येव व्याधितस्य भिषक्क्रियायामप्रतिषिद्धानि भवन्ति यानि चैवंप्रकाराणि तेष्वपि न दोषः ॥७॥
अप्स्वग्नौ वा मेहतस्तप्तकृच्छ्रम् ॥ ८ ॥

(२८) मार्कण्डेयस्मृति ।

प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्तिता । क्षुत्तृष्णे प्रत्यहं तत्र भवेतां भृगुनन्दन ॥ १ ॥
उदक्या तु सवर्णा या स्पृष्टा चेत्स्यादुदक्यया । तस्मिन्नेवाहनि स्नात्वा शुद्धिमाप्नोत्यसंशयम् ॥२॥
द्विजान्कथञ्चिदुच्छिष्टान् रजस्या यदि संस्पृशेत् । अधोच्छिष्टे त्वहोरात्रमूर्ध्वोच्छिष्टे त्र्यहं क्षिपेत्॥३॥
अपांक्तेयस्य यः कश्चित् पंक्तौ भुंक्ते द्विजोत्तमः । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ ४ ॥

(२९) प्रचेतास्मृति ।

एकोद्दिष्टं यतेर्नास्ति त्रिदण्डग्रहणादिह । सपिण्डीकरणाभावात्पार्वणं तस्य सर्वदा ॥ १ ॥
असंस्कृतानां भूमौ पिण्डं दद्यात्संस्कृतानां कुशेषु ॥ २ ॥
मृते चर्त्विजि याज्ये च त्रिरात्रेण विशुद्ध्यति ॥ ३ ॥
कारवः शिल्पिनो वैद्या दासीदासास्तथैव च । राजानो राजभृत्याश्च सद्यःशौचाः प्रकीर्तिताः ॥ ४ ॥
तथा लोहेन पात्रेण सुरापोऽग्निवर्णां सुरामायसेन पात्रेण ताम्रेण वा पिबेत् ॥ ५ ॥
सुरापगुरुतल्पगौ चीरवल्कलवाससौ ब्रह्महत्याव्रतं चरेताम् ॥ ६ ॥
अनृतुमतीं ब्राह्मणीं हत्वा कृच्छ्राब्दं षण्मासान्वेति । क्षत्रियां हत्वा षण्मासान्मासत्रयं वेति ॥
वैश्यां हत्वा मासत्रयं सार्धमासं वेति शूद्रां हत्वा सार्धमासं सार्द्धद्वाविंशत्यहानि वा ॥ ७ ॥

(३०) पितामहस्मृति ।

ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः। वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेत् ॥ १ ॥
तुलितो यदि वर्द्धेत स शुद्धः स्यान्न संशयः । समो वा हीयमानो वा न स शुद्धो भवेन्नरः ॥ २ ॥
सप्तपिप्पलपत्राणि अक्षतान्सुमनो दधि । हस्तयोर्निक्षिपेत्तत्र सूत्रेणावेष्टनं तथा ॥ ३ ॥
स्थिरतोये निमज्जेत्तु न ग्राहिणि न चाल्पके । तृणशैवालरहिते जलौकामत्स्यवर्जिते ॥ ४ ॥
देवखातेषु यत्तोयं तस्मिन्कुर्याद्विशोधनम् । आहार्यं वर्जयेन्नित्यं शीघ्रगासु नदीषु च ॥ ५ ॥
आविशेत्सलिलं नित्यमूर्मिपंकविवर्जिते ॥ ६ ॥
घटोग्निरुदकं चैव विषं कोशस्तथैव च । तण्डुलाश्चैव दिव्यानि सप्तमस्तप्तमाषकः ॥ ७॥
शृंगिणो वत्सनाभस्य हिमजस्य विषस्य वा ॥ ८ ॥

(३१) मरीचिस्मृति ।

सूतके मृतके चैव त्रिरात्रं परपूर्वयोः । एकाहस्तु सपिण्डानां त्रिरात्रं यत्र वै पितुः ॥ १ ॥
ब्रह्मसूत्रं विना भुंक्ते विण्मूत्रं कुरुतेथ वा । गायत्र्यष्टसहस्रेण प्राणायामेन शुद्ध्यति ॥ २ ॥
सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतम् । द्रव्येण वाऽविभक्तेन सर्वैरेव कृतं भवेत् ॥ ३ ॥
आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः । अत ऊर्द्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत् ॥ ४ ॥

(३२) जाबालिस्मृति ।

एकोदकानां तु त्र्यहो गोत्रजानामहः स्मृतम् । मातृबन्धौ गुरौ मित्रे मण्डलाधिपतौ तथा ॥ १ ॥
षण्णामेकैकमेतेषां त्रिरात्रमुपयोजयेत् । त्र्यहं चोपवसेदन्त्यं महासान्तपनं विदुः ॥ २ ॥
पिण्याकं सक्तवस्तक्रं चतुर्थेऽहन्यभोजनम् । वासो वै दक्षिणां दद्यात्सौम्योयं कृच्छ्र उच्यते ॥ ३ ॥
अतिकृच्छ्रं तप्तकृच्छ्रं पराकं वा तथैव च । गुराः शूद्रां सकृद्गत्वा बुद्ध्या विप्रः समाचरेत् ॥ ४ ॥

(३३) पैठीनसिस्मृति ।

विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि । न तत्र सूतकं तद्वत्कर्म यज्ञादि कारयेत् ॥ १ ॥
भक्ष्याभोज्यान्नस्यादरपूर्णपात्रहरणे त्रिरात्रमेकरात्रं वा पञ्चगव्याहारश्च ॥ २ ॥
पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः । श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् ॥ ३ ॥
अनग्निमत उत्क्रान्तेराशौचं हि द्विजातिषु । दाहादग्निमतो विद्याद्विदेशस्थे मृते सति ॥ ४ ॥
अविखरोष्ट्रमानुषीक्षीरप्राशने तप्तकृच्छ्रः पुनरुपनयनं च अनिर्दशाहगोमहिषीक्षीरप्राशने षड्रात्रमभोजनम् । सर्वासां द्विस्तनीनां क्षीरपानेऽप्यजावर्ज्यमेतदेव ॥ ५ ॥

(३४) शौनकस्मृति ।

पुरुषस्य यानि पतननिमित्तानि स्त्रीणामपि तान्येव ब्राह्मणस्य हीनवर्णे सेवायामधिकं पतति ॥ १॥
प्रौष्ठपद्यामपरपक्षे मासि मासि चैवम् ॥ २ ॥

(३५) कण्वस्मृति ।

एकरात्रं वसेद्ग्रामे नगरे रात्रिपञ्चकम् । वर्षाभ्योऽन्यत्र वर्षासु मासांस्तु चतुरो वसेत् ॥ १ ॥
मत्या गत्वा पुनर्भार्यां गुरोः क्षत्रसुतां द्विजः । अण्डाभ्यां रहितं लिङ्गमुत्कृत्य स मृतः शुचिः॥२॥

(३६) षट्त्रिंशत् मत ।

षण्ढं तु ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेत् । चान्द्रायणं वा कुर्वीत पराकद्वयमेव च ॥ १ ॥
वालाग्रमात्रेऽपहृते प्राणायामं समाचरेत् । लिक्षामात्रेपि च तथा प्राणायामत्रयं बुधः ॥ २ ॥
राजसर्षपमात्रे तु प्राणायामचतुष्टयम् । गायत्र्यष्टसहस्रं च जपेत्पापविशुद्धये ॥ ३ ॥
गौरसर्षपमात्रे च सावित्रीं वै दिनं जपेत् । यवमात्रे सुवर्णस्य प्रायश्चित्तं दिनद्वयम् ॥ ४ ॥
सुवर्णकृष्णलं ह्येकमपहृत्य द्विजोत्तमः । कुर्यात्सान्तपनं कृच्छ्रं तत्पापस्यापनुत्तये ॥ ५ ॥
अपहृत्य सुवर्णस्य माषमात्रं द्विजोत्तमः । गोमूत्रयावकाहारस्त्रिभिर्मासैर्विशुद्ध्यति ॥ ६ ॥
सुवर्णस्यापहरणे वत्सरं यावकी भवेत् । ऊर्ध्वं प्राणान्तिकं ज्ञेयमथवा ब्रह्महव्रतम् ॥ ७ ॥
पाद उत्पन्नमात्रे तु द्वौ पादौ दृढतां गते । पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनम् ॥ ८ ॥

अङ्गप्रत्यङ्गसम्पूर्णे गर्भे चेतःसमन्विते । द्विगुणं गोव्रतं कुर्यादेषा गोघ्न
पवित्रेष्टया विशुद्ध्यन्ति सर्वे घोराः प्रतिग्रहाः । ऐंदवेन मृगारेष्ट्या कदा
देव्या लक्षजपेनैव शुद्ध्यंते दुष्प्रतिग्रहात् ॥ ११ ॥

(३७) चतुर्विंशतिमत ।

गायत्र्यास्तु जपेत्कोटिं ब्रह्महत्यां व्यपोहति । लक्षाशीतिं जपेद्यस्तु सुरापाना
पुनाति हेमहर्तारं गायत्र्या लक्षसप्ततिः । गायत्र्या लक्षषष्ट्या तु मुच्यते गुरु
लघुदोषे त्वनादिष्टे प्राजापत्यं समाचरेत् ॥ ३ ॥
चतुर्थमाश्रमं गच्छेद्ब्रह्मविद्यापरायणः । एकदण्डी त्रिदण्डी वा सर्वसङ्गविवर्जि

(३८) उपमन्युस्मृति ।

शूद्रायां तु कामतोऽभ्यासे द्वादशवार्षिकम् ॥ १ ॥
पुनः शूद्रां गुरोर्गत्वा बुद्ध्या विप्रः समाहितः । ब्रह्मचर्यमदुष्टात्मा संचरेद्द्वादशाब्दिकम् ॥ २ ॥

(३९) कश्यपस्मृति ।

रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि । एकरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ॥ १ ॥
गां हत्वा तच्चर्मणा प्रावृतो मासं गोष्ठेशयस्त्रिषवणस्नायी नित्यं पञ्चगव्याहारः ॥ २ ॥
मासं पञ्चगव्येनेति षष्ठे काले पयोभक्षो वा गच्छन्तीष्वनुगच्छेत्तासु सुखोपविष्टासु चोपविशेन्नाति-
प्लवं गच्छेन्नातिविषमेणावतारयेन्नाल्पोदके पाययेदन्ते ब्राह्मणान्भोजयित्वा तिलधेनुं दद्यात् ॥३॥

(४०) लौगाक्षिस्मृति ।

गुरोर्भार्यां तु यो वैश्यां मत्या गच्छेत्पुनःपुनः । लिङ्गाग्रं छेदयित्वा तु ततः शुद्ध्येत्स किल्बिषात्१॥
क्षेमं पूर्तं योगमिष्टमित्याहुस्तत्त्वदर्शिनः । अविभाज्ये च ते प्रोक्ते शयनासनमेव च ॥ २ ॥

(४१) क्रतुस्मृति ।

शूद्रहस्तेन यो भुङ्क्ते पानीयं वा पिबेत्क्वचित् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ १ ॥
पूर्वसङ्कल्पितं द्रव्यं दीयमानं न दुष्यति ॥ २ ॥
यस्तु भुङ्क्ते द्विजः कश्चिदुच्छिष्टायां कदाचन । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ ३ ॥

(४२) पुलस्त्यस्मृति ।

मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः । मधुप्रधानं शूद्रस्य सर्वेषां चाविरोधि यत् ॥ १ ॥
रजस्वला यदा दष्टा शुना जम्बूकरासभैः । पञ्चरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ॥ २ ॥
ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं तथा । चतुर्गुणं स्मृतं मूर्ध्नि दष्टेऽन्यत्राप्लुतिर्भवेत् ॥ ३ ॥
पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् । मधूत्थं सैरमारिष्टं मैरेयं नालिकेरजम् ॥ ४ ॥
समानानि विजानीयान्मद्यान्येकादशैव तु । द्वादशं तु सुरा मद्यं सर्वेषामधमं स्मृतम् ॥ ५ ॥

(४३) शाण्डिल्यस्मृति ।

अवकीर्णो द्विजो राजा वैश्यश्चापि खरेण तु । इष्ट्वा भैक्षाशिनो नित्यं शुद्ध्यंत्यब्दात्समाहिताः ॥१॥
वानप्रस्थो यतिश्चैव स्कन्दने सति कामतः । पराकत्रयसंयुक्तमवकीर्णव्रतं चरेत् ॥ २ ॥

कृष्णयजुर्वेदके मैत्रायणीशाखाका ।

मानवगृह्यसूत्र-१ पुरुष-१ खण्ड ।

यदेनमुपेयात्तदस्मै दद्याद्भूनां येन संयुक्तः ॥ ३ ॥ न स्नायादुदकं वाऽभ्यवेयान् ॥ १३ ॥
यदि स्नायाद्दण्ड इवाप्सु प्लवेत ॥ १४ ॥

मानवगृह्यसूत्र-१ पुरुष-२ खण्ड ।

आदेवोयातीति त्रिष्टुभं राजन्यस्य । युञ्जत इति जगतीं वैश्यस्य ॥ ३ ॥
एतेन धर्मेण द्वादशचतुर्विंशतिषट्त्रिंशतमष्टाचत्वारिंशतं वा वर्षाणि यो ब्राह्मणो राजन्यो वैश्यो वा
ब्रह्मचर्यं चरति मुण्डः शिखाजटः सर्वजटो वा मलजुरवलः कृशः स्नात्वा स सर्वं विन्दते यत्कि-
ञ्चिन्मनसेच्छतीति ॥ ६ ॥ एतेन धर्मेण साध्वधीते ॥ ७ ॥ आपोहिष्ठेति तिसृभिर्हिरण्यवर्णाः
शुचय इति द्वाभ्यां स्नात्वाऽहते वाससी परिधत्ते ॥ ११ ॥ वस्व्यसि वसुमन्तं मा कुरु सौवर्च-
सायमातेजसे ब्रह्मवर्चसाय परिदधामीति परिदधाति ॥ १२ ॥ यथा द्यौश्च पृथिवी च न बिभीतो
न रिष्यतः । एवं मे प्राणमाबिभ एवं मे प्राणमारिषः इत्याङ्क्ते ॥१३॥ हिरण्यमाबध्नीते ॥१४॥

(३०) पितामहस्मृति ।

ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः। वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेत् ॥ १ ॥
तुलितो यदि वर्द्धेत स शुद्धः स्यान्न संशयः । समो वा हीयमानो वा न स शुद्धो भवेन्नरः ॥ २ ॥
सप्तपिप्पलपत्राणि अक्षतान्सुमनो दधि । हस्तयोर्निक्षिपेत्तत्र सूत्रेणावेष्टनं तथा ॥ ३ ॥
स्थिरतोये निमज्जेत्तु न ग्राहिणि न चाल्पके । तृणशैवालरहिते जलौकामत्स्यवर्जिते ॥ ४ ॥
देवखातेषु यत्तोयं तस्मिन्कुर्याद्विशोधनम् । आहार्यं वर्जयेन्नित्यं शीघ्रगासु नदीषु च ॥ ५ ॥
आविशेत्सलिलं नित्यमूर्मिपंकविवर्जिते ॥ ६ ॥
घटोऽग्निरुदकं चैव विषं कोशस्तथैव च । तण्डुलाश्चैव दिव्यानि सप्तमस्तप्तमाषकः ॥ ७॥
शृंगिणो वत्सनाभस्य हिमजस्य विषस्य वा ॥ ८ ॥

(३१) मरीचिस्मृति ।

सूतके मृतके चैव त्रिरात्रं परपूर्वयोः । एकाहस्तु सपिण्डानां त्रिरात्रं यत्र वै पितुः ॥ १ ॥
ब्रह्मसूत्रं विना भुंक्ते विण्मूत्रं कुरुतेथ वा । गायत्र्यष्टसहस्रेण प्राणायामेन शुद्ध्यति ॥ २ ॥
सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतम् । द्रव्येण चाऽविभक्तेन सर्वैरेव कृतं भवेत् ॥ ३ ॥
आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः । अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत् ॥ ४ ॥

(३२) जाबालिस्मृति ।

एकोदकानां तु त्र्यहो गोत्रजानामहः स्मृतम् । मातृबन्धौ गुरौ मित्रे मण्डलाधिपतौ तथा ॥ १ ॥
षण्णामेकैकमेतेषां त्रिरात्रमुपयोजयेत् । त्र्यहं चोपवसेदन्त्यं महासान्तपनं विदुः ॥ २ ॥
पिण्याकं सक्तवस्तक्रं चतुर्थेऽहन्यभोजनम् । वासो वै दक्षिणां दद्यात्सौम्योयं कृच्छ्र उच्यते ॥ ३ ॥
अतिकृच्छ्रं तप्तकृच्छ्रं पराकं वा तथैव च । गुरोः शूद्रां सकृद्गत्वा बुद्ध्या विप्रः समाचरेत् ॥ ४ ॥

(३३) पैठीनसिस्मृति ।

विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि । न तत्र सूतकं तद्वत्कर्म यज्ञादि कारयेत् ॥ १ ॥
भक्ष्याभोज्यान्नस्योदरपूर्णपात्रहरणे त्रिरात्रमेकरात्रं वा पञ्चगव्याहारश्च ॥ २ ॥
पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः । श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् ॥ ३ ॥
अनग्निमत उत्क्रान्तेराशौचं हि द्विजातिषु । दाहादग्निमतो विद्याद्विदेशस्थे मृते सति ॥ ४ ॥
अविखरोष्ट्रमानुषीक्षीरप्राशने तप्तकृच्छ्रः पुनरुपनयनं च अनिर्दशाहगोमहिषीक्षीरप्राशने षड्रात्रम-
भोजनम् । सर्वासां द्विस्तनीनां क्षीरपानेऽप्यजावर्ज्यमेतदेव ॥ ५ ॥

(३४) शौनकस्मृति ।

पुरुषस्य यानि पतननिमित्तानि स्त्रीणामपि तान्येव ब्राह्मणस्य हीनवर्ण सेवायामधिकं पतति ॥ १॥
प्रौष्ठपद्यामपरपक्षे मासि मासि चैवम् ॥ २ ॥

(३५) कण्वस्मृति ।

एकरात्रं वसेद्ग्रामे नगरे रात्रिपञ्चकम् । वर्षाभ्योऽन्यत्र वर्षासु मासांस्तु चतुरो वसेत् ॥ १ ॥
मत्या गत्वा पुनर्भार्यां गुरोः क्षत्रसुतां द्विजः । अण्डाभ्यां रहितं लिङ्गमुत्कृत्य स मृतः शुचिः॥२॥

(३६) षट्त्रिंशत् मत ।

षण्ढं तु ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेत् । चान्द्रायणं वा कुर्वीत पराकद्वयमेव च ॥ १ ॥
वालाग्रमात्रेऽपहृते प्राणायामं समाचरेत् । लिक्षामात्रेपि च तथा प्राणायामत्रयं बुधः ॥ २ ॥
राजसर्षपमात्रे तु प्राणायामचतुष्टयम् । गायत्र्यष्टसहस्रं च जपेत्पापविशुद्धये ॥ ३ ॥
गौरसर्षपमात्रे च सावित्रीं वै दिनं जपेत् । यवमात्रे सुवर्णस्य प्रायश्चित्तं दिनद्वयम् ॥ ४ ॥
सुवर्णकृष्णलं ह्येकमपहृत्य द्विजोत्तमः । कुर्यात्सान्तपनं कृच्छ्रं तत्पापस्यापनुत्तये ॥ ५ ॥
अपहृत्य सुवर्णस्य माषमात्रं द्विजोत्तमः । गोमूत्रयावकाहारस्त्रिभिर्मासैर्विशुद्ध्यति ॥ ६ ॥
सुवर्णस्यापहरणे वत्सरं यावकी भवेत् । ऊर्ध्वं प्राणान्तिकं ज्ञेयमथवा ब्रह्महव्रतम् ॥ ७ ॥
पाद उत्पन्नमात्रे तु द्वौ पादौ दृढतां गते । पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनम् ॥ ८ ॥

अङ्गप्रत्यङ्गसम्पूर्णे गर्भे चेतःसमन्विते । द्विगुणं गोव्रतं कुर्यादेषा गोघ्नस्य निष्कृतिः ॥ ९ ॥
पवित्रेष्ट्या विशुद्ध्यन्ति सर्वे घोराः प्रतिग्रहाः । ऐंदवेन मृगारेष्ट्या कदाचिन्मित्रविन्दया ॥ १० ॥
देव्या लक्षजपेनैव शुद्ध्यंते दुष्प्रतिग्रहात् ॥ ११ ॥

(३७) चतुर्विंशतिमत ।

गायत्र्यास्तु जपेत्कोटिं ब्रह्महत्यां व्यपोहति । लक्षाशीतिं जपेद्यस्तु सुरापानाद्विमुच्यते ॥ १ ॥
पुनाति हेमहर्तारं गायत्र्या लक्षसप्ततिः । गायत्र्या लक्षषष्ट्या तु मुच्यते गुरुतल्पगः ॥ २ ॥
लघुदोषे त्वनादिष्ट प्राजापत्यं समाचरेत् ॥ ३ ॥
चतुर्थमाश्रमं गच्छेद्ब्रह्मविद्यापरायणः । एकदण्डी त्रिदण्डी वा सर्वसङ्गविवर्जितः ॥ ४ ॥

(३८) उपमन्युस्मृति ।

शूद्रायां तु कामतोऽभ्यासे द्वादशवार्षिकम् ॥ १ ॥
पुनः शूद्रां गुरोर्गत्वा बुद्ध्या विप्रः समाहितः । ब्रह्मचर्यमदुष्टात्मा संचरेद्द्वादशाब्दिकम् ॥ २ ॥

(३९) कश्यपस्मृति ।

रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि । एकरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ॥ १ ॥
गां हत्वा तच्चर्मणा प्रावृतो मासं गोष्ठेशयस्त्रिषवणस्नायी नित्यं पञ्चगव्याहारः ॥ २ ॥
मासं पञ्चगव्येनेति षष्ठे काले पयोभक्षो वा गच्छन्तीष्वनुगच्छेत्तासु सुखोपविष्टासु चोपविशेन्नाति-प्लवं गच्छेन्नातिविषमेणावतारयेन्नाल्पोदके पाययेदन्ते ब्राह्मणान्भोजयित्वा तिलधेनुं दद्यात् ॥३॥

(४०) लौगाक्षिस्मृति ।

गुरोर्भार्यां तु यो वेश्यां मत्या गच्छेत्पुनःपुनः । लिङ्गाग्रं छेदयित्वा तु ततः शुद्ध्येत्स किल्बिषात्॥१॥
क्षेमं पूर्तं योगमिष्टमित्याहुस्तत्त्वदर्शिनः । अविभाज्ये च ते प्रोक्ते शयनासनमेव च ॥ २ ॥

(४१) क्रतुस्मृति ।

शूद्रहस्तेन यो भुङ्क्ते पानीयं वा पिबेत्कचित् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ १ ॥
पूर्वसङ्कल्पितं द्रव्यं दीयमानं न दुष्यति ॥ २ ॥
यस्तु भुङ्क्ते द्विजः कश्चिदुच्छिष्टायां कदाचन । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ ३ ॥

(४२) पुलस्त्यस्मृति ।

मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः । मधुप्रधानं शूद्रस्य सर्वेषां चाविरोधि यत् ॥ १ ॥
रजस्वला यदा दष्टा शुना जम्बूकरासभैः । पञ्चरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ॥ २ ॥
ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं तथा । चतुर्गुणं स्मृतं मूर्ध्नि दष्टेऽन्यत्राप्लुतिर्भवेत् ॥ ३ ॥
पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् । मधूत्थं सैरमारिष्टं मैरेयं नालिकेरजम् ॥ ४ ॥
समानानि विजानीयान्मद्यान्येकादशैव तु । द्वादशं तु सुरा मद्यं सर्वेषामधमं स्मृतम् ॥ ५ ॥

(४३) शाण्डिल्यस्मृति ।

अवकीर्णी द्विजो राजा वैश्यश्चापि खरेण तु । इष्ट्वा भैक्षाशिनो नित्यं शुद्ध्यंत्यब्दात्समाहिताः ॥१॥
वानप्रस्थो यतिश्चैव स्कन्दने सति कामतः । पराकत्रयसंयुक्तमवकीर्णव्रतं चरेत् ॥ २ ॥

कृष्णयजुर्वेदके मैत्रायणीशाखाका ।

मानवगृह्यसूत्र--१ पुरुष--१ खण्ड ।

यदेनमुपेयात्तदस्मै दद्याद्बहूनां येन संयुक्तः ॥ ३ ॥ न स्नायादुदकं वाऽभ्यवेयात् ॥ १३ ॥
यदि स्नायाद्दण्ड इवाप्सु प्लवेत ॥ १४ ॥

मानवगृह्यसूत्र--१ पुरुष--२ खण्ड ।

आदेवोयातीति त्रिष्टुभं राजन्यस्य । युञ्जत इति जगतीं वैश्यस्य ॥ ३ ॥
एतेन धर्मेण द्वादशचतुर्विंशतिषट्त्रिंशतमष्टाचत्वारिंशतं वा वर्षाणि यो ब्राह्मणो राजन्यो वैश्यो वा ब्रह्मचर्यं चरति मुण्डः शिखाजटः सर्वजटो वा मलजुरवलः कृशः स्नात्वा स सर्वं विन्दते यत्कि-ञ्चिन्मनसेच्छतीति ॥ ६ ॥ एतेन धर्मेण साध्वधीते ॥ ७ ॥ आपोहिष्ठेति तिसृभिर्हिरण्यवर्णाः शुचय इति द्वाभ्यां स्नात्वाऽहते वाससी परिधत्ते ॥ ११ ॥ वस्त्यसि वसुमन्तं मा कुरु सौवर्च-सायमातेजसे ब्रह्मवर्चसाय परिदधामीति परिदधाति ॥ १२ ॥ यथा द्यौश्च पृथिवी च न बिभीतो न रिष्यतः । एवं मे प्राणमाबिभ एवं मे प्राणमारिषः इत्याङ्क्ते ॥१३॥ हिरण्यमाबध्नीते ॥१४॥

छत्रं धारयते दण्डं मालां गन्धम् ॥ १५ ॥ प्रतिष्ठेस्थो दैवते द्यावापृथिवीमामासन्तासमित्यु-पानहौ ॥ १६ ॥ द्विवस्त्रोऽत ऊर्ध्वं भवति तस्माच्छोभनं वासो भर्तव्यमिति श्रुतिः ॥ १७ ॥ आमन्त्र्य गुरुन् गुरुवंधूश्च स्वान् गृहान्व्रजेत् ॥ १८ ॥

मानवगृह्यसूत्र—१ पुरुष—७ खण्ड ।

अथोपनिषदर्हाः । ब्रह्मचारी सुचरितो मेधावी कर्मकृद्धनदः प्रियो विद्यां विद्ययान्वेष्यन्॥१॥तानि तीर्थानि ब्रह्मणः ॥२॥ पञ्च विवाहकारकाणि भवन्ति वित्तं रूपं विद्या प्रज्ञा बान्धव इति ॥ ६ ॥ एकालाभे वित्तं विसृजेद्द्वितीयालाभे रूपं तृतीयालाभे विद्यां प्रज्ञायां बान्धव इति च विवहन्ते ॥७॥ बन्धुमतीं कन्यामस्पृष्टमैथुनामुपयच्छेत समानवर्णामसमानप्रवरां यवीयसीं नग्निकां श्रेष्ठाम् ॥ ८ ॥

मानवगृह्यसूत्र—१ पुरुष—९ खण्ड ।

षडर्घ्या भवन्त्यृत्विगाचार्यो विवाह्यो राजा स्नातकः प्रियश्चेति ॥ १ ॥ अप्राकरणिकान्वा परिसंवत्सरादर्हयन्ति ॥ २ ॥

मानवगृह्यसूत्र १ पुरुष—१४ खण्ड ।

संवत्सरं ब्रह्मचर्यं चरतो द्वादशरात्रं [त्रिरात्रमेकरात्रं] वा॥१४॥अथास्यै गृहान्विसृजेत्॥ १५ ॥ योक्त्रपाशं विषाय तौ संनिपातयेत् । अपश्यं त्वा तपसा चेकितानं तपसो जातं तपसो विभूतम् ।इह प्रजामिह रयिं रराणः प्रजायस्व प्रजया पुत्रकाम॥अपश्यं त्वा मनसा दीध्यानां स्वायां तनूं ऋत्विये नाधमानाम् । उपमामुच्चायुवतिर्बभूयाः प्रजायस्व प्रजया पुत्रकामे ॥ प्रजापतिस्तन्वं मे जुषस्व त्वष्टा देवैः सह मा न इन्द्रः । विश्वैर्देवैर्ऋतुभिः संविदानः पुंसां बहूनां मातरौ स्याव ॥ अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वन्तः । अहं प्रजा अजनयं पृथिव्या अहं जनिभ्योऽअपरीषु पुत्रान् ॥ इति स्त्र्यादिव्यत्यासं जपति ॥ १६ ॥ करदिति भसदभिमृशति ॥ १७ ॥ जननी-त्युपजननम् ॥१८॥ बृहदितिजातं प्रतिष्ठितम् ॥१९॥ एतेन धर्मेण ऋतावृतौ संनिपातयेत् ॥ २०॥

मानवगृह्यसूत्र—१ पुरुष—१५ खण्ड ।

तृतीये गर्भमासे अरणी आहृत्य षष्ठेऽष्टमे वा । जयप्रभृतिभिर्हुत्वा पश्चादग्नेर्दर्भेष्वासीनायाः (पत्न्याः) सर्वान्प्रमुच्य केशान्नवनीतेनाभ्यज्य त्रिश्येतया शलल्या शमीशाखया च सपलाशया पुनः पत्नीमग्निरदादिति सीमन्तं करोति ॥ १ ॥

मानवगृह्यसूत्र—१ पुरुष—१६ खण्ड ।

अष्टमे गर्भमासे जयप्रभृतिभिर्हुत्वा फलैः स्नापयित्वा या ओषधय इत्यनुवाकेनाहतेन वाससा प्रच्छाद्य गन्धपुष्पैरलंकृत्य फलानि कण्ठे वै संसृज्याऽग्निं प्रदक्षिणं कुर्यात् ॥ १ ॥ प्रजां मे नर्यपाहीति मन्त्रेणोपस्थानं कृत्वा गुणवतो ब्राह्मणान्भोजयेत् ॥ २ ॥ फलानि दक्षिणां दद्यात् ॥ ३ ॥ ततः स्वस्त्ययनं च ॥ ४ ॥ यो गुरुस्तमर्हयेत् ॥ ५ ॥

मानवगृह्यसूत्र—१ पुरुष १७ खण्ड ।

पुत्रे जाते वरं ददाति ॥ १ ॥ अरणिभ्यामग्निं मथित्वा तस्मिन्नायुष्यहोमाञ्जुहोति ॥ २ ॥ अग्ने-रायुरसीत्यनुवाकेन प्रत्यृचं प्रतिपर्यायमेकविंशतिमाज्याहुतीर्जुहोति ॥ ३ ॥ आज्यशेषे दधिमध्व-पोहिरण्यशकलेनोपहत्य त्रिः प्राशयति ॥ ४ ॥ अश्माभव परशुर्भव हिरण्यमस्तृतं भव। वेदो वै पुत्रनामासि, स जीव शरदः शतम् ॥ इति प्रादेशेनाध्यधिपतिमुखं प्रदक्षिणं सर्वतोऽभ्युद्दिशति ॥ ५ ॥ पलाशस्य मध्यमपर्णं प्रवेष्ट्य तेनास्यकर्णयोर्जपेत् । भूस्ते ददामीति दक्षिणे । भुवस्ते ददामीति सव्ये । स्वस्ते ददामीति दक्षिणे । भूर्भुवः स्वस्ते ददामीति सव्ये ॥ ६ ॥ इषंपिन्वोर्जंपि-न्वेति स्तनौ प्रक्षाल्य प्रधापयेत् ॥ ७ ॥

मानवगृह्यसूत्र—१ पुरुष ८१ खण्ड ।

दशम्यां रात्र्यां पुत्रस्य नाम दध्यात् । घोषवदाद्यन्तरन्तस्थं द्व्यक्षरं चतुरक्षरं वा । त्र्यक्षरं दान्तं कुमारीणाम् ॥ १ ॥ तेनाभिवादयितुं, त्यक्त्वा पितुर्नामधेयं, यशस्यनामधेयं देवताश्रयं, नक्षत्रा-श्रयं देवतायाश्च प्रत्यक्षं प्रातिषिद्धम् ॥ २ ॥ स्नात्वा सह पुत्रोऽभ्युपैति ॥ ३ ॥ अथैनमभिमृ-शति अग्नेष्ट्वा तेजसा सूर्यस्य वर्चसा विश्वेषां त्वा देवानां क्रतुनाभिमृशामीति प्रक्षालितपाणिर्न-वनीतेनाभ्यज्याग्नौ प्रताप्य, ब्राह्मणाय प्रोच्याभिमृशेदिति श्रुतिः ॥ ४ ॥ वरकर्त्रे ददाति ॥ ५ ॥

मानवगृह्यसूत्र—१पुरुष१९ खण्ड ।

अथादित्यदर्शनम् ॥१॥ चतुर्थे मासि पयसि स्थालीपाकं श्रपयित्वा तस्य जुहोति ॥२॥ आदित्यः शुक्र उदगात्पुरस्तात्, हंसः शुचिषत्, यदेदेनमिति सूर्यस्य जुहोति॥३॥ उदुत्यंजातवेदसमित्येतयो-पस्थायादित्यस्याभिमुखं दर्शयेत् । नमस्ते अस्तु भगवन् शतरश्मे तमोनुद । जहि मे देव दौर्भाग्यं सौभाग्येन मां संयोजयस्व इति ॥ ४ ॥ अथ ब्राह्मणतर्पणम् ॥ ५ ॥ ऋषभो दक्षिणा ॥ ६ ॥

मानवगृह्यसूत्र—१ पुरुष २०—खण्ड ।

अथान्नप्राशनम्॥ १॥पञ्चमे षष्ठे वा मासि पयसि स्थालीपाकं श्रपयित्वा, स्नातमलंकृतमहतेन वाससा प्रच्छाद्याऽन्नपतेऽन्नस्यनोदेहीति हुत्वा, हिरण्येन प्राशयेदन्नात्परिस्रुत इत्यृचा ॥२॥ रत्नसुवर्णोपस्करा-ण्यायुधानि दर्शयेत्॥ ३॥यदिच्छेत्तदुपसंगृह्णीयात्॥४॥ततो ब्राह्मणभोजनम्॥५॥ वासो दक्षिणा॥६॥

मानवगृह्यसूत्र—१पुरुष २१ खण्ड ।

तृतीयस्य वर्षस्य भूयिष्ठे गते चूडाः कारयेत् । उदगयने ज्यौत्स्ने पुण्ये नक्षत्रेऽन्यत्र नवम्याः ॥१॥ जयप्रभृतिभिर्हुत्वा-उष्णेन वायुरुदकेनेद्यजमानस्यायुषा । सविता वरुणो दधद्यजमानाय दाशुषे ॥ इत्युष्णा आपोऽभिमन्त्रयते ॥ २ ॥ अदितिः केशान्वपत्वापउन्दन्तु जीवसे । धारयतु प्रजापतिः पुनः पुनः स्वस्तये ॥ इत्यभ्युन्दन्ति ॥ ३ ॥ ओषधे त्रायस्वैनमिति दक्षिणस्मिन्केशान्ते दर्भम-न्तर्दधाति ॥४॥ स्वधिते मैनं हिंसीरिति क्षुरेणाभिनिदधाति ॥५॥ येनावपत्सविताक्षुरेण सोमस्य-राज्ञो वरुणस्य केशान् । तेन ब्राह्मणोव्वपत्वायुष्मानयं जरदष्टिरस्तु ॥ येन पूषाबृहस्पतेरिन्द्रस्य-चायुषेऽवपत् । तेन ते वपाम्यायुषे दीर्घायुत्वाय जीवसे । येन भूयंश्चरत्ययं ज्योक्च पश्यति सूर्यः ।तेन ते वपाम्यायुषे सुश्लोयक्याय स्वस्तये ॥ इति तिसृभिस्त्रिः प्रवपति ॥ ६ ॥ यत्क्षुरेण वर्त्तयता सुते-जसा वांतर्वपसि केशान्॥शुन्धि शिरोमास्यायुः प्रमोषीः इति लौहायसं क्षुरं केशवापाय प्रयच्छति ॥ ७ ॥ मा ते केशाननुगाद्वर्च एतत्तथा धाता दधातु ते । तुभ्यमिन्द्रो वरुणो बृहस्पतिः सविता वर्च आदधुः ॥ इति प्रवपतोऽनुमन्त्रयते ॥ ८ ॥ सुहृत्पारिग्राहं हरितगोशकृत्पिण्डे समवचिनोति ॥ ९ ॥ उप्त्वा य केशान्वरुणस्य राज्ञो बृहस्पतिः सविता विष्णुरग्निः । तेभ्यो निधानं महतं न विदन्नन्तराद्यावापृथिव्योरपस्युः ॥ इति प्रागुदीचो ह्रियमाणाननुमन्त्रयते ॥ १० ॥ अनिक्ते पत्न्या श्लेषयेदिति श्रुतिः ॥११॥ वरं कर्त्रे ददाति । पक्ष्मगुडं तिलपिञ्जलं च केशवापाय ॥ १२ ॥ एतेन तु कल्पेन षोडशे वर्षे गोदानम् । अग्निं वाध्येष्यमाणस्थमाग्निगोदानिकोमैत्राय-णिरिति श्रुतिः ॥१३ ॥ अदितिः श्मश्रु वपत्वित्युहनैं श्मश्रु प्रवपतिशुन्धिमुखमिति च ॥ १४ ॥

मानवगृह्यसूत्र—१ पुरुष—२२ खण्ड ।

सप्तमे नवमे वोपायनम् ॥ १ ॥ आगन्त्रासमगन्महि प्रथममर्तिं युयोतु नः । अरिष्टाः संचरेमहि स्वस्ति चरतादिशः । स्वस्त्यागृहेभ्यः ॥ इत्युप्तकेशेन स्नातेनाक्तेनाभ्यक्तेनालङ्कृतेन यज्ञोपवी-तिना समेत्य जपति॥२॥अथास्मै वासः प्रयच्छति । या अकृन्तन्या अतन्वन्या आवन्या अवाहरन् । याश्चग्नादेव्योऽन्तानभितोऽततनन्त । तास्त्वा देव्यो जरसे संव्ययन्त्वायुष्मन्निदं परिधत्स्व वासः ॥ इत्यहतं वासः परिधाप्यान्वारभ्याघारावाज्यभागौ हुत्वाऽऽज्यशेषे दध्यानीय—दधिक्राव्णोअकारिष-मिति दधिः त्रिः प्राश्नाति ॥ ३ ॥ को नामासीत्याह ॥४ ॥ नामधेये प्रोक्ते देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णाम्यसाविति हस्तं गृह्णन्नाम गृह्णाति । प्राङ्-मुखस्य प्रत्यङ्मुख ऊर्ध्वस्तिष्ठन्नासीनस्य दक्षिणमुत्तानं दक्षिणेन नीचारिक्तमरिक्तेन—सविता ते हस्तमग्रहीदसावग्निराचार्यस्तवा देवसावितरेष ते ब्रह्मचारी त्वं गोपाय समावृतन् ॥ कस्य ब्रह्मचार्यसि । प्राणस्य ब्रह्मचार्यसि । कस्त्वा कमुपनयते । काय त्वा परिददामि । कस्मै त्वा परिददामि । भगाय त्वा परिददामि । अर्यम्णे त्वा परिददामि । सवित्रे त्वा परिददामि । सर-स्वत्यै त्वा परिददामि । इन्द्राग्निभ्यां त्वा परिददामि । विश्वेभ्यस्त्वा देवेभ्यः परिददामि । सर्वे-भ्यस्त्वा देवेभ्यः परिददामीति परिददाति ॥ ५ ॥ ब्रह्मणो ग्रन्थिरसि स ते माविस्रसदिति हृदय-देशमारभ्य जपति । प्राणानां ग्रन्थिरसीति प्राणदेशम् ॥ ६ ॥ ऋतस्य गोप्त्री तपसस्तरुत्री घ्नती रक्षः सहमाना अरातीः । सा नः समन्तमभिपर्येहि भद्रे धर्त्तारस्ते सुभगे मेखले मा रिषाम ॥ इति मौञ्जीं पृथ्वीं त्रिगुणां मेखलामादत्ते ॥ ७ ॥ युवासुवासा इति मेखलां प्रदक्षिणं त्रिः परिव्ययति ॥ ८ ॥ पुंसस्त्रीन् ग्रन्थीन्बध्नाति ॥ ९ ॥ इयं दुरुक्तात्परिबाधमाना वर्णं पुराणं पुनती म आगात् । प्राणापानाभ्यां बलमाभजन्ती शिवा देवी सुभगे मेखले मारिषाम॥इति तस्मां

